व्याख्या—पुनः **सा बाला अन्नमशनं, पानं** शर्करोदकादिकं, **च** पुनः **स्नानं** कुङ्कुमादिपानीयैः शरीरसिञ्चनं, **च पुनर्गन्धमाल्यं,** गन्धं सुगन्धिगोशीर्षादिशरीरसार्चनं, माल्यं ग्रथितसुरभिकुसुमादिमालारोपणं, **विलेपनं** लक्षपाकतैलाद्यभ्यङ्गं, **मया ज्ञातं वा अज्ञातं** स्वभावेनैव, अनेन सद्भावसारता गदिता, **नैवोपभुङ्क्ते,** मदुःखार्त्तया सर्वाण्यपि भोगाङ्गानि त्यक्तानीति भावः ॥२९॥

खणं पि मे महाराय, पासओ ण य उट्ठइ ।
ण य मे दुक्खा विमोएइ, एसा मज्झ अणाहया ॥३०॥

व्याख्या—पुनर्हे **महाराज** ! सा बाला **मम पार्श्वात् क्षणमपि नोत्तिष्ठति** नापयाति, सदा सन्निहितैवास्ते, अनेन तस्या अतिवत्सलत्वं गदितं, तथापि सा **मां दुःखान्न विमोचयति, एषापि ममानाथता** ज्ञेया ॥३०॥

तओ हं एवमाहंसु, दुक्खमा हु पुणो पुणो ।
वेयणा अणुभविउं जे, संसारंमि अणंतए ॥३१॥

व्याख्या—**तत** इति रोगाऽप्रतिकार्यताऽनन्तरं **अहमेवं** वक्ष्यमाण**मुक्तवान्** । किमुक्तवान् ? **हु** निश्चयेन **या वेदना** अक्षिरोगप्रमुखा **अनुभवितुं दुःक्षमा** भोक्तुमसमर्थास्ता वेदनाः संसारे **पुनः पुन**र्भुक्तेति शेषः, वेद्यते दुःखमनयेति वेदना, ता वेदना दुःखेन क्षम्यन्ते सह्यन्ते इति दुःक्षमा दुस्सहाः, कीदृशे **संसारे ? अनन्तके** अपारे ॥३१॥

सयं च जइ मुंच्चेज्जा, वेयणा विउला इओ ।
खंतो दंतो निरारंभो, पव्वए अणगारियं ॥३२॥

व्याख्या—अहं किमवादिषं ? **यदि सकृदेकवार**मपि [**इतः** इत्यनुभूयमानायाः] अस्या **विपुलाया** विस्तीर्णाया **वेदनाया** अहं **विमुच्ये** तदाहं **क्षान्तो** भूत्वा, पुन**र्दान्तो** जितेन्द्रियो भूत्वा **निरारम्भः** सन् **अनगारत्वं** साधुत्वं **प्रव्रजामि** दीक्षां गृह्णामीति भावः, येन संसारोच्छित्त्या वेदनाया अभाव एव स्यात् ॥३२॥

एवं च चिंतइत्ताणं, पसुत्तो मि नराहिवा ।
परिवत्तंति राईए, वेयणा मे खयं गया ॥३३॥

व्याख्या—**एवं च विचिन्त्य नराधिप** ! रात्रौ यावदहं **सुप्तोऽस्मि,** तावत्तस्यामेव **रात्रौ प्रवर्त्तमानाया**मतिक्रामन्त्यां 'मे' **मम वेदनाः क्षयं गता** उपशान्ता इति ॥३३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तओ कल्ले पभायंमि, आपुच्छित्ताण बंधवे ।
खंतो दंतो निरारंभो, पव्वइओ अणगारियं ॥३४॥

व्याख्या—**ततो** वेदनाशमादनन्तरमहं **कल्यो**ऽरोगः **प्रभाते** बान्धवान् **पित्रादिस्वजनान्** **आपृच्छ्या**ऽहं **क्षान्तः** पुनर्दान्तो **निरारम्भश्च अनगारत्वं** साधुत्वं **प्रव्रजितः** ॥३४॥

तओ हं णाहो जाओ, अप्पणो य परस्स य ।
सव्वेसिं चेव भूयाणं, तस्साणं थावराण य ॥३५॥

व्याख्या—**तत** इति प्रव्रज्याप्रतिपत्तेरनन्तरमहं **नाथो जातो** योगक्षेमकरणक्षमतया- **ऽात्मनः परस्य च,** आत्मनः शुद्धप्ररूपित्वात्, परस्य च हितचिन्तनात्, **च** पुनः **एव** निश्चयेन **सर्वेषां भूतानां त्रसानां स्थावराणां** च नाथो जात इति ॥३५॥

किं दीक्षाया अनु नाथस्त्वं जातः ? पुरा ते नेत्याह—

अप्पा णई वेयरणी, अप्पा मे कूडसामली ।
अप्पा कामदुघा घेणू, अप्पा मे नंदणं वणं ॥३६॥

व्याख्या—**आत्मैव नदी वैतरणी** नरकस्य सम्बन्धिनी, तद्धेतुत्वात्, अत एव**ात्मैव** कूटमिव जन्तुयातनाहेतुत्वात् **शाल्मलीकूटः,** शाल्मली नरकोद्भवा, **आत्मैव** हितार्थकृत्तया **कामदुघा धेनुः,** इयं च रूढ्योक्त्या, एतदौपम्यं स्वर्मोक्षाद्याप्तिहेतुत्वात्, **आत्मैव मे नन्दनं वनं,** नन्दनौपम्यं च चित्तप्रह्लत्तिहेतुत्वात् ॥३६॥

अप्पा कत्ता विकत्ता य, सुहाण य दुहाण य ।
अप्पा मित्तममित्तं च, दुप्पट्ठिय सुपट्ठिओ ॥३७॥

व्याख्या—**आत्मैव कर्त्ता** दुःखानां **सुखानां च, विकरिता च** विक्षेपकश्चात्मैव तेषां, अतः **स्वात्मैव मित्रमु**पकारितया, **अमित्रं चा**पकारितया, कीदृक् सन् ? **दुःप्रस्थितो** दुराचारः, **सुप्रस्थितः** सदनुष्ठानः, दुःप्रस्थितो ह्यात्मा समस्तदुःखहेतुर्वैतरण्यादिरूपः, सुप्रस्थितश्च सकलसुखहेतुरिति कामधेन्वादिकल्पः, दीक्षायामेव सुप्रस्थितत्वादात्मनोऽन्येषां च योगक्षेमकृत्त्वान्नाथत्वं, लब्धलाभो योगः, स स्वस्य रत्नत्रयाप्त्या, लब्धस्य परिरक्षणं क्षेमः, स स्वस्य प्रमादरोधेन, एवमन्येष्वपि धर्माप्तिस्थैर्यकृत्त्वाभ्यां योगक्षेमकृतिः ॥३७॥

पुनरन्यथाऽनाथत्वमाह—

इमा हु अण्णा वि अणाहया निवा, तमेगचित्तो णिहुओ सुणेहि ।
णियंठधम्मं लहिऊण वी जहा, सीयंति एगे बहुकातरा नरा ॥३८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—**इयं** वक्ष्यमाणा, **हुः** पूर्त्तौ, **अन्या, अपि** समुच्चये, **अनाथता,** यदभावतोऽहं नाथो जात इत्याशयः, **हे नृप ! तामनाथतां एकचित्तो निवृत्तः** स्थिरः सन् त्वं **शृणु ! निर्ग्रन्थधर्मं** निर्ग्रन्थानामाचारं **लब्ध्वापि, यथेत्युपदर्शने सीदन्ति** तदनुष्ठानं प्रति शिथिलीभवन्ति, **एके** केचन ईषत्कातरा निःसत्त्वाः, **बहुकातरा नराः,** यदि वा **कातरा** एव **बहवः** सम्भवन्तीति बहुशब्दो विशेषणे, सीदन्तश्च न स्वमन्यांश्च रक्षयितुं क्षमा इति सीदनलक्षणान्यनाथता ॥३८॥

जो पव्वइत्ताण महव्वयाइं, सम्मं च नो फासयई पमाया ।
अणिग्गहप्पायरसेसु गिद्धे, न मूलओ छिंदइ बंधणं से ॥३९॥

व्याख्या—**यः प्रव्रज्यापि महाव्रतानि सम्यग् न स्पृशति,** न सेवते, **प्रमादान्निद्रादेरनिगृहीतात्मा,** अत एव **रसेषु** मधुरादिषु **गृद्धः,** इदृक् सन् **स मूलतो बन्धनं** रागद्वेषात्मकं **न छिनत्ति** ॥३९॥

आउत्तया जस्स य नत्थि काइ, इरियाइ भासाइ तहेसणाए ।
आयाणनिक्खेव दुगंछणाए, न वीरजायं अणुजाइ मग्गं ॥४०॥

व्याख्या—**आयुक्तता**ऽवधानता काचित् स्वल्पापि **यस्य च नास्ति, ईर्यायां भाषायां** तथैषणायां, सुब्लोपात् **आदाननिक्षेपयोः, जुगुप्सायां,** इहोच्चारादीनां संयमाऽनुपयोगितया जुगुप्सनीयत्वेनैव परिष्ठापनात् परिष्ठापनैव जुगुप्सतोक्ता, स ईदृग् वीर्यातो **वीर्यातस्तन्मार्गं** मुक्तिपथं **नानुयाति** ॥४०॥

चिरं पि से मुंडरुई भवित्ता, अथिरव्वए तवनियमेहिं भट्ठो ।
चिरं पि अप्पाणं किलेसइत्ता, न पारए होइ हु संपराए ॥४१॥

व्याख्या—तथा **चिरं** मुण्डे एव केशलोचे एव शेषानुष्ठानपराङ्मुखतया रुचिर्यस्यासौ **मुण्डरुचिर्भूत्वा अस्थिरव्रतो** गृहीतमुक्त व्रतस्**तपोनियमेभ्यो भ्रष्टश्चिरमप्यात्मानं क्लेशयित्वा** लोचादिना । **न पारगो भवति, हुर्वाक्यालङ्कारे,** 'सम्पराय'त्ति, सुब्व्यत्ययात् सम्परायस्य संसारस्य ॥४१॥

पुल्लेव मुट्ठी जह से असारे, अयंतिए कूडकहावणे वा ।
राढामणीवेरुलियप्पगासे, अमहग्घए होइ हु जाणएसु ॥४२॥

व्याख्या—**पोल्लेवान्तः**सुषिरेव, न मनागपि निबिडा, **मुष्टिर्यथा सा असारा**ऽर्थशून्या

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तथा स मुण्डरुचिरप्यसारः (पाठान्तरे-**पोल्लारमुट्ठी**, स एवार्थः) **वा** इवार्थे**ऽयन्त्रितो**-ऽनियमितः **कूटकार्षापण इव**, यथायं येन केनचित् कूटतया नियन्त्र्यते, तथैषोऽपि निर्गुणत्वादुपेक्षणीयः, राढामणिः काचमणि**र्वैडूर्यमणिसदृशो**ऽप्य**महार्घको** महामूल्यो **न भवति**, हुर्निश्चये, **ज्ञेषु** मुग्धजनविप्रतारकत्वात् ॥४२॥

कुसीललिंगं इह धारइत्ता, इसिज्झयं जीविय वूहइत्ता ।
असंजए संजय लप्पमाणे, विणिघायमागच्छइ से चिरं पि ॥४३॥

व्याख्या—**कुशीललिङ्गं** पार्श्वस्थादिवेषं **इह** जन्मनि **ऋषिध्वजं** ऋषिचिह्नं रजोहरणादि, आर्षत्वाज्**जीविकायै बृंहयित्वा**, इदमेव प्रधानमिति ख्यापनेनोपबृह्य यद्वा, सुब्व्यत्ययात् **ऋषिध्वजेन**, बिन्दुलोपाज्**जीवितम**संयमजीवितं **जीविकां** वा निर्वहणोपायरूपां बृंहयित्वाऽत एवा**ऽसंयतः** सन्, प्राकृतत्वात् **संयतमात्मानं लपन्** (पाठान्तरे—'**संजयलाभमाणि**'त्ति, आर्षत्वात् **संयतलाभं** स्वर्गापवर्गादिरूपं **मन्यमानो**) ममायं भविष्यतीति विगणयन् **विनिघातं** विविधाभिघातरूप**मागच्छति चिरम**पि नरकादौ ॥४३॥

इहैव हेतुमाह—

विसं तु पीयं जह कालकूटं, हणाइ सत्थं जह कुग्गहीयं ।
एसेवं धम्मो विसओववन्नो, हणाइ वेयाल इवाविवन्नो ॥४४॥

व्याख्या—**विषं, तु** स्वार्थे, **पीतं यथा कालकूटा**ख्यं 'हणाइ'त्ति **हन्ति, शस्त्रं च यथा कुगृहीतं** कुत्सितं गृहीतं हन्ति, [**एष**] एवं विषादिवद्धर्मो **यतिधर्मो विषयोपपन्नः** शब्दादिविषययुक्तो हन्ति दुर्गतिहेतुत्वेन द्रव्ययतिं, वेताल इव वाऽविपन्नोऽप्राप्तविपन्मन्त्राद्योऽनियन्त्रितः (पाठान्तरे-'**वेयाल इवाविबंधणो**'-**अविबन्धनो** मन्त्राद्यनियन्त्रितो **वेताल इवे**ति) ॥४४॥

जे लक्खणं सुविणपउंजमाणे, निमित्तकोऊहलसंपगाढे ।
कुहेडविज्जासवदारजीवी, ण गच्छई सरणं तंमि काले ॥४५॥

व्याख्या—**यो लक्षणं** सामुद्रिकादि **स्वप्नं** च **प्रयुञ्जानो** व्यापारयन्, निमित्तं भौमादि, कौतुकमपत्याद्यर्थं स्नपनादि, तयोः सम्प्रगाढोऽतिशयेनासक्तो **निमित्तकौतुकसम्प्रगाढः**, कुहेटकविद्या अलीकाश्चर्यकृन्मन्त्रतन्त्रविद्याः, ता एव कर्मबन्धहेतुतयाऽऽश्रवद्वाराणि, तैर्जीवितुं शीलमस्येति **कुहेटकविद्याश्रवद्वारजीवी न गच्छति** न प्राप्नोति **शरणं** त्राणं दुर्गतेः, 'तंमि'त्ति **तस्मिन् काले** भोगस्य काले ॥४५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अमुमेवार्थं भावयति–

तमं तमेणेव उ से असीले, सया दुही विप्परियासुवेइ ।
संधावई नरगतिरिक्खजोणिं, मोणं विराहित्तु असाहुरूवे ॥४६॥

व्याख्या–**तमस्तमसैवा**ऽतिमिथ्यात्वोपहततया प्रकृष्टाऽज्ञानेनैव, **तुः** पूर्त्तौ, **स** द्रव्ययतिः **अशीलः सदा दुःखी** विराधनोत्थदुःखेनैव, **विपर्यासं** तत्त्वादिषु वैपरीत्य-**मुपैति**, ततश्च **सन्धावति** सततं गच्छति **नरकतिर्यग्योनीः**, **मौनं** चारित्रं **विराध्या**-ऽसाधुरूपस्तत्त्वतोऽयतिस्वभावः सन् अनेन विराधनायाः फलमुक्तम् ॥४६॥

कथं पुनर्मौनं विराध्य कथं वा नरकतिर्यग्योनीर्यातीत्याह–

उद्देसियं कीयगडं नियागं, न मुंचइ किंचि अणेसणिज्जं ।
अग्गीव वा सव्वभक्खी भवित्ता, इओ चुओ गच्छइ कट्टु पावं ॥४७॥

व्याख्या–**उद्देशिकं** साधुमुद्दिश्य कृतं, क्रीतेन कृतं साधुनिमित्तं मौल्येन गृहीतं, **नित्याकं** नित्यपिण्डं, गृहस्थगृहे नियतपिण्डं, एतादृशं यः साधुर्न **मुञ्चति किञ्चिदनेष-णीयम**शुद्धं, सोऽग्निरिव सर्वमप्राशुकमपि भक्षयतीत्येवंशीलः **सर्वभक्षी भूत्वा, कृत्वा** च **पापं, इतश्च्युतो गच्छति** कुगतिम् ॥४७॥

ण तं अरी कंठछित्ता करेइ, जं से करे अप्पणिया दुरप्पा ।
से णाहई मच्चुमुहं तु पत्ते, पच्छाणुतावेण दयाविहूणे ॥४८॥

व्याख्या–यतः स्वपापैर्दुर्गतेः प्राप्तिरतो **न** नैव **तमर्थमरिः कंठच्छेत्ता** प्राणहर्त्ता **करोति, यत्तस्य करोत्यात्मीया दुरात्मता** दुराचारवृत्तिः, न चैनामाचरन्नपि जन्तुरत्यन्त-मूढतया वेत्ति, परं **स** दुरात्मा पापकर्त्ता **ज्ञास्यति** निजदुरात्मतां **मृत्युमुखं प्राप्तः, पश्चाद-नुतापेन**, हा दुष्टेन मयाऽनुष्ठितेयमितिरूपेण, **दयया** संयमेन **विहीनः** सन्, यतश्चैवं महा-ऽनर्थहेतुः पश्चात्तापहेतुश्च दुरात्मता, तत आदित एव सा त्याज्या ॥४८॥

यस्त्वन्तेऽपि तां न वेत्स्यति तस्य किमित्याह–

निरट्ठिया नग्गरुइ उ तस्स, जे उत्तमट्ठं विवज्जासमेइ ।
इमे वि से नत्थि परे वि लोए, दुहओ वि से झिज्झइ तत्थ लोए ॥४९॥

व्याख्या–**निरर्थकैव** निष्फलैव, **तुः** एवार्थे, नाग्न्ये श्रामण्ये रुचिर्**नाग्न्यरुचिः**, **तस्य**, 'उत्तमट्ठं'त्ति, सुब्व्यत्ययादपेर्गम्यत्वात् **उत्तमार्थे** पर्यन्तसमाराधनायामपि **विपर्यासं**,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दुरात्मतायामपि सुन्दरात्मता**मेति,** अहं शुभ एवेति, अन्यस्य तु स्यादपि किञ्चित् फलं, परं 'से' **तस्य** तु **अयमपि लोको नास्ति** लोचादिकष्टात्, **परोऽपि लोक**स्तस्य नष्टः कुगतिगमनात्, तथा च **द्विधाप्यैहि**कपारत्रिकार्थाभावेन **स** उभयलोकसुखसम्पन्नजनान् वीक्ष्य धिग्मामुभयभ्रष्टमिति चिन्तया **क्षीयते, तत्रेत्युभ**यलोकाऽभावे सति, **लोके** जगति ॥४९॥

यदुक्तं स ज्ञास्यति पश्चादनुतापेनेति, तत्र यथासौ परितप्यते तथा दर्शयन्नुपसंहरति—

एमेवऽहाछंदकुसीलरूवे, मग्गं विराहित्तु जिणुत्तमाणं ।
कुररी इवा भोगरसाणुगिद्धा, निरट्ठसोया परियावमेइ ॥५०॥

व्याख्या—एवमेव अमुना प्रकारेण महाव्रताऽस्पर्शनादिप्रकारेण **यथाछन्दः कुशील-रूपः** स्वरुचिरचिताचारः कुत्सितशीलस्वभावो **जिनोत्तमानां मार्गं विराध्य कुररीव** पक्षिणीव **भोगरसानुगृद्धा निरर्थकशोका परितापं** पश्चात्ताप**मेति,** यथैषाऽऽमिषगृद्धा पक्ष्यन्तरेभ्यो विपत्प्राप्तौ शोचते, यत एषा तद्विपत्प्रतीकारं न लभते, एवमसावपि भोगरसगृद्धो लोकद्वयानर्थाप्तौ शोचते, ततोऽस्य स्वान्यरक्षणाऽक्षमत्वेनाऽनाथत्वम् ॥५०॥

सोच्चाण मेहावि सुभासियं इमं, अणुसासणं नाणगुणोववेयं ।
मग्गं कुसीलाण जहाय सव्वं, महानियंठाण वए पहेणं ॥५१॥

व्याख्या—श्रुत्वा हे मेधाविन् ! सुभाषितमिमं मदुक्तं अनु**शासनं** शिक्षणं, **ज्ञान-गुणोपपेतं,** ज्ञानं तथा ज्ञानस्य गुणो विरतिस्ताभ्यां ज्ञानगुणाभ्यामुपेतं युक्तं, च **मार्गं कुशीलानां जहाय** त्यक्त्वा **सर्वं,** महानिर्ग्रन्थानां पथा व्रजेस्त्वम् ॥५१॥

ततः फलमाह—

चरित्तमायारगुणण्णिए तओ, अणुत्तरं संजम पालियाणं ।
निरासवे संखवियाण कम्मं, उवेइ ठाणं विउलुत्तमं धुवं ॥५२॥

व्याख्या—चरित्रस्याचारः सेवनं, **गुणो** ज्ञानं, ताभ्या**मन्वितो,** मोऽलाक्षणिकः, ततो महानिर्ग्रन्थमार्गत्वादनु**त्तरं** प्रधानं 'संयम पालियाणं'त्ति **संयमं** यथाख्यातं **पालयित्वा निराश्रवः** कर्म **सङ्क्षिप्य** क्षयं नीत्वा **उपैति स्थानं** विपुलं, अनन्तानां तत्र स्थितेः, उत्तमं जगत्प्रधानत्वात् **विपुलोत्तमं, ध्रुवं** मुक्तिपदम् ॥५२॥

उपसंहरति—

एवुग्गदंते वि महातवोधणे, महामुणी महापइन्ने महायसे ।
महानियंठिज्जमिणं महासुयं, से कहेइ महया वित्थरेणं ॥५३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—एवं स श्रेणिकपृष्टो **मुनिरकथयत्**, तत्कालापेक्षया कथयति, उग्रः कर्मारीन् प्रति स एव दान्त **उग्रदान्तः, अपिः** पूर्त्तौ, **महातपोधनो, महामुनिः, महाप्रतिज्ञोऽतिदृढव्रतो महायशाः**, महानिर्ग्रन्थेभ्यो हितं **महानिर्ग्रन्थीयमिदं महाश्रुतं महता विस्तरेणे**ति ॥५३॥

ततश्च—

तुट्ठो य सेणिओ राया, इणमुदाहु कयंजली ।
अणाहत्तं जहाभूयं, सुट्ठु मे उवदंसियं ॥५४॥

व्याख्या—च पुनस्तुष्टो हृष्टः **श्रेणिको राजा कृताञ्जलिः** सन् **हु** निश्चयेन **इदमुदाहावदीत्**, हे मुने ! **यथाभूतं** यथावस्थितं सत्य**मनाथत्वं** 'मे' **मह्यं** त्वया **सुष्ठूपदिष्टम्** ॥५४॥

तुम्हं सुलद्धं खुमणुस्सजम्मं, लाभा सुलद्धा य तुमे महेसी ।
तुब्भे सणाहा य सबंधवा य, जं भे ठिया मग्गि जिणुत्तमाणं ॥५५॥

व्याख्या—तव सुलब्धं खु निश्चितं **मनुष्यजन्म, लाभा** वर्णरूपाद्याप्तिरूपाः, धर्मचारित्रोपलम्भा वा 'तुमे' **युष्माभिः सुलब्धाः**, उत्तरोत्तरगुणप्रकर्षहेतुत्वात्, **च** एवार्थे, **हे महर्षे** ! 'तुब्भे' **यूयं सनाथाश्च सबान्धवाश्च** तत्त्वतः, **यद्यस्मात्** 'भे' इति **भवन्तः स्थिता मार्गे जिनोत्तमानां**, जिनोत्तममार्गे स्थितत्वं हि सुलब्धजन्मत्वादौ हेतुः ॥५५॥

तं सि णाहो अणाहाणं, सव्वभूयाण संजया ।
खामेमि ते महाभाग, इच्छामि अणुसासिउं ॥५६॥

व्याख्या—हे संयत ! त्वं अनाथानां सर्वभूतानां त्रसानां स्थावराणां जीवानां **नाथोऽसि**, इति पूर्वार्धेन तदुपबृंहणा कृता । **हे महाभाग** ! हे महाभाग्ययुक्त ! 'ते' इति **त्वामहं क्षमामि**, मया पूर्वं यस्तवापराधः कृतः स त्वया क्षन्तव्यः, **इच्छामि** च त्वयाऽनुशासयितुं शिक्षितुमात्मानमिति ॥५६॥

पुच्छिऊण मए तुब्भं, झाणविग्घो य जो कओ ।
निमंतिया य भोगेहिं, तं सव्वं मरिसेहि मे ॥५७॥

व्याख्या—पुनर्नृपः क्षमयति, हे मुने ! **मया तुभ्यं** 'पुच्छिऊण'त्ति **पृष्ट्वा**, कथं त्वं प्रथमे वयसि प्रव्रजित इत्यादि पृष्ट्वा **यस्तव** मया **ध्यानविघ्नः कृतः, च** पुन**भोगैर्निमन्त्रितो** यथा भो स्वामिन् ! भोगान् भुङ्क्ष्वेत्यादि, **तं सर्वं ममा**परार्धं मृष ! **क्षमस्वे**त्यर्थः ॥५७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सकलाध्ययनार्थोपसंहारमाह–

एवं थुणित्ताण स रायसीहो, अणगारसीहं परमाइ भत्तीए ।
सओरोहो सपरियणो सबंधवो [य], धम्माणुरत्तो विमलेण चेयसा ॥५८॥

व्याख्या–स राजासिंहोऽतिपराक्रमात्तस्य सिंहोपमा, **श्रेणिक**राजा एवममुना प्रकारेण **अनगारसिंहं** साधुसिंहं, कर्ममृगान् प्रत्यतिदारुणत्वात्तस्यापि सिंहोपमा ज्ञेया, **परमयोत्कृष्टया भक्त्या** स्तुत्वा, **विमलेन** निर्मलेन विगतमिथ्यात्वमलेन **चेतसा धर्मानुरक्तो**ऽभूत् । कीदृशः सः ? **सावरोधः** सान्तःपुरः, **सपरिजनः सबान्धवश्च**, तत्रान्तःपुरपरिजनबान्धवाश्च वन-क्रीडार्थं तेन सार्द्धमेवासन् ॥५८॥

ऊससियरोमकूवो, काऊण य पयाहिणं ।
अभिवंदिऊण सिरसा, अइयाओ नराहिवो ॥५९॥

व्याख्या–उच्छ्वसितरोमकूपो मुनिदर्शनवाक्यश्रवणतश्चोल्लसितरोमकूप एवंविधोऽसौ **नराधिपः श्रेणिकः शिरसा** मुनिमभिवन्द्य नमस्कृत्य च **प्रदक्षिणां कृत्वाऽभियातः** स्वस्थानं गतः, एष **श्रेणिक**स्य श्री**वीर**ननेर्वाक् पूर्वसम्यक्त्वलाभः ॥५९॥

इयरो वि गुणसमिद्धो तिगुत्तिगुत्तो तिदंडविरओ य ।
विहंग इव विप्पमुक्को, विहरइ वसुहं विगयमोहो ॥६०॥ त्ति बेमि

व्याख्या–अथ **इतरोऽपि श्रेणिका**पेक्षयाऽपरोऽपि स मुनिरपि **विहग इव विप्रमुक्तः** क्वापि ममत्वरहितो **वसुधां विहरति** स्म । कीदृशः सन् ? **गुणसमिद्धः** साधुगुणगणा-लङ्कृतः, **त्रिगुप्तिगुप्तः, त्रिदण्डविरतः, विगतमोहो** मोहरहितः सन्, केवली सन्, **इति** समाप्तौ **ब्रवीमी**ति प्राग्वत् ॥

इत्यनाथत्वे विंशतितमं महानिर्ग्रन्थीयाध्ययनमुक्तम् ॥२०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एकविंशं समुद्रपालीयमध्ययनम् ॥

तदनाथत्वं च सत्यैकत्वेन स्यादिति तद्वाच्येकविंशं **समुद्रपालीया**ध्ययनमाह–

चंपाए पालिए नामं, सावए आसि वाणिए ।
महावीरस्स भगवओ, सीसो सो उ महप्पणो ॥१॥

व्याख्या–चम्पायां पुरि **पालितो** वणिक् सार्थवाह [**श्रावकः** श्रमणोपासकः] **आसीत्**, **तु** पुनः **स महावीरस्य भगवतः अर्हतो महात्मनो** महाबलस्य **शिष्यः**, श्री**वीर**बोधितत्वात् ॥१॥

निग्गंथे पावयणे, सावए से विकोविए ।
पोएण ववहरंते, पिहुंडं णगरमागए ॥२॥

व्याख्या–निर्ग्रन्थे निर्ग्रन्थसम्बन्धिनि **प्रवचने स श्रावकः पालितो विकोविदो** विशेषेण कोविदो ज्ञातजीवादितत्त्वः, **पोतेन व्यवहरन्** प्रवहणवाणिज्यं कुर्वन् **पिहुण्डं** नामकं **नगरमागतः** ॥२॥

पिहुंडे ववहरंतस्स, वाणिओ देइ धूअरं ।
तं ससत्तं पइगिज्झ, सदेसमह पत्थिओ ॥३॥

व्याख्या–पिहुण्डे व्यवहरतस्तस्य तद्गुणाकृष्टचेताः कश्चिद्**वाणिजो ददाति दुहितरं,** स च तामूढवान्, स्थित्वा च तत्र कियत्कालं **ससत्त्वां** सगर्भां **तां प्रतिगृह्यादाय स्वदेश-मथ प्रस्थितः** ॥३॥

अह पालिअस्स घरणी, समुद्दंमि य पसवइ ।
अह दारए तहिं जाए, समुद्दपालि त्ति नामए ॥४॥

व्याख्या–अथ पालितस्य गृहिणी समुद्रे प्रसूते स्म, **अथ तस्मिन्** प्रसवने **दारकः** सुतो **जातः, समुद्रपाल इति नामतः** ॥४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

खेमेण आगए चंपं, पालिए सावए घरं ।
संवड्ढई तस्स घरे, दारए से सुहोचिए ॥५॥

व्याख्या–अथ स **पालितः श्रावकः क्षेमेण चम्पायां स्वगृहे आगतः, स दारकश्च सुखोचित** सुकुमारस्तस्य गृहे **संवर्द्धते** ॥५॥

बावत्तरिकलाओ य, सिक्खिए णीइकोविए ।
जोवणेण य संपन्ने, सुरूवं पियदंसणे ॥६॥

व्याख्या–स बालः **द्वासप्ततिकलाश्च शिक्षितो नीतिकोविदो** न्यायाऽभिज्ञः, **यौवनेन च सम्पन्नः** पूर्णाङ्गः **सुरूपः** सुसंस्थानः **प्रियदर्शनश्च** ॥६॥

तस्स रूववई भज्जं, पिया आणेइ रूविणिं ।
पासाए कीलए रम्मे, देवो दोगुंदगो जहा ॥७॥

व्याख्या–**तस्य** कृते तस्य **पिता रूपवतीं रूपिणी**तिनाम्नीं **पत्नीमानयति,** स तया सह पित्रा परिणायित इत्यर्थः, तया सह स **रम्ये** मनोहरे **प्रासादे दोगुन्दक**-स्त्रायस्त्रिंशद्देव **इव क्रीडति** ॥७॥

अह अन्नया कयाई, पासायालोयणे ट्ठिओ ।
वज्झमंडणसोभागं, वज्झं पासइ वज्झगं ॥८॥

व्याख्या–**अथान्यदा कदाचित् प्रासादालोकने स्थितः** सन् स वध्यमण्डनानि रक्तचन्दनकरीरादीनि, तैः शोभा यस्यासौ **वध्यमण्डनशोभाकः, तं वध्यं** वधार्हं कञ्चन **पश्यति बाह्यगं,** कोऽर्थः ? बहिर्निःक्रामन्तं, यद्वा **वध्यगं,** इह वध्यशब्देनोपचाराद्वध्यभूरुक्ता ॥८॥

तं पासिऊण संविग्गो, समुद्दपालो इणमब्बवी ।
अहो असुहाण कम्माणं, णिज्जाणं पावगं इमं ॥९॥

व्याख्या–**तं दृष्ट्वा संविग्नः** संवेगं प्राप्तः सन् **समुद्रपालः** (पाठान्तरे–**'संवेगं'** संवेगहेतुः) **इदमब्रवीत् । अहो अशुभानां कर्मणां निर्याने**ऽवसाने **पापक**मशुभ**मिदं** प्रत्यक्षं, यदसौ वराको वधार्थमित्थं नीयते ॥९॥

संबुद्धो सो तहिं भगवं, परमसंवेगमागओ ।
आपुच्छम्मापियरं, पव्वइए अणगारियं ॥१०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—एवं भावयन् **सम्बुद्धो** ज्ञाततत्वः **स तस्मिन्नेव** प्रासादालोकने **भगवान्** माहात्म्यवान् **परं** प्रकृष्टं **संवेगमागतः** सन् **आपृच्छ्य मातापितरौ प्राव्राजीत्** अगच्छदनगारितां निःसङ्गताम् ॥१०॥

जहित्तु संगं च महाकिलेसं, महंतमोहं कसिणं भयाणगं ।
परियायधम्मं च ऽभिरोयएज्जा, वयाणि सीलाणि परीसहे य ॥११॥

व्याख्या—स **समुद्रपालो** भगवान् **हित्वा सङ्गं, चः** पूर्त्तौ यद्वा ['सग्गंथ'] सङ्गश्चासौ ग्रन्थश्च **सद्ग्रन्थः**, उभयत्र स्वजनप्रतिबन्धं, महान् क्लेशो दुःखं यस्माद्यस्मिन् वा **महाक्लेशं, महान् मोहो** यस्मिंस्तं, **कृत्स्नं कृष्णं** वा, कृष्णलेश्याहेतुत्वेन **भयानकं,** विवेकिनां भयावहं। **पर्यायधर्मः** प्रव्रज्यापर्यायस्तं, **चः** पूर्त्तौ, **अभिरोचयेत्**, स सङ्गं त्यक्त्वा प्रव्रजित इति भावार्थः, पुनः स **व्रतानि** महाव्रतानि, **शीलानि** पिण्डविशुद्ध्याद्युत्तरगुणरूपाणि, [**परीषहानि**ति] भीमसेनन्यायेन **परीषहसहनानि च** स प्रपन्नवानिति ॥११॥

अहिंस सच्चं च अतेणयं च, तत्तो य बंभं अपरिग्गहं च ।
पडिवज्जिया पंच महव्वयाई, चरिज्ज धम्मं जिणदेसियं विऊ ॥१२॥

व्याख्या—**अहिंसां सत्यं च अस्तैन्यकं, ततश्च ब्रह्मचर्यं, अपरिग्रहं च,** एवं **प्रतिपद्य पञ्च महाव्रतानि जिनोपदिष्टं धर्मं** श्रुतचारित्ररूपं स **विद्वान् चरेत्** चरतीति ॥१२॥

सव्वेहिं भूएहिं दयाणुकंपी, खंतिक्खमे संजयबंभयारी ।
सावज्जजोगं परिवज्जयंते, चरिज्ज भिक्खू सुसमाहिइंदिए ॥१३॥

व्याख्या—सुब्व्यत्ययात् **सर्वेषु भूतेषु दयया** हितोपदेशरूपया रक्षणरूपया वाऽनुकम्पनशीलोऽ**नुकम्पी,** क्षान्त्या तत्त्वशक्त्या क्षमते दुर्वचनादीनीति **क्षान्तिक्षमः**, संयतश्चासौ ब्रह्मचारी च **संयतब्रह्मचारी,** पूर्वत्र ब्रह्मप्रतिपत्त्या गतार्थत्वेऽपि ब्रह्मचारीत्यभिधानं ब्रह्मचर्यस्य दुश्चरत्वज्ञप्त्यै, एवंविधः स **समुद्रपालो भिक्षुः सावद्ययोगं** पापयोगं **परिवर्जयन् सुसमाधितेन्द्रियः** सन् **चरेत्** विचरति स्मेति ॥१३॥

कालेण कालं विहरिज्ज रट्ठे, बलाबलं जाणिय अप्पणो अ ।
सीहो व सद्देण ण संतसिज्जा, वययोग सुच्चा ण असब्भमाहु ॥१४॥

व्याख्या—रूढितः **काले** प्रस्तावे, यद्वा **कालेन** पादोनपौरुष्यादिना, **कालं** कालोचितं प्रत्युपेक्षणादि कुर्वन् **व्यवहरन्** साधुमार्गे चलन् **राष्ट्रे** मण्डले **बलाबलं**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सहिष्णुत्वाऽसहिष्णुत्वरूपं **ज्ञात्वाऽऽत्मनो**, यथा यथा संयमयोगहानिर्न स्यात्तथा स तस्थौ । **सिंह इव शब्देन** भयोत्पादकेन न **सन्त्रसेत्** सत्वान्नाऽत्रसत्, अत एव **वाग्योगं** दुःखोत्पादकं **श्रुत्वा नाऽसभ्यमब्रवीत्** ॥१४॥

किमयमकरोदित्याह–

उवेहमाणो उ परिव्वइज्जा, पियमप्पियं सव्व तितिक्खएज्जा ।
ण सव्व सव्वत्थऽभिरोयइज्जा, न यावि पूयं गरहं च संजए ॥१५॥

व्याख्या–पुनः स साधुः **उपेक्ष्यमाणो** जनाऽसभ्यमवगणयन् **परिव्रजेत्**, मनसि वचसि च दुर्वचनमधारयन् ग्रामानुग्रामेषु विहृतवान् । **प्रियमप्रियं सर्वमपि तितिक्षेत्** सोढवानिति । पुनः स **सर्वं** वस्तु **सर्वत्र नाऽभ्यरोचयत्**, दृष्टऽदृष्टाऽभिलाषुको नाभूत्, यत् क्वापि पुष्टालम्बनसेवितं न तत्सर्वमिष्टान्नादि स सर्वत्राभिलषितवानित्यर्थः, पुनः स **संयतः** संयतमना **न चापि पूजां गर्हां वा** इष्टाऽनिष्टतयाभ्यरोचयत् ॥१५॥

भिक्षोरप्यन्यथाभावात् किं स्याद्येनेत्थं तद्गुणोक्तिरित्याह–

अणेग छंदा इह माणवेहिं, जे भावओ संपकरेइ भिक्खू ।
भयभेरवा तत्थ उविंति भीमा, दिव्वा मणुस्सा अदुवा तिरिच्छा ॥१६॥

व्याख्या–अनेके छन्दा अभिप्रायाः स्युः, **इह** जगति, सुब्व्यत्ययान्**मानवेषु, याननेकान्** **भावतस्तत्त्ववृत्त्या सम्प्रकरोति भिक्षुरपि** । तथा **तत्र** भिक्षायां **भयभैरवा** गाढभयङ्करा **उद्यन्ति** (पाठान्तरे–'**उविंति' उपयन्ति**) **भीमा** रौद्राः, **दिव्या मानुषास्तैरश्चा अथवो**पसर्गाः ॥१६॥

परीसहा दुव्विसहा अणेगे, सीयंति जत्था बहुकायरा नरा ।
से तत्थ पत्ते णऽवहिज्ज भिक्खू, संगामसीसे इव नागराया ॥१७॥

व्याख्या–परीषहाश्चोद्यन्ति दुर्विषहा अनेके, सीदन्ति संयमे श्लथीभवन्ति **यत्र** येषूपसर्गेषु परीषहेषु सत्सु **बहुकातरा नराः, स समुद्रपालसाधुस्तत्र** तेषु, वचनव्यत्ययात् **प्राप्तेषु नाऽव्यथत** न सत्वादचलत्, **सङ्ग्रामशीर्षे इव** युद्धप्रकर्षे इव **नागराजा** सुहस्ती ॥१७॥

सीओसिणादंसमसगाय फासा, आयंका देहं विविहा फुसंति ।
अकुक्कुओ तत्थऽहियासएज्जा, रयाइं खेविज्ज पुराकडाइं ॥१८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—**शीतोष्णदंशमशकतृणस्पर्शादयः परीषहाः**, तथा विविधा **आतङ्का** रोगास्तस्य साधोर्**देहं स्पृशन्ति** उपतापयन्ति, कुत्सितं कूजति, पीडितः सन्नाक्रन्दतीति कूकुजः, न तथेत्य**कूकुजः** (पाठान्तरे-'**अकक्करे**'त्ति वेदनाकुलितोऽपि **न** तदा **कर्कारायितकारी**) परं **तत्र** शीतादिकालेषु तान् परीषहा**नध्यसहत**, अनेन पूर्वसूत्रोक्त एवार्थः स्पष्टीकृतः, एवंविधश्च स **पुराकृतानि रजांसि** कर्माण्य**क्षिपत्** क्षयमनयत् ॥१८॥

पहाय रागं च तहेव दोसं, मोहं च भिक्खू सततं वियक्खणो ।
मेरु व्व वाएण अकंपमाणो, परीसहे आयगुत्ते सहिज्जा ॥१९॥

व्याख्या—**रागं तथैव च द्वेषं च मोहं** मिथ्यात्वहास्यादि अज्ञानं वा **प्रहाय** त्यक्त्वा सततं विचक्षणो निरन्तरतत्त्वविचाररतः स **भिक्षुर्मुनिरात्मगुप्तः** कूर्मवदात्मना गुप्तः सङ्कुचितसर्वाङ्गः, च **मेरुरिव वातेनाऽकम्पमानः परीषहानसहत**, अनेन परीषहसहनोपाय उक्तः ॥१९॥

अणुण्णए नावणए महेसी, न यावि पूयं गरहं च संजए ।
से उज्जुभावं पडिवज्ज संजए, निव्वाणमग्गं विरए उवेइ ॥२०॥

व्याख्या—**अनुन्नतो**ऽभिमानरहितः, पुन**र्नाऽवनतो** दीनभावरहितः, एवंविध स संयतः **समुद्रपाल**मुनि**र्महर्षिर्न चापि पूजां गर्हां च** प्रति **असजत्**, तयोः सङ्गं नाकरोदिति। एवं **स ऋजुभावं प्रतिपद्य** [**संयतो**] **विरतो** पापान्निवृत्तः सन् निर्वाण-मार्गमुपैति प्राप्नोतीति ॥२०॥

अरइरइसहे पहीणसंथवे, विरए आयहिए पहाणवं ।
परमट्ठपएहिं चिट्ठइ, छिन्नसोए अममे अकिंचणे ॥२१॥

व्याख्या—**अरतिरती** संयमाऽसंयमविषये यः सहते, न ताभ्यां बाध्यते, **प्रक्षीण-संस्तवो** विगतगृहस्थपरिचयः, **विरतः** पापक्रियातो निवृत्तः, **आत्महितः** सर्वजीव-हितवाञ्छकः, **प्रधानवान्** प्रधानः सर्वसंयमो मुक्तिहेतुत्वात्, स यस्यास्त्यसौ प्रधानवान्, परमार्थो मोक्षः सम्पद्यते यैस्तानि **परमार्थपदानि** सम्यग्दर्शनादीनि, **तेषु** स मुनि**स्तिष्ठति** । पुनः स **छिन्नशोकः**, **अममो** ममत्वरहितः, **अकिञ्चनः** परिग्रहरहित आसीदिति ॥२१॥

विवित्तलयणाइं भएज्ज ताई, निरोवलेवाइं असंथडाइं ।
इसीहि चिन्नाइं महायसेहिं, काएण फासिज्ज परीसहाइं ॥२२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—पुनः स **समुद्रपालमुनिस्त्रायी** षट्कायरक्षकः सन् **विविक्तानि स्त्र्यादि-रहितोपाश्रयादिधर्मस्थानानि भजते**, पुनर्**निरुपलेपानि** उपलेपवर्जितानि, द्रव्यतस्तदर्थं नोपलिप्तानि, भावतो रागाभावेन **असंस्कृतानि**, पुनरसंसृतानि शाल्यादिसचित्तबीजादि-भिरव्याप्तानि, निर्दोषतया च **ऋषिभिश्चीर्णानि** आसेवितानि । पुनः स **कायेन परीषहान-स्पृशत्** सहते स्म । पुनः परीषहसहनोक्तिर्गाढपरीषहसहनज्ञप्त्यै ॥२२॥

स नाणनाणोवगओ महेसी, अणुत्तरं चरिउं धम्मसंचयं ।
अणुत्तरेनाणधरे जसंसी, ओभासइ सूरिए वंतलिक्खे ॥२३॥

व्याख्या—स समुद्रपालमुनिः ज्ञानं श्रुतज्ञानं, तेन ज्ञानं अवगमः क्रियाकलापस्य, तेनोपगतो **ज्ञानज्ञानोपगतः**, यद्वा सन्ति शोभनानि नानाऽनेकधा ज्ञानानि, धर्मरुचित्वात् सद्बोधास्तैरुपगतः **सन्नानाज्ञानोपगतो महर्षिश्चरित्वा धर्मसञ्चयं** क्षान्त्यादियतिधर्मसमूह-मनुत्तरं प्रधानं, एकारस्याऽलाक्षणिकत्वादनुत्तरं ज्ञानं केवलज्ञानं धारयतीत्य**नुत्तरज्ञानधरः** (पाठान्तरे-**गुणोत्तरनाणधरः**, गुणप्रधानं ज्ञानं केवलं तद्धरः) च **यशस्वी** सन् **अन्तरिक्षे** आकाशे **सूर्य इवावभासते** तपस्तेजसा ज्ञानप्रकाशेन वा विराजते इति ॥२३॥

तस्य फलमाह—

दुविहं खवेऊण य पुण्णपावं, निरंगणे सव्वओ विप्पमुक्के ।
तरित्ता समुद्दं व महाभवोहं, समुद्दपाले अपुणागमं गइं गए ॥२४॥ त्ति बेमि

व्याख्या—'दुविहं' **द्विविधं** घातिभवोपग्राहिभेदेन **पुण्यपापं** शुभाऽशुभप्रकृतिरूपं **क्षिप्त्वा**, अङ्गेर्गत्यर्थत्वान्**निरङ्गनः** संयमे निश्चलः शैलेश्यवस्थां प्राप्त इत्यर्थः (पाठान्तरे-**निरञ्जनः** कर्मसङ्गरहितः) **सर्वतो** बाह्यादान्तराच्च देहादिसङ्गाद्**विप्रमुक्तः**, **तीर्त्वाब्धिमिवा-**ऽतिदुस्तरं **महाभवौघं** देवादिभववृन्दं, स **समुद्रपालो** मुनीश्वरोऽ**पुनरागमां** पुनरागमरहितां मोक्षरूपां **गतिं गतः** प्राप्तः, **इति** समाप्तौ **ब्रवीमी**ति प्राग्वत् ॥२४॥

इत्येकत्वार्थे एकविंशं समुद्रपालीयाध्ययनमुक्तम् ॥२१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

द्वाविंशं रथनेमीयमध्ययनम् ॥

एकत्वे च संयमे ध्यानान्तरावाप्तावपि पुनर्धर्मे स्थैर्यं कार्यमिति **रथनेमीया**ख्यं द्वाविंशाध्ययनमाह–

सोरियपुरंमि नयरे, आसि राया महड्ढिओ ।
वसुदेवि त्ति नामेणं, रायलक्खणसंजुए ॥१॥

व्याख्या–सौर्यपुरे नाम्नि **नगरे वसुदेव इति नाम्ना** राजासीत् । स **महर्द्धिक**-श्छत्रचामरादिविभूतियुतः, पुना **राजलक्षणसंयुतः**, चक्रस्वस्तिकाङ्कुशादीनि, त्यागसत्य-शौर्यादीनि वा, तैः संयुतो राजलक्षणसंयुतोऽभूदिति ॥१॥

तस्स भज्जा दुवे आसि, रोहिणी देवई तहा ।
तासिं दोण्हं दुवे पुत्ता, अइट्ठा रामकेसवा ॥२॥

व्याख्या–तस्य वसुदेवस्य द्वे भार्ये आस्तां, रोहिणी तथा देवकी, तयोर्द्वयोर्द्वौ **पुत्रा**वभूतां, **अभीष्टौ** मातापित्रोरधिकवल्लभौ **रामकेशवा**भिधानौ ॥२॥

सोरियपुरंमि नयरे, आसि राया महड्ढिए ।
समुद्दविजये नामं, रायलक्खणसंजुए ॥३॥

व्याख्या–तस्मिन्नेव **सौर्यपुरे नगरे महर्द्धिकस्तथैव राजलक्षणसंयुतः समुद्रविजयनामा** राजाऽसीत् । अत्र पुनः **सौर्यपुरो**क्तिः **समुद्रविजयवसुदेव**योरेकत्र स्थितिज्ञप्त्यै ॥३॥

तस्स भज्जा सिवा नाम, तीसे पुत्ते महायसे ।
भयवं अरिट्ठनेमि, तिलोगनाहे दमीसरे ॥४॥

व्याख्या–तस्य भार्या शिवा नाम्नी, तस्याः पुत्रश्च भगवानैश्वर्यवान्, महायशा महाकीर्त्तिः, **त्रिलोकनाथस्तथा दमीश्वरः** कुमारत्वेऽपि कन्दर्पजेता **अरिष्टनेमि**नामासीत् ॥४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सोरिट्ठनेमिनाहो, लक्खणस्सरसंजुओ ।
अट्ठसहस्सलक्खणधरो, गोयमो कालगच्छवी ॥५॥

व्याख्या—**सोऽरिष्टनेमिनाथो लक्षणस्वरसंयुतो** लक्षणैः सहितः स्वरस्तेन संयुतः सौस्वर्यगाम्भीर्यादिलक्षणोपेतस्वरयुतः, (पाठान्तरे—'**वंजणसंजुओ**' तत्र **व्यञ्जनानि** प्रशस्ततिलकादीनि **तैः संयुतः**) तथै**वाष्टोत्तरसहस्रलक्षणधरः** करादिरेखात्मकचक्रादि-लक्षणधारी, **गौतमगोत्रीयः, कालकच्छविः** कृष्णत्वगासीदिति ॥५॥

वज्जरिसहसंघयणो, समचउरंसो झसोयरो ।
तस्स राईमई कण्णं, भज्जं जायइ केसवो ॥६॥

व्याख्या—पुनः स वज्रऋषभनाराचसंहननयुतः, वज्रं कीलिका, ऋषभः पट्टो, नाराच उभयपार्श्वयोर्मर्कटबन्धः, एभिः संहननं शरीररचना यस्य स **वज्रर्षभनाराचसंहननः**, पुनः **समचतुरस्रः** प्रथमसंस्थानवान्, यः पद्मासने स्थितः सन् चतुर्षु पार्श्वेषु सदृशशरीर-प्रमाणो भवति स समचतुरस्रसंस्थानवान् उच्यते । पुन**र्झषोदरः**, झषस्य मत्स्यस्य उदर-मिवोदरं यस्य स झषोदरः एवंविधस्य **तस्य** श्रीनेमेः कृते **केशवः कृष्णो राजीमतीं** नाम्नीं **कन्यां तद्भार्यां** याचते ॥६॥

अथ सा **राजीमती** कीदृशीत्याह—

अह सा रायवरकण्णा, सुसीला चारुपेहिणी ।
सव्वलक्खणसंपुण्णा, विज्जुसोदामणिप्पभा ॥७॥

व्याख्या—अथ **सा राजवरस्य उग्रसेनस्य** राज्ञः **कन्या, सुशीला** उत्तमशीला-लङ्कृता, **चारुप्रेक्षिणी** चारु प्रेक्षितुं शीलमस्याः सा, नाधोदृष्टितादिदोषदूषिता, **सर्व-लक्षणसम्पूर्णा** चतुःषष्टिकामिनीकलादिलक्षणसंयुता, तथा विशेषेण द्योतते इति विद्युत्, सा चासौ सौदामिनी च, तत्प्रभा यस्या विद्यते सा **विद्युत्सौदामिनीप्रभा**, एवंविधा सा वर्त्तते ॥७॥

अहाह जणओ तीसे, वासुदेवं महड्ढियं ।
इहागच्छउ कुमारो, जा से कन्नं दलामहं ॥८॥

व्याख्या—**अथेति** याज्ञानन्तरं **तस्या** राजीमत्या **जनक उग्रसेनो महर्द्धिकं वासुदेवं** प्रत्याह, कुमारोऽरिष्टनेमिरिहास्मद्गृहे **आगच्छतु**, 'जा' **येन** 'से' **तस्मै** तां **राजीमतीं कन्यामहं ददामी**ति ॥८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सव्वोसहीहिं न्हविओ, कयकोउयमंगलो ।
दिव्वजुअलपरिहिओ आहरणेहिं विभूसिओ ॥९॥

व्याख्या—अथासन्ने क्रोष्टुक्यादिष्टलग्ने सति, **सर्वौषधीभिर्जयाविजयर्द्धिवृद्ध्यादिभिः स्नपितो**ऽभिषिक्तः, **कृतकौतुकमङ्गलः**, तत्र कौतुकानि ललाटमुशलस्पर्शादीनि, मङ्गलानि च दध्यक्षतदुर्वाचन्दनादीनि, तानि कृतानि यस्य स कृतकौतुकमङ्गलः, **परिहितं दिव्यं युगलं** देवदुष्यं येन **सः**, तथा **आभरणैर्मुकुटकुण्डलालङ्कारैर्विभूषितः**, एवंविधो**ऽरिष्टनेमिकुमारो** ज्ञेयः ॥९॥

मत्तं च गंधहत्थिं च, वासुदेवस्स जिट्ठगं ।
आरूढो सोहई कुमरो (अहियं), सिरे चूडामणी जहा ॥१०॥

व्याख्या—**वासुदेवस्य** ज्येष्ठकं **मत्तं गन्धहस्तिनं** पट्टहस्तिन**मारूढो**ऽरिष्टनेमिकुमारो यथा **शिरसि** मस्तके **चूडामणिः** शिरोरत्नमिव **शोभते** ॥१०॥

अह ऊसिएण छत्तेणं, चामराहि य सोहिओ ।
दसारचक्केण य सो, सव्वओ परिवारिओ ॥११॥

व्याख्या—**अथा**नन्तरं **वृष्णिपुङ्गवो नेमिकुमारो** निजकाद्भवनात् स्वगृहान्निसृतः, कीदृश्या ऋद्ध्येत्याह—**उच्छ्रितेनो**च्चैःकृतेन **छत्रेण**, उभयपार्श्वे **च चामराभ्यां शोभितः**, पुन**र्दशार्हचक्रेण** यादवसमूहेन **सर्वतः परिवारितः** ॥११॥

चउरंगिणीए सेणाए, रइयाए जहक्कमं ।
तुरियाण सन्निनाएणं, दिव्वेणं गयणंफुसा ॥१२॥

व्याख्या—पुनश्च**तुरङ्गिण्या** हस्त्यश्वरथपदातिभेदया **सेनया यथाक्रमं** परिपाट्या **रचितया** न्यस्तया युतः, पुन**र्गगनस्पृशा** वियन्मण्डलव्यापिना **दिव्येन** प्रधानेन देवकृतेन वा, **तूर्याणां** मृदङ्गपटहादीनां **सन्निनादेन** मनोहरध्वनिनोपलक्षितः ॥१२॥

एयारिसीए इड्ढीए, जुईए उत्तमाइ य ।
णियगाओ भवणाओ, णिज्जाओ वण्हिपुंगवो ॥१३॥

व्याख्या—**एतादृश्या ऋद्ध्या द्युत्या चोत्तमयो**पलक्षितः स [**निर्यातो**] निःसृत इति सम्बन्धो ज्ञेयः ॥१३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अह सो तत्थ णिज्जंतो, दिस्स पाणे भयद्दुए ।
वाडेहिं पंजरेहिं च, संनिरुद्धे सुदुक्खिए ॥१४॥

व्याख्या—**अथ स तत्र** विवाहमण्डपासन्ने **निर्यन्** गच्छन् **दृष्ट्वा प्राणान्** प्राणिन् प्राणिनो मृगलावकान् **भयद्रुतान्** भयत्रस्तान्, **वाटकै**र्वृत्तिवरण्डादिवेष्टितभूदेशैः **पञ्जरैश्च सन्निरुद्धान्** गाढं नियन्त्रितान्, अत एव **सुदुःखितान्** ॥१४॥

जीवियंतं तु संपत्ते, मंसट्ठा भक्खियव्वए ।
पासित्ता से महापन्ने, सारहिं इणमब्बवी ॥१५॥

व्याख्या—**जीवितस्यान्तमिवान्तं तु सम्प्राप्तान्**, तेषां **मांसार्थं**, मांसं पुष्टं स्यादिति वा मांसार्थं, **भक्षितव्या** एते मूर्खैरिति दृष्ट्वा हृदि निध्याय सोऽर्हन्, महती प्रज्ञा ज्ञानत्रयं यस्यासौ **महाप्राज्ञः सारथिं** प्रवर्त्तयितारं गन्धहस्तिनो हस्तिपकं **प्रतीदं** वक्ष्यमाणस्वरूप**मब्रवीद**कथयदिति ॥१५॥

कस्स अट्ठा इमे पाणा, एए सव्वे सुहेसिणो ।
वाडेहिं पंजरेहिं च, संनिरुद्धा य अच्छइ ॥१६॥

व्याख्या—हे सारथे ! **इमे** प्रत्यक्षं दृश्यमानाः **सुखैषिणः** सुखेच्छवोऽपि सर्वे **प्राणाः** प्राणिनो **वाटकैश्च** पुनः **पञ्जरैः सन्निरुद्धा** अत्यन्तं नियन्त्रिताः **कस्यार्थं** कस्य हेतोः 'अच्छइ' इति **तिष्ठन्ति** ! ज्ञानवतोऽपि प्रभोरिदं प्रश्नं दयाप्रकटीकरणार्थमेवेति ॥१६॥

अह सारही तओ भणइ, एए भद्दा उ पाणिणो ।
तुब्भं विवाहकज्जंमि, भोयावेउं बहुं जणं ॥१७॥

व्याख्या—**अथ सारथिस्ततो भणति, एते प्राणिनो भद्रा एव,** न तु श्वशिवादिवत् क्रूराः, निरपराधा वा, **भवतो विवाहकार्ये बहुजनं भोजयितुं** सन्ति ॥१७॥

सोऊण तस्स वयणं, बहुपाणिविणासणं ।
चिंतेइ से महापन्ने, साणुक्कोसे जिए हिओ ॥१८॥

व्याख्या—'से' इति **स नेमिकुमारस्तस्य** सारथेर्**बहुप्राणिविनाशनं** बहुजीवघातकवाच्ययुक्तं **वचनं श्रुत्वा चिन्तयति,** कीदृशः सः ? **महाप्राज्ञो** महाबुद्धिवान् पुन**र्जीवे हितः** प्राणिनां हितेच्छुः, पुनः **सानुक्रोश** सकरुणः ॥१८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जइ मज्झ कारणा एए, हिम्मिहंति बहुजिया ।
ण मे एयं तु निस्सेयं, परलोए भविस्सइ ॥१९॥

व्याख्या—**यदि मम कारणान्**मद्विवाहे भोजने **एते बहुजीवा हनिष्यन्ते**, तदा **न मे एतज्**जीवहननं, **तुः** एवार्थे, **नैव निःश्रेयसं** कल्याणं **परलोके भविष्यति** । परलोकभीरुत्वस्यत्यन्ताभ्यस्ततयैवैवं कथनं, अन्यथाऽर्हतश्चरमदेहत्वाद् ज्ञानित्वाच्च कुत ईदृक् चिन्ता ? ॥१९॥

एवं ज्ञातार्हदाकूतेन सारथिना मोचितेषु सत्त्वेषु परितोषितोऽर्हन्—

सो कुंडलाण जुयलं, सुत्तगं च महायसो ।
आभरणाणि य सव्वाणि, सारहिस्स पणामए ॥२०॥

व्याख्या—**स महायशा नेमिकुमारः कुण्डलयोर्युगलं, सूत्रकं** कटीदवरकं च पुनः **सर्वाण्याभरणानि** विभूषणानि **सारथये प्रणामयति** ददातीति ॥२०॥

मणपरिणामे य कओ, देवा जहोइयं समोइण्णा ।
सव्वड्ढीए सपरिसा, निक्खमणं तस्स काउं जे ॥२१॥

व्याख्या—अर्हता **मनसा परिणामो** दीक्षां प्रति **कृतः, यथोचितमौ**चित्याऽनतिक्रमेण, **देवा लोकान्तिक**देवाः **समवतीर्णाः, सर्वद्धर्या सपर्षदो** बाह्यपर्षदोपेताः, **निष्क्रमणं** निष्क्रमणमहं **तस्य** श्रीनेमेः **कर्त्तुं, 'जे'** पूर्त्तौ ॥२१॥

देवमणुस्सपरिवुडो, सिवियारयणं तओ समारूढो ।
निक्खमिय बारगाओ, रेवयंमि ठिओ भयवं ॥२२॥

व्याख्या—**ततो**ऽनन्तरं भगवान् **देवमनुष्यपरिवृत**स्तथा देवकृतमुत्तरकुरुनाम**शिबिकारत्नं समारूढो द्वारिकातो निःक्रम्य रैवते उज्जयन्ते स्थितो** गमनान्निवृत्तः ॥२२॥

उज्जाणं संपत्तो, उइण्णो उत्तमाओ सीयाओ ।
साहस्सीए परिवुडो, अह निक्खमई उ चित्ताहिं ॥२३॥

व्याख्या—**उद्यानं सहस्राम्र**वनाख्यं **सम्प्राप्तः**, तत **उत्तमायाः शिबिकाया उत्तीर्णः**, प्रधाननृ**सहस्रेण** सह **परिवृत्तोऽथे**त्यानन्तर्ये **निःक्रामति** श्रामण्यं प्रतिपद्यते । **तुः** पूर्त्तौ, **चित्रासु** चित्रानक्षत्रे ॥२३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अह सो सुगंधगंधिए, तुरियं मउयकुंचिए ।
सयमेव लुंचई केसे, पंचमुट्ठीहिं समाहिए ॥२४॥

व्याख्या—**अथ स सुगन्धिगन्धकान्** स्वभावतः सुरभिगन्धान् **त्वरितं मृदुक-कुञ्चितान्** कोमलकुटिलान् **स्वयमेव केशान् पञ्चमुष्टीभिः समाधिमान्** लुञ्चते ।

वासुदेवो य णं भणइ, लुत्तकेसं जिइंदियं ।
इच्छियमणोरहे तुरियं, पावेसु तं दमीसर ॥२५॥

व्याख्या—**वासुदेवश्चात्समुद्रविजयाद्याः, लुप्तकेशं** च **जितेन्द्रियं** श्रीनेमिं प्रति भणति, **भो दमीश्वर ! इप्सितमनोरथं** मुक्तिरूपं **त्वरितं** शीघ्रं **प्राप्नुहीति** ॥२५॥

णाणेणं दंसणेणं च, चरित्तेणं तवेण य ।
खंतीए मुत्तीए, वद्धमाणो भवाहि य ॥२६॥

व्याख्या—पुनस्त्वं **ज्ञानेन, दर्शनेन, चारित्रेण, तपसा, क्षान्त्या मुक्त्या** निर्लोभत्वेन च **वर्धमानो** वृद्धिभाग् **भव** ! ॥२६॥

एवं ते रामकेसवा, दसारा य बहुजणा ।
अरिट्ठनेमिं वंदित्ता, अइगया बारगापुरिं ॥२७॥

व्याख्या—**एवं ते रामकेशवदशार्हाश्चान्येऽपि बहवो जना अरिष्टनेमिं वन्दित्वा द्वारिकां पुरीं** प्रत्यतिगताः प्रविष्टा इति ॥२७॥

सोऊण रायवरकण्णा, पव्वज्जं सा जिणस्स उ ।
नीहासा य निराणंदा, सोगेण य समुच्छया ॥२८॥

व्याख्या—**सा राजवरकन्या उग्रसेननृपपुत्री राजीमती जिनस्य** श्रीनेमिनाथस्य **प्रव्रज्यां** दीक्षां **श्रुत्वा निर्हासा** हास्यरहिता च पुनर्**निरानन्दा** गतप्रमोदा **शोकेन च समवसृता** व्याप्ताऽभूत् ॥२८॥

राइमई विचिंतेइ, धिरत्थु मम जीवियं ।
जाहं तेणं परिचत्ता, से यं पव्वइउं मम ॥२९॥

व्याख्या—ततः सा **राजीमती विचिन्तयति मम जीवितं** प्रति **धिगस्तु, याऽहं तेन** श्रीनेमिनाथेन **परित्यक्ता, तस्या ममाथ प्रव्रजितुं** दीक्षां ग्रहीतुं श्रेयः, येनान्यभवेऽपि नैव दुःखिनी स्यामिति ॥२९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अथ प्रभुरन्यत्र विहृत्य पुनस्तत्रागात्, तावत् सा तथैवास्थात्, केवलोत्पत्तेश्चार्हद्देशनां श्रुत्वा गाढवैराग्या सा—

अह सा भमरसंकासे, कुच्चफणगपसाहिए ।
सयमेव लुंचइ केसे, धिइमंतावविस्सिया ॥३०॥

व्याख्या—अथ सा भ्रमरसङ्काशान् कृष्णान्, कुञ्चिततया **कूर्चफनकप्रसाधितान्**, कूर्चको गूढकेशोन्मोहको वंशमयः, फनकः कङ्कतकस्ताभ्यां प्रसाधितान्, एवंविधान् **केशान् धृतीमती व्यवसिता** धर्मं कर्त्तुं स्थिरीभूता **स्वयमेव** स्वाम्यनुज्ञया **लुञ्चति** ॥३०॥

तत्प्रव्रज्याप्रतिपत्तौ—

वासुदेवो य णं भणइ, लुत्तकेसं जिइंदियं ।
संसारसागरं घोरं, तर कण्णे लहुं लहुं ॥३१॥

व्याख्या—वासुदेवश्च, णं अलङ्कारे, तां **लुप्तकेशां** च **जितेन्द्रियां** साध्वीं प्रति **भणति** हे कन्ये ! त्वं **घोरं संसारसागरं लघु लघु** त्वरितं त्वरितं **तरोल्लङ्घयेति**, सम्भ्रमे द्विरुक्तिः ॥३१॥

ततः—

सा पव्वइया संती, पव्वावेसी तहिं बहुं ।
सयणं परियणं चेव, सीलवंता बहुस्सुया ॥३२॥

व्याख्या—शीलवन्ती च बहुश्रुता सा राजीमती प्रव्रजिता सती **तत्र द्वारिकायां बहून् स्वजनान्** स्वज्ञातीन् स्त्रीजनान् पुनः **परिजनान् प्राव्राजयत्** ॥३२॥

गिरिं रेवययं जंती, वासेणोल्लाउ अंतरा ।
वासंते अंधयारंमि, अंतो लयणस्स सा ठिया ॥३३॥

व्याख्या—अथान्यदा **सा राजीमती** स्वामिनत्यै **रैवतं गिरिं प्रति यान्ती, वर्षति** मेघे अन्धकारे दृग्प्रचारे निरुद्धे सति, **अन्तराऽर्धपथे वर्षाभिरुल्ला** आर्द्रा क्लिन्नसर्ववीवरा **लयनस्यान्तर्गिरिगह्वरे स्थिता** ॥३३॥

तत्राग्रे **रथनेमि**रात्तदीक्षः स्थितोऽस्ति, तया तु स न दृष्टः—

चीवराणि विसारंती, जहाजाय त्ति पासिया ।
रहनेमी भग्गचित्तो, पच्छा दिट्ठो य तीइ वि ॥३४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—चीवराणि सङ्घाट्यादिवस्त्राणि **विस्तारयन्ती** शरीरादुत्तार्येतिशेषः, **यथाजाताऽनाच्छादिताङ्गा** साभूत्, **इत्येवंरूपां** तां **दृष्ट्वा रथनेमिर्भग्नचित्तः** संयमं प्रत्यभूत्, एवंविधः स **पश्चात्तयापि दृष्टः**, चेत् पूर्वं दृष्टो भवेत्तदा सा तत्र न विशेदिति ॥३४॥

भीया य सा तहिं दट्ठुं, एगंते संजयं तयं ।
बाहाहिं काउं संगोफं, वेवमाणी णिसीयइ ॥३५॥

व्याख्या—मा कदाचिदसौ शीलभङ्गं कुर्यादिति **भीता सा तत्र** गुहायां **दृष्ट्वा एकान्ते** निर्जने **संयतं तकं रथनेमिं, बाहुभ्यां कृत्वा सङ्गोफं** मिथो बाहुगुण्ठनं स्तनोपरिमर्कटबन्धं **वेपमाना** शीलभङ्गभयात् कम्पमाना **निषीदति,** तदाश्लेषादिवारणार्थम् ॥३५॥

अह सो वि रायपुत्तो उ समुद्दविजयंगओ ।
भीयं पवेइयं दट्ठुं, इमं वक्कमुदाहरे ॥३६॥

व्याख्या—**अथ सोऽपी**ति स **पुना** राजपुत्रो **रथनेमिः समुद्रविजयाङ्गजो भीतां** अत एव च **कम्पमानां** तां **राजीमतीं दृष्ट्वा** इदं **वाक्यमुदाहरदु**क्तवानिति ॥३६॥

किं तदित्याह—

रहनेमी अहं भद्दे, सुरूवे चारुभासिणि ।
ममं भयाहि सुतणु ण ते पीला भविस्सई ॥३७॥

व्याख्या—हे भद्रे ! कल्याणि ! **अहं रथनेमि**रस्मि, अत्राहमिति निजरूपवत्त्वादिमानात् स्वप्रज्ञापनं ध्वनितं । **हे सुरूपे !** सुन्दराकारे ! **हे चारुभाषिणि !** मधुरवचनालापिनि ! च **हे सुतनु !** कोमलाङ्गि ! अत्रैतावन्ति सम्बोधनानि तन्मदनौत्सुक्यसूचकानि । 'ममं' इति **मां भजस्व** भर्तृत्वेनाङ्गीकुरु ? 'ते' **तव पीडा** दुःखं **न भविष्यति,** सुखहेतुत्वाद्विषयस्य । यद्वा ससम्भ्रमां तां दृष्ट्वेवमाह—'ममं भयाहि'त्ति **मा मा भैषीः** ! पीडाशङ्कया भयं स्यादित्येवमुक्तम् ॥३७॥

एहि ता भुंजिमो भोए, माणुस्सं खु सुदुल्लहं ।
भुत्तभोए तओ पच्छा, जिणमग्गं चरिस्सामो ॥३८॥

व्याख्या—एह्यागच्छेति, 'ता' **तस्मात्तावद्वा भोगान् भुञ्जवहे, मानुष्यं खुः** निश्चितं **सुदुर्लभं,** तदेतदाप्तावावां भोगफलं लभावहे । **भुक्तभोगौ ततः पश्चाद्वार्द्धक्ये जिनमार्गं** जिनोक्तमुक्तिपथं **चरिष्याव** इति ॥३८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ततः सा—

दट्ठूण रहनेमिं तं, भग्गुज्जोयपराइयं ।
राईमई असंभंता, अप्पाणं संवरे तहिं ॥३९॥

व्याख्या—तदा **राजीमती तं रथनेमिं भग्नोद्योगपराजितं** भग्नोद्योगोऽपगतोत्साहः संयमे, स चासौ पराजितश्चाभिभूतः स्त्रीपरीषहेण तं भग्नोद्योगपराजितं **दृष्ट्वा** विलोक्य, **असम्भ्राता** नाऽयं बलादकार्यं करिष्यतीत्याशयेनाऽत्रस्ता, **तत्र** गुहायां **आत्मानं संवरेत्** चीवरैराच्छादितवती ॥३९॥

अह सा रायवरकन्ना, सुट्ठिया नियमव्वए ।
जाइं कुलं च सीलं च, रक्खमाणी तयं वए ॥४०॥

व्याख्या—**अथ सा राजवरकन्या राजीमती नियमव्रते सुस्थिता,** नियमे शौच-स्वाध्यायादौ, व्रते च पञ्चमहाव्रतरूपे सुष्ठुप्रकारेण स्थिरा, यद्वा इन्द्रियनोइन्द्रियसंवरे दीक्षायां च निश्चला सती, **जातिं कुलं च शीलं रक्षमाणा तकं** तं प्रति **वदति** ॥४०॥

जइ सि रूवेण वेसमणो, ललिएण नलकूबरो ।
तहा वि ते न इच्छामि, जइ वि सक्खं पुरंदरो ॥४१॥

व्याख्या—हे **रथनेमे** ! यदि त्वं रूपेण **वैश्रमणो** धनदोऽसि, च **ललितेन** सविलास-चेष्टितेन **नलकूबरो** देवविशेषोऽसि, **तथापि** 'ते' इति **त्वां नेच्छामि** नाभिलषामि, **साक्षात्** समक्षः **पुरन्दर** इन्द्रो रूपाद्यनेकगुणाश्रयो **यद्यसि** । रूपाभिमान्ययमित्येवमुक्तः ॥४१॥

पक्खंदे जलियं जोइं, धूमकेओ दुरासयं ।
नेच्छंति वंतयं भोत्तुं, कुले जाया अगंधणे ॥४२॥

व्याख्या—हे **रथनेमे** ! **अगन्धने कुले जाता** अगन्धकुलोत्पन्नाः सर्पा **वान्तं** विषं **भोक्तुं** पुनः पश्चाद् गृहीतुं **नेच्छन्ति** न वाञ्छन्ति । **ज्वलद्धूमकेतोरग्नेर्ज्योतिर्ज्वालां प्रस्कन्देदिति** प्रस्कन्देयुः, प्राकृतत्वाद्बहुवचने एकवचनं । अगन्धजातीयाः सर्पा ज्वलदग्निज्वालां प्रविशेयुः, न तूद्गीर्णं विषं पश्चाद् गृह्णन्ति, कीदृशं ? धूमकेतोर्ज्योतिर्दुरासदं दुःसहमित्यर्थः ॥४२॥

धिरत्थु तेऽजसोकामी, जो तं जीवियकारणा ।
वंतं इच्छसि आवेउं, सेयं ते मरणं भवे ॥४३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—हे **अयशःकामिन्** ! दुराचारावाञ्छया **धिगस्तु ते** पौरुषं, यद्वा तव यशो महाकुलत्वादभूत्, अधुना हे कामिन् ! धिगस्तु ते, **यस्त्वं जीवितकारणाद**संयमजीवित-हेतो**र्वान्तं** श्वा इव त्यक्तमापातु**मिच्छसि,** दीक्षाङ्गीकारात्त्यक्तान् भोगान् पुनरापातुमि**वापातुं** भोक्तुमिच्छसि, अतः **श्रेयः** कल्याणं **ते मरणं भवेन्न** तु वान्तापानं, तदनासेवने कदाचिन्मरणं स्यात्ततोऽपि न दोषः, यतः—

विज्ञाय वस्तु निद्यं, कृत्वा गृह्णन्ति किं क्वचित् पुरुषाः ।
वान्तं पुनरपि भुङ्क्ते, न च सर्वः सारमेयोऽपि ॥१॥ [ ] ॥४३॥

अहं च भोगरायस्स, तं च सि अंधगवण्हिणो ।
मा कुले गंधणा होमो, संजमे निहुओ चर ॥४४॥

व्याख्या—**राजीमती** वदति, **अहं, चः** पूर्त्तौ, **भोजराजस्योग्रसेनस्य** सुतास्मि, **त्वं चान्धकवृष्णेः** सुतः, **कुले** आवां **गन्धनानां** सर्पाधमानां कुले **माभूव,** तच्चेष्टि-तानुकारित्वात्, ते वान्तमपि विषं ज्वलद्वह्निभीरवः पुनरपि पिबन्ति । "**सप्पाणं दो जाइओ, गन्धणा अगन्धणा य, तत्थ गन्धणा नाम जे डसिए मंतेहिं आकड्ढिआ तं विसं वणमुहाउ आवियन्ति, अगन्धणा पुण अवि मरणं अज्झवसन्ति, न य वन्तमावियन्ति,**" [ ] ततः **संयमं निभृतः** स्थिरः सन् **चरा**सेवस्व ! ॥४४॥

जइ तं काहिसि भावं, जा जा दिच्छसि नारिओ ।
वायाविद्धो व्व हडो, अट्ठिअप्पा भविस्ससि ॥४५॥

व्याख्या—हे मुने ! **यदि त्वं भावं** भोगाभिलाषं **करिष्यसि यां यां** सुरूपां **नारीं दृष्ट्वा** भोगाभिलाषं करिष्यसि, तदा त्वं **वाताविद्धो** वायुना प्रेरितो **हड इव** शेवालनाम-वनस्पतिविशेष इवा**ऽस्थितात्मा**ऽस्थिरस्वभावो **भविष्यसि** ॥४५॥

गोवालो भंडवालो वा, जहा तद्दवऽणिस्सरो ।
एवं अणिस्सरो तं पि, सामन्नस्स भविस्ससि ॥४६॥

व्याख्या—**गोपालो** यो गाः पालयति, **भाण्डपालो** योऽन्यभाण्डानि भाटकादिना पालयति (पाठान्तरे-**दण्डपालो वा** पुरारक्षकः) **यथा तद्द्रव्यस्य** गवादे**रनीश्वरो**ऽप्रभु-र्विशिष्टतत्फलभोगाभावात्, **एवमनीश्वरस्त्वं** [**श्रामणस्य**] दीक्षाया **भविष्यसि,** भोगेच्छा-स्तत्फलस्यापि विशिष्टस्याऽभावादिति ॥४६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कोहं माणं निगिण्हित्ता, माया लोभं च सव्वसो ।
इंदियाइं वसे काउं, अप्पाणं उवसंहरे ॥४७॥

तीसे सो वयणं सोच्चा, संजयाए सुभासियं ।
अंकुसेण जहा नागो, धम्मे संपडिवाइओ ॥४८॥

व्याख्या—अथ स **रथनेमिस्तस्या राजीमत्याः संयतायाः** साध्व्याः **सुभाषितं** अनुशिष्टिरूपं संवेगजनितत्वेन सुभाषितं **वचनं श्रुत्वा क्रोधं मानं मायां लोभं च सर्वथा निगृह्य, च** पुनरिन्द्रियाणि **वशीकृत्यात्मानमुपसंहरति** स्थिरीकरोति । **अङ्कुशेन** च **यथा नागः** पथि व्रजति, तथा **धर्मे** चारित्रधर्मे स **सम्प्रतिपतितः** संस्थितस्तद्वचसेति ।

यथा **नूपुरपण्डिता**कथायां राज्ञा मण्ठो हस्ती देवी च मारणाय शृङ्गात् पातयितुं छिन्नकटकाद्रौ चाटितानि, तदा लोकः पशोराज्ञाकर्त्तुः को मन्तुरितीभरक्षायै नृपं व्यजिज्ञपत्, नृपे चाऽमन्वाने मेण्ठ इभं क्रमात् त्रिद्व्येकांह्रिस्थमधारयत्, हाहारवपरैः पौरैर्विज्ञप्तो नृपो गजरत्नमरक्षयत् । ततो मेण्ठस्तावद्ध्रुवं गतमपि तं शनैः शनैर्न्यवर्त्तयत्, गिरेरुदतारयत्, तथा यमपीति ॥४७॥४८॥

अथ स कीदृशः स्थिरेऽभूत्तदाह—

मणगुत्तो वयगुत्तो, कायगुत्तो जिइंदिओ ।
सामन्नं निच्चलं फासे, जावज्जीवं दढव्वए ॥४९॥

व्याख्या—**मनोगुप्तो** गुप्तमना तथा **वचोगुप्तो** गुप्तवाक् तथैव **कायगुप्त** एवं गुप्तित्रयसहितः, पुनर्जितेन्द्रियः, एतादृशो **रथनेमिर्यावज्जीवं दृढव्रतः** सन् **श्रामण्यं** चारित्रधर्मं **निश्चलं** यथा स्यात्तथा **स्पृशति** सम्यक् क्रियानुष्ठानेन पालयति ॥४९॥

द्वयोः क्रियाफलमाह—

उग्गं तवं चरित्ताणं, जाया दुन्नि वि केवली ।
सव्वं कम्मं खवित्ताणं, सिद्धिं पत्ता अणुत्तरं ॥५०॥

व्याख्या—**उग्रं** कर्मरिपुदारणतया **तपोऽनशनादि चरित्वा जातौ द्वावपि रथनेमि-राजीमत्यौ केवलिनौ,** क्रमेण च **सर्वाणि कर्माणि क्षपयित्वा** पुनस्ता**वनुत्तरां** सर्वोत्कृष्टां **सिद्धिं** मोक्षगतिं **प्राप्तौ** ॥५०॥

रहनेमिस्स भगवओ, गिहत्थत्ते होंति चउरवाससया ।
संवच्छर छउमत्थो, पंचसए केवली जाओ ॥१॥ [उत्त. नि./गा.४४६]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

नववाससए वासाहिए उ सव्वत्थ[१] तस्स नायव्वं ।
एसो[२] चेव य कालो, रायमईए[३] वि नायव्वो ॥२॥ [उत्त. नि./गा.४४७]

भग्नपरिणामतया मा भूद्रथनेमौ कस्याप्यवज्ञेत्याह–

एवं करिंति संबुद्धा, पंडिया पवियक्खणा ।
विणियट्टंति भोगेसु, जहा से पुरिसुत्तमो ॥५१॥ त्ति बेमि

व्याख्या–एवं कुर्वन्ति सम्बुद्धा बोधिलाभतः, **पण्डिता** बुद्धिमत्त्वेन **प्रविचक्षणाः** प्रकर्षेण शास्त्रज्ञतया, **विशेषेण** कथञ्चिद्विश्रोतसिकोत्पत्तावपि तन्निरोधेन **निवर्त्तन्ते भोगेभ्यः, यथा स पुरुषोत्तमो रथनेमिः**, अनीदृशा ह्येकदा भग्नपरिणामा न पुनः संयमे प्रवर्त्तितुं क्षमाः, ततो भोगनिवर्त्तनात् सम्बुद्धादिविशेषणविशेषितः कथमयमवज्ञास्पदं स्यात् ? **इति** समाप्तौ **ब्रवीमी**ति प्राग्वत् ॥

इति चित्तधृत्यै द्वाविंशं रथनेमीयमध्ययनमुक्तम् ॥२२॥

● ● ●

१. सव्वाउगस्स नायव्वं ।
२. एसो उ चेव कालो ।
३. रायमईए उ । इति उत्त. नि. गा. ४४७ मध्ये पाठः ॥ सम्पा.

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

त्रयोविंशं केशि-गौतमीयमध्ययनम् ॥

चित्तधृतिश्च **गौतम**पार्श्वे **केशि**वत् कार्या, इति **केशिगौतमीयं** त्रयोविंशाध्ययनमाह–

जिणे पासि त्ति नामेणं, अरहा लोगपूइए ।
संबुद्धप्पा य सव्वन्नू, धम्मतित्थयरे जिणे ॥१॥

व्याख्या–जिनः परीषहोपसर्गजित्, **पार्श्व** इति **नामा**भूत्, स चान्योऽपि स्यादित्याह्वः, अतोऽर्हति देवेन्द्रादिकृतां पूजामित्य**र्हन्**, **लोकपूजितः**, सम्बुद्धस्तत्वज्ञानादात्माऽस्येति **सम्बुद्धात्मा**, **च** पूर्त्तौ, **सर्वज्ञः** सद्द्रव्यपर्यायवित्, तथा धर्म एव भवाब्धितरणहेतुत्वात्तीर्थं, तत्करणशीलो **धर्मतीर्थकरो**, **जिनो जितसर्वकर्मा**, मुक्त्यवस्थापेक्ष्यमेतत्।

(पाठान्तरे-**अरिहा लोयविस्सुए, सव्वन्नू सव्वदंसी य,**
सम्बुद्धप्पा य सव्वन्नू, धम्मतित्थस्स देसए) ॥१॥

तस्स लोगप्पईवस्स, आसि सीसे महायसे ।
केसी कुमारसमणे विज्जाचरणपारगे ॥२॥

व्याख्या–तस्य सर्ववस्तुप्रकाशकतया **लोकप्रदीपस्यासीच्छिष्यो बहुयशाः केशी केशी**नामा कुमारोऽपरिणीततया, श्रमणस्तपस्वितया **कुमारश्रमणो विद्याचरणयो**र्ज्ञानचारित्रयोः **पारगः** ॥२॥

ओहिनाणसुए बुद्धे, सीससंघसमाउले ।
गामाणुगामं रीयंते, सावत्थिं णगरिमागए ॥३॥

व्याख्या–सुब्व्यत्ययात् **अवधिज्ञानश्रुताभ्यां** "मइपुव्वे जेण सुयं" [ ] इत्यागमान्मतिपूर्वत्वात् श्रुतस्य, मत्या च मनोज्ञानेन **चावबुद्धो** ज्ञातहेयादेयभावः, **शिष्यसङ्घेन समाकुलो** वृतो **ग्रामानुग्रामं रीयमाणो** विहरन् **श्रावस्तीं नगरीमागतः** ॥३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तिंदुयं णाम उज्जाणं, तंमि णगरमंडले ।
फासुए सिज्जसंथारे, तत्थ वासं उवागए ॥४॥

व्याख्या–तिन्दुकनामोद्यानं, तस्याः श्रावस्त्या नगरमण्डले पुरपरिसरे, प्रासुके स्वाभाविकाङ्गतुकसत्त्वरहिते, शय्या वसतिस्तस्यां संस्तारको वस्त्रनिषद्या तस्मिन्, तत्र तदुद्याने वासमवस्थानमुपागतः प्राप्त इति ॥४॥

अह तेणेव कालेणं, धम्मतित्थयरे जिणे ।
भयवं वद्धमाणु त्ति, सव्वलोगंमि विस्सुए ॥५॥

व्याख्या–अथ तस्मिन्नेव काले धर्मतीर्थकरो जिनो भगवान् श्रीवर्द्धमान इति सर्वलोके विश्रुतोऽभूत् ॥५॥

तस्स लोगप्पईवस्स, आसि सीसे महायसे ।
भयवं गोयमो णामं, विज्जाचरणपारए ॥६॥

व्याख्या–तस्य लोकप्रदीपस्य शिष्यो महायशा भगवान् विद्याचरणपारगः गौतमगोत्रीय इन्द्रभूतिर्नामासीत् ॥६॥

बारसंगविऊ बुद्धे, सीससंघसमाउले ।
गामाणुगामं रीयंते, से वि सावत्थीमागए ॥७॥

व्याख्या–द्वादशाङ्गवित्, बुद्धो ज्ञाततत्त्वश्चतुर्ज्ञानी शिष्यसङ्घसमाकुलस्तत्र ग्रामानुग्रामं विहरन् स गौतमोऽपि श्रावस्त्यां समागतः ॥७॥

कोट्ठगं णाम उज्जाणं, तम्मि णगरमंडले ।
फासुए सेज्जसंथारे, तत्थ वासमुवागए ॥८॥

व्याख्या–तस्याः श्रावस्त्या नगर्या मण्डले परिसरे क्रोष्टुकं नाम उद्यानं वर्त्तते, तत्र प्रासुके शय्यासंस्तारके स वासमवस्थानमुपागतः प्राप्तः ॥८॥

केसीकुमारसमणे, गोयमे य महायसे ।
उभओ वि तत्थ विहरिंसु, अल्लीणा सुसमाहिया ॥९॥

व्याख्या–उभावपि केशीकुमारश्रमणो गौतमश्च महायशसौ आलीनौ मनो-वाक्कायगुप्तिष्वाश्रितौ, यद्वाऽऽलीनौ पृथगवस्थानेनाऽन्योऽन्यमाश्लिष्टौ, सुष्ठुसमाधिमन्तौ च तत्र श्रावस्त्यां व्यहार्ष्टाम् ॥९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

उभओ सीससंघाणं, संजयाणं तवस्सिणं ।
तत्थ चिंता समुप्पन्ना, गुणवंताण ताइणं ॥१०॥

व्याख्या—**उभयोः केशिगौतमयोः शिष्यसङ्घानां** शिष्यवृन्दानां **संयतानां तपस्विनां गुणवतां** ज्ञानादिवतां **तायिनां त्रायिणां** वा षड्कायानां **तत्र श्रावस्त्यां** वक्ष्यमाणा **चिन्ता समुत्पन्ना** परस्परविलोकनादिति शेषः ॥१०॥

यथा—

केरिसो वा इमो धम्मो, इमो धम्मो व केरिसो ।
आयारधम्मपणिही, इमा वा सा व केरिसी ॥११॥

व्याख्या—**कीदृशः** किंरूपो ? **वा** विकल्पे, 'इमो'त्ति **अयमस्य** सम्बन्धी, **धर्मो** महाव्रतानि, **अयं वा गौतम**गणभृच्छिष्याणां **धर्मः कीदृशः** ? आचारो वेषधारणादिर्बाह्यः क्रियाकलापः, स एव सुगतिधारणाद्धर्मः, प्राप्यते हि बाह्यक्रियामात्रादपि नवमग्रैवेयकं, ततस्तस्य प्रणिधिर्व्यवस्था, **आचारधर्मप्रणिधिरियं वा, स चा**चारः सर्वज्ञोक्तयोर्द्वयोर्धर्मयोरस्ति, अतस्तत्साधनानां च भेदे हेतुं ज्ञातुमिच्छामः ॥११॥

चाउज्जामो य जो धम्मो, जो इमो पंचसिक्खओ ।
देसिओ वद्धमाणेणं, पासेण य महामुणी ॥१२॥

व्याख्या—**चातुर्यामश्चतुर्महाव्रतैर्युक्तो यो धर्मो** देशितः **श्रीपार्श्वेन**, तथा **यश्चायं** पञ्च शिक्षाः प्राणातिपातादिविरत्याद्युपदेशा यस्मिन्नसौ **पञ्चशिक्षितो** धर्मो **वर्द्धमानेन देशितः**, सुब्व्यत्ययान्**महामुनिने**त्युभयोरपि विशेषणं, **महामुनीनां** प्रति वा, अन्योर्विशेषे किं कारणम् ? ॥१२॥

एवं धर्मविषये संशय उक्तः, अथाचारप्रणिधिसंशयमाह—

अचेलओ य जो धम्मो, जो इमो संतरुत्तरो ।
एककज्जपवन्नाणं, विसेसे किं नु कारणं ॥१३॥

व्याख्या—**अचेलकश्च यो धर्मो वर्द्धमानेनोक्तः, यश्चायं** सान्तराणि श्री**वीर**शिष्यापेक्षया कदाचिन्मानवर्णविशेषितानि, उत्तराणि च बहूमूल्यतया प्रधानानि वस्त्राणि यत्रासौ **सान्तरोत्तरो** धर्मः श्री**पार्श्वेनो**क्तः, **एकमुक्तिकार्यप्रवृत्तयोः पार्श्ववीरयोर्विशेषे** उक्तरूपे **किं नु** वितर्के **कारणं** ? एवं तेषां चिन्तोत्पत्तिर्ज्ञेया ॥१३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अह ते तत्थ सीसाणं, विण्णाय पवियक्खियं ।
समागमे कयमइ, उभओ केसिगोयमा ॥१४॥

व्याख्या—अथ तौ तत्र श्रावस्त्यां शिष्याणां निजनिजक्षुल्लकानां **प्रवितर्कितं** विकल्पं **विज्ञाय समागमे** मिलने **कृतमती उभौ केशिगौतमावभूताम् ॥१४॥**

गोयमो पडिरूवन्नू, सीससंघसमाउले ।
जिट्ठं कुलमवेक्खंतो, तिंदुयं वणमागओ ॥१५॥

व्याख्या—गौतमः प्रतिरूपं विनयं यथार्हत्प्रतिपत्तिरूपं जानातीति **प्रतिरूपज्ञः, शिष्यसङ्घसंयुक्तः, ज्येष्ठं** प्रथमव्रतभावितया **कुलं पार्श्वनाथस्य** सन्तानमपेक्ष्यमाणो गणयन् **तिन्दुकं वनं समागतः ॥१५॥**

केसीकुमारसमणे, गोयमं दिस्समागयं ।
पडिरूवं पडिवत्तिं, सम्मं संपडिवज्जई ॥१६॥

व्याख्या—अथ **केशीकुमारश्रमणो गौतममा**गतं **दृष्ट्वा प्रतिरूपामु**चितां **प्रतिपत्तिरूपा**मभ्यागतकर्त्तव्यरूपां **सम्यक् सम्प्रतिपद्यते** करोतीति ॥१६॥

यथा—

पलालं फासुयं तत्थ, पंचमं कुसतणाणि य ।
गोयमस्स निसिज्जाए, खिप्पं स पणामए ॥१७॥

व्याख्या—पलालं प्रासुकं निर्जीवं, **तत्र तिन्दुको**द्याने, वचनव्यत्ययात् **पञ्चमानि कुशतृणानि, चादन्यान्यपि** साधुयोग्यानि तृणानि, पञ्चमत्वं चैषां पलालभेदापेक्ष्यं, ते चामी-"**साली वीही कोद्दव रालगरन्ने तिणाइं च,**" [ ] **गौतमस्य निषद्यायै** उपवेशनार्थं **क्षिप्रं** तूर्णं स **प्रणामते**ऽर्पयति ॥१७॥

केसीकुमारसमणो, गोयमे य महायसे ।
उभओ निसन्ना सोहंति, चंदसुरसमप्पभा ॥१८॥

व्याख्या—तदा **केशीकुमारश्रमणश्च पुनर्गौतमो महायशाः,** एतावुभौ तत्र **तिन्दुको**द्याने **निषण्णौ चन्द्रसूर्यसमप्रभौ शोभेते ॥१८॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तदा च—

समागया बहू तत्थ, पासंडा कोउगासिया ।
गिहत्थाण अणेगाओ, साहस्सीओ समागया ॥१९॥

व्याख्या—समागता मिलितास्तत्र बहवः **पाखण्डाः** पाखण्डव्रतयोगात् पाखण्डाः शेषव्रतिनः **कौतुकाश्रिताः** (पाठान्तरे—**'कोउगा मिया' कौतुकान्मृगा** इव, अज्ञानत्वात्, प्राकृतत्वाद्**मितकौतुका** वा) तथैव **गृहस्थानामनेकाः सहस्रयः** सूत्रत्वात् सहस्राणि **समागताः** ॥१९॥

देवदाणवगंधव्वा, जक्खरक्खसकिन्नरा ।
अदिस्साणं य भूयाणं, तत्थ आसी समागमो ॥२०॥

व्याख्या—देवा वैमानिकाः, **दानवा** भवनपतयः, [**गन्धर्वाः**] **यक्षा राक्षसाः किन्नरास्तत्र** समागताः, च पुनरदृश्यानां **भूतानां तत्र समागमः** सङ्गम **आसीत्** ॥२०॥

अथ तयोर्जल्पः—

पुच्छामि ते महाभाग, केसी गोयममब्बवी ।
तओ केसीं बुवंतं तु, गोयमो इणमब्बवी ॥२१॥

व्याख्या—पृच्छामि 'ते' **त्वां हे महाभाग** ! अतिशयाचिन्त्यशक्ते ! **इति केशी गौतममब्रवीत्, ततः केशिं** 'तु' **पुनर्बुवन्तं गौतम इदमब्रवीत्** ॥२१॥

पुच्छ भंते जहिच्छंते, केसिं गोयममब्बवी ।
तओ केसी अणुण्णाओ गोयमं इणमब्बवी ॥२२॥

व्याख्या—हे भदन्त ! हे पूज्य ! 'ते' **तव यथेच्छं** यत्तव चित्तेऽवभासते तत्त्वं **पृच्छ**! इति **केशिकुमारं** प्रति **गौतमोऽब्रवीत्** । अत्र 'गौतमम्' इति प्राकृतत्वात् प्रथमास्थाने द्वितीया । **ततो** गौतमवाक्यादनन्तरं **केशिकुमारो** गौतमेनानुज्ञातः सन् **गौतमं** प्रति **इदं** वक्ष्यमाणं वचनमब्रवीत् ॥२२॥

(सिक्खावएसु[1] १ लिंगे य २, सत्तूणं च पराजए ३ ।
पासावगत्तणे चेव ४, तंतुद्धरणबंधणे ५ ॥१॥ [उत्त. नि./गा.४५२]
अगणीनिव्वावणे चेव ६, तहा दुट्ठस्स निग्गहे ७ ।
तहा पहपरिण्णा य ८, महासोयनिवारणे ९ ॥२॥ [उत्त. नि./गा.४५३]

१. सिक्खावए अ ॥ उत्त० नि० गा० ४५२ मध्ये । सम्पा.

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

संसारपारगमणे १०, तमस्स य विघाडणे ११ ।
ठाणोवसंपया चेव १२, एवं बारससुक्कमे ॥३॥ [उत्त. नि./गा.४५४]

व्याख्या—तत्र केशिना शिक्षापदाख्यव्रत १ लिङ्ग २ शत्रुजय ३ पाशकर्त्तन ४ वल्लीतरूत्खनन ५ अग्निविध्यापन ६ दुष्टाश्वनिग्रह ७ मार्गपरिज्ञा ८ महाश्रोतोवारण ९ संसारपारगमन १० तमोविघटन ११ स्थान १२ द्वाराणि द्वादश पृष्टानि)

तत्राद्याद्वारपृच्छा—

चाउज्जामो य जो धम्मो, जो इमो पंचसिक्खिओ ।
देसिओ वद्धमाणेणं, पासेण य महामुणी ॥२३॥

व्याख्या—हे गौतम ! **पार्श्वेण महामुनिना** तीर्थकरेण **यश्चातुर्यामश्चातुर्व्रति**कोऽयमस्माकं **धर्म** उपदिष्टः, पुनर्योऽयं **धर्मो वर्द्धमानेन पञ्चशिक्षितः** पञ्चमहाव्रतात्मको **दिष्टः** कथितः ॥२३॥

एककज्जपवण्णाणं, विसेसे किं नु कारणं ।
धम्मे दुविहे मेहावी, कहं विप्पच्चओ ण ते ॥२४॥

व्याख्या—**एककार्ये** मोक्षसाधनरूपे **प्रपन्नयोः** श्री**पार्श्वमहावीरयोर्विशेषे** भेदे **किं नु कारणं** ? **हे मेधाविन्** ! एवं **द्विविधे धर्मे तव कथं विप्रत्ययः** संदेहो **न** भवति ? ॥२४॥

तओ केसिं बुवंतं तु, गोयमो इणमब्बवी ।
पण्णा समिक्खए धम्मंतत्तं तत्तविणिच्छयं ॥२५॥

व्याख्या—**ततः केशिं ब्रुवन्तमेव,** अनेनादरातिशय आवेदितः, **गौतमोऽब्रवीत्**, किं तदब्रवीदित्याह-**प्रज्ञा** बुद्धिः **समीक्षते** सम्यक् पश्यति, किं पश्यतीत्याह-'धम्मंतत्तं,' बिन्दुरलाक्षणिकः, ततो **धर्मतत्त्वं** धर्मपरमार्थं, **तत्त्वानां** जीवादीनां **विनिश्चयो** यस्मिंस्तथाविधं धर्मतत्त्वं **प्रज्ञा समीक्षते,** न केवलं वाक्यश्रवणादेवार्थनिश्चयः स्यात्, किं तु प्रज्ञातः ॥२५॥

पुरिमा उज्जुजडा उ, वक्कजडा य पच्छिमा ।
मज्झिमा उज्जुपन्ना उ तेण धम्मो दुहा कओ ॥२६॥

व्याख्या—**पूर्वे** प्रथमतीर्थकृत्साधव ऋजवश्च प्राञ्जलतया, जडाश्च त एव दुःप्रतिपाद्यतया **ऋजुजडाः, तुः** यस्मादर्थे, **वक्राश्च** वक्रबोधत्वात् स्वाऽनेककुविकल्पतो-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ऽर्थप्रतिपत्तेरक्षमत्वात्, **जडाश्च, पश्चिमाः** पश्चिमार्हन्मुनयः, पुन**र्मध्यमा** मध्यमार्हतां मुनयः **ऋजुप्रज्ञाः**, ऋजवश्च ते प्रकर्षेण जानन्ति, सुखेनोक्तमर्थं ग्राहयितुं शक्यन्ते इति ऋजुप्रज्ञाः सन्ति, **तेन** हेतुना धर्मो **द्विभेदः कृतः**, एककार्यप्रतिपन्नत्वेऽपि ॥२६॥

यदि नाम पूर्वादिसाधूनामीदृशत्वं तथापि कथमेतद् द्वैविध्यमित्याह–

पुरिमाणं दुव्विसोज्झो उ, चरिमाणं दुरणुपालए ।
कप्पो मज्झिमगाणं तु, सुविसोज्झो सुपालए ॥२७॥

व्याख्या–पूर्वेषां प्रथमजिनमुनीनां दुःखेन विशोध्यो निर्मलतां नेतुं शक्यो **दुर्विशोध्यः** कल्पः, ऋजुत्वात् कल्पाऽकल्पविधेरज्ञानात्, तुशब्द उत्तरेभ्यो गुणवत्त्वं द्योतयति, **चरमाणां** चरमजिनयतीनां दुःखेनानुपाल्यते इति **दुरनुपालकः कल्पो** यति-क्रियामार्गः, न हि ते वक्रत्वेन कुविकल्पाकुलचित्तत्वात्कथञ्चिज्जानाना अपि यथावदनुष्ठातुमीशन्ते, **तु** पुन**र्मध्यमगानां** द्वाविंशतितीर्थकरसाधूनां कल्पः **सुविशोध्यः सुपालकश्च,** सुखेन निर्मलीकर्तुं शक्यः, यतस्ते हि ऋजुप्राज्ञाः स्तोकेनोक्तेन बहुज्ञाः, अतः श्री**पार्श्वेन** चातुर्यामो धर्म उक्तः, **महावीरेण** च पञ्चव्रतात्मक उपदिष्ट इति ॥२७॥

इत्थं **गौतमे**नोक्ते **केशि**राह–

साहु गोयम पण्णा ते, छिन्नो मे संसओ इमे ।
अन्नो वि संसओ मज्झं, तं मे कहसु गोयमा ॥२८॥

व्याख्या–साधु शोभना हे **गौतम** ! **प्रज्ञा** बुद्धिस्ते, **छिन्नस्त्वया मेऽयं संशयः,** शिष्यापेक्षं चैतत्, न तु तस्य चतुर्ज्ञानवतः संशयः, **अन्योऽपि वक्ष्यमाणः संशयो मम** विद्यते, **तं** तद्विषयमर्थं **मे कथय हे गौतम** ! ॥२८॥

उक्तं व्रतद्वारं, अथ लिङ्गद्वारमाह–

अचेलओ य जो धम्मो, जो इमो संतरुत्तरो ।
देसिओ वद्धमाणेणं, पासेण य महायसा ॥२९॥

एककज्जपवण्णाणं, विसेसे किं नु कारणं ।
लिंगे दुविहे मेहावी, कहं विप्पच्चओ न ते ॥३०॥

व्याख्या–श्रीवर्द्धमानेन योऽयमचेलकः प्रमाणोपेतजीर्णप्रायवस्त्रधारणात्मकः साध्वाचारः **कथितः**, पुनर्महायशसा **पार्श्वेन** च **योऽयं सान्तरुत्तरः** पञ्चवर्णबहुमूल्य-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

प्रमाणरहितवस्त्रधारणात्मको धर्मः **प्रदर्शितः**, ततो **हे मेधाविन्** ! **एककार्यप्रतिपन्नयोः** श्री**वीरपार्श्वयोर्विशेषे** भेदे **किं कारणं** को हेतुः ? हे **गौतम** ! एवं **द्विविधे लिङ्गे** सति **किं तव संशयो न** भवति ? ॥२९॥३०॥

केसिं एवं बुवाणं तु, गोयमो इणमब्बवी ।
विण्णाणेण समागम्म, धम्मसाहणमिच्छियं ॥३१॥

व्याख्या—**तु** पुनर्**गौतम एवं ब्रुवाणं केशिकुमारं** मुनिं प्रति**दमब्रवीत्**, हे **केशि**मुने ! **विज्ञानेन** केवलेन **समागम्य** ज्ञात्वा यद्यस्योचितं तत्तथैव **धर्मसाधनं** धर्मोपकरणं वर्षाकल्पादि **इष्टम**नुमतं **पार्श्ववीर**जिनाभ्यां, तत्र श्री**वीरे**ण शिष्याणां, रक्तादिवस्त्रं वक्रजडत्वेन रञ्जनादिषु प्रवृत्तिरेषां दुर्निवारैव स्यात्, इति नानुज्ञातं, तथा **पार्श्वे**ण च शिष्यास्तु न रञ्जनाद्यारम्भकारका इति रक्ताद्यप्यनुज्ञातम् ॥३१॥

पच्चयत्थं च लोगस्स, नाणाविहविकप्पणं ।
जत्तत्थं गहणत्थं च, लोगे लिंगप्पओयणं ॥३२॥

व्याख्या—**प्रत्ययार्थं च,** अमी व्रतिन इति प्रतीत्यर्थं **लोकस्य,** अन्यथा यथेष्टवेषमादाय विडम्बकादयोऽपि वयं व्रतिन इति ब्रुवीरन्, ततश्च व्रतिष्वप्यप्रतीतिः स्यात्, अतो **नानाविधविकल्पनं** नानाप्रकारेणोपकरणपरिकल्पनं, नानाविधं वर्षाकल्पाद्युपकरणं यतिष्वेव स्यादिति कथं न तत्प्रत्ययहेतुः ? तथा **यात्रा** संयमनिर्वाहस्**तदर्थं,** यतो वर्षाकल्पादिकं विना वृष्ट्यादौ संयमबाधैव स्यात् । तथा **ग्रहणं** ज्ञानं **तदर्थं च,** कथञ्चिच्चित्तविप्लवोत्पत्तावपि मुनिर्ज्ञानं गृह्णातु, यथाऽहं व्रतीत्येतदर्थं **लोके लिङ्गस्य** वेषधारणस्य **प्रयोजनं** प्रवर्त्तनं लिङ्गप्रयोजनमस्तीति ज्ञेयम् ॥३२॥

अह भवे पइण्णा उ, मुक्खसब्भूयसाहणे ।
नाणं च दंसणं चेव, चरित्तं चेव निच्छयं ॥३३॥

व्याख्या—**अथ** पुनर्**भवेदेवं प्रतिज्ञा पार्श्ववीरयोः, मोक्षसद्भूतानि** सत्यानि **साधनानि, ज्ञानं** ह्यवबोधो, **दर्शनं** तत्वरुचिः, **चारित्रं** सर्वसावद्यविरतिः, एवं ज्ञानाद्येव मुक्तिसाधनं न तु लिङ्गं, **भरतादी**नां लिङ्गं विनापि केवलोत्पत्तिः, इति **निश्चये** निश्चयनये विचार्यं । कोऽर्थः ? निश्चयो न लिङ्गं प्रत्याद्रियते, व्यवहारस्तदिच्छति ॥३३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

साहु गोयम पण्णा ते, छिन्नो मे संसओ इमो ।
अन्नो वि संसओ मज्झं, तं मे कहसु गोयमा ॥३४॥

व्याख्या—प्राग्वत् ।

उक्तं द्वितीयं लिङ्गद्वारं, अथ तृतीयं शत्रुजयद्वारमाह—

अणेगाण सहस्साणं, मज्झे चिट्ठसि गोयमा ।
ते य ते अभिगच्छंति, कहं ते णिज्जिया तुमे ॥३५॥

व्याख्या—हे **गौतम** ! त्वम**नेकेषां** बहूनां **सहस्राणां** शत्रूणां **मध्ये** तिष्ठसि, **ते चा**नेकसहस्रसङ्ख्याः शत्रव**स्ते** इति त्वामाश्रित्य**ाभिगच्छन्ति** धावन्ति जेतुं, **कथं ते** शत्रवो **निर्जितास्त्वया** ? ॥३५॥

इत्थं **केश्युक्ते गौतमः** प्राह—

एगे जिए जिया पंच, पंच जिए जिया दस ।
दसहा उ जिणित्ताणं, सव्वसत्तू जिणामिहं ॥३६॥

व्याख्या—एकस्मिन् शत्रौ जिते जिताः पञ्च, पञ्चसु च जितेषु जिता दश, दशधा दशप्रकारान् तु पुनः शत्रून् **जित्वा सर्वशत्रूंस्तदुत्तरोत्तरभेदांश्चनेकसहस्रसङ्ख्यान्** जयाम्यहम् ॥३५॥

सत्तू य इइ के वुत्ते, केसी गोयममब्बवी ।
तओ केसिं बुवंतं तु, गोयमो इणमब्बवी ॥३७॥

व्याख्या—चः पूर्त्तौ, **शत्रुरयं क उक्तः** ? इति **केशिगौतममब्रवीत्** , न तु यदसौ शत्रूनपि न वेत्तीति कथं तन्मध्यगतस्त्वं तिष्ठसीत्यादिकमनेन यत् प्रागुक्तं । अन्य जनबोधार्थं सर्वा अपि ज्ञपृच्छा एताः, **ततो ब्रुवन्तं केशिं** प्रति तु पुन**र्गौतम इदमब्रवीत्** ॥३७॥

एगप्पा अजिए सत्तू, कसाया इंदियाणि य ।
ते जिणित्ता जहानायं, विहरामि अहं मुणी ॥३८॥

व्याख्या—एक आत्मा चित्तं वा, तदभेदोपचारात्, **अजितो**ऽनेकाऽनर्थाप्तिहेतुत्वा**च्छत्रुः**, अतस्तस्मिन्नेकस्मिन्नेव जिते सति जिताः पञ्च, एक आत्मा चत्वारः **कषायाश्च** क्रोधाद्या, एवं पञ्चसु जितेषु दश जिताः, त एव पञ्च **इन्द्रियाणि** स्पर्शनादीनि, **चा**न्नोकषायाद्याः कषायाद्युत्तरोत्तरभेदाश्च जिताः, त एव सर्वेऽप्यजिताः शत्रवः, अतस्**तान्**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

शत्रून् **जित्वा** यथान्यायं यथोक्तनीत्यनुक्रमेण **विहरामि**, तन्मध्येऽपि तिष्ठन्नप्रतिबद्धविहारितया, **अहमि**त्यात्मनिर्देशो, **मुने** इति च **केश्याह्वा**नम् ॥३८॥

केशिराह–

साहु गोयम पण्णा ते छिन्नो मे संसओ इमो ।
अन्नो वि संसओ मज्झं तं मे कहसु गोयमा ॥३९॥

व्याख्या–प्राग्वत् ।

इत्युक्तं तृतीयं शत्रुजयद्वारं, अथ तुर्यं पाशकर्त्तनद्वारमाह–

दीसंति बहवे लोए, पासबद्धा सरीरिणो ।
मुक्कपासो लहुब्भूओ, कहं तं विहरसि मुणी ॥४०॥

व्याख्या–**केशि**रवदति हे **गौतम**मुने ! **लोके** संसारे बहवः **शरीरिणः पाशबद्धा** दृश्यन्ते, त्वं तु **मुक्तपाशो**ऽत एव **लघूभूतो** वायुवत् सर्वत्राऽप्रतिबद्धतया कथं विहरसि ? ॥४०॥

गौतमः प्राह–

ते पासे सव्वसो छित्ता, निहंतूणमुवायओ ।
मुक्कपासो लहुब्भूओ विहरामि अहं मुणी ॥४१॥

व्याख्या–हे **केशि**मुने ! **तान् पाशान् सर्वशः** सर्वानपि **छित्वा**, तथै**वोपायतो** निस्सङ्गादिसद्भूतभावभ्यासा**न्निहत्य** पुनर्बन्धाऽभावो यथा स्यात्तथा विनाश्य, पश्चा**न्मुक्तपाशो** बन्धरहितो **लघूभूतः** सन्नहमप्रतिबद्धविहारितया विहरामि ॥४१॥

पासा य इइ के वुत्ता, केसी गोयममब्बवी ।
तओ केसिं बुवंतं तु, गोयमो इणमब्बवी ॥४२॥

व्याख्या–पुनः **केशिर्गौतमं प्रत्यब्रवीत्**, हे **गौतम** ! **पाशाश्च इति के** त्वयोक्ताः ? **तत** इति **ब्रुवन्तं केशिं** प्रति **गौतम इदमुत्तरमब्रीत्** ॥४२॥

रागद्दोसादओ तिव्वा, नेहपासा भयंकरा ।
ते छिंदित्तु जहानायं, विहरामि जहक्कमं ॥४३॥

व्याख्या–**रागद्वेषादयः**, आदेर्मोहादयस्**तीव्राः स्नेहाः** पुत्रकलत्रादि सम्बन्धास्ते पारवश्यहेतुया **पाशा** उक्ताः, अति गाढत्वाद्रागान्तर्गतत्वेऽप्येषां पृथक्कथनं, [**भयङ्कराः** अनर्थहेतुतया त्रासोत्पादका] **यथाक्रमं**, क्रमो यतिविहितचरणकरणानुरूपाचारस्तदनतिक्रमेण, **यथान्यायं** वीतरागोपदेशेन **तान्** पाशान् **छित्वा विहरामि** साधुमार्गे ॥४३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

केशिराह–

साहु गोयम पण्णा ते, छिन्नो मे संसओ इमो ।
अन्नो वि संसओ मज्झं, तं मे कहसु गोयमा ॥४४॥

व्याख्या–प्राग्वत् ।

उक्तं तुर्यं पाशद्वारं, अथ पञ्चमं लतोत्खननमाह–

अंतोहिययसंभूया, लया चिट्ठइ गोयमा ।
फलेइ विसभक्खीणं, सा उ उद्धरिया कहं ॥४५॥

व्याख्या–हे **गौतम** ! **अन्तर्हृदयं** मनोमध्ये **सम्भूता लता तिष्ठति**, या **फलति विषभक्ष्याणि** फलानि, विषवद्भक्ष्यन्ते इति विषभक्ष्याणि, पर्यन्तदारुणत्वाद्विषोपमानि फलानि, **सा** वल्ली **तु** त्वया **कथमुद्धृता** ? ॥४५॥

गौतमः प्राह–

तं लयं सव्वसो छित्ता, उद्धरित्ता समूलियं ।
विहरामि जहानायं, मुक्को मि विसभक्खणा ॥४६॥

व्याख्या–**तां लतां सर्वतश्छित्त्वा** खण्डीकृत्योद्धृत्योत्पाट्य **समूलिकां** राग-द्वेषादिमूलयुतां **यथान्यायं विहरामि, मुक्तोऽस्मि**, सुव्व्यत्ययाद्विषभक्षणाद्विषफलाहारोपमक्लिष्टकर्मणः ॥४६॥

लया य इइ का वुत्ता, केसी गोयममब्बवी ।
केसिमेवं बुवंतं तु, गोयमो इणमब्बवी ॥४७॥

व्याख्या–हे **गौतम** ! **लता इति का उक्ता** ? एवं **केशिगौतममब्रवीत्**, अथेति **ब्रुवन्तं** केशिं प्रति **गौतम इदमब्रवीत्** ॥४७॥

भवतण्हा लया वुत्ता, भीमा भीमफलोदया ।
तमुद्धित्तु जहानायं, विहरामि जहक्कमं ॥४८॥

व्याख्या–भवे तृष्णा लोभात्मका **भवतृष्णा, भीमा** भयदा स्वरूपतः, तथा **भीमफलोदया** कार्यतश्च भीमो दुःखहेतुतया फलानां क्लिष्टकर्मणामुदयो विपाको यस्याः सा, एवंविधा सा **लता उक्ता** । **तां** तृष्णावल्लीं **यथान्यायमुद्धृत्य** मूलोन्मूलीकृत्य **यथाक्रमं विहारं करोमि** ॥४८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

केशिरुवाच—

साहु गोयम पण्णा ते, छिन्नो मे संसओ इमो ।
अन्नो वि संसओ मज्झं, तं मे कह सुगोयमा ॥४९॥

व्याख्या—प्राग्वत् ।

इत्युक्तं पञ्चमं लतोत्खननं, अथ षष्ठमग्निनिर्वापणमाह—

संपज्जलिया घोरा, अग्गी चिट्ठई गोयमा ।
जे डहंति सरीरत्था, कहं विज्झाविया तुमे ॥५०॥

व्याख्या—हे गौतम ! **सम्प्रज्वलिता घोरा** आर्षत्वादग्नयः संसारे तिष्ठन्ति, **ये दहन्ति शरीरस्था** आत्मानं परितापकारितया, तेऽग्नयः **कथं त्वया विध्यापिताः** ? ॥५०॥

गौतम आह—

महामेहप्पसूत्ताओ (प्पभूयाओ) गिज्झ वारि जलुत्तमं ।
सिंचामि सययं ते उ, सित्ता नेव डहंति मे ॥५१॥

व्याख्या—**महामेघात् प्रसूतमुत्पन्नं**, तस्मान्महाश्रोतसो **गृहीत्वा वारि जलोत्तमं** पानीयेषूत्कृष्टं, तेन **तानग्नीन् सततं सिञ्चामि**, एवं च **सिक्तास्ते**ऽग्नयो **मां नैव दहन्ति** ॥५१॥

अग्गी य इइ के वुत्ते, केसी गोयममब्बवी ।
तओ केसिं बुवंतं तु, गोयमो इणमब्बवी ॥५२॥

व्याख्या—तदा **केशिश्रमणो गौतमं प्रत्यब्रवीत्, हे गौतम ! तेऽग्नय इति के उक्ताः** ? तत इत्युक्तवन्तं **केशिं** प्रति **गौतम इदमब्रवीत्** ॥५२॥

कसाया अग्गिणो वुत्ता, सुयसीलतवो जलं ।
सुयधाराभिहया संता, भिन्ना न य डहंति मे ॥५३॥

व्याख्या—कषाया अग्नयः परितापकाश्चोक्ता जिनैः, श्रुतं चेहोपचारात् कषायोपशमहेतवः श्रुतान्तर्गतोपदेशाः, शीलं च, महाव्रतानि, तपश्च, **श्रुतशीलतपः**, तज्जलं, महामेघस्तीर्थकृत्, महाश्रोतश्चागमः, उक्तमर्थमुपसंहरति—श्रुतस्य शीलतपसोश्च धारा इव धाराः, आक्रोशहननतर्जनधर्मभ्रंशेष्वधिकाधिकाः कर्मक्षयलाभभावनाः, ताभिरभिहतास्ताडिताः **श्रुतधाराभिहताः सन्तो**ऽग्नयो **भिन्नास्त**दभिघातेन लवमात्रीकृता **नैव दहन्ति** माम् ॥५३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तत् श्रुत्वा **केशिरुवाच**–

साहु गोयम पण्णा ते, छिन्नो मे संसओ इमो ।
अन्नो वि संसओ मज्झं, तं मे कहसु गोयमा ॥५४॥

व्याख्या–प्राग्वत् ।

उक्तं षष्ठमग्निनिर्वापणं, सप्तमाश्वदमनमाह–

अयं साहसिओ भीमो, दुट्ठस्सो परिधावइ ।
जं सि गोयम आरूढो, कहं तेण न हीरसी ॥५५॥

व्याख्या–**अयं** प्रत्यक्षः सहसाऽसमीक्ष्य प्रवर्त्तते इति **साहसिको भीमो** भयङ्करो **दुष्टाश्वः परिधावति, यं** दुष्टाश्वं प्रति **असि** भवसि त्वमारूढः, यदि वा 'जंसि'ति यस्मिन्नश्वे त्वं हे **गौतम** ! **आरूढः, कथं** इति प्रश्ने [**तेन** इति दुष्टाश्वेन] **न ह्रियसे** ? नाऽमार्गं नीयसे ? ॥५५॥

गौतमः प्राह–

पहावंतं णिगिण्हामि, सुयरस्सीसमाहिया(यं) ।
न मे गच्छइ उम्मग्गं, मग्गं च पडिवज्जइ ॥५६॥

व्याख्या–**प्रधावन्तमुन्मार्गाभिमुखं** यान्तं **निगृह्णामि श्रुतरश्मिना समाहितः**, [बद्धः **श्रुतरश्मिसमाहितस्तम्**] ततोऽसौ **मे** दुष्टाश्वोऽपि निग्रहणयोग्यो जात्याश्वप्राय एवोन्मार्गे **न गच्छति, मार्गं च प्रतिपद्यते** ॥५६॥

केशिराह–

अस्से य इति के वुत्ते, केसी गोयममब्बवी ।
तओ केसिं बुवंतं तु, गोयमो इणमब्बवी ॥५७॥

व्याख्या–**हे गौतम ! अश्वश्च इति क उक्तः** ? एवं **केशिगौतमं** प्रत्यब्रवीत् । **तत** इति **ब्रुवन्तं केशिं** प्रति **गौतम इदमुत्तरमब्रवीत्** ॥५७॥

मणो साहसिओ भीमो, दुट्ठस्सो परिधावइ ।
तं सम्मं तु णिगिण्हामि, धम्मसिक्खाए कंथगं ॥५८॥

व्याख्या–**मन** एव **साहसिको भीमो दुष्टश्वः प्रधावति, तं सम्यग्धर्मशिक्षया कन्थकं** प्रधानाश्वमिव **निगृह्णामि** वशीकरोमीति ॥५८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

केशिराह–

साहु गोयम पण्णा ते, छिन्नो मे संसओ इमो ।
अन्नो वि संसओ मज्झं, तं मे कहसु गोयमा ॥५९॥

व्याख्या–प्राग्वत् ।

इत्युक्तं सप्तममश्वदमनं, अथाष्टमं पथपरिज्ञानमाह–

कुप्पहा बहवो लोए, जेसिं नासंति जंतवो ।
अद्धाणे कह वट्टंतो, तं ण णाससि गोयमा ॥६०॥

व्याख्या–**हे गौतम** ! कुत्सिताः पन्थानः **कुपथा** असन्मार्गा **बहवो लोके** जगति वर्तन्ते, **यैः कुपथैर्नश्यन्ति** सन्मार्गाद् भ्रस्यन्ति **जन्तवः**, ततश्च**ाध्वनि** सन्मार्गे **वर्त्तमानस्त्वं** कथं **न नश्यसि** ? कथं सत्पथान्न च्यवसि ? ॥६०॥

गौतमः प्राह–

जे य मग्गेण गच्छंति, जे य उम्मग्गपट्ठिया ।
ते सव्वे विइया मज्झं, तो ण णस्सामिहं मुणी ॥६१॥

व्याख्या–हे **केशिमुने** ! **ये च मार्गेण** वीतरागप्रणीतधर्माध्वना **गच्छन्ति, ये चोन्मार्गं प्रति प्रस्थिता** तद्विपरीताध्वनि गतास्ते **सर्वे विदिता मम, ततः** पथाऽपथ-परिज्ञानतो न **नश्याम्यहम्** ॥६१॥

मग्गे य इइ के वुत्ते, केसी गोयममब्बवी ।
तओ केसिं वुवंतं तु, गोयमो इणमब्बवी ॥६२॥

व्याख्या–**मार्गश्च** सन्मार्गकुमार्गात्मकश्च **इति क उक्तः** ? एवं **केशिगौतमं** प्रत्य-**ब्रवीत्**, **तत** एवं ब्रुवन्तं **केशिं** प्रति **गौतम इदमब्रवीत्** ॥६२॥

कुप्पवयणपासंडी, सव्वे उम्मग्गपट्ठिया ।
सम्मग्गं तु जिणक्खायं, एस मग्गो हि उत्तमो ॥६३॥

व्याख्या–**कुप्रवचनेषु कापिलमतादिषु पाखण्डिनो** ये व्रतिनस्ते **सर्वे उन्मार्ग-प्रस्थिताः**, अनेन कुप्रवचनानि कुपथा इत्युक्तं, **सन्मार्गं पुनर्विद्याज्जिनाख्यातं, एष मार्गो हिर्यस्मादुत्तमः** ॥६३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

केशिः प्राह—

साहु गोयम पण्णा ते, छिन्नो मे संसओ इमो ।
अन्नो वि संसओ मज्झं, तं मे कहसु गोयमा ॥६४॥

व्याख्या—प्राग्वत् ।

इत्युक्तमष्टमं मार्गद्वारं, नवमं महाश्रोतोनिवारणमाह—

महाउदगवेगेणं, वुह्यमाणाण पाणिणं ।
सरणं गई पइट्ठा च, दीवं कं मण्णसी मुणी ॥६५॥

व्याख्या—महदुदकं यत्र तन्**महोदकं** महाश्रोतस्**तस्य वेगस्तेनोह्यमानानां प्राणिनां शरणं** तन्निवारणक्षममत एव **गतिं** गम्यमानत्वाद् गतिं स्थानरूपं, तत एव **प्रतिष्ठां** स्थिर-स्थानहेतुं, **चः** समुच्चये, **द्वीपं कं मन्यसे** ? **मुने** ! अस्त्येव कश्चित्तादृशो द्वीपः ? इति प्रश्नयितुराशयः ॥६५॥

गौतमः प्राह—

अत्थि एगो महादीवो, वारिमज्झे महालओ ।
महाउदगवेगस्स, गई तत्थ न विज्जइ ॥६६॥

व्याख्या—**अस्त्येको महाद्वीपो वारिमध्ये**, अब्ध्यन्तर्वर्त्ती अन्तर्द्वीप इत्यर्थः, **महालयरूप** उच्चैस्त्वेन विस्तीर्णतया च, **तत्र** महाद्वीपे च **महोदकवेगस्य** वातैः क्षुभित-स्यापि जलप्रवाहस्य **गतिर्**गमनमपि **न विद्यते**, तर्हि प्लावनस्य तु का वार्तेति संटङ्कः ॥६६॥

दीवे य इति के वुत्ते, केसी गोयममब्बवी ।
तओ केसिं बुवंतं तु, गोयमो इणमब्बवी ॥६७॥

व्याख्या—**हे गौतम ! द्वीपश्च इति** त्वया **क उक्तः** ? एवं **केशिगौतमं** प्रत्य-**ब्रवीत्**, **तत** इति ब्रुवन्तं **केशिं** प्रति **गौतम इदमुत्तरमब्रवीत्** ॥६७॥

जरामरणवेगेणं, वुज्झमाणाण पाणिणं ।
धम्मो दीवो पइट्ठा य, गइ सरणमुत्तमं ॥६८॥

व्याख्या—**जरामरण** एव निरन्तरप्रवाहप्रवृत्ततया **वेग** उदकान्वितमहाश्रोतसः, **तेनोह्यमानानाम**पराऽपरपर्यायनयनेन **प्राणिनां धर्मः** श्रुतधर्मादिः, स एव **द्वीपो** भवाब्धि-मध्यवर्त्ती, मुक्तिहेतुत्वाज्जरामरणवेगस्याप्यगम्यः, विवेकिनश्च तमाश्रित्य तिष्ठन्तीति

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

प्रतिष्ठारूपः, तथा **गतिर्गमनयोग्यत्वात्**, **शरणं** चोत्तमं सर्वसांसारिकक्लेशमोचनात्मकत्वात्। इह द्वीपमात्रप्रश्नोक्तावपि शेषोक्तिः सादृश्यात्तत्प्रश्ने ज्ञेया ॥६८॥

केशिः प्राह—

साहु गोयम पण्णा ते, छिन्नो मे संसओ इमो ।
अन्नो वि संसओ मज्झं, तं मे कहसु गोयमा ॥६९॥

व्याख्या—प्राग्वत् ।

इत्युक्तं नवमं द्वीपद्वारं, अथ दशमं भवतरणप्रश्नमाह—

अन्नवंसि महोघंसि, णावा विपरिधावइ ।
जं सि गोयममारूढो, कहं पारं गमिस्ससि ॥७०॥

व्याख्या—**हे गौतम** ! **अर्णवे** समुद्रे, **महौघे** बृहत्कल्लोलोल्ललितजलप्रवाहोपेते, **नौर्विपरिधावति** विशेषणे समन्तादितस्ततोऽनेकाऽनर्थसार्थवीचिभिरालोड्यमाना वेगाद्गच्छति, **यां** नावं प्रति **असि** भवसि त्वम**ारूढः**, अथवा **यस्यां** नौकाया**मारूढस्त्वं कथं पारं** तन्महार्णवस्य **गमिष्यसि** ? न कथञ्चिदिति प्रष्टुराशयः ॥७०॥

गौतमः प्राह—

जा उ आस्सावि[1]णी णावा, ण सा पारस्स गामिणी ।
जा णिरस्सावि[1]णी णावा, सा उ पारस्स गामिणी ॥७१॥

व्याख्या—**या** तुः पूर्त्तौ, **आस्रावि[1]णी** जलसङ्ग्राहिणी (पाठान्तरे—'सहस्सावि[1]णी' सहस्रादिभिर्जलप्रवेशान्वितैः सन्धिभिर्वर्त्तते इति) **सा** नौः **पारस्याब्धेर्न गामिनी** । **या** पुनर्**निरास्रावि[1]णी नौः** सा तु पुनरब्धेः **पारगामिनी** वर्त्तते, ततोऽहं तां निरास्रावि[1]णीं नावमारूढोऽतः पारगाम्येव भविष्यामीति भावः ॥७१॥

केशिः—

नावा य इइ का वुत्ता, केसी गोयममब्बवी ।
तओ केसिं बुवंतं तु, गोयमो इणमब्बवी ॥७२॥

व्याख्या—**हे गौतम** ! **नौरिति का उक्ता** ? एवं **केशिगौतमं प्रत्यब्रवीत्**, तत इति **ब्रुवन्तं केशिं** प्रति **गौतम इदमब्रवीत्** ॥७२॥

---

१. पाठान्तरतः साश्राविणी वा - सहाश्राविभिः-जलप्रवेशान्वितैः प्रकमात् सन्धिभिर्वर्त्तत इति कृत्वा। उत्त० बृहट्टीकायाम् ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सरीरमाहु णावि त्ति, जीवो वुच्चइ नाविओ ।
संसारो अण्णवो वुत्तो, जं तरंति महेसिणो ॥७३॥

व्याख्या—शरीरमाहुर्नौरिति, **नाविकश्च** तस्यैव सदनुष्ठानहेतुतया भावाब्धितारकत्वा-ज्जीव **उच्यते**ऽर्हद्भिः, **संसारश्चायमर्णव उक्तः**, **यं तरन्ति महदेषिणो महर्षयो** वा ॥७३॥

केशिराह—

साहु गोयम पण्णा ते, छिन्नो मे संसओ इमो ।
अन्नो वि संसओ मज्झं, तं मे कहसु गोयमा ॥७४॥

व्याख्या—प्राग्वत् ॥७४॥

इत्युक्तं दशमं भवतरणद्वारं, अथैकदशस्तमोनाशकप्रश्नः—

अंधकारे तमे घोरे, चिट्ठंती पाणिणो बहू ।
को करिस्सइ उज्जोयं, सव्वलोगंमि पाणिणं ॥७५॥

व्याख्या—अन्धं जनं करोतीत्यन्धकारं, एवंविधे तस्मिन् **घोरे तमसि** तिष्ठन्ति **प्राणिनो बहवः**, अतो **हे गौतम** ! तमोव्याप्ते **सर्वलोके प्राणिनां क उद्योतं करिष्यति** ? न कञ्चित्तादृशमुद्योतकरं पश्याम इति ॥७५॥

गौतम प्राह—

उग्गओ विमलो भाणू, सव्वलोगप्पभंकरो ।
सो करिस्सइ उज्जोयं, सव्वलोगंमि पाणिणं ॥७६॥

व्याख्या—हे **केशि**मुने ! **सर्वलोकप्रभाकरो विमलो** निर्मलो **भानुरुद्गतो**ऽस्ति, **स सर्वलोके प्राणिनामुद्योतं करिष्यति** ॥७६॥

केशिरुवाच—

भाणू य इइ के वुत्ते, केसी गोयममब्बवी ।
तओ केसिं बुवंतं तु, गोयमो इणमब्बवी ॥७७॥

व्याख्या—हे **गौतम** ! **भानुश्च इति** त्वया **क उक्तः** ? एवं **केशिगौतमं** प्रत्य-**ब्रवीत्** । तत इति ब्रुवन्तं **केशिं** प्रति **गौतम इदमुत्तरमब्रवीत्** ॥७७॥

उग्गओ खीणसंसारो, सव्वन्नू जिणभास्करो ।
सो करिस्सइ उज्जोयं, सव्वलोगंमि पाणिणं ॥७८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या–हे **केशि**मुने ! **क्षीणः संसारो** भवभ्रमणं यस्य, तथा **सर्वज्ञः** सर्वस्वरूपवेत्ता, एवंविधो **जिनभास्करो**ऽर्हदादित्य **उद्गतो**ऽस्ति, स च **सर्वलोके** मिथ्यात्वतमः-पटलततिविघटनत **उद्योतं** सर्वपदार्थप्रकटनं **करिष्यति** विधास्यतीति ॥७८॥

साहु गोयम पण्णा ते, छिन्नो मे संसओ इमो ।
अन्नो वि संसओ मज्झं, तं मे कहसु गोयमा ॥७९॥

व्याख्या–प्राग्वत् ॥७९॥

इत्युक्तमेकादशं तमोनाशनद्वारं, अथ द्वादशं स्थानोपसम्पत्प्रश्नमाह–

सारीरमाणसे दुक्खे, बज्झमाणाण पाणिणं ।
खेमं सिवमणाबाहं, ठाणं किम्मण्णसी मुणी ॥८०॥

व्याख्या–हे **गौतम**मुने ! आर्षत्वाच्**छारीरमानसैर्दुःखैर्बाध्यमानानां** (पाठान्तरे-**पच्यमानानां**) व्याकुलीक्रियमाणतया, **प्राणिनां क्षेमं** व्याध्यभावेन, **शिवं** जरामरणाद्युपद्रवाऽभावेन, **अनाबाधं** स्वाभाविकबाधाऽपगमात्, तिष्ठन्त्यस्मिन्निति **स्थानमा**श्रयः, **किं** त्वं **मन्यसे** ? न किञ्चिदीदृशं विद्मः ॥८०॥

गौतमः प्राह–

अत्थि एगं धुवं ठाणं, लोगग्गंमि दुरारुहं ।
जत्थ नत्थि जरा मच्चू, वाहि णो वेयणा तहा ॥८१॥

व्याख्या–हे **केशि**मुने ! **अस्त्येक**मद्वितीयं **ध्रुवं** निश्चलं तत्**स्थानं लोकाग्रे**, दुःखेनारुह्यते इति **दुरारोहं**, दुरापेणैव सम्यग्दर्शनादित्रयेण तदवाप्यते । **यत्र** यस्मिन् स्थाने **नास्ति जरा** वृद्धत्वं **मरणं** च । तथैव तत्र **व्याधिः** कफपित्ताद्युद्भवा शारीरबाधा **नास्ति**, तथा **वेदना** मानसोद्भवा दुःखानुभवरूपापि तत्र **नास्ति** । एवं तत्स्थानस्य क्षेमत्वमावेदितम् ॥८१॥

केशिराह–

ठाणे य इइ के वुत्ते, केसी गोयममब्बवी ।
तओ केसिं वुवंतं तु, गोयमो इणमब्बवी ॥८२॥

व्याख्या–**हे गौतम ! इति** ध्रुवादिविशेषणयुतं **स्थानं** च त्वया **किमुक्तं** ? इति **केशिगौतमं** प्रत्यब्रवीत्, तत एवं **ब्रुवन्तं केशिं** प्रति **गौतम इदमब्रवीत्** ॥८२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

णिव्वाणं ति अबाहं ति, सिद्धी लोयग्गमेव य ।
खेमं सिवमणाबाहं, जं चरंति महेसिणो ॥८३॥

व्याख्या—निर्वान्ति सन्तापाऽभावेन शीतीभवन्ति जन्तवोऽस्मिन्निति **निर्वाणं, अबाधं** बाधारहितं, सिद्ध्यन्ति निष्ठितार्था भवन्त्यस्यां जन्तव इति **सिद्धिः, लोकाग्रमिति** सर्वजगदुपरिवर्त्ति, '**एव**'त्ति पूर्त्तौ, **चः** समुच्चये, **क्षेमं** शाश्वतसुखकारणं, **शिवमु**पद्रवरहितं, एवंविधं **यन्मोक्षस्थानं चरन्ति** गच्छन्ति महर्षयो **बा**धारहितं यथास्यात्तथा ॥८३॥

तं ठाणं सासयं वासं, लोयग्गंमि दुरारुहं ।
जं संपत्ता ण सोयंति, भवोहंतकरा मुणी ॥८४॥

व्याख्या—तत् पूर्वोक्तं, बिन्दोरलाक्षणिकत्वात् **शाश्वतावास**रूपं **स्थानं लोकाग्र-भागे दुरारोहं** तपोऽनुष्ठानादिदुःकरयोगसाध्यमस्ति । **यत्** स्थानं **सम्प्राप्ता मुनयो भवौ-घान्तकराः** संसारप्रवाहविध्वंसकाः सन्तो **न शोचन्ते** ॥८४॥

अथ **केशिगौतमं** स्तौति—

साहु गोयम पण्णा ते, छिन्नो मे संसओ इमो ।
णमो ते संसयातीत, सव्वसुत्तमहोयही ॥८५॥

व्याख्या—हे गौतम ! 'ते' तव **प्रज्ञा साध्वी** वर्त्तते, 'मे' **ममायं संशयः** सन्देह-स्त्वया **छिन्नो** दूरीकृतः, **हे संशयातीत** ! हे सन्देहरहित ! **हे सर्वसूत्रमहोदधे** ! सकल-सिद्धान्तरत्नाकर ! यद्वा **संशयैरतीता** निःसन्देहीभूता ये **सकलसिद्धान्ता**स्तेषां **हे महोदधे** ! स्तुतिसूचकमेतत्, 'ते' **तुभ्यं नमो**ऽस्तु ? गाम्भीर्यान्वितविनयसूचकोऽयं **केशि**महात्मनो **गौतमं** प्रति नमस्कारः ॥८५॥

प्रश्नोपसंहारमाह—

एवं तु संसये छिन्ने, केसी घोरपरक्कमे ।
अभिवंदित्ता सिरसा, गोयमं तु महाजसं ॥८६॥

पंचमहव्वयं धम्मं, पडिवज्जइ भावओ ।
पुरिमस्स पच्छिमंमि, मग्गे तत्थ सुहावहे ॥८७॥ युग्मम् ॥

व्याख्या—एवं पूर्वोक्तेनैव क्रमेण, **तुः** एवार्थे, **संशये छिन्ने** सति, जातावेकवचनं, **घोरपराक्रम**स्तपश्चर्यादिषु रौद्रपुरुषार्थवान् **केशि**गणधरो **महायशसं** निजप्रज्ञाज्ञानाति-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

शयोत्पन्नकीर्त्तिपरिपूरितदिग्गणगगनमण्डलं एवंविधं श्री**गौतमं** गणधरं प्रति **शिर-साभिवन्द्य** ॥८६॥

व्याख्या—**पूर्वस्या**र्हतो **युगादीशस्य** प्रथमार्हतो मार्गे, **पश्चिमे** पश्चिमार्हन्मार्गे श्री**वीर**प्रभोर्मार्गे **शुभावहे** कल्याणप्रापके मार्गे, **तत्रे**ति **तिन्दुको**द्याने स **पञ्चमहाव्रतोपेतं धर्मं प्रतिपद्यते**ऽङ्गीकरोति तत्त्वज्ञत्वात्, पूर्वं तेन चातुर्यामो धर्मो **भावतः** प्रपन्नोऽभूत् ॥८७॥

अथाध्ययनार्थोपसंहारव्याजेन महापुरुषसङ्गफलमाह—

केसीगोयमओ निच्चं, तंमि आसी समागमे ।
सुयसीलसमुक्करिसो, महत्थत्थविणिच्छओ ॥८८॥

व्याख्या—'केसीगोयमओ' इति **केशिगौतमावाश्रित्य नित्यं** 'तंमि'त्ति **तत्पुर्यां** तस्मिन् प्रकृतस्थाने **आसीत् समागमे** मीलके **श्रुतशीलसमुत्कर्षो** ज्ञानचरणप्रकर्षः, तथा **महार्था** महाप्रयोजना मुक्तिसाधकत्वेन येऽर्थाः शिक्षाव्रताद्यास्तेषां **विनिश्चयो** निर्णयः शिष्याणां द्वयेषां । यद्वा 'केसि'त्ति सुब्व्यत्ययात् **केशेर्वा गौतमतः** ॥८८॥

तदा च—

तोसिया परिसा सव्वा, समग्गं समुवट्ठिया ।
संथुया ते पसीयंतु, भयवं केसीगोयमो ॥८९॥ त्ति बेमि

व्याख्या—**तोषिता पर्षत्** सदेवमनुजासुरा **सर्वा, सन्मार्गं** मुक्तिपथं **समुपस्थिता** (पाठान्तरे-**पर्युपस्थिता** वा, सन्मार्गं प्रत्युद्यताऽभूत्) एवं पर्षदः फलमुक्तं । इत्थं तद्व्रत्तवर्णनेन तयोः स्तवमुक्त्वा स्वाशयमाह—**संस्तुतौ** सम्यक् स्तुतौ **तौ प्रसीदतां** ! असत्याऽमृषागिरा चित्तप्रसत्तये स्तां **भगवत्केशिगौतमौ** । **इति** समाप्तौ, **ब्रवीमी**ति प्राग्वत् ॥८९॥

इति त्रयोविंशं केशिगौतमीयमध्ययनमुक्तम् ॥२३॥

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चतुर्विंशं प्रवचनमात्रीयमध्ययनम् ॥

प्रागध्ययनेऽन्येषां सन्देहः **केशिगौतम**वत् सह्य इत्युक्तं । तत्सन्देहस्फेटनं च वाक्समित्या स्यादिति तद्ज्ञप्त्यै चतुर्विंशं **प्रवचनमातृ**नामाध्ययनमाह–

अट्ठप्पवयणमायाओ, समिई गुत्ती तहेव य ।
पंचेव य समिईओ, तओ गुत्तीओ आहिया ॥१॥

व्याख्या–अष्टौ प्रवचनमाताः प्रवचनमातारो वा, 'समिई'त्ति **समितयः**, सं सम्यग् रीत्या इतिरात्मनश्चेष्टा समितिः, सिद्धान्तसङ्ज्ञा, इर्यादिचेष्टासु पञ्चसु, 'गुत्ति'त्ति गोपनं **गुप्तिः** सम्यग्योगनिग्रहस्**तथैव चे**ति समुच्चये, इति **पञ्च समितयस्तिस्रो गुप्तयश्च**, इत्यष्टौ **आहिता** आख्याता जिनैः ॥१॥

ता नाम्नाह–

इरियाभासेसणादाणे, उच्चारे समिई इय ।
मणगुत्ती वयगुत्ती, कायगुत्ती य अट्ठमा ॥२॥

व्याख्या–ईरणमीर्या गतिः, भाषणं भाषा, एषणं एषो गवेषणं तं करोतीत्येषणा, आदानं ग्रहणं पात्रादेः, निक्षेपोपलक्षणमेतत्, तत एतेषां समाहारे **ईर्याभाषैषणादानं, उच्चारे** उच्चारादिपरिष्ठापनायां च, **समिति**शब्दः प्रत्येकं योज्यः, ईर्यासमितिरित्यादि, **इतिः** समाप्तौ, एतावत्येव समितयः, तथा मनसो गुप्तिरशुभनिग्रहः शुभे प्रवृत्तिश्च **मनोगुप्तिः**, एवं **वाग्गुप्तिकायगुप्ती** अपि, एवं मीलनेऽ**ष्टौ** प्रवचनमातरो ज्ञेयाः ॥२॥

निगमयति–

एया उ अट्ठ समिईओ, समासेण वियाहिया ।
दुवालसंगं जिणक्खायं, मायं जत्थ उ पवयणं ॥३॥

व्याख्या–एता अष्ट समितयः, गुप्तीनामपि प्रवचनविधिना सच्चेष्टात्मकत्वा-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

त्समितिशब्दवाच्यत्वमस्तीत्येवमुपन्यासः, यत्तु भेदेनोपादानं तत्समितीनां प्रवीचाररूपत्वेन, गुप्तीनां प्रवीचाराऽप्रवीचारात्मकत्वेन कथञ्चिद्भेदात्, **समासेन** सकलागमसङ्ग्रहेण **व्याख्याताः**, द्वादशाङ्गं **जिनाख्यातं, तुः** एवार्थे, **मातामेवान्तर्भूतमेव यत्रेति** यासु **प्रवचनमा**गमः, एवं प्रवचनमातमत्रेति प्रवचनमाताः, यद्वा प्रवचनस्य जिनाज्ञारूपस्य पालनात् मातृवत् प्रवचनमातरो वा । यथेर्यासमितावाद्यव्रतं, तद्वृत्तिकल्पानि शेषव्रतान्यपि च तत्रैवान्तर्भवन्ति, तेषु च न तदस्ति यन्न समवरसति । उक्तं च—

पढमंमि सव्व जीवा, बीए चरिमे य सव्वदव्वाइं ।
सेसा महव्वया खलु, तदिक्कदेसेण नायव्वा ॥१॥ [आ. नि./गा.७९१]

इत्यर्थतः सर्वमपि प्रवचनमिह मातमुच्यते । भाषासमितौ च सावद्यवाक्त्यागाऽनवद्यवाग्रूपायां वाक्यपर्यायः समग्रोऽप्याक्षिप्त एव, न च तद्बहिर्भूतं किञ्चिदस्ति, एवमेषणादिष्वपि भावनीयं । यद्वा सर्वा अप्यमूश्चारित्ररूपाः, ज्ञानदर्शनादिना भावि च चारित्रं, न चैतेभ्योऽतिरिक्तमन्यद् द्वादशाङ्गं, इत्यत एतासु तद् द्वादशाङ्गं मातमुच्यते ॥३॥

तत्रेर्यासमितिमाह—

आलंबणेण कालेण, मग्गेणं जयणाइ य ।
चउकारणपरिसुद्धं, संजए इरियं रिए ॥४॥

व्याख्या—आलम्बनेन, कालेन, मार्गेण, यतनया च एवं चतुःकारणैरेभिः परिशुद्धां निर्दोषां **चतुःकारणपरिशुद्धां संयतो** यतिरि**र्यां** गतिं **रीयते** गच्छेत् ॥४॥

आलम्बनादीनि व्याख्याति—

तत्थ आलंबणं नाणं, दंसणं चरणं तहा ।
काले य दिवसे वुत्ते, मग्गे उप्पहवज्जिए ॥५॥

व्याख्या—तेष्वालम्बनादिषु **आलम्बनं** यदालम्ब्य गमनमनुज्ञायते, नरालम्बनस्य हि नानुज्ञातं गमनं, तच्चालम्बनं **ज्ञानं** सूत्रार्थोभयात्मकागमः, **दर्शनं** सम्यक्त्वं, **चरणं** चारित्रं, **तथा**शब्दोऽनुक्तसमुच्चयार्थो द्वित्वादिभङ्गसूचकः, ततः प्रत्येकं ज्ञानादीन्याश्रित्य द्विकादिसंयोगेन वा गमनमनुज्ञातम् ॥१॥

कालश्चेर्याया विषयो **दिवस उक्तो**ऽर्हदाद्यैः, रात्रौ ह्यचक्षुर्विषयत्वेन पुष्टालम्बनं विना नानुज्ञातं गमनम् ॥२॥

मार्ग इह सामान्येन पन्थाः, स उत्पथेनोन्मार्गेण वर्जित **इत्युत्पथवर्जितः**, उत्पथे व्रजत आत्मसंयमविराधनादयो दोषाः ॥३॥ ॥५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अथ यतनामाह–

दव्वओ खित्तओ चेव, कालओ भावओ तहा ।
जयणा चउव्विहा वुत्ता, तं मे कित्तयओ सुणे ॥६॥

व्याख्या–यतना चतुर्विधा उक्ता जिनैरिति शेषः, **द्रव्यतः, क्षेत्रतः कालतस्तथा भावतश्च** । **तां** यतनां चतुर्विधां **मे कीर्त्तयतः शृणु** हे शिष्येति ॥६॥

दव्वओ चक्खुसा पेहे, जुगमित्तं च खित्तओ ।
कालओ जाव रीएज्जा, उवउत्ते य भावओ ॥७॥

व्याख्या–द्रव्यतो जीवादिकं द्रव्यमाश्रित्यैवं यतना यच्च**क्षुषा प्रेक्षेत,** जीवादि-द्रव्यं प्रेक्ष्य संयमात्मविराधनात्यागेन गच्छेदिति । **युगमात्रं** चतुर्हस्तप्रमाणं क्षेत्रं प्रेक्ष्यते शकटोर्द्धसंस्थितया शरीरप्रमाणया दृष्ट्या, इयं **क्षेत्रतो** यतना । **कालतो** यतना यावन्तं कालं **रीयते** तावत्कालमानेन । **उपयुक्तत्वेन** सावधानत्वेन यद्रीयते इयं **भावतो** यतना ॥७॥

उपयुक्तत्वमेवाह–

इंदियत्थे विवज्जित्ता, सज्झायं चेव पंचहा ।
तम्मुत्ती तप्पुरक्कारे, उवउत्ते रियं रिए ॥८॥

व्याख्या–इन्द्रियार्थान् शब्दादीन्, तदध्यवसायतो **विवर्ज्य, चः** समुच्चये, **एवो**ऽप्यर्थः, ततो न केवलमिन्द्रियार्थान् विवर्ज्य, किन्तु स्वाध्यायं चापि **पञ्चधा,** वाचनादिभेदतः पञ्चप्रकारं गत्युपयोगोपघातित्वात् , ततस्तस्यामेवेर्यायां मूर्त्तिर्देहो व्याप्रियमाणायस्यासौ **तन्मूर्त्तिस्**तामेव पुरस्करोति, तत्रैवोपयुक्ततया प्राधान्येनाङ्गीकुरुते इति **तत्पुरस्कारो**ऽनेन कायमनसोस्तत्परतोक्ता, एव**मुपयुक्तः** सन्**ईर्यां रीयते** यतिः ॥८॥

अथ भाषासमितिमाह–

कोहे माणे य माया य, लोभे य उवउत्तया ।
हासे भय मोहरिए, विकहासु तहेव य ॥९॥

व्याख्या–क्रोधे माने च मायायां लोभे चोपयुक्तता, क्रोधाद्येकाग्रता, **हास्ये भये मौखर्ये विकथासु तथैवो**पयुक्तता ॥९॥

एयाइं अट्ठ ठाणाइं, परिवज्जित्तु संजए ।
असावज्जं मियं काले, भासं भासेज्ज पण्णए ॥१०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—**एतान्यष्टौ स्थानानि परिवर्ज्य संयतः** क्रोधादियोगेन मृषारूपमसद्वाग्योगं परिहृत्याऽसावद्यां निर्दोषां मितां यथाकार्यार्थां **काले** प्रस्तावे **भाषां भाषेत प्रज्ञावान्** ॥१०॥

अथैषणासमितिमाह—

गवेसणा य गहणे य, परिभोगेसणा य जा ।
आहारोवहिसेज्जाए, एए तिण्णि विसोहए ॥११॥

व्याख्या—**गवेषणायाम**न्वेषणायां **च ग्रहणे च** स्वीकरणे, उभयत्र प्राकृतत्वादेषणेति सम्बद्ध्यते । ततो गवेषणायामेषणा, ग्रहणे चैषणा । परिभोग आसेवनं तद्विषयैषणा **परिभोगैषणा, च यावत्** वचनव्यत्ययादाहारोपधिशय्यासु, **एता** एषणाः, सूत्रत्वाल्लिङ्गव्यत्ययः, **तिस्रो** विशोधयेन्निर्दोषा **विदध्यात्** ॥११॥

कथमित्याह—

उग्गमुप्पायणं पढमे, बिइए सोहिज्ज एसणं ।
परिभोगंमि चउक्कं च, विसोहिज्ज जयं जयी ॥१२॥

व्याख्या—**उद्गमोत्पादनं**, समाहारे उद्गमोत्पादनादोषान् विशोधयेत्, आधादित्यागादुद्गमं, धात्र्यादित्यागादुत्पादनां शुद्धां कुर्यात् **प्रथमायां** गवेषणैषणायां । **द्वितीयायां** ग्रहणैषणायां **शोधयेच्छङ्कितादिदोषत्यागत एषणां**, ग्रहणकालभाविग्राह्यगतदोषान्वेषणां । **परिभोगैषणायां चतुष्कं** पिण्डशय्यावस्त्रपात्रात्मकं, यद्वा संयोजनाऽप्रमाणाङ्गारधूमाऽकारणात्मकं, अङ्गारधूमयोर्मोहनीयान्तर्गतत्वेनैकतया विवक्षितत्वात्, **विशोधयेत् यतमानो यतिः**, पुनः क्रियाभिधानं विशुद्ध्यादरज्ञप्त्यै ॥१२॥

आदाननिक्षेपसमितिमाह—

ओहोवहोवग्गहियं, भंडगं दुविहं मुणी ।
गिह्णंतो निक्खिवंतो य, पउंजिज्ज इमं विहिं ॥१३॥

व्याख्या—उपधिशब्दो मध्यनिविष्टत्वादुभयत्र सम्बद्ध्यते, **ओघोपधिमौपग्राहिकोपधिं** च, **भाण्डकमु**पकरणं रजोहरणदण्डकादि **द्विविधं मुनिर्गृह्णन् निक्षिपंश्च** क्वचित् स्थापयन् **प्रयुञ्जीत इमं** वक्ष्यमाणं विधिम् ॥१३॥

तमेवाह—

चक्खुसा पडिलेहित्ता, पमज्जेज्ज जयं जई ।
आयए निक्खिविज्जा वा, दुहओ वि समिए सया ॥१४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—यत्नवान् यतिश्चक्षुषा प्रत्युपेक्ष्यावलोक्य **प्रमार्जयेद्र**जोहरणादिना, **आददीत निक्षेपेद्वा, द्वावप्यौ**घिकौपग्राहिकोपधी, यद्वा **द्विधापि** द्रव्यतो भावतश्च **समित** आदाननिक्षेपणासमितिवान् सन् **सदा** ॥१४॥

पारिष्ठापनासमितिमाह—

उच्चारं पासवणं, खेलं सिंघाणजल्लियं ।
आहारं उवहिं देहं, अण्णं वा वि तहाविहं ॥१५॥

व्याख्या—उच्चारं पुरीषं, **प्रश्रवणं** मूत्रं, **खेलं** मुखस्य श्लेष्माणं, **सिंघाणं** नासायाः आर्षत्वाज्जल्लं मलं, **आहारम**शनादिं, **उपधिं** वर्षाकल्पादिं, **देहं** तनुं, **अन्यद्वा** कारणगृहीतं गोमयादि, **अपिः** पूरणे, **तथाविधं** परिष्ठापनार्हं स्थण्डिले व्युत्सृजेदित्युत्तरत्र सम्बन्धः ॥१५॥

स्थण्डिलं च दशविशेषणविशिष्टमिति मनसाऽध्यायि, तद्गताखिलभङ्गोपलक्षणार्थमाद्यविशेषणपदयोर्भङ्गरचनमाह—

अणावायमसंलोए, अणावाए चेव होइ संलोए ।
आवायमसंलोए, आवाए चेव संलोए ॥१६॥

व्याख्या—अनापाताः स्वपरोभयपक्षसमीपागमनरूपा यस्मिंस्तस्मिन्नित्यनापातं स्थण्डिलमिति गम्यं, 'असंलोए'त्ति सूत्रत्वादिहोत्तरत्र च लिङ्गव्यत्यये न [विद्यते] संलोको दूरस्थस्यापि स्वपक्षादेर्दर्शनं यस्मिंस्तदऽसंलोकं, आद्यो भङ्गः ।१।

अनापातं चैव भवति **संलोकं**, यत्रापातो नास्ति, संलोकश्चास्तीति द्वितीयो भङ्गः ।२।

आपातमसंलोकं, यत्रापातोऽस्ति, न च संलोक इति तृतीयो भङ्गः ।३।

आपातं चैव संलोकं, यत्रोभयमपि स्यात्, इति चतुर्थो भङ्गः ।४। ॥१६॥

यादृशे स्थण्डिले व्युत्सृजेत्तदाह—

अणावायमसंलोए, परस्साणुवघाइए ।
समे अज्झुसिरे यावि, अचिरकालकयंमि य ॥१७॥

व्याख्या—अनापाते असंलोके परस्य स्वपक्षादेरनुपघातिके संयमात्मप्रवचनबाधारहिते, **समे** निम्नोन्नतत्ववर्जिते, **अशुषिरे** तृणपर्णाद्यनाकीर्णे, **अचिरकालकृते च** दाहादिना स्वल्पकालनिर्वर्त्तिते, मासद्वयऋतुपरावर्त्तिचिरकालकृते हि पुनः सम्मूर्च्छन्त्येव पृथ्वीकायादयः ॥१७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

विच्छिन्ने दूरमोगाढे, नासन्ने बिलवज्जिए ।
तसपाणबीयरहिए, उच्चाराईणि वोसिरे ॥१८॥

व्याख्या–विस्तीर्णे जघन्यतोऽपि हस्तमाने, **दूरमवगाढे** जघन्यतोऽप्यधस्ताच्चतुरङ्गुलमचित्तीभूते, **नासन्ने** ग्रामारामादेर्दूरवर्त्तिनि, **बिलवर्जिते** मूषकादिरन्ध्ररहिते, त्रसप्राणाश्च द्वीन्द्रियादयः, बीजानि शाल्यादीनि, सर्वैकेन्द्रियोपलक्षणं चैतत्, तत्रस्थैरागन्तुकैश्च तै रहितं तत् **त्रसप्राणबीजरहितं तस्मिन्** । एभिर्दशभिर्गुणैरेकद्व्यादिगुणसंयोगेन १०×२४ भङ्गाः स्युः, परं अन्त्ये दशगुणभेद एव स्थण्डिले मुख्यवृत्त्या परिष्ठाप्यं, तदभावेन गुणादिष्वप्यपवादेन **उच्चारादीनि व्युत्सृजेत्** परिष्ठापयेत्, पुनरुच्चाराद्यभिधानं विस्मरणशीलस्मरणार्थमदुष्टमिति सूत्रचतुष्कार्थः ॥१८॥

उक्तमुपसंहरन् वक्ष्यमाणार्थसम्बन्धायाह–

एयाओ पंच समिईओ, समासेण वियाहिया ।
इत्तो य तओ गुत्तीओ, वुच्छामि अणुपुव्वसो ॥१९॥

व्याख्या–एताः पञ्च समितयः समासेन सङ्क्षेपेण **व्याहृता** उक्ताः, **अतश्च** समितिप्रतिपादनादनु 'तओ'त्ति **तिस्रो गुप्ती**र्मनोवाक्कायगुप्तीः 'अणुपुव्वसो'त्ति आर्षत्वादानुपूर्व्याऽनुक्रमतो **वक्ष्यामि** ॥१९॥

मनोगुप्तिमाह–

सच्चा तहेव मोसा य, सच्चामोसा तहेव य ।
चउत्थी असच्चमोसाओ, मणगुत्ती चउव्विहा ॥२०॥

व्याख्या–सद्भ्यः पदार्थेभ्यो हिता, यथा विकल्पनेनाप्तः सत्यो मनोयोगस्तद्विषया मनोगुप्तिरप्युपचारात् **सत्या, तथैव मृषा च** तद्विपरीता, **सत्यामृषा** उभयात्मकमनोयोगगोचरा, **तथैव चे**ति समुच्चये, **चतुर्थी असत्याऽमृषा** उभयस्वभावविकलमनोदलिकरूपा, एवं **मनोगुप्तिश्चतुर्विधोक्ता** ॥२०॥

अस्या एव स्वरूपं निरूपयन्नुपदिशति–

संरंभसमारंभे, आरंभे य तहेव य ।
मणं पवत्तमाणं तु, नियत्तिज्ज जयं जई ॥२१॥

व्याख्या–संरम्भः सङ्कल्पस्तथाहं ध्यास्यामि यथासौ मरिष्यतीत्येवंविधः, समारम्भः परपीडाकरोच्चाटनादिनिबन्धनं ध्यानं, समाहारे **संरम्भसमारम्भस्तस्मिन्, आरम्भः** परमारणक्षमाऽशुभध्यानमेव, **तस्मिन्, चः** समुच्चये, **तथैव** तेनैवागमोक्तेन तत्र मनसोऽसन्नि-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वेशात्मकेन प्रकारेण, **चः** पूर्त्तौ, **तु** विशेषणे, **मनः प्रवर्त्तमानं निवर्त्तयेत्**, विशेषश्चायमिह शुभसङ्कल्पेषु मनः प्रवर्त्तयेत् ['जयं'ति **यतमानः यतिः** तपस्वी] ॥२१॥

वाग्गुप्तिमाह–

(संकप्पो संरंभो, परितापकरो भवे समारंभो ।
आरंभो उद्दवओ, ऽसुद्धवयाणं सव्वेसिं ॥२१॥)

व्याख्या–वचनयोगं वदति–**सर्वेषां अशुद्धवचसां** एते भेदा भवन्ति, कीदृशास्ते भेदाः ? **परितापकराः**, के ते भेदाः ? **संरम्भः सङ्कल्पः**, इत्याद्यर्थः पूर्ववदेव ।

सच्चा तहेव मोसा य, सच्चामोसा तहेव य ।
चउत्थी असच्चमोसा उ, वयगुत्ती चउव्विहा ॥२२॥

व्याख्या–**तथा सत्या** वाक् जीवं जीवमिति वदतः, **असत्या** जीवमजीवमिति, **सत्यामृषा** क्वचिद्विवक्षितसमये नृशतमुत्पन्नं मृतं चेति । **तथैव चतुर्थी असत्याऽमृषा तु** विधेहि स्वाध्यायं ! नैव तत्सदृशमन्यत्तपोऽस्तीत्यादि । एवं **वचनगुप्तिश्चतुर्विधा** ॥२२॥

संरंभसमारंभे, आरंभे य तहेव य ।
वयं पवट्टमाणं तु, नियत्तिज्ज जयं जई ॥२३॥

व्याख्या–**यतिः** साधुः 'जयं'ति **यत्नवान्** सन् **वचनं संरम्भे समारम्भे तथैव चारम्भे प्रवर्त्तमानं निवर्त्तयेत्**, संरम्भः परजीवस्य विनाशनसमर्थदुष्टविद्यानां गुणनं, समारम्भः परेषां परितापकारकमन्त्रादीनां मुहुर्मुहुः परावर्त्तनं, तथैव च आरम्भः परेषां क्लेशोच्चाटनमारणादिमन्त्रजापकरणं, तत्रापि प्रवर्त्तमानं वचनं निवारयेत् ॥२३॥

कायगुप्तिमाह–

ठाणे निसीयणे चेव, तहेव य तुयट्टणे ।
उल्लंघण पल्लंघण, इंदियाण य जुंजणे ॥२४॥

व्याख्या–**स्थाने** ऊर्ध्वस्थितौ, **निषीदने** उपवेशने, **चः** तयोरेव विचित्रभेद-समुच्चयार्थः, **एवे**ति पूरणे, **तथैव त्वग्वर्त्तने** शयने, **उल्लङ्घने** तथाविधनिमित्तत्त ऊर्ध्व-भूमिकाद्युत्क्रमेण गर्त्ताद्यतिक्रमेण वा, **प्रलङ्घने** सामान्येन गमने, उभयत्र सुपो लुक्, **इन्द्रियाणां** स्पर्शादीनां योजने, शब्दादिविषयेषु व्यापारेण सर्वत्र वर्त्तमान इति शेषः ॥२४॥

संरंभसमारंभे, आरंभे य तहेव य ।
कायं पवत्तमाणं तु, नियत्तिज्ज जयं जई ॥२५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—संरम्भोऽभिघातो यष्टिमुष्ट्यादिभिः, समारम्भः परितापकरो मुष्ट्याद्यभिघातः, ततः **संरम्भसमारम्भस्तस्मिन्, आरम्भः** प्राणिवधस्तेषु सर्वेषु **प्रवर्त्तमानं कायं यत्नवान् साधुर्निवर्त्तयेत्** ॥२५॥

समितिगुप्त्योरन्योऽन्यं विशेषं स्वयं सूत्रकृदाह—

एयाओ पंच समिईओ, चरणस्स पवत्तणे ।
गुत्ती णियत्तणे वुत्ता, असुभत्थेसु सव्वसो ॥२६॥

व्याख्या—एता पञ्च समितयश्चरणं सच्चेष्टा, **तस्य, च** एवार्थे, ततः प्रवर्त्तने एव सच्चेष्टाप्रवृत्तावेव **चारित्रस्य प्रवर्त्तने** एव समितय उक्ताः, **गुप्तय**स्तु **निवर्त्तनेऽप्युक्ताः**, केभ्यः ? सुब्व्यत्ययात् **दशुभार्थेभ्यो**ऽशुभमनोयोगादिभ्यः **सर्वेभ्यो**ऽपि, तपश्चरणप्रवर्त्तने चोक्ता, उपलक्षणं चैतत् शुभार्थेभ्योऽपि निवृत्तेः, वाक्काययोर्निव्यापारताया अपि गुप्तिरूपत्वात् ॥२६॥

अध्ययनार्थमुपसंहरन्नेतदाचरणफलमाह—

एया पवयणमाया, जे सम्मं आयरे मुणी ।
सो खिप्पं सव्वसंसारा-विप्पमुच्चइ पंडिए ॥२७॥ त्ति बेमि

व्याख्या—यो मुनिरेताः **प्रवचनमातृः सम्यग**ऽवैपरीत्येन, न तु दम्भादिना **आचरेत्** कुर्यात्, **स** पण्डित **सर्वसंसारात् क्षिप्रं विप्रमुच्येत, इति** समाप्तौ, **ब्रवीमी**ति प्राग्वत् ॥२७॥

इति चतुर्विंशं प्रवचनमात्रीयमध्ययनमुक्तम् ॥२४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पञ्चविंशं यज्ञीयाध्ययनम् ॥

उक्ताः प्रवचनमातरः, एता ब्रह्मस्थस्य स्युरिति ब्राह्मण्यज्ञप्त्यै पञ्चविंशं **यज्ञीयाध्ययनमाह**—

तत्र प्रस्तावनानिर्युक्तिः—

वाणारसिनयरीए, दो विप्पा आसि कासवसगोत्ता ।
धणकणगविउलकोसा, छक्कम्मरया चउव्वेया ॥१॥ [आव. नि./गा.४६३]

यजनयाजनाध्ययनाध्यापनदानप्रतिग्रहाः षट् कर्माणि ।

दो वि य जमला भाओ, संपीया अन्नमन्नमणुरत्ता ।
जयघोसविजयघोसा, आगमकुसला सदारया ॥२॥ [आव. नि./गा.४६४]

यमलौ युग्मजौ भ्रातरौ सप्रीतौ ।

अह अन्नया कयाइ, जयघोसो ण्हाइओ गओ गंगं ।
अह पिच्छइ मंडूक्कं, सप्पेण तहिं गसिज्जंतं ॥३॥ [आव. नि./गा.४६५]

णहाइओ त्ति स्नातुं

सप्पो वि (अ) कुलणेणं, उक्खित्तो पाडिओ (य) भूमीए ।
सो वि य कुललो सप्पं, अक्कमिउं अच्छइ तत्थ ॥४॥ [आव. नि./गा.४६६]

सर्पोऽपि कुररेण पक्षिणा श्येनेनेति उत्क्षिप्य भूमौ पातितः, सोऽपि च कुरः सर्पमाक्रम्य तत्रास्थात् ।

सप्पो वि कुललवसगो, मंडूक्कं खाइ चिंचियायंतं ।
सो वि य कुललो सप्पं, खाइयं चंडेहिं घासेहिं ॥५॥ [आव. नि./गा.४६७]

सर्पोऽपि कुरवशगोऽपि मण्डुकं चिञ्चि शब्दयन्तं खादति, सोऽपि च कुरः सर्पं चण्डै रौद्रैर्ग्रासैः खण्डत्रोटैः खादितः ।

तं अन्नमन्नघासं, जयघोसो पासिऊण पडिबुद्धो ।
गंगाओ उत्तरीउं, समणाणं आगओ वसहिं ॥६॥ [आव. नि./गा.४६८]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एवं तमन्योऽन्यग्रासं दृष्ट्वा अहो घोरः संसार इति बुद्धो **जयघोसो** गङ्गामुत्तीर्य श्रमणानां वसतिं वनादौ स्थानमागतः ।

सो समणो पव्वइओ, निग्गंथो सव्वगंथउम्मुको ।
वोसिरिऊण असारो, केसेहिं समं परिक्लेसे ॥७॥ [आव. नि./गा.४६९]

जयघोषः समनाः सहृदयप्रव्रजितो हेयधर्मेभ्यो निर्गतो निर्ग्रन्थो ग्रन्थरहितः, स च बाह्य-ग्रन्थमुक्तोऽपि स्यात्, अत आह—सर्वो बाह्य आन्तरश्च यो ग्रन्थस्तेनोन्मुक्तः, वक्ष्यमाण-श्रमणविशेषान्येतानि, व्युत्सृज्य त्यक्त्वाऽसारान् परमार्थालोचनायामप्रधानान्, केशैः शिरोरुहैः समं, परिक्लेशयन्तीति परिक्लेशाः पुत्रकलत्रादिसम्बन्धास्तान् ।

पंचमहव्वयजुत्तो, पंचिंदियसंवुडो गुणसमग्गो ।
घडणजयणप्पहाणो, जाओ समणो समियपावो ॥८॥ [आव. नि./गा.४७०]

पञ्चमहाव्रतयुक्तः पञ्चेन्द्रियसंवृतो गुणसमग्र इति सर्वगुणैर्युक्तः, घटनं संयमयोगविषयं चेष्टनं, यतनं तत्रैवोपयुक्तत्वं, ताभ्यां प्रधानः प्रवरो घटनयतनप्रधानो जातः श्रमणः, शमितपापः समितानि पापानि मिथ्यात्वादिपापकृतिरूपाणि येनासौ शमितपापः ॥ सूत्रम्—

शेषचरितं सूत्रकृदेवाह—

माहणकुलसंभूओ, आसि विप्पो महायसो ।
जायाई जमजण्णंमि, जयघोस त्ति नामओ ॥१॥

व्याख्या—ब्राह्मणकुलसम्भूतो विप्रकुले समुत्पन्नो **जयघोष** इति **नामा विप्र आसीत्**। अत्र हि यद् ब्राह्मणकुलसम्भूतो विप्र आसीदित्युक्तं, तद्ब्राह्मणजनकादुत्पन्नोऽपि जननीजातिहीनत्वेऽब्राह्मणः स्यादत एव विप्र इत्युक्तं । अवश्यं यो यजतीति **यायाजी**, क्वेत्याह—यमाः प्राणातिपातविरत्यादिरूपाः पञ्च, त एव यज्ञो **यमयज्ञस्तस्मिन्** । यतिर्जात इत्यर्थः ॥१॥

इंदियग्गामनिग्गाही, मग्गगामी महामुणी ।
गामाणुगामं रीयंते, पत्ते वाणारसिं पुरिं ॥२॥

व्याख्या—'इंदियग्गामनिग्गाही' इन्द्रियाणां ग्रामं समूहं निगृह्णाति वशीकरोतीति **इन्द्रियग्रामनिग्राही**, अत एव **मार्गगामी** मुक्तिपथयायी, एवंविधोऽसौ एकरात्रिकीं प्रतिमामभिग्रहं वहन्, ग्रामादन्यो ग्रामो **ग्रामानुग्रामस्तं रीयमाणो** विहरन् **वाणारसीं पुरीं प्राप्तः** ॥२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वाणारसीइ बहिया, उज्जाणंमि मणोरमे ।
फासुए सिज्जसंथारे, तत्थ वासमुवागए ॥३॥

व्याख्या–स साधुर्**वाणारस्यां बाह्ये मनोरमे** उद्याने प्रासुके जन्तुरहिते **शय्या-संस्तारके** दर्भतृणादिरचिते शयनोपवेशनस्थितौ **तत्र वासं** निवास**मुपागतः** ॥३॥

तदा च तत्र–

अह तेणेव कालेणं, पुरीए तत्थ माहणे ।
नामेण विजयघोस त्ति, जण्णं जयइ वेयवी ॥४॥

व्याख्या–अथ सुब्व्यत्ययात्तस्मिन्नेव काले तत्र **पुर्यां विजयघोष इति नाम्ना वेदविद् ब्राह्मणो यज्ञं यजति** ॥४॥

अह से तत्थ अणगारे, मासक्खमणपारणे ।
विजयघोसस्स जण्णंमि, भिक्खमट्ठा उवट्ठिए ॥५॥

व्याख्या–**अथ स जयघोषोऽनगारो** मुनिस्तत्र **विजयघोषस्य यज्ञे** इति यज्ञ-स्थाने **मासक्षपणपारणे भिक्षार्थमुपस्थितः** प्राप्तः ॥५॥

समुवट्ठियं तहिं संतं, जायगो पडिसेहइ ।
ण हु दाहामि ते भिक्खं, भिक्खू जायाहि अण्णओ ॥६॥

व्याख्या–तदा **याजको** यजमानो **विजयघोषब्राह्मणस्तत्र** भिक्षार्थं समुपस्थितं **सन्तं** तं साधुं **प्रतिषेधति** निवारयति, **न हु** नैव **दास्यामि** 'ते' **तुभ्यं भिक्षां**, अतो हे **भिक्षो याचस्वान्यतो**ऽन्यस्मात् ॥६॥

यतः–

जे य वेयविऊ विप्पा, जण्णट्ठा य जे दिया ।
जोइसंगविऊ जे य, जे य धम्माण पारगा ॥७॥

व्याख्या–**ये च वेदविदो** वेदज्ञा जातितश्च **विप्राः**, यज्ञार्था यज्ञ एव अर्थः प्रयोजनं येषां ते **यज्ञार्थाः**, **च** पुनर्ये **द्विजाः** संस्कारेण द्वितीयजन्मतः, च पुनर्ये **ज्योतिषाङ्गविदः**, ज्योतिःशास्त्रस्य वेदाङ्गत्वेऽपि तदादानेन शिक्षा १ कल्प २ व्याकरण ३ छन्दो ४ ज्योतिः ५ निरुक्तानां ६ षडङ्गानामादानं ज्ञेयं । **ये च धर्मशास्त्राणां पारगाः** सर्वविद्यास्थानानां वा, ॥७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जे समत्था समुद्धत्तुं, परं अप्पाणमेव य ।
तेसिं अण्णमिणं देयं, भो भिक्खू सव्वकामियं ॥८॥

व्याख्या—ये समर्थाः समुद्धर्त्तुं भवाब्धेः **परं चात्मानमेव च,** सुब्व्यत्ययात्तेभ्यो द्विजेभ्योऽन्नमिदं **देयं, भो भिक्षो** ! सर्वाणि काम्यान्यभिलषणीयवस्तूनि यस्मिंस्तत्- **सर्वकाम्यं** सर्वकामिकं षड्रसोपेतमिति ॥८॥

एवमुक्तो मुनिः—

सो तत्थ एव पडिसिद्धो, जायएण महामुणी ।
न वि तुट्ठो न वि रुट्ठो, उत्तमट्ठगवेसओ ॥९॥

व्याख्या—स जयघोषो महामुनिस्तत्र यज्ञे एवं **प्रतिषिद्धो याजकेन** यज्ञकर्त्रा **विजयघोषेण, नापि तुष्टो नापि रुष्टः,** किं तु समतयैव स्थित इति भावः, यतः स उत्तमार्थो मोक्षस्तमेव गवेषयते इत्य**ुत्तमार्थगवेषकः**, मुक्तिं विनाऽन्यत्र निःस्पृह आसीदिति ॥९॥

णण्णट्ठं पाणहेउं वा, ण वि णिव्वाहणाय वा ।
तेसिं विमोक्खणट्ठाए, इमं वक्कमुदाहरे ॥१०॥

व्याख्या—नाऽन्नार्थं, पानमाचाम्लादि **तद्धेतुं वा, नापि निर्वाहणाय वा** वस्त्राभ्यङ्गतैलादिना यापनार्थं, सर्वत्रात्मन इति गम्यम् । किमर्थं तर्हीत्याह—**तेषां याज्ञिकानां विमोक्षणार्थाय,** कथं नामामी मुक्तिमाप्नुयुरित्यर्था**येदं वाक्यमब्रवीत्** ॥१०॥

किं तदित्याह—

न वि जाणसि वेयमुहं, न वि जण्णाण जं मुहं ।
नक्खत्ताण मुहं जं च, जं च धम्माण वा मुहं ॥११॥

व्याख्या—नैव जानासि वेदानां मुखमिव मुखं **वेदमुखं** यत्तेषु प्रधानं, **नापि यज्ञानां यन्मुखमुपायस्तं, नक्षत्राणां मुखं** प्रधानं, **यच्च धर्माणां वा मुखमुपायस्तं,** तानि सर्वाण्यपि भो **विजयघोष** ! त्वं न जानासि । अनेन तस्य वेदयज्ञज्योतिर्धर्माऽनभिज्ञत्वमुक्तम् ॥११॥

अथ तस्य पात्राऽविज्ञातामाह—

जे समत्था समुद्धत्तुं, परं अप्पाणमेव य ।
ते वि तुमं ण याणासि, अह जाणसि तो भण ॥१२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या–हे विजयघोष ! ये परं च पुनरात्मानमेव समुद्धर्त्तुं संसारकर्दमान्निस्तारयितुं **समर्थास्तान्** स्वपरनिस्तारकांस्त्वं न जानासि, अथ चेत्त्वं **जानासि तदा भण** ! कथय ! इत्याक्षेपोक्तिः ॥१२॥

एवं मुनिनाक्षिप्तः सः–

तस्सक्खेवपमोक्खं च, अचयंतो तहिं दिओ ।
सपरिसो पंजलिउडो, पुच्छई तं महामुणिं ॥१३॥

व्याख्या–**तस्य** मुनेराक्षेपः प्रश्नस्तस्य **प्रमोक्षमुत्तरं** तमशक्नुवन् दातुं स **तस्मिन्** यज्ञे **द्विजः सपर्षत्** सभान्वितः **प्राञ्जलिर्भूत्वा पृच्छति तं महामुनिं** प्रति ॥१३॥

वेयाणं च मुहं बूहि, बूहि जंनाण जं मुहं ।
नक्खत्ताण मुहं बूहि, बूहि धम्माण वा मुहं ॥१४॥

व्याख्या–हे मुने ! त्वमेव **वेदानां मुखं बूहि** ! पुनर्यद् **यज्ञानां मुखं** तन्मे **बूहि** ! पुनर्नक्षत्राणां **मुखं बूहि** ! पुनर्यद्धर्माणां **मुखं** तमपि **बूहि** ! पुनः पुनर्ब्रूहीत्यादरज्ञप्त्यै ॥१४॥

जे समत्था समुद्धत्तुं, परमप्पाणमेव य ।
एयं मे संसयं सव्वं, साहू कहय पुच्छिओ ॥१५॥

व्याख्या–पुनर्ये पुरुषाः **परं च** पुनरात्मानमपि संसारादुद्धर्त्तुं **समर्थाः** सन्ति, एतन् 'मे' **मम संशयविषयं** वेदमुखादिकमस्ति, तत् हे **साधो** ! त्वं मया **पृष्टः** सन् **सर्वं कथयस्व** ! ॥१५॥

मुनिराह–

अग्गिहोत्तमुहा वेया, जन्नट्ठी वेयसामुहं ।
नक्खत्ताणं मुहं चंदो, धम्माणं कासवो मुहं ॥१६॥

व्याख्या–अग्निहोत्रमग्निकारिका, सा चेह–

कर्मेन्धनं समाश्रित्य, दहा सद्भावनाहुतिः ।
धर्मध्यानाग्निना कार्या, दीक्षितेनाग्निकारिका ॥१॥ [अग्निका. अष्ट. श्लो.१]

इत्यादि रूपा गृह्यते । तदेव मुखं प्रधानं येषां ते**ऽग्निहोत्रमुखा वेदाः**, वेदानां हि दध्नः इव नवनीत**मारण्यकं** प्रधानं, तत्र च सत्यं तपः सन्तोषः संयमश्चारित्रमार्जवं क्षमा धृतिः श्रद्धा अहिंसेत्येतद्दशविधमिह धामेति । धामशब्देन धर्म एव, तदनुसारि चोक्तमेवाग्निहोत्रं ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तदा **यज्ञः** प्रस्तावाद्भावयज्ञः संयमरूप**स्तदर्थी वेदसां** यागानां **मुखमु**पायो वर्त्तते, ते सत्यादीनि हि सत्ये यज्ञार्थिनि प्रवर्त्तन्ते । **नक्षत्राणां मुखं चन्द्रः, धर्माणां** च **काश्यप ऋषभदेवो मुखमुपा**यः, तस्यैवादितस्तत्प्ररूपकत्वात् । तथा**चारण्यकं**–"**ऋषभ एव भगवान् ब्रह्मा, तेन भगवता ब्रह्मणा स्वयमेव चीर्णानि ब्रह्माणि**" । **ब्रह्माण्डपुराणे** चोक्तं–"**इह हि इक्ष्वाकुकुलवंशोद्भवेन नाभिसुतेन मरुदेव्या नन्दनेन महादेवेन ऋषभेण दशप्रकारो धर्मः स्वयमेव चीर्णः, केवलज्ञानलाभाच्च महर्षिणो ये परमेष्ठिनो वीतरागाः स्नातका निर्ग्रन्था नैष्ठिकास्तेषां प्रवर्त्तित आख्यातः प्रणीतस्त्रेतायामादौ**" इत्यादि ॥१६॥

काश्यपस्यैव महात्मनो धर्ममुखत्वं समर्थयति–

जहा चंदं गहाईया, चिट्ठंती पंजलीउडा ।
वंदमाणा णमंसंता, उत्तमं मणहारिणो ॥१७॥

व्याख्या–यथोत्तमं प्रधानं **चन्द्रं** प्रति **ग्रहादिकाः कृतप्राञ्जलयो वन्दमानाः** स्तुवन्तो **नमस्यन्तो मनोहारिणो**ऽतिविनीततया प्रभुचित्ताक्षेपिण**स्तिष्ठन्ती**ति सम्बन्धस्तथैनमुत्तमं श्री**ऋषभ**देवं प्रतीन्द्राद्या इत्युपस्कारः ॥१७॥

इति चतुःप्रश्नयुत्तराण्युक्त्वा स्वपरात्मोद्धरणाख्यं पञ्चमं प्रश्नमाश्रित्याह–

अयाणगा जण्णवाई, विज्जामाहणसंपया ।
मूढा सज्झायतवसा, भासच्छण्णा इवग्गिणो ॥१८॥

व्याख्या–अज्ञा अतत्त्ववादिनो **यज्ञवादिन**स्तव पात्रत्वेन ये मताः, कासामज्ञाः ? **विद्याब्राह्मणसम्पदां**, विद्या **आरण्यकब्रह्माण्डपुराणा**त्मिकास्ता एव ब्राह्मणसम्पदो विद्याब्राह्मणसम्पदस्तात्त्विकब्राह्मणानां विद्यास्तदविज्ञत्वेनाऽज्ञाः, अन्यथा कथमेते **बृहदारण्यका**द्युक्तदशविधधर्मज्ञा अपि यागमेवं कुर्युः ? अत एव **मूढा** मोहवन्तः, सुब्व्यत्ययात् **स्वाध्यायतपस्सु**, तत्त्वतस्तत्स्वरूपाऽज्ञाना**द्भस्मच्छन्ना अग्नय इव** ते हि बहिरुपशमभा आभान्ति, अन्तश्च कषायवत्तया ज्वलिताः (पाठान्तरे–'**गूढा सज्झायतवस्स**'त्ति–**गूढा** बहिः संवृतिमन्तः **स्वाध्यायतपसा** वेदाध्ययनोपवासादिना) एवं च तत्त्वतस्त्वन्मतब्राह्मणानामात्मपरोद्धरणक्षमत्वं दूरापास्तम् ॥१८॥

को ब्राह्मणः पात्रमित्याह–

जो लोए बंभणो वुत्तो, अग्गी वा महिओ जहा ।
सया कुसलसंदिट्ठं, तं वयं बूम माहणं ॥१९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—यो लोके ब्राह्मण उक्तः कुशलैः, **वे**ति पूर्त्तौ, **यथाग्निर्यत्तदोर्नित्य**-सम्बन्धात् तथा **महितः** पूजितोऽस्ति । **सदा कुशलैस्तत्त्वज्ञैः सन्दिष्टं** कथितं, **तं वयं ब्रूमो ब्राह्मणम्** ॥१९॥

कुशलसन्दिष्टस्वरूमाह—

जो ण सज्जइ आगंतुं, पव्वयंतो न सोयई ।
रमए अज्जवयणंमि, तं वयं बूम माहणं ॥२०॥

व्याख्या—यो न स्वजति नाभिष्वङ्गं करोति, **आगन्तुं** बहुभ्यो दिनेभ्यः प्राप्तं स्वजनादिकं प्रति, यद्वा **स्वजनादिस्थानं प्रति** स्वयमागत्य यस्तस्मै आलिङ्गनं न ददाति । तथैव यः **प्रव्रजन्** स्थानान्तरं विदेशं वा गच्छन्न **शोचते,** यथाहं कथमेतं स्वजनादिकं विना विदेशे भविष्यामि ? अत एव **रमते आर्यवचने** तीर्थकरप्रणीतागमे । यद्वा यो न **सज्जत्यागन्तुं** निवर्त्तितुं प्रव्रज्यापर्यायाद् गार्हस्थ्यपर्यायं प्रति, **प्रव्रजंश्च** प्रव्रज्यां गृह्णंश्च यो **न शोचते न** खिद्यते, किन्त्विदमेव नृजन्मफलमिति मन्वानो निःक्रमेत् । निःक्रम्य च केवलं **जिनवचने** एव यो **रमते, तं वयं ब्राह्मणं ब्रूमः,** एवं व्याख्याद्वयेऽपि ब्राह्मणस्य निःस्पृहतैवोक्ता ॥२०॥

जायरूवं महामत्थं(जहामट्ठं), निद्धंतमलपावगं ।
रागद्दोसभयातीतं, तं वयं बूम माहणं ॥२१॥

व्याख्या—जातरूपं स्वर्णमिव स्वर्णं, यः, कीदृक् सन् ? 'महामत्थं'ति **मः** अलाक्षणिकः, महान् अर्थः कर्मविषघातरूपोऽस्येति स **महार्थः,** जातरूपस्याप्यर्थो विषघातादिः, निर्ध्मातं निर्दग्धं मल इवात्मशुद्धिघाति पापकं येनासौ **निर्ध्मातमलपापकः,** स्वर्णं तु प्राकृतत्वात् पावकेनाग्निना निर्ध्मातो मलः किट्टयात्मकोऽस्येति **पावकनिर्ध्मातमलं,** स च रागद्वेषभयातीतः (पाठान्तरे—**'जायरूवं जहामट्ठं' आमृष्टं** तेजःप्रकर्षाय मनःशिलादिना परामृष्टं) अनेनास्य बाह्यगुण उक्तः, पावकनिर्ध्मातमलं इत्यनेनान्तरः, ततो जातरूपव-द्बाह्यान्तरगुणान्वितोऽत एव रागाद्यतीतो **रागद्वेषभयातीतो** यस्तं **वयं ब्रूमो ब्राह्मणम्** ॥२१॥

तवस्सियं किसं दंतं, अवचियमंससोणियं ।
सुव्वयं पत्तनिव्वाणं, तं वयं बूम माहणं ॥२२॥

व्याख्या—तपस्विनं, अत एव **कृशं** दुर्बलं, **दान्तं** जितेन्द्रियं, **अपचितमांसशोणितं** शोषितमांसरक्तं, **सुव्रतं** सम्यगाचरणयुतं, **प्राप्तनिर्वाणं** कषायाग्निशमनेन प्राप्तसमाधिं, **तमेतं वयं ब्राह्मणं ब्रूमः** ॥२२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तसपाणे वियाणित्ता, संगहेण य थावरे ।
जो न हिंसइ तिविहेणं, तं वयं बूम माहणं ॥२३॥

व्याख्या—यस्त्रसान् **प्राणान्** पुनः स्थावरान् **सङ्ग्रहेण** समासेन सङ्क्षेपेण **विज्ञाय, चाद्विस्तरेण**, यदि वा **सङ्ग्रहो** वर्षाकल्पादिस्तेन, जीवरक्षार्थत्वात्तस्य, **यो न हिनस्ति त्रिविधेन** योगेन मनोवाक्कायकरणकारणानुमतिरूपेण **तं वयं ब्राह्मणं ब्रूम** इति । यदुक्तम**ारण्यके**—

यदा न कुरुते पापं, सर्वभूतेषु दारुणं ।
कर्मणा मनसा वाचा, ब्रह्म सम्पद्यते तदा ॥१॥ [ ] ॥२३॥

कोहा वा जइ वा लोहा, हासा वा जइ वा भया ।
मुसं न वयइ जो उ, तं वयं बूम माहणं ॥२४॥

व्याख्या—**क्रोधात्** यदि वा लोभात् अथवा हासात्, यदि वा भयात् मृषां असत्यवाणीं **यस्तु न वदति तं वयं ब्राह्मणं ब्रूमः**, यदुक्तम**हारण्यके**—

यथा सर्वानृतत्यक्तं, मिथ्याभाषाविवर्जितं ।
अनवद्यं च भाषेत, ब्रह्म सम्पद्यते तदा ॥१॥ [ ] ॥२४॥

चित्तमंतमचित्तं वा, अप्पं वा यदि वा बहुं ।
न गिण्हइ अदत्तं जो, तं वयं बूम माहणं ॥२५॥

व्याख्या—पुनर्यच्चित्तमन्तं द्विपदादि, वा **अचित्तं** सुवर्णादि, **अल्पं यदि वा बहुं** प्रचुरं **अदत्तं** दायकेनाऽनर्पितं **यः** स्वयमेव **न गृह्णाति, तं वयं ब्राह्मणं ब्रूमः** ॥२५॥ यदुक्तम**ारण्यके**—

परद्रव्यं यदा दृष्ट्वा, आकुलं ह्यथवा रहे ।
धर्मकामो न गृह्णाति, ब्रह्म सम्पद्यते तदा ॥१॥ [ ]

दिव्वं तिरिक्खमाणुस्सं, मेहुणं जो न सेवइ ।
मणसा कायवक्केण, तं वयं बूम माहणं ॥२६॥

व्याख्या—पुनर्यो **दिव्यतिर्यग्मानुष्यं मैथुनं न सेवते मनसा कायेन वचसा** च, **तं वयं ब्राह्मणं ब्रूमः**, यदुक्तम**ारण्यके**—

देवमानुषतिर्यक्षु, मैथुनं विर्जयेद्यदा ।
कामरागविरक्तश्च, ब्रह्म सम्पद्यते तदा ॥१॥ [ ] ॥२६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जहा पोमं जले जायं, नोवलिप्पइ वारिणा ।
एवं अलित्तं कामेहिं, तं वयं बूम माहणं ॥२७॥

व्याख्या—**यथा पद्मं जले जातं** तत्त्यागादूर्ध्वस्थितेश्च **वारिणा नोपलिप्यते, एवं** पद्मवदलिप्तः **कामै**स्तत्र जन्मादिप्राप्तोऽपि, **तं वयं ब्राह्मणं ब्रूमः** ॥ यदुक्तमारण्यके—

यदा सर्वं परित्यज्य, निःसंगो निःपरिग्रहः ।
निश्चिन्तश्च चरेद्धर्मं, ब्रह्म सम्पद्यते तदा ॥१॥ [ ] ॥२७॥

एवं मूलगुणैरुक्त्वा अथोत्तरगुणैस्तमाह—

अलोलुयं मुहाजीविं, अणगारं अकिंचणं ।
असंसत्तं गिहत्थेसु, तं वयं बूम माहणं ॥२८॥

व्याख्या—**अलोलुपमा**हारादिष्वलम्पटं, **मुग्धाजीविनं** मुग्ध इवोञ्छमात्रवृत्तिं, **अनगारमकिञ्चनमसंसक्तम**सम्बद्धं **गृहस्थै**रिति पिण्डविशुद्धिरुक्ता, **तं वयं ब्राह्मणं ब्रूमः** ॥२८॥

जहित्ता पुव्वसंजोगं, नाइसंगे य बंधवे ।
जो ण सज्जइ एएसु, तं वयं बूम माहणं ॥२९॥

व्याख्या—**पूर्वसंयोगं** मात्रादिसम्बन्धं, **च** पुनर्ज्ञातिसङ्गान् श्वश्वादिसम्बन्धाश्च **बान्धवान्** भ्रात्रादीन् त्यक्त्वा, **एतेषु** पुनर्यो **न सजति** रज्यते **तं वयं ब्राह्मणं ब्रूमः** ॥२९॥

वेदाध्ययनयजनकृदेव पात्रं ब्राह्मणो न तु त्वयोक्त इत्याशङ्क्याह—

पसुबंधा सव्ववेया य, जट्ठं च पावकम्मुणा ।
ण तं तायइ दुस्सीलं, कम्माणि बलवंतिह ॥३०॥

व्याख्या—पशूनां बन्धो विनाशाय नियमनं यैर्हेतुभिस्तेऽमी **पशुबन्धाः**, "**श्वेतं छागमालभेत वायव्यां दिशि भूतिकामः**" [ ] इत्यादिवाक्योपलक्षिताः सर्वे वेदाः, तथा **इष्टं** यजनं, **चः** समुच्चये, **पापकर्मणा** पापहेतुपशुवधाद्यनुष्ठानेन, **न** नैव **तं** वेदाध्यातारं यष्टारं वा **त्रायन्ते** भवात्, **दुःशीलं** हिंसादिप्रवर्त्तनेन दुराचारं, यतः **कर्माणि बलवन्ति** दुर्गतिनयनं प्रति, **इह** वेदाध्ययने यजने च हिंसास्ति, अतो नैतद्योगाद् ब्राह्मणः पात्रभूतः, किन्तूक्तगुण एव ॥३०॥

अन्यच्च—

न वि मुंडिएण समणो, न ॐकारेण बंभणो ।
न मुणी रण्णवासेण, न कुसचीरेण तावसो ॥३१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—**मुण्डितेन** केवलं केशलोचेनैव **न श्रमणो** निर्ग्रन्थो न, **ओंकारेणेति** '**ॐभूर्भुवःस्वः**' इत्यादिना **ब्राह्मणो न** स्यात्, **न मुनिररण्यवासेन, न कुशमयं चीवरं** वल्कलं **तेन तापसः** ॥३१॥

कथममी स्युरित्याह—

समयाए समणो होइ, बंभचेरेण बंभणो ।
नाणेण उ मुणी होइ, तवेण होइ तावसो ॥३२॥

व्याख्या—**समतया** रागद्वेषाऽभावरूपया **श्रमणो भवति**, तथा **ब्रह्मचर्येण** ब्रह्म प्रागुक्ताऽहिंसादिरूपं, तस्य चर्यं चरणं तेन **ब्राह्मणो** भवति । तथा च—"**द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च**", [ ] यतः—"**शब्दब्रह्मणि निष्णातः, परं ब्रह्माधिगच्छति**" [ ] इत्यादि । तु पुनर्ज्ञानेन **मुनिर्हेयोपादेयविधिज्ञो भवति** । तथैव **तपसा तापसो** द्वादशविधतपोऽनुष्ठाता **भवति** ॥३२॥

नन्वर्थवत्त्वं नाम्नो हेतुरुतान्यथाऽपि डित्थादिवदित्याह—

कम्मुणा बंभणो होइ, खत्तिओ होइ कम्मुणा ।
वइस्सो कम्मुणा होइ, सुद्दो हवइ कम्मुणा ॥३३॥

व्याख्या—**कर्मणा** क्रियया **ब्राह्मणो भवति** । यथा—

क्षमा दानं दमो ध्यानं, सत्यं शौचं धृतिर्घृ(दया घृ)णा ।
ज्ञानविज्ञानमास्तिक्य-मेतद् ब्राह्मणलक्षणम् ॥१॥ [ ]

तथा **कर्मणा** क्षतत्राणलक्षणेन **क्षत्रियो भवति** । कृषिपशुपाल्यादि**कर्मणा वैश्यो भवति** । शोचनादिहेतुप्रैषादि**कर्मणा** च **शूद्रो भवति** । ब्राह्मणप्रक्रमे शेषाभिधानं व्याप्तिदर्शनार्थं । भवन्मतेऽप्युक्तम्—

एकवर्णमिदं सर्वं, पूर्वमासीद्युधिष्ठिर ! ।
क्रियाकर्मविभेदेन, चातुर्वण्यं व्यवस्थितम् ॥१॥ [ ] ॥३३॥

किमिदं स्वबुद्ध्यैवोच्यते ? इत्याह—

एए पाउकरे बुद्धे, जहिं होइ सिणायए ।
सव्वकम्मविणिमुक्कं, तं वयं बूम माहणं ॥३४॥

व्याख्या—**एतान्** प्रागुक्तानहिंसाद्यर्थान् **प्रादुरकार्षीद्बुद्धो** ज्ञाततत्त्वः श्रीवीरः, (पाठान्तरे—'**एए पाउकरा धम्मा**' **प्रादुःकरा** नैर्मल्यकारितयाऽऽत्मनः प्रकाशहेतवो **धर्माः**)

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

यैर्भवति स्नातकः केवली, सुब्व्यत्ययात् **सर्वकर्मविनिर्मुक्तः**, **तमित्युक्तगुणं** तत्वतः स्नातकं वा **वयं ब्रूमो ब्राह्मणम्** ॥३४॥

अथोपसंहरति--

एवं गुणसमाउत्ता, जे भवंति दियुत्तमा ।
ते समत्था उद्धत्तुं, परं अप्पाणमेव य ॥३५॥

व्याख्या--एवं **गुणै**रहिंसाद्यैः **समायुक्ता ये भवन्ति द्विजोत्तमाः**, **ते परमात्मानं चैवोद्धर्त्तुं** संसारपङ्कान्निष्कासयितुं मुक्तिपदे स्थापयितुमिति यावत् **समर्थाः** ॥३५॥

इत्युक्त्वा स्थिते मुनौ--

एवं तु संसए छिन्ने, विजयघोसे य माहणो ।
समादाय तओ तं तु, जयघोसं महामुणिं ॥३६॥

व्याख्या--तुरलङ्कारे, **एवं** पूर्वोक्तप्रकारेण **संशये छिन्ने** सति **विजयघोष**नामा स **ब्राह्मणः** 'समादाय' आर्षत्वात् **सम्यगवधार्य**, **ततः** संशयच्छेदानन्तरं **तं**, **तुः** पूर्त्तौ (पाठान्तरे--'संजाणंतो तओ तं तु' **ततस्तं तु सम्यगुपलक्षयन्** यथैष मम भ्रातेति, एष एव च महामुनिरिति) **जयघोषं महामुनिं** प्रति ॥३६॥

तुट्ठे य विजयघोसे, इणमुदाहु कयंजली ।
माहणत्तं जहाभूयं, सुट्ठु मे उवदंसियं ॥३७॥

व्याख्या--**तुष्टश्च**ः पूर्त्तौ **विजयघोष इदमुदाहरति कृताञ्जलिः**, **ब्राह्मणत्वं यथाभूतं** यथावस्थितं सुष्ठु शोभनं यथा स्यादेवं **मे** त्वयोपदर्शितम् ॥३७॥

किञ्च--

तुब्भे जइया जन्नाणं, तुब्भे वेयविओ विऊ ।
जोइसंगविऊ तुब्भे, तुब्भे धम्माण पारगा ॥३८॥

व्याख्या--**यूयं यष्टारो यज्ञानां यूयं वेदविज्ञा विद्वांसः**, **ज्योतिषाङ्गविदो यूयं**, **यूयं धर्माणां** सदाचाराणां **पारगाः** ॥३८॥

तुब्भे समत्था उद्धत्तुं, परं अप्पाणमेव य ।
तमणुग्गहं करेहऽम्हं, भिक्खेणं भिक्खुउत्तमा ॥३९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—यूयमेव **परमात्मानं चोद्धर्त्तुं समर्थाः, तत्तस्मादनुग्रहं भिक्षाग्रहणे-नोपकारं कुरुताऽस्माकं हे भिक्षूत्तम** ! हे तपस्विश्रेष्ठ ! **णमलङ्कारे** ॥३९॥

एवं ब्राह्मणोक्तो मुनिः—

न कज्जं मज्झ भिक्खेणं, खिप्पं निक्खमसू दिया ।
मा भमिहि भयावत्ते, घोरे संसारसागरे ॥४०॥

व्याख्या—हे **द्विज** ! न **कार्यं मम भिक्षया, क्षिप्रं निःक्रम** ! प्रव्रज ! **मा भ्रमीः**! यद्वा **मा भ्रमिष्यसि, भयावर्त्ते** भयानि इहलोकभयादीनि तान्येवावर्त्ता भ्रमर्यो यस्मिन्, एवंविधे **घोरे** भीषणे **संसारसागरे** ॥४०॥

उवलेवो होइ भोएसु, अभोगी णोवलिप्पइ ।
भोगी भमइ संसारे, अभोगी विप्पमुच्चइ ॥४१॥

व्याख्या—**उपलेपः** कर्मोपचयरूपो [**भवति**] **भोगेषु** भुज्यमानेषु, **अभोगी च नोपलिप्यते** कर्मभिः, **भोगी भ्रमति संसारे, अभोगी** च कर्मलेपाद्विप्रमुच्यते ॥४१॥

दृष्टान्तेनाह—

सुक्को उल्लो य दो छूढा, गोलया मट्टियामया ।
दो वि आवडिया कुड्डे, जो उल्लो सोत्थ लग्गइ ॥४२॥

व्याख्या—शुष्कश्चार्द्रश्च द्वौ क्षिप्तौ गोलकौ मृत्तिकामयौ, द्वाप्यापतितौ **कुड्ये** भित्तौ, ततो **य आर्द्रः सोऽत्रेत्यनयोर्मध्ये लगति** श्लिष्यति कुड्ये ॥४२॥

दार्ष्टान्तिकयोजनामाह—

एवं लग्गंति दुम्मेहा, जे नरा कामलालसा ।
विरत्ता उ न लग्गंति, जहा सुक्के उ गोलए ॥४३॥

व्याख्या—**एवं लगन्ति** कर्मणा, **दुर्मेधसो** दुष्टबुद्धयो **ये नराः कामलालसा** विषयलम्पटाः, **तु** पुनर्ये **विरक्ता** विषयेभ्यो विमुखीभूतास्ते **न लगन्ति** कर्मभिः सह श्लेषीभावं न प्राप्नुवन्ति, **यथा** स **शुष्को गोलको** भित्तौ न लगन्ति ॥४३॥

ततः—

एवं सो विजयघोसो, जयघोसस्स अंतिए ।
अणगारस्स निक्खंतो, धम्मं सुच्चा अणुत्तरं ॥४४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—**एवम**मुना प्रकारेण **स विजयघोषो** विप्रो **जयघोषस्यानगारस्यान्तिके-ऽनुत्तरं** प्रधानं **धर्मं** धर्मस्वरूपं **श्रुत्वा निष्क्रान्तो** दीक्षितः ॥४४॥

अध्ययनार्थमुपसंहरन्ननयोः फलमाह—

खवित्ता पुव्वकम्माइं, संजमेण तवेण य ।
जयघोसविजयघोसा, सिद्धिं पत्ता अणुत्तरं ॥४५॥ त्ति बेमि

व्याख्या—**जयघोषविजयघोषा**वुभावपि **पूर्वकर्माणि संयमेन** श्रामण्येन **तपसा च क्षपयित्वा** क्षयं नीत्वाऽनुत्तरामनुपमां **सिद्धिगतिं प्राप्तौ, इति** समाप्तौ, **ब्रवीमी**ति प्राग्वत् ॥४५॥

इति पञ्चविंशं यज्ञीयाध्ययनमुक्तम् ॥२५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

षड्विंशं सामाचार्याख्यमध्ययनम् ॥

प्राग्ब्राह्मणा उक्ताः, तद्वांश्च यतिः, तेन च सामाचारी समाचार्येति षड्विंशं **सामाचार्य**ध्ययनमाह–

सामायारिं पवक्खामि, सव्वदुक्खविमोक्खणिं ।
जं चरित्ता ण निग्गंथा, तिण्णा संसारसागरं ॥१॥

व्याख्या–**सामाचारीं** यतिजनकार्यरूपां **प्रवक्ष्यामि, सर्वदुःखविमोक्षणीं, यां चरित्वाऽ**सेव्य, **णं** वाक्यालङ्कारे, **निर्ग्रन्थाः संसारसागरं तीर्णा** मुक्तिं प्राप्ताः एवं तरन्ति तरिष्यन्ति च ॥१॥

सामाचारीमाह–

आवस्सिया य पढमा, बिइया य निसीहिया ।
आपुच्छणा य तइया, चउत्थी पडिपुच्छणा ॥२॥

व्याख्या–व्रतादारभ्य निःकारणं गुर्ववग्रहे आशातनासम्भवान्न स्थेयं, किन्तु ततो निर्गम्यं, न च निर्गमनमावश्यिकीं विनेति **प्रथमावश्यिकी**, निर्गत्य च यत्रास्पदे स्थेयं तत्र नैषेधिकी कार्येति **द्वितीया नैषेधिकी**, ततोच्छ्वासं मुक्त्वा सर्वकार्येषु गुरवः पृष्टव्या इति **तृतीया आपृच्छना**, आपृच्छनायाः प्रवृत्तिकाले पुनः पृष्टव्या गुरव इति **चतुर्थी प्रतिपृच्छना** ॥२॥

छंदणा पंचमा होइ, इच्छाकारो य छट्ठओ ।
सत्तमा उ भवे मिच्छा, तहक्कारो य अट्ठमो ॥३॥

व्याख्या–अट्टनादि कृत्वा नात्मकुक्षम्भरिणा भाव्यं, शेषयतिनिमन्त्रणात्मिका **छन्दना** कार्येति **पञ्चमी**, तस्यामपीच्छाकारस्तद्रूपा **षष्ठी**, स्खलिते **मिथ्याकार** इति **सप्तमी**, गुर्वादेशे तथेति **तथाकार**रूपाऽष्टमी ॥३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अब्भुट्ठाणं नवमं, दसमा उवसंपया ।
एसा दसंगा साहूणं, सामायारी पवेइया ॥४॥

व्याख्या—तथेति प्रतिपद्य सर्वकृत्येषूद्यमवता भाव्यमित्यभ्युत्थानरूपा **नवमी,** उद्यमवता च ज्ञानाद्यर्थाय गणान्तरं गम्यं, तत्रोपसम्पद्ग्राह्येत्युपसम्पत् **एषा दशाङ्गा साधूनां सामाचारी प्रवेदिता** उक्तार्हदाद्यैः ॥४॥

एताः स्पष्टयति—

गमणे आवस्सियं कुज्जा, ठाणे कुज्जा निसीहियं ।
आपुच्छणा सयंकरणे, परकरणे पडिपुच्छणा ॥५॥

व्याख्या—गमने आवश्यिकीं कुर्यात्, आवश्यकेष्वप्रमत्ततयाऽवश्यकर्त्तव्यव्यापारेषु सत्सु भवावश्यिकी तां, **स्थाने** उपाश्रये प्रविशन् निषेधः प्रमादेभ्य आत्मनो व्यावर्त्तनं, तत्र भवा **नैषेधिकी, तां** कुर्यात्, स्वस्य कार्यस्य करणं **स्वकरणं तस्मिन् आपृच्छना** ज्ञेया, आङिति सर्वकृत्याभिव्याप्त्या पृच्छनं, यथेदमहं कुर्यां न वेत्येवंरूपाऽऽपृच्छना, **परकरणेऽन्य-**कार्यविधाने **प्रतिपृच्छना,** गुरुनियुक्तेऽपि पुनःप्रवृत्तिकाले पृच्छना प्रतिपृच्छना ॥५॥

छंदणा दव्वजाएणं, इच्छकारो य सारणे ।
मिच्छाकारो य णिंदाए, तहक्कारो य पडिस्सुए ॥६॥

व्याख्या—छन्दना शेषयतिनिमन्त्रणा, **द्रव्यजातेना**ऽशनाद्यैः प्राग्गृहीतैः, इच्छा स्वाभिप्रायस्तया करणं तत्तत्कार्ये निवर्त्तन**मिच्छकारः, सारणे** इत्यौचित्येनात्मनः परस्य वा कृत्यं प्रति प्रवर्त्तने, तत्रात्मसारणे यथा इच्छाकारे युष्मच्चिकीर्षितं कार्यमिदमहं करोमीति, अन्यसारणे च मम पात्रलेपनादिसूत्रदानादीच्छाकारेण यूयं कुरुतेति । मिथ्या करोमीदमिति प्रतिपत्ति**र्मिथ्याकारः,** स **चात्मनो निन्दायां** वितथाचरणे, यथा धिगिदं मिथ्या मया कृतमिति । **तथाकारः,** इदमित्थमेवेत्यभ्युपगमः **प्रतिश्रुते** प्रतिश्रवणे वचनादीनां गुरोः पार्श्वात् ॥६॥

अब्भुट्ठाणं गुरुपूया, अच्छणे उवसंपया ।
एवं दुपंचसंजुत्ता, सामायारी पवेइया ॥७॥

व्याख्या—अभीत्याभिमुख्येनोत्थानमुद्यम**नमभ्युत्थानं,** तच्च **गुरुपूजायां,** सा च गौरवार्हाणामाचार्यग्लानबालादीनां यथाहारादिसम्पादनं, अत्राभ्युत्थानं निमन्त्रणाभूतरूपमेव ग्राह्यं । 'अच्छणे'त्ति, **अस्थाने** आचार्यान्तरादिपार्श्वे **उपसम्पत्** इयन्तं कालं भवदन्तिके

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मया वसितव्यमिति । आर्षत्वाद् **द्विपञ्चकसंयुक्ता** दशसङ्ख्यायुक्ता **सामाचारी प्रवेदिता** कथिता । (पाठान्तरे–**एषा दसंगा साहूणं । सामाचारी पवेइया**) ॥७॥

एवं दशधा सामाचारीमुक्त्वौघसामाचारीमाह–

पुव्विल्लंमि चउब्भाए, आइच्चंमि समुट्ठिए ।
भंडयं पडिलेहित्ता, वंदित्ता य तओ गुरुं ॥८॥

व्याख्या–पूर्वस्मिन् किञ्चिदूननभश्चतुर्भागे **आदित्ये समुत्थिते** प्राप्ते पादोन-पौरुष्यां **भाण्डकं** पतद्ग्रहाद्युपकरणं **प्रतिलेख्य** सामायिकभाषया चक्षुषा निरीक्ष्य प्रमृज्य च, **वन्दित्वा च ततो गुरुमाचार्याद्यम्** ॥८॥

पुच्छिज्जा पंजलिउडो, किं कायव्वं मए इह ।
इच्छं निओइउं भंते, वेयावच्चे व सज्झाए ॥९॥

व्याख्या–पृच्छेत् कृतप्राञ्जलिः, यथा **किं कर्त्तव्यं मयेहास्मिन्** समये, **इच्छामि** अन्तर्भावितण्यर्थत्वान्**नियोजयितुं** युष्माभिरात्मानमित्यर्थः, **हे भदन्त** ! **वैयावृत्त्ये** ग्लानादि-कार्ये **स्वाध्याये वा,** पात्रप्रतिलेखनानन्तरं गुरुं पृच्छेदिति यदुक्तं तत्प्रायस्तदैव वैया-वृत्त्यादिकार्याऽभावात्, यद्वा पूर्वस्मिन्नभसश्चाग्रे आदित्ये समुत्थित इव समुत्थिते बहु-प्रकाशीभवनात्तस्य, भाण्डकं धर्मद्रविणोपार्जनहेतुमुखवस्त्रिकावर्षाकल्पादि प्रतिलेख्य गुरुं नत्वा पृच्छेदिति ॥९॥

एवं पृष्ट्वा–

वेयावच्चे निउत्तेणं, कायव्वं अगिलायओ ।
सज्झाए वा निउत्तेणं, सव्वदुक्खविमोक्खणे ॥१०॥

व्याख्या–वैयावृत्त्ये नियुक्तेन कर्त्तव्यं वैयावृत्त्यं **अग्लान्यैव** शरीर श्रमम-ध्यात्वैव, **स्वाध्याये वा नियुक्तेन सर्वदुःखविमोक्षणे** स्वाध्यायोऽग्लान्यैव कार्यः ॥१०॥

उत्सर्गिकं दिनकृत्यमाह–

दिवसस्स चउरो भाए, भिक्खू कुज्जा वियक्खणो ।
तओ उत्तरगुणे कुज्जा, दिणभाएसु चउसु वि ॥११॥

व्याख्या–दिवसस्य चतुरो भागान् कुर्याद्भिक्षुर्विचक्षणो बुद्ध्या, **ततो** बुद्ध्या चतुर्भागकरणादनु **उत्तरगुणान्** स्वाध्यायादीन् **कुर्यादिवसभागेषु चतुर्ष्वपि** ॥११॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पढमं पोरिसिं सज्झायं, बीयं ज्झाणं ज्झियायइ ।
तइयाए भिक्खायरियं, चउत्थीं भुज्जो वि सज्झायं ॥१२॥

व्याख्या–**प्रथमां पौरुषीमा**श्रित्येति गम्यं, **स्वाध्यायं** वाचनादिं कुर्यात्, **द्वितीयां** पौरुषीमाश्रित्य **ध्यानमर्थ**विषयं मानसादिव्यापारणं **ध्यायेत्** कुर्यात्, **तृतीयायां भिक्षाचर्यां** भोजनबहिर्गमनादीनि च, **'भुज्जो वि' पुनरपि चतुर्थीं** पौरुषीमाश्रित्य **स्वाध्यायं** प्रतिलेखनास्थण्डिलप्रत्युपेक्षणादीनि च कुर्यात्, इत्थं कथनं काले कृष्यादिरिव सर्वानुष्ठानसाफल्यात् ॥१२॥

पौरुषी कथं ज्ञेयेत्याह–

आसाढे मासे दुपया, पोसे मासे चउप्पया ।
चित्तासोएसु मासेसु, तिपया होइ पोरिसी ॥१३॥

व्याख्या–**आषाढे मासे** आषाढपूर्णिमायां **द्विपद्या** छायया पौरुषी स्यात्, एवं **पौषे मासे चतुःपद्या, चैत्राश्विनमासद्वये त्रिपद्या भवति पौरुषी** ॥१३॥

शेषमासदिनेषु पौरुष्यानयनविधिमाह–

अंगुलं सत्तरत्तेण, पक्खेणं य दुयंगुलं ।
वड्ढए हायए वावि, मासेणं चउरंगुलं ॥१४॥

व्याख्या–**सप्तरात्रेण**, दिनाऽविनाभावित्वाद्रात्रीणां, ततः सप्ताहोरात्रेण सार्द्धेनेति शेषः अङ्गुलं, एवं **पक्षेण द्व्यङ्गुलं** दक्षिणायने **वर्द्धते**, उत्तरायणे य सार्द्धसप्ताहोरात्रेण अङ्गुलं, पक्षेण च द्व्यङ्गुलं **हीयते, मासेन** च **चतुरङ्गुलं** । एवं दक्षिणायने वर्द्धते, उत्तरायणे च हीयते। पुनर्यदा केषुचिन्मासेषु चतुर्दशदिनैः पक्षः स्यात्, तदा सप्तरात्रेणापि अङ्गुलवृद्धिहान्या न कश्चिदपि दोषः ॥१४॥

तानेवाह–

आसाढबहुले पक्खे, भद्दवए कत्तिए य पोसे य ।
फग्गुणवइसाहेसु य, नायव्वा ओमरत्ताओ ॥१५॥

व्याख्या–एतेषु मासेषु अवमरात्रयो ज्ञेयाः, **आषाढे बहुलपक्षे,** बहुलपक्षशब्दस्य भाद्रपदादिषु सम्बन्धः कर्त्तव्यः, **भाद्रपदे कार्त्तिके पौषे फाल्गुने वैशाखे** कृष्णपक्षे **अवमरात्रयो भवन्ति**, अवमा उना एकेन अहोरात्रेण हीना इति अवमरात्रयः, रात्रिपदेन अहोरात्रग्रहणं कर्त्तव्यं, एवमेतेषु मासेषु दिनचतुर्दशकः कृष्णपक्षः स्यादिति भावः ॥१५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पादोनपौरुषीपरिज्ञानोपायमाह—

जिट्ठामूले आसाढसावणे, छहिं अंगुलेहिं पडिलेहा ।
अट्ठहि बिइयतइयम्मी, तईए दसहिं अट्ठहिं चउत्थे ॥१६॥

व्याख्या—ज्येष्ठामूले ज्येष्ठायां मूले च राकाभावाज्ज्येष्ठामूलशब्देन **ज्येष्ठे** तथा **आषाढे श्रावणे** च **षड्भिरङ्गुलैः** प्रागुद्दिष्टपौरुषीमाने **प्रतिलेखना**कालः, **अष्टभिरङ्गुलैरिति** सर्वत्र ज्ञेयं, **द्वितीयत्रिके** भाद्रपदाश्विनकार्त्तिकरूपे, **तृतीये** त्रिके मार्गशीर्षपौषधमाघेषु **दशभिः, तथाष्टभिश्चतुर्थे** फाल्गुनचैत्रवैशाखत्रये ॥१६॥

पादोनपौरुषीप्रतिलेखनापौरुषीयन्त्रामित्थं—

॥ पादोनपौरुषीयन्त्रं[१] ॥

ज्ये० पद २ अं० १०	भा० पद ३ अं० ४	मा० पद ४ अं० ६	फा० पद ४
आ० पद २ अं० ६	आ० पद ३ अं० ८	पो० पद ४ अं० १०	चै० पद ३ अं० ८
श्रा० पद २ अं० १०	का० पद ३	मा० पद ४ अं० ६	वै० पद ३ अं० ४

॥ प्रतिलेखनापौरुषीयन्त्रं ॥

ज्ये० पद २ अं० ४	भा० पद २ अं० ८	मा० पद ३ अं० ८	फा० पद ४ अं० ४
आ० पद २	आ० पद ३	पो० पद ४	चै० पद ३
श्रा० पद २ अं० ४	का० पद ३ अं० ४	मा० पद ३ अं० ८	वै० पद ३ अं० ८

दिनकृत्यमुक्त्वाथ रात्रिकृत्यमाह—

रत्तिं पि चउरो भाए, भिक्खू कुज्जा वियक्खणो ।
तओ उत्तरगुणे कुज्जा, राईभाएसु चउसु वि ॥१७॥

व्याख्या—रात्रेरपि, न केवलं दिनमित्यपिशब्दार्थः, **चतुरो भागान् विचक्षणः** क्रियावान् भिक्षुः कुर्यात्, **ततश्च**तुर्भागकरणादनन्तरं **चतुर्ष्वपि रात्रिभागेषु** उत्तरगुणान् कुर्यात् ॥१७॥

पढमे पोरिसि सज्झायं, बिइए ज्झाणं झियायइ ।
तइयाए निद्दमुक्खं च, चउत्थी भुज्जो वि सज्झायं ॥१८॥

---

१. मुख्यवृत्त्याऽयनगतकर्कसङ्क्रान्तिमारभ्याङ्गुलवृद्धिः, मकरादारभ्याङ्गुलहानिर्ज्ञेया, पूर्णिमान्ता मासाः स्युः, तत्र कर्के श्रावणः, मकरे माघः, मासान्ते पूर्णिमायां आसाढे मासे 'दुपया' इत्यादि प्रमाणम् ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या–प्रथमायां पौरुष्यां स्वाध्यायं, द्वितीयायां पौरुष्यां **ध्यानं** धर्मध्यानं सूक्ष्मसूत्रार्थलक्षणं क्षितिवलयद्वीपसागरभवनादिविषयं [**ध्यायेदिति** वाऽनेकार्थत्वाद्धातूनां] **कुर्यात्**। **तृतीयायां निद्रामोक्षं** पूर्वं निरुद्धाया निद्राया मोक्षं मुत्कलं, न स्वापं, वृषभापेक्षं चैतत्। **चतुर्थपौरुष्यां** च **भूयोऽपि स्वाध्यायं** कुर्यात्।

तथा च

सव्वे वि पढमजामे, दोन्नि य वसभाण आइमा जामा।
तइओ होइ गुरूणं, [१]चउत्थ सव्वे गुरू सूयइ ॥१॥ [प्र. सा./गा.८६१]

शयनविधिश्चायं–**बहुपडिपुण्णाए पोरसीए गुरुसगासं गंतूण भणइ, इच्छामि खमासमणो वंदिउं, पवंदामि, बहुपडिपुण्णा पोरिसी, अणुजाणह राइयं संथारयं, ताहे पढमं काइया भूमिं वच्चंति, ताहे जत्थ संथारभूमी तच्छ वच्चंति, ताहे उवहिंमि उवओगं करेत्ता पमज्जित्ता उवहीए दोरयं छोडंति, ताहे संथारपट्टयं उत्तरपट्टयं च पडिलेहित्ता, दो वि एगत्थ लायित्ता उरुम्मि ठवंति, ताहे संथारभूमिं पमज्जंति, ताहे संथारयं अच्छुरंति, से उत्तरपट्टयं तत्थय लग्गा मुहपोत्तियाए उवरिमं कायं पमज्जंति, हेठिल्लं रयहरणेणं, कप्पे य वामप्पासे ठावंति, पुणो संथारं च पडित्ता भणंति, जेट्ठज्जाईण पुरतो चिट्ठित्ताणं, अणुजाणिज्जह, पुणो सामाइयं तिन्नि वारि कड्ढिऊण सूयंति।** [ ] सुप्तानां चायं विधिः–

[२]अणुजाणह० संकोए संडासं, उव्वत्तंती य कायपडिलेहा।
दव्वादीउवओगं, उस्सासनिरुंभणालोयं ॥२॥ [वि. सा./गा.३७६] ॥१८॥

रात्रिचतुर्भागज्ञोपायमाह–

जं नेइ जया रत्तिं, णक्खत्तं तंमि णहचउब्भाए।
संपत्ते विरमिज्जा, सज्झायं पदोसकालंमि ॥१९॥

व्याख्या–यन्नक्षत्रं रात्रिं समाप्तिं **नयति, यदा** अस्तसमये यन्नक्षत्रं उदेति तस्मिन्नेव नक्षत्रे रात्रिः समाप्तीभवति, **तस्मिन्नेव** नक्षत्रे **आकाशस्य चतुर्भागे सम्प्राप्ते** स्वाध्यायाद्विरमेत्, **प्रदोषकाले** रजनीमुखे प्रदोषकालग्रहणं कृत्वा पश्चात्पौरुष्यां प्रथमायां सूत्र**स्वाध्यायं** कुर्यात् ॥१९॥

तम्मेव य नक्खत्ते, गयणचउब्भाए सावसेसंमि।
वेरत्तियं पि कालं, पडिलेहित्ता मुणी कुज्जा ॥२०॥

---

१. चउत्थओ होइ सव्वेसिं। इति बृहद्वृत्तौ ॥ सम्पा.

२. अणुजाणह संथारं बाहुवहाणेण वामपासेणं।
पायपसारिणि कुक्कुडि अतरंतो पमज्जए भूमिं ॥१॥ [वि.सा./गा.३७५]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या–तस्मिन्नेव नक्षत्रे गगने आकाशस्य **चतुर्थे भागे सावशेषे** सति **वैरात्रिकं** नाम **कालं, अपि**शब्दात् स्वस्य स्वस्य समये कालं **प्रतिलेख्य मुनिः** कालग्रहणं प्रति जागर्यं **कुर्यात्**, ततश्चैतावता प्रथमे प्रहरे प्रादोषिकं कालं गृहीत्वा स्वाध्यायः कर्त्तव्यः, एवमन्येष्वपि ज्ञेयम् ॥२०॥

सामान्येन दिनरात्रिकृत्यमुपदिश्य विशेषत आह–

पुव्विल्लंमि चउब्भाए, पडिलेहित्ताण भंडगं ।
गुरुं वंदित्तु सज्झायं, कुज्जा दुक्खविमोक्खणं ॥२१॥

व्याख्या–पूर्वस्मिंश्चतुर्थभागे प्रथमे पौरुषीलक्षणे दिनस्य, **प्रत्युपेक्ष्य भाण्डकं** वर्षाकल्पादिकमुपधिमादित्योदयसमये, **गुरुं वन्दित्वा दुःखविमोक्षणं** पापनिवारकं स्वाध्यायं कुर्यात् ॥२१॥

पोरिसीए चउब्भाए, सेसे वंदित्ता तो गुरुं ।
अपडिक्कमित्ता कालस्स, भायणं पडिलेहए ॥२२॥

व्याख्या–पौरुष्याश्चतुर्थे भागेऽवशिष्यमाणे पादोनपौरुष्यां सत्यां **ततो गुरून् वन्दित्वा, अप्रतिक्रम्य कालस्य,** चतुर्थपौरुष्यामपि स्वाध्यायस्य विधास्यमानत्वात्, **भाजनं प्रतिलेखयत्** ॥२२॥

प्रतिलेखनाविधिमाह–

मुहपोत्तिं पडिलेहित्ता, पडिलेहिज्ज गोच्छयं ।
गोच्छगलइयंगुलिओ, वत्थाइं पडिलेहए ॥२३॥

व्याख्या–मुखपोतिकां प्रतिलेख्य गोच्छकं झोलिकोपरिसत्कमुर्णामयं वस्त्रं **प्रतिलेखयेत्**, प्राकृतत्वादङ्गुलिभिर्लातो गोच्छो येनाय**मङ्गुलिलातगोच्छको** मुनिः **वस्त्राणि** पटलकरूपाणि **प्रतिलेखयेत्** प्रमार्जयेच्च ॥२३॥

इत्थं पटलानि गोच्छकेन प्रमृज्य पुनर्यत्कुर्यात्तदाह–

उड्ढं थिरं अतुरियं, पुव्वं ता वत्थमेव पडिलेहे ।
तओ बिइयं पप्फोडे, तइयं च पुणो पमज्जिज्जा ॥२४॥

व्याख्या–ऊर्द्ध्वं कायत उत्कुटुकत्वेन स्थित्वाद्वस्त्रतस्तिर्यक्प्रसारितत्वात्, **स्थिरं** दृढग्रहणेन, **अत्वरितं** अद्रुतं यथास्यादेवं, **पूर्वं** प्रथमं, 'ता' इति **तावद्वस्त्रं** पटलकरूपं,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जातावेकवचनं, सामान्यतो वस्त्रशब्दाभिधानं वर्षाकल्पादिप्रत्युपेक्षणायामप्ययमेव विधिरिति ज्ञप्त्यै एवाऽभिन्नक्रमः, अतः **प्रत्युपेक्षेतैवा**रतश्च निरीक्षेतैव, न तु प्रस्फोटयेत्, **ततः** प्रत्युपेक्षणानन्तरं **द्वितीय**मिदं कुर्याद्यत् परिशुद्धं सत् **प्रस्फोटयेत्** तत्स्फोटनां कुर्यात्, **तृतीयं** च **पुनरि**दं कुर्याद्यत् **प्रमृज्यात्**। कोऽर्थः ? प्रत्युपेक्ष्य प्रस्फोट्य च हस्तगतान् प्राणिनः प्रमृज्यादित्यर्थः। **ओघर्निर्युक्त्या**दौ पात्रस्य प्रत्युपेक्षा पादपुञ्छने निविष्टस्योक्तास्ति ॥२४॥

प्रस्फोटनविधिमाह–

अणच्चावियं अवलियं, अणाणुबंधिममोसलिं चेव ।
छप्पुरिमा णव खोडा, पाणीपाणिविसोहणं ॥२५॥

व्याख्या–एवं वस्त्रप्रतिलेखनं कुर्यात्। कीदृशं ? **अनर्त्तितं** वस्त्रं वपुर्यथा स्यात्, **अवलितमा**त्मनो वस्त्रस्य च मोटनं यथा न स्यात्, अनुबन्धेन नैरन्तर्येण युक्तमनुबन्धि, न तथा **अननुबन्धि**, आन्तर्यसहितमिति, कोऽर्थः ? यथा पूर्वापरप्रस्फोटनज्ञानं स्यात्तथा प्रस्फोटनं कर्त्तव्यमिति भावः, 'अमोसलिं'त्ति सूत्रत्वादनामर्शवत्, तिर्यगूर्ध्वाधो घट्टनं यथा न स्यात्, 'छप्पुरिमा' **षट् पूर्वाः** पूर्वं क्रियमाणत्वात् तिर्यक्कृतवस्त्रप्रस्फोटनात्मकाः क्रियाविशेषा येषु ते षट्पूर्वाः, **नव** 'खोड'त्ति **क्षोटकाः** समयप्रसिद्धस्फोटनात्मका हस्तोपरि कर्त्तव्याः, पुनः **पाणौ** पाणितले **प्राणानां** कुन्थ्वादिसत्त्वानां **विशोधनं** (पाठान्तरे–**प्रमार्जनं प्रस्फोटनं**) त्रिकत्रिकोत्तरकालं त्रिकसङ्ख्यं कर्त्तव्यम् ॥२५॥

प्रतिलेखनादोषत्यागार्थमाह–

आरभडा सम्मद्दा, वज्जेयव्वा य मोसली तइया ।
पप्फोडणा चउत्थी, विक्खित्ता वेइया छट्ठी ॥२६॥

व्याख्या–**आरभटे**ति विपरीतकरणं, त्वरितं वाऽन्यान्यवस्त्रग्रहणं, 'सम्मद्दा' **संमर्दनं** रूढित्वात् स्त्रीत्वं, वस्त्रान्तःकोणसम्वलनं उपधेर्वोपरि निषीदनं, वर्जितव्येति सर्वत्र ज्ञेयं। **चः** पूर्त्तौ '**मोसलि**'त्ति तिर्यगूर्ध्वमधो वा घट्टना **तृतीया, प्रस्फोटना** प्रकर्षेण रेणुयुग्वस्त्रस्य **प्रस्फोटना चतुर्थी, पञ्चमी विक्षिप्ता** प्रतिलेखितस्य वस्त्रस्य अप्रतिलेखितवस्त्रोपरिमोचनं, अथवा दिक्षु च विलोकनं, **षष्ठी** प्रतिलेखना **वेदिका**नाम्नी, तस्या वेदिकायाः पञ्च भेदा इत्थम्–

ऊर्द्ध्ववेदिका १ अधोवेदिका २ तिर्यग्वेदिका ३ उभयवेदिका ४ एकवेदिका ५॥

यस्मयामुभयोर्जान्वोरुपरि हस्तयो रक्षणं सोर्द्ध्ववेदिका १ यस्यां जान्वोरधः प्रचुरं हस्तयो रक्षणं साऽधोवेदिका २ यस्यां तिर्यग्हस्तौ कृत्वा प्रतिलेखनं सा तिर्यग्वेदिका ३

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

यस्यामुभाभ्यां जानुभ्यां बाह्ये उभयोर्हस्तयो रक्षणं सोभयवेदिका ४ यस्यामेकं जानु हस्तमध्ये अपरं जानु च बाह्ये रक्ष्यते सा एकवेदिका ५। एते पञ्चापि वेदिकादोषाः प्रतिलेखनावसरे त्याज्याः । यदुक्तम्–

''उड्ढवेइया उवरि जुन्नगाणं हत्थे काऊणं पडिलेहइ, हेट्ठा वा काऊणं, दुहओ वा काऊणं, एगं वा जाणुं, अंतो दोण्हं हत्थाणं करेति, उच्छंगे वा हत्थे काऊण पडिलेहे''त्ति ॥२६॥

तथा–

पसिढिलपलंबलोला, एगामोसा अणेगरूवधुणा ।
कुणइ पमाणे पमायं, संकिए गणणोवगं कुज्जा ॥२७॥

व्याख्या–प्रशिथिलं यदऽदृढं अनिरायतं वा वस्त्रं गृह्यते, प्रलम्बो यद्विषमग्रहणेन वस्त्रकोणानामालम्बनं, लोलो भूमौ करे वा यत्प्रत्युपेक्ष्यमाणस्य लोलनं, द्वन्द्वे **प्रशिथिल-प्रलम्बलोलाः**, एकामर्शनं **एकामर्शा** रूढितः स्त्रीत्वं, वस्त्रमध्यप्रदेशं गृहीत्वा ग्रहणदेशं यावदुभयतो वस्त्रस्य यदेककालं सङ्घर्षणमाकर्षणं । **अनेकरूपधुनना** सङ्ख्यात्रयाति-क्रमेण, युगपदेनकवस्त्रग्रहणतो वा धूनना कम्पना यस्यां साऽनेकरूपधुनना । तथा **प्रमाणे** प्रस्फोटादिसङ्ख्यारूपे **प्रमादं कुर्यात्**, यच्च **शङ्किते** प्रमादतः प्रमाणं प्रति शङ्कोत्पत्तौ अङ्गुलिरेखास्पर्शादिनैकद्वित्रिसङ्ख्यात्मकं **गणनोपयोगं** यथा स्यादेवं **कुर्यात्** सोऽपि दोष इति सर्वत्र गम्यम् ॥२७॥

उक्तदोषाऽभावे निर्दोषा प्रतिलेखनेत्युक्तं, अथैनामेव भङ्गकद्वारेण साक्षात् सदोषां निर्दोषां किञ्चिद्विशेषाद्वक्तुमाह–

अणूणातिरित्तपडिलेहा, अविवच्चा सा तहेव य ।
पढमं पयं पसत्थं, सेसाइं उ अप्पसत्थाइं ॥२८॥

व्याख्या–**अन्यूना** ऊना **प्रतिलेखना** न कर्त्तव्या १ **अतिरिक्ता** अधिका न कर्त्तव्या २ **अविव्यत्यासा**, विविधो व्यत्यासो यस्यां सा विव्यत्यासा, न विव्यत्यासा अविव्यत्यासा विपर्यासरहिता, विपरीतत्वेन रहिता ३ इत्यर्थः, एतेषां त्रयाणां भेदानामष्टौ भङ्गा उत्पद्यते, तेषु भङ्गेषु प्रथमं पदं प्रशस्तं प्रथमो भङ्गः समीचीनः, अन्यूना १ अनतिरिक्ता २ अविपर्यासा ३ इत्येवंरूपं **प्रथम**भङ्गरूप**पदं प्रशस्तं** निर्दोषत्वात् शुद्धमित्यर्थः, **शेषाः** सप्तभङ्गास्त्व-**प्रशस्ताः**। अत्र प्रतिलेखनान्यूनताधिक्ये प्रस्फोटनाप्रमार्जने वेलां चाश्रित्य वाच्ये, अवि-व्यत्यासा पुरुषोपधिविपर्यासरहिता कार्या ॥२८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

निर्दोषामप्येनां कुर्वतो तदाह–

पडिलेहणं कुणंतो, मिहो कहं कुणइ जणवयकहं वा ।
देइ व पच्चक्खाणं, वाएइ सयं पडिच्छइ वा ॥२९॥

व्याख्या–प्रतिलेखनां कुर्वन् मिथः कथां करोति, जनपदकथां वा, स्त्यादिकथां च, **ददाति वा प्रत्याख्यानमन्यस्मै, वाचयति वा** परं, **प्रतीच्छति वा स्वयमा**लापादिकं गृह्णाति यः ॥२९॥

पुढवी आउक्काए, तेऊ वाऊवणस्सइतसाणं ।
पडिलेहणापमत्तो, छण्हं पि विराहगो होइ ॥३०॥

व्याख्या–पूर्वोक्तकार्याणि कुर्वन् **प्रतिलेखनायां प्रमत्तो** मुनिः **पृथ्वीकायअप्काय-तेजस्कायवायुकायवनस्पतिकायत्रसकायानां षण्णामपि विराधको भवति** । यथा कुम्भकारशालादौ स्थितो मुनिः प्रतिलेखनाप्रमादवशाच्चेदम्बुभृतघटादिकमपि प्रालोठ्येत्, तदा तज्जलेनाग्निमृद्वीकन्थ्वाद्याः प्लावनया विराध्यन्ते, यत्र चाग्निस्तत्रावश्यं वायुरिति षण्णामपि विराधनं । यदुक्तम्–

जत्थ जलं तत्थ वणं, जत्थ वणं तत्थ सासओ अग्गी ।
तेऊवाऊसहिया, एयं छण्हं पि सह जोओ ॥१॥ [गा.स./गा.१३७]

भावतस्तु प्रमत्ततयाऽन्यथापि विराधकत्वमेव ॥३०॥

पुढवीआउक्काए, तेऊवाऊवणस्सइ तसाणं ।
पडिलेहणआउत्तो, छण्हं पि संरक्खओ (आराहगो) होइ ॥३१॥

व्याख्या–प्रतिखेखनायामायुक्तः प्रमादरहितः साधुः **पृथ्वीकायादीनां षण्णामप्याराधको भवती**ति ॥३१॥

इत्थं प्रथमपौरुषीकृत्यमुक्तं, द्वितीयपौरुषीकृत्यं 'बीइए झाणं झियायइ' इत्यनेन ध्यानमुक्तमेव, उभयं चैतदवश्यं कार्यं, अथ तृतीयपौरुषीकृत्यमाह–

तइयाए पोरिसीए, भत्तं पाणं गवेसए ।
छण्हं अन्नयराए, कारणंमि उवट्ठिए ॥३२॥

व्याख्या–तृतीयायां पौरुष्यां भक्तं पानं च गवेषयेत् । औत्सर्गिकमेतत्, अन्यथा स्थविरकल्पिकानां यथाकालमेव भक्तादिगवेषणं । **''सइ काले चरे''** [द.५-२/६] इत्यादि । **षण्णां कारणानामन्यतरत्कारणे उपस्थिते** समुत्थिते, न तु कारणोत्पत्तिं विनेति भावः ॥३२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तान्येवाह—

वेयण वेयावच्चे, इरियट्ठाए य संजमट्ठाए ।
तह पाणवत्तियाए, छट्ठं पुण धम्मचिंताए ॥३३॥

व्याख्या—सुब्लोपात् **वेदनायै** क्षुत्तृट्वेदनानाशाय १ क्षुत्तृड्भ्यां न गुर्वादिवैयावृत्त्यं स्यादिति **वैयावृत्त्याय** २ **इर्यासमित्यर्थाय च** ३ **संयमार्थाय** ४ **प्राणप्रत्ययाय** जीवित-निमित्ताय ५, अविधिना ह्यात्मनोऽपि प्राणोपक्रमणे हिंसा स्यात्, **षष्ठं पुनरिदं** कारणं, यदुत **धर्मचिन्तायै** ६ भक्तपानं गवेषयेदिति । धर्मचिन्ता धर्मध्यानरूपा श्रुतधर्मविषया ॥३३॥

अथैतत्कारणोत्पत्तौ किमवश्यं भक्तपानं गवेष्यमुतान्यथेत्याह—

निग्गंथो धिइमंतो, निग्गंथी वि ण करिज्ज छहिं चेव ।
ठाणेहिं उ इमेहिं, अणइक्कमणा य से होइ ॥३४॥

व्याख्या—निर्ग्रन्थो धृतिमान् धर्मचरणं प्रति, **निर्ग्रन्थी** तपस्विनी, **सापि न कुर्याद्भ**-क्तादिगवेषणं, **षड्भिश्चैव स्थानैः, तु** पुनरर्थे, **एभिः** किमित्येवमत आह—सूत्रत्वादनतिक्रमणं संयमयोगानां **च** यस्मात् 'से' **तस्य तस्या** वा **भवत्यन्यथातिक्रमणसम्भवात्** ॥३४॥

षट्स्थानान्येवाह—

आयंके उवसग्गे, तितिक्खया बंभचेरगुत्तीसु ।
पाणिदयातवहेउ, सरीरवुच्छेयणट्ठाए ॥३५॥

व्याख्या—आतङ्के ज्वरादिरोगे १ **उपसर्गे** दीक्षादिमोक्षाणार्थं स्वजनादिकृते विमर्शादिहेतोर्वा देवादिकृते २ उभयत्र तन्निवारणार्थं ज्ञेयं, **तितिक्षया** सहनेन, तया क्वविषययेत्याह—**ब्रह्मचर्यगुप्तिषु,** ता हि नान्यथा सोढुं शक्याः ३ **प्राणिंदयाहेतोः,** वर्षादावप्कायादिरक्षायै ४ **तपश्चतुर्थादि** तद्धेतोश्च ५ **शरीरस्य व्यवच्छेदस्तदर्थं,** उचितकाले संलेखनामनशनं वा कुर्वन् भक्ताम्बुगवेषणं न कुर्यात् ६ ॥३५॥

भक्तादि गवेषयन् केन विधिना कियत्क्षेत्रं पर्यटेदित्याह—

अवसेसं भंडगं गिज्झा, चक्खुसा पडिलेहए ।
परमद्धजोयणाओ, विहारं विहरे मुणी ॥३६॥

व्याख्या—अपगतशेष**मपशेषं** समस्तं **भाण्डक**मुपकरणं **गृहीत्वा चक्षुषा** प्रत्यु-पेक्ष्येत, विशेषतः **प्रतिलेखये**च्च, सामान्यतो ह्यप्रत्युपेक्षितस्य ग्रहणमपि न युज्यत एव ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

यतीनां तदादाय **परमुत्कृष्टमर्द्धयोजनादर्द्धयोजनमाश्रित्य** परतो हि क्षेत्रातीतमशनादिः स्यात्, विहरन्त्यस्मिन् प्रदेश इति **विहारः** क्षेत्रं तं **विहरेद्विचरेन्मुनिः** ॥३६॥

पोरिसीए चउत्थीए, निक्खिवित्ताण भायणं ।
सज्झायं तओ कुज्जा, सव्वभावविभावणं ॥३७॥

व्याख्या–इत्थं विहृत्योपाश्रयं चागत्य गुर्वालोचनादि कृत्वा भुक्त्वा **चतुर्थ्यां पौरुष्यां निक्षिप्य** प्रत्युपेक्षणापूर्वकं बद्ध्वा **भाजनं** पात्रं **स्वाध्यायं ततः कुर्यात् सर्वभावानां** जीवादीनां **विभावनं** प्रकाशकम् (पाठान्तरे–**सव्वदुक्खविमोक्खणं**) ॥३७॥

पोरिसीए चउब्भाए, सेसे वंदित्ता तो गुरुं ।
पडिक्कमित्ता कालस्स, सिज्जं तु पडिलेहए ॥३८॥

व्याख्या–**पौरुष्याश्चतुर्थ्याश्चतुर्थभागे शेषे गुरुं वन्दित्वा, ततः** स्वाध्यायादनन्तरं **कालस्य** कालं **प्रतिक्रम्य तु** पुनः **शय्यां** वसतिं **प्रतिलेखयेत्** ॥३८॥

ततश्च–

पासवणुच्चारभूमिं, पडिलेहिज्ज जयं जई ।
काउस्सग्गं तओ कुज्जा, सव्वदुक्खविमुक्खणं ॥३९॥

व्याख्या–**ततः साधुर्यत्नवान्** सन् **प्रस्रवणोच्चारभूमिं** प्रत्येकं द्वादशस्थण्डिलात्मिकां, **चात्कालभूमिं** स्थण्डिलत्रयात्मिकां प्रतिलेखयेत्, उक्तं च–

अहियासिया उ अंतो, आसन्ने मज्झि दूरे तिन्नि तिन्नि भवे ।
तिन्नेव अणहियासी, अंतो छच्छच्च बाहिरओ ॥१॥ [प.व./गा.४४१]

एवमेव य पासवणे, बारस चउवीसइं तु पेहित्ता ।
कालस्स य तिन्नि भवे, अह सूरो अत्थमुवजाइ ॥२॥ [प.व./गा.४४२]

अन्तर्वसतिमध्ये ६ बहिर्वसतेः ६ उच्चारस्य, एवं १२, एवं प्रस्रवणस्यापि हस्ताद्यन्तरे १२, एवं २४, त्रीणि च कालग्रहणभूमिस्थानमण्डलानि, एवं सप्तविंशतिमण्डलानि कुर्यात् । एवं दिनकृत्यमुक्त्वा रात्रिकृत्यमाह–**ततो** भूमिप्रतिलेखनान्तरं **सर्वदुःखविमोक्षणं कायोत्सर्गं कुर्यात्** ॥३९॥

देसियं य अईयारं, चिंतिज्ज अणुपुव्वसो ।
नाणे य दंसणे चेव, चरित्तंमि तहेव य ॥४०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—प्राकृतत्वाद्दैवसिकं च पुनरतीचारं **चिन्तयेदानुपूर्व्या**ऽनुक्रमेण प्रातर्मुखे वासःप्रत्युपेक्षणामारभ्यैतत्कायोत्सर्गं यावद् **ज्ञाने** ज्ञानविषयमतीचारं, एवं **दर्शने चैव चारित्रे** च **तथैव च** ॥४०॥

पारियकाउस्सग्गो, वंदित्ताण तओ गुरुं ।
देवसियं उ अइयारं, आलोएज्ज जहक्कमं ॥४१॥

व्याख्या—पारितकायोत्सर्गो वन्दित्वा द्वादशावर्त्तवन्दनेन **ततो गुरुं, दैवसिकं त्वतीचारमालोचयेत्** प्रकाशयेद्**यथाक्रमं** लघुवृद्धातीचाराणां साधूनां वा लघुवृद्धानां क्रमेण क्रमाऽनतिक्रमेणेति ॥४१॥

पडिक्कमित्तु निस्सल्लो, वंदित्ताण तओ गुरुं ।
काउस्सग्गं तओ कुज्जा, सव्वदुक्खविमुक्खणं ॥४२॥

व्याख्या—प्रतिक्रम्याऽपराधस्थानेभ्यो निवृत्त्य, मनसा भावशुद्धितो, वाचा तत्सूत्र-पाठतः, कायेन शिरोनमनादितो **निःशल्यो** मायादिमुक्तः, सूचकत्वात् सूत्रस्य, गुरुं द्वादशा-वर्त्तवन्दनपूर्वं **वन्दित्वा** क्षमयित्वा च, ततस्तथैव **सर्वदुःखविमोक्षणं कायोत्सर्गं** चारित्र-दर्शनज्ञानशुद्ध्यर्थं व्युत्सर्गत्रयरूपं **कुर्यात्**, जातावेकवचनम् ॥४२॥

पारियकाउस्सग्गो, वंदित्ताण तओ गुरुं ।
थुइमंगलं च काऊणं, कालं संपडिलेहए ॥४३॥

व्याख्या—ततः पारितकायोत्सर्गस्ततश्च द्वादशावर्त्तवन्दनपूर्वकं **गुरुं वन्दित्वा, स्तुतिमङ्गलं** सिद्धस्तवरूपं (पाठान्तरे-**सिद्धाणं संथवं किच्चा**) **कालं सम्प्रत्युपेक्षते,** कोऽर्थः ? प्रतिजागर्त्ति गृह्णाति च ॥४३॥

ततः—

पढमं पोरिसि सज्झायं, बिइयं झाणं झियायए ।
तइयाए निद्दमोक्खं तु सज्झायं तु चउत्थीए ॥४४॥

व्याख्या—प्रथमायां पौरुष्यां स्वाध्यायं कुर्यादिति शेषः, **द्वितीयायां च ध्यानं** पिण्डस्थादिकं धर्मध्यानादिकं च अधीतसूत्रार्थचिन्तनरूपं **ध्योयत्**, **तृतीयायां निद्रामोक्षो** निद्रामुत्कलता विधेया, **चतुर्थ्यां च पुनः स्वाध्यायं कुर्यात्** । पुनः कथनमस्य, पुनः पुनरुपदेष्टव्यमेव गुरुभिः, न प्रयासो मन्तव्य इति ज्ञप्त्यै ॥४४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पोरिसीए चउत्थीए, कालं तु पडिलेहए ।
सज्झायं तओ कुज्जा, अबोहंतो असंजए ॥४५॥

व्याख्या—**चतुर्थ्यां पौरुष्यां** पुनः **कालं प्रतिलेख्य** प्रतिजागर्य ततः **स्वाध्यायं कुर्यात्**, परं किं कुर्वन् ? **असंयतीन्** गृहस्थान् **अबोधयन्** अजागरयन्, यतः सावद्यव्यापारव्याकुल-गृहस्थजागरणतस्तन्निमित्तभूतो यतिरपि तत्कृतसावद्यक्रियाभाक् स्यादिति भावः ॥४५॥

चतुर्थ्यां कथं स्वाध्यायं कुर्यादित्याह—

पोरिसीए चउब्भाए, सेसे वंदित्ता तो गुरुं ।
पडिक्कमित्तु कालस्स, कालं तु पडिलेहए ॥४६॥

व्याख्या—चतुर्थ्याः **पौरुष्याश्चतुर्थे भागेऽवशेषे** सति, घटिकाद्वये रजन्या अविष्टे सति **गुरुं वन्दित्वा प्रतिक्रम्य कालस्य** वैरात्रिकस्य, **कालं** प्राभातिकं **प्रत्युपेक्षेत** गृह्णीयाच्च । मध्यमक्रमापेक्ष्यं कालत्रयमुक्तं, अन्यथा ह्युत्सर्गेण चत्वारो जघन्येनैकोऽप्य-नुज्ञात एव । कालग्रहणविधिः श्रीआवश्यकदीपिकादिषु ज्ञेयः ॥४६॥

आगए कायवुस्सग्गे, सव्वदुक्खविमोक्खणे ।
काउस्सग्गं तओ कुज्जा, सव्वदुक्खविमुक्खणं ॥४७॥

व्याख्या—तत **आगते कायव्युत्सर्गे** इति कायव्युत्सर्गसमये सर्वदुःखानां सांसारि-काणां विमोक्षणे मोचके, **सर्वदुःखविमोक्षणं कायोत्सर्गं कुर्यात्**, अत्र कायोत्सर्गग्रहणेन चारित्रादिशुद्ध्यर्थं कायोत्सर्गत्रयं ग्राह्यं । **सर्वदुःखविमोक्षणं** इति पुनरुच्चारणं कायोत्सर्ग-स्यात्यन्तनिर्जराहेतुत्वात् ॥४७॥

रात्रिकोऽतिचारो यथा तत्तृतीयकायोत्सर्गविषयश्चिन्त्यते तदाह—

राईयं च अईयारं, चिंतिज्ज अणुपुव्वसो ।
नाणंमि दंसणंमि चरित्तंमि तवंमि य ॥४८॥

व्याख्या—रात्रौ भवं **रात्रिकं, चः** पूर्त्तौ, **अतिचारं चिन्तयेत्, आनुपूर्व्या**ऽनुक्रमेण **ज्ञाने दर्शने चारित्रे तपसि, चाद्वीर्ये**ऽपि, अत्र शेषकायोत्सर्गेषु चतुर्विंशतिस्तवचिन्तनं प्रसिद्धमतोऽत्र नोक्तम् ॥४८॥

ततः—

पारियकाउस्सग्गो, वंदित्ताण तओ गुरुं ।
राइयं तु अइयारं आलोएज्ज जहक्कमं ॥४९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या–**ततः पारितकायोत्सर्गः** सन् **गुरुं** द्वादशावर्त्तवन्दनपूर्वकं **वन्दित्वा रात्रिकमतीचारमालोचयेत् यथाक्रमम्** ॥४९॥

पडिक्कमित्तु निस्सल्लो, वंदित्ताण तओ गुरुं ।
काउस्सग्गं तओ कुज्जा, सव्वदुक्खविमोक्खणं ॥५०॥

व्याख्या–**ततः** पदसम्पदासहितं **प्रतिक्रम्य निःशल्यः** सन् पुनरपि यथोक्तविधिना **गुरुं वन्दित्वा, सर्वदुःखविमोक्षणं कायोत्सर्गं पुनः कुर्यात्** ॥५०॥

कायोत्सर्गस्थः किं चिन्तयेदित्याह–

किं तवं पडिवज्जामि, एवं तत्थ विचिंतए ।
काउस्सग्गं तु पारित्ता, वंदई य तओ गुरुं ॥५१॥

व्याख्या–**किंरूपं तपो** नमस्कारसहितं **प्रपद्येऽहमेवं तत्र विचिन्तयेत्, वीरो** हि भगवान् षण्मासान् निरशनो विहृतवान्, तत्किमहमपि निरशनः शक्तोऽस्म्येतावत्कालं स्थातुमुत नेति । एवं पञ्चमासाद्यपि यावन्नमस्कारसहितं तावत् परिभावयेत् । **ततस्तं कायोत्सर्गं पारयित्वा गुरुं** द्वादशावर्त्तनेन **वन्दयेत्** ॥५१॥

एतदुक्तार्थानुवादतः सामाचारीशेषमाह–

पारियकाउस्सग्गो, वंदित्ताण तओ गुरुं ।
तवं संपडिवज्जित्ता, करिज्ज सिद्धाण संथवं ॥५२॥

व्याख्या–**पारितकायोत्सर्गः** सन् **गुरुं वन्दित्वा** पूर्वोक्तरीत्या **तपः सम्प्रतिपद्येत,** यथाशक्त्या चिन्तितोपवासादिप्रतिपत्तिं कुर्यात्, तथा **सिद्धानां संस्तवं** स्तुतित्रयरूपं, तदनु च यत्र चैत्यानि सन्ति तत्र तद्वन्दनं विधेयम् ॥५२॥

अथ फलमाह–

एसा सामायारी, समासेण वियाहिया ।
जं चरित्ता बहू जीवा, तिण्णा संसारसागरं ॥५३॥ त्ति बेमि

व्याख्या–**एषा** भगवदुक्ता दशविध**समाचारी समासेन** सङ्क्षेपेण **व्याख्याता, याः** सामाचारी**श्चरित्वा बहवो जीवाः संसारसागरं तीर्णाः** सन्ती**ति** समाप्तौ **ब्रवीमी**ति प्राग्वत् ॥५३॥

इति षड्विंशं सामाचार्याख्यमध्ययनमुक्तम् ॥२६॥

●●●

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सप्तविंशं खलुङ्कीयमध्ययनम् ॥

सामाचार्यशठैः पाल्यते, ततोऽशठज्ञप्त्यै सप्तविंशं **खलुङ्काध्ययनं** शठस्वरूपवाचकमाह—

अत्र निर्युक्तिः—

अवदाली १ उत्तसओ २, जोत्तजुगभंज ३ तोत्तभंजो य ४ ।
उप्पह ५ विप्पहगामी ६, एए खलुंका भवे गोणा ॥१॥ [उत्त. नि./गा.४८७]

शठसाधोः शठगोदृष्टान्तः, यथा—

अवदाली सारथिं दशनैर्दारयतीत्यवदाली, शृङ्गेन वा विध्यति १ उत्त्रसकः सारथिरुत्त्रस्यति २ योत्रबन्धत्रोटकः, युगभञ्जको हठात् ३ तोत्रभञ्जको गलित्वात् ४ उत्पथः कूटेन उत्पथगामी ५ विपथगामी, पथौ विमुखमसन्मुखमेव चलति ६, एते ईदृशा गावः खलुङ्का उच्यन्ते ॥१॥

तथा काष्ठेन शठोपमा यथा—

जं किर दव्वं खुज्जं, कक्कडगुरुयं तहा दुरवणामं ।
तं दव्वेसु खलुंकं, वंककुडिलवेढिमाइद्धं ॥२॥ [उत्त. नि./गा.४९०]

यत्किल द्रव्यं कुज्जं तथा कर्कशं तथा गुरुकं तथा दुरवनामं कुकाष्ठत्वादुपायैरप्यनाम्यं, तद् द्रव्यं खलुङ्कमुच्यते, वक्रं गाढवक्रं, कुटिलं स्तोकवक्रं, वेढैराविद्धं युक्तम् ॥२॥

दृष्टान्ता उक्तास्तान् शिष्येषु योजयति—

दंसमसगस्समाणा, [१]जलूगविच्छुगसमा य जे होंति ।
ते खलु होंति खलुंका, [२]तिक्खमिओ य चंडमद्दविया ॥३॥ [उत्त. नि./गा.४९२]

---

१. जलुयकविच्छुयसमा । २. तिक्खमिउचंडमद्दविआ । इति पाठः उत्त० बृ० वृत्तौ नि०गा० ४९२ मध्ये ॥ सम्पा.

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

य शिष्या दंशमशकजलूकावृश्चिकवच्छास्त्रं पाठयतो गुरुन् पीडयन्ति वाक्यादिना, ते खलुङ्कास्तीक्ष्णत्वेन मृदवो जलूकावत्, चण्डत्वेन मृदवो दंशादिवत् ॥३॥

यथा—

जे किर [1]गुरुपीडणया, सबला असमाहिकारगा पावा ।
[2]अहिगरणकारगा वा, जिणवयणे ते किर खलुंका ॥४॥ [उत्त. नि./गा.४९३]

ये किल गुरुपीडाकारकाः, शबलाः कर्बुरचारित्राः करकर्मादिशबलोपेताः, असमाधिकारकाः विंशत्यसमाधिस्थानकराः, पापाः पापश्रमणलक्षणाः, क्रियावन्तोऽप्यधिकरणकराः कलहकराः, ते किल सत्ये सर्वज्ञवचने सिद्धान्ते खलुङ्का उच्यन्ते ॥४॥

तथा—

पिसुणा परोवतावी, भिन्नरहस्सा परं परिभवंति ।
[3]निव्वयनिस्सीलसड्ढा, जिणवयणे ते किर खलुंका ॥५॥ [उत्त. नि./गा.४९४]

पिशुनाः, परोपतापिनः, भिन्नरहस्याश्छन्नवाक्प्राकटयितारः, निशीथत्वादिप्रकटका वा, परं परिभवन्ति स्वविद्यादिना, निवृताः स्तोकक्रियत्वादल्पविरतयः, निःशीला मूलगुणदोषिणः, निःश्रद्धा जिनवचनश्रद्धारहिताः, ते खलु सर्वज्ञवचने सिद्धान्ते खलुङ्काः कथ्यन्ते ॥५॥

तम्हा खलुंकभावं, चइऊणं पंडिएण पुरिसेणं ।
कायव्वा होइ मई, उज्जुसहावंमि भावेणं ॥६॥ [उत्त. नि./गा.४९५]

ततः पण्डितेन पुरुषेण खलुङ्कभावं त्यक्त्वा ऋजुस्वभावे भावेन तत्त्वधिया, न तु लोकरञ्जनाय मतिः कर्त्तव्या भवति ॥६॥

अथ सूत्रं, शठशिष्यसम्बन्धः—

थेरे गणहरे गग्गे, मुणी आसी विसारए ।
आइन्ने गणिभावंमि, समाहिं पडिसंधए ॥१॥

व्याख्या—धर्मे स्थिरीकरणात् **स्थविरो**, गणं धरतीति **गणधरः**, **गार्ग्यो** गर्गसगोत्रः, मनुते प्रतिजानीते सर्वसावद्यत्यागमिति **मुनिः**, **विशारदः** कुशलः सर्वशास्त्रेषु, **आकीर्ण** आचार्यगुणैर्व्याप्तः, **गणिभावे** आचार्यव्यवस्थितौ स्थित **आसीत्**, स **समाधिं** कुशिष्यै-स्त्रोटितमपि **प्रतिसन्धत्ते** आत्मनः ॥१॥

---

१. गुरुपडिणीआ । २. अहिगरणकारगऽप्पा । ३. निव्विअणिज्जा य सठा इति उत्त० बृ० वृत्तौ नि० गा० ४९३।४९४ मध्ये

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तच्चिन्तनामाह–

वहणे वहमाणस्स, कंतारं अइवत्तइ ।
जोए वहमाणस्स, संसारो अइवत्तइ ॥२॥

व्याख्या–वहने शकटादौ, अन्तर्भावितण्यर्थतया **वाहयमानस्य** सारथेर्विनीत-गवादीन्, **कान्तार**मरण्य**मतिवर्त्तते** अत्येति, तथा **योगे** संयमव्यापारे **वाहयमानस्या**-चार्यादेः सुशिष्यान् **संसारोऽतिवर्त्तते** सुखातिवर्त्त्यतया स्वयमेवातिक्रामति, तद्विनीतता-दर्शनादात्मनो विशेषतः समाधिभावात् ॥२॥

विनीतस्वरूपं ध्यात्वाऽविनीतस्वरूपं ध्यायति–

खलुंके जो उ जोएइ, विहम्माणो किलिस्सई ।
असमाहिं च वेएइ, तोत्तए य से भज्जइ ॥३॥

व्याख्या–खलुङ्कान् गलिवृषभान् **पुनर्यो योजयति** वाहने, सूत्रत्वाद् 'विहम्माणो' **विशेषेण** प्राजनकेन **घ्नंस्ताडयन्** स **क्लिश्यति** (पाठान्तरे-**क्लाम्यति**) अत एव सोऽ**समाधिं वेदयति, तोत्रकः** प्राजनकः 'से' **तस्य** च खलुङ्कयोजयितु**र्भज्यते** ॥३॥

एगं डसइ पुच्छंमि, एगं विंधइ भिक्खणं ।
एगं भंजइ समिलं, एगो उप्पहपट्ठिओ ॥४॥

व्याख्या–ततश्चातिरुष्टः सन् स **एकं दशति** दशनैर्भक्षयति **पुच्छे, एकमन्यं** गलि **विद्धयत्या**रया अश्लीलभाषणादिना च, **अभीक्ष्णं** पुनः पुनः, यत **एको भनक्ति समिलां, उत्पथप्रस्थितश्चैकः** स्यात् ॥४॥

एगो पडइ पासेणं, निवेसइ निवज्जइ ।
उक्कुद्दइ उप्फिडइ, सढे बालगवी वए ॥५॥

व्याख्या–एकः पतति भूमौ **पार्श्वे**, अन्यस्तु **निविशते** उपविशति, 'निवज्जइ'त्ति **शेते, उत्कुर्दति** उच्छलति, 'उप्फिडइ'त्ति मण्डुकवद**ुत्प्लवते** । अन्यः **शठो** भवति धूर्त्तत्वमाचरति, अन्यश्च **बालगवी**मवृद्धां गां **व्रजेत्त**दभिमुखं धावेत् ॥५॥

माई मुद्धेण पडइ, कुद्धे गच्छइ पडिपहं ।
मयलक्खेण चिट्ठाइ, वेगेण य पहावइ ॥६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—**मायी मूर्ध्ना पतति**, निःसत्वमिव स्वं दर्शयन् मस्तकं भूमावास्फाल्य पततीति, **क्रुद्धश्चैकः प्रतिपथं गच्छति** पश्चाद्वलति, एक कश्चिन्**मृतलक्ष्येण** मृतस्य लक्षणमादृत्य तिष्ठति निश्चेष्टीभूय पततीत्यर्थः, पुनः कथञ्चित् सज्जीकृत्योत्थापितश्च **वेगेन** प्रधावति, यथा सारथिस्तं गृहीतुं न शक्नोति ॥६॥

छिन्नाले छिंदई सिल्लिं, दुद्दंते भंजइ जुगं ।
से वि य सुस्सुयाइत्ता, उज्जुहित्ता पलायइ ॥७॥

व्याख्या—**छिन्नालस्तथाविधदुष्टजातिः** कश्चिच्**छिनत्ति** 'सिल्लि'ति **रश्मिं** बन्धनरज्जुं, अन्यो **दुर्दान्तो** दमितमशक्यो **युगं** जूसरं **भनक्ति**, 'से वि' इति **स च** दुष्टो बलीबर्दः **सुतरामतिशयेन सूत्कृत्य** फूत्कारं कृत्वा 'उज्जुहित्त'ति **प्रेर्य** स्वामिनं शकटं चोन्मार्गे, स्वयं च **पलायते** ॥७॥

दार्ष्टान्तिकयोजनामाह—

खलुंका जारिसा जोज्जा, दुस्सिसा वि हु तारिसा ।
जोइया धम्मजाणंमि भज्जंति धिइदुब्बला ॥८॥

व्याख्या—**खलुङ्का** उक्तरूपा गावो **यादृशाः** स्वाम्यसमाधिप्रापणसमिलाभङ्गादि-कृतो **योज्या** योज्यमानाः स्युः, **दुःशिष्या अपि हुः** एवार्थे, **तादृशाः**, यतो **योजिता धर्मयाने ते भज्यन्ते, दुर्बलधृतयो** धर्मानुष्ठानं प्रति ॥८॥

यतः—

इड्ढीगारविए एगे, एगित्थ रसगारवे ।
सायागारविए एगे, एगे सुचिरकोहणे ॥९॥

व्याख्या—ऋद्ध्या गौरवं, श्राद्धा आढ्या मे वश्याः, सम्पद्यते चेष्टमुपकरणं मे, इत्याद्यात्मबहुमानरूपमस्यास्तीति **ऋद्धिगौरविकः** कश्चिदेको न गुरुनियोगे वर्त्तते, **रसगौर-विकश्चैको** ग्लानाद्याहारदानतपसोर्न प्रवर्त्तते, **एकश्च** कश्चित् **सातगौरविको**ऽप्रतिबद्धविहारादौ न प्रवर्त्तते, **एकश्च** कश्चित् कुशिष्यः **सुचिरक्रोधनो** दीर्घरोषतयैवोचितक्रियासु न प्रवर्त्तते ॥९॥

भिक्खालसिए एगे, एगे ओमाणभीरुए ।
थद्धेगं अणुसासंमि, हेऊहिं कारणेहि य ॥१०॥

व्याख्या—**एकश्च भिक्षालसो** गोचराग्रं न विहर्त्तुमिच्छति, **एकश्च** कश्चिदपमान-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भीरुर्न यस्य तस्य गृहे याति, यद्वा **अवमानं** प्रवेशस्**तद्भीरुर्**यथा मा मामायान्तं दृष्ट्वाऽन्ये ऋषयो **बौद्धाद्या** वाऽत्र गृहे आयान्त्विति, **एकः** कश्चित् स्तब्धो, न निजकुग्रहान्नमयतुं शक्य एव। **एकं** च दुःशिष्यं कथमिति शेषः, **अनुशास्म्यहं हेतुभिः** अविनाभावज्ञापकैः, **कारणै**र्युक्तिरूपैरिति गुरोश्चिन्ता भवतीति भावार्थः ॥१०॥

सो वि अंतरभासिल्लो, दोसमेव पकुव्वइ ।
आयरियाणं तं वयणं, पडिकूलेइ अभिक्खणं ॥११॥

व्याख्या–**सोऽप्यनुशिष्यमाणोऽन्तरभाषावान्** गुरुवचनान्तरा एव स्वाभिमत-प्रकाशको गुरूणां प्रत्युत **दोषमेवा**परावमेव **प्रकरोति** प्रकाशयतीति । त**थाचार्याणां** प्रति, उपलक्षणादुपाध्यायादीनामपि **तच्छिक्षावाचि वचनं** अभीक्ष्णं पुनः पुनः **प्रतिकूलयति** वालयति, यथा मां यूयमेव वदथ तर्हि यूयमेवैवं किं न कुरुथेत्यादि ॥११॥

यथा–

न सा ममं वियाणाइ, न वि सा मज्झ दाहिई ।
निग्गया होहिई मन्ने, साहू अन्नोत्थ वच्चउ ॥१२॥

व्याख्या–अमुकस्या गृहात् पथ्याद्यानेयमित्यस्माभिरुक्तोऽसौ कुशिष्यो ब्रूते, **न सा मां विजानाति, नापि सा मह्यं दत्ते** । यदि वा **निर्गता** गृहादधुना **भविष्यती**ति **मन्ये** इति वक्ति, अथवा **साधुरन्योऽत्र** कार्ये **व्रजतु** ! किमहमेवैकः साधुरस्मीत्याद्याह ॥१२॥

अन्यच्च–

पेसिया पलिउवंति, पलिएत्ति समंतओ ।
रायवेट्ठि व मन्नंता, करिंति भिउडिं मुहे ॥१३॥

व्याख्या–**प्रेषिताः** क्वचित् कार्ये (पाठान्तरे–**पोषिता** वाऽाहाराद्यैः) 'पलिउवंति', तदनिष्पादने पृष्टाः सन्तोऽ**पह्नुवन्ते**, यथा क्व वयं मुक्ता गता वा ? तत्र न सा दात्री दृष्टा, ततोऽनादायाऽागता वयं, पुनस्ते दुःशिष्याः **परियन्ति समन्ततः**, न गुरुपार्श्वे कदापि उपविशन्ति, मा एषां कृत्यं भूयादिति मन्यमानाः, कदाचिद् गुरुणा कृत्यकथने **राज-वेष्टिमिव मन्यमाना भृकुटीं** भ्रूभङ्गं **मुखे**ऽन्यान् वपुर्विकारांश्च **कुर्वन्ति** ॥१३॥

वाइया संगहिया चेव, भत्तपाणेण पोसिया ।
जायपक्खा जहा हंसा, पक्कमंति दिसोदिसिं ॥१४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—**वाचिताः** सूत्रं तदर्थं च ग्राहिताः, **सङ्गृहीताः** सम्यक् स्वनिश्रायां रक्षिताः, तथैव **भक्तपानेन पोषिताः** पुष्टिं नीताः, **चादीक्षिताः** स्वयं चोपस्थापिताश्च, ततः कार्ये सृते **जातपक्षा** अतश्च त्यक्तनिजननीजनका **हंसा इव** तेऽपि कुशिष्या तमेव गुरुं त्यक्त्वा **दिशि दिशि प्रक्रमन्ति** यदृच्छाविहारिणो भवन्तीति ॥१४॥

अह सारही विचिंतेइ, खलुंकेहिं समागओ ।
किं मज्झ दुट्ठसीसेहिं, अप्पा मे अवसीयइ ॥१५॥

व्याख्या—**अथोक्त**चिन्तातोऽनु **सारथि**र्धर्मयाने स्खलितवारको **गर्गा**चार्यः **खलुङ्कै-र्दुःशिष्यैः समागतः** संयुक्तो **विचिन्तयति, किं** ? न किञ्चिदित्यर्थः, **मे** कार्यं सिद्ध्यति ऐहिकं पारत्रिकं च एभिः कुशिष्यैः प्रेरितैः, प्रत्युत 'मे' **ममात्माऽवसीदति** श्राम्यते, तत्प्रेरणाव्यग्रतया स्वकृत्यहानेः, अतो वरमेतत्त्यागेनोद्यतविहारेण मे विहरणम् ॥१५॥

जारिसा मम सीसाओ, तारिसा गलिगद्दहा ।
गलिगद्दहे चइत्ताणं, दढं पगिण्हइ तवं ॥१६॥

व्याख्या—गर्गाचार्यो विचारयति, **यादृशास्तु मम शिष्यास्तादृशा गलिगर्दभाः**, अत्र गलिगर्दभशब्दोऽत्यन्तकुत्साज्ञापकः, ते हि स्वरूपतोऽप्यतिप्रेरणयैव प्रवर्त्तन्ते, ततस्त-त्प्रेरणार्थं कालातिक्रमणं निरर्थकमेव । इति विचिन्त्य स **गर्गा**चार्यो निजात्मकार्यसाधनार्थं **गलिगर्दभानि**व तान् दुःशिष्यांस्त्यक्त्वा **दृढम**नशनादितपः **प्रगृह्णाति**, तद्दुःशिष्यपलि-मन्थत्यागादिति ॥१६॥

मिउमद्दवसंपन्ने, गंभीरे सुसमाहिए ।
विहरइ महिं महप्पा, सीलभूएण अप्पणे ॥१७॥ त्ति बेमि

व्याख्या—**मृदु**र्बहिर्वृत्त्या विनयवान्, **मार्दवसम्पन्न**श्चित्तेऽपि तादृगेव, **गम्भीरो**-ऽलब्धमध्यः, **सुष्ठुसमाहित**श्चित्तसमाधिवान्, **विहरत्य**प्रतिबद्धविहारेण **महीं महात्मा**, स **गर्गा**चार्यः शीलं चारित्रं भूतः प्राप्तः शीलभूतस्तेन **शीलभूतेनात्मना** सहितः, एवं गुरोरपि खलुङ्कत्यागादेव मार्दवादिगुणवत्तेति खलुङ्कतात्मनो गुरूणां चेहैव दोषहेतुरतस्तत्त्यागतो-ऽशठतैव सेव्येत्यध्ययनार्थः ॥ **इति** समाप्तौ, **ब्रवीमी**ति प्राग्वत् ॥१७॥

इति सप्तविंशं खलुङ्कीयमध्ययनमुक्तम् ॥२७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अष्टाविंशं मोक्षमार्गीयमध्ययनम् ॥

अशठस्य मोक्षमार्गप्राप्तिः स्यादतो **मोक्षप्राप्तिविधायकमष्टाविंशतितममध्ययनमाह–**

मोक्खमग्गगइं तच्चं, सुणेह जिणभासियं ।
चउकारणसंजुत्तं, नाणदंसणलक्खणं ॥१॥

व्याख्या–'मोक्खमग्ग'त्ति, मोक्षोऽष्टकर्मोच्छेदस्तस्य मार्गो ज्ञानादिस्तेन गतिः सिद्धिगमनं, तद्धेतुत्वेनोपदेशकथामपि **मोक्षमार्गगतिं** कथ्यमानां **तथ्यां** सत्यां **शृणुत** ! जिनैर्भाषितां, यद्वा **मोक्ष**विषये 'मृजू शुद्धौ' इति धातो**र्मार्गो** नैर्मल्यं, तस्य **गतिं** प्राप्तिं **शृणुत** ! **चतुर्भिः कारणै**र्वक्ष्यमाणैर्मोक्षहेतुभिः **संयुक्तां**, विशेषणेनास्या मूलोत्पत्तिमाह– **ज्ञानदर्शने** विशेषसामान्योपयोगरूपे **लक्षणं** स्वरूपं यस्याः सा, **ताम्** ॥१॥

अथ तानि चतुःकारणान्याह–

नाणं च दंसणं चेव, चरित्तं च तवो तहा ।
एस मग्गो पन्नत्तो, जिणेहिं वरदंसिहिं ॥२॥

व्याख्या–ज्ञायतेऽनेनेति **ज्ञानं**, दृश्यते तत्वमस्मिन्निति **दर्शनं**, चरन्ति गच्छन्त्यनेन मोक्षमिति **चारित्रं**, तपन्ति पूर्वकर्माणि अनेनेति **तपः**, तत्र ज्ञानं सम्यग्ज्ञानरूपं, दर्शनं दर्शनमोहनीयक्षयात् क्षयोपशमो[पशमो]त्थमर्हदुक्तजीवादितत्त्वरुचिरूपाऽनन्तानुबन्धिवर्जात्मशुभभावरूपं, चारित्रं चारित्रमोहनीयक्षयादित्रयसामायिकादिभेदं, सदसत्क्रियाप्रवृत्तिनिवृत्ति, तपो बाह्यान्तरभेदं, **एष** एव **मार्गो** मुक्तिप्रापकत्वात् **प्रज्ञप्तो जिनैर्वरदर्शिभिः**, चारित्रभेदत्वेऽपि तपसः पृथगादानं अस्यैव कर्मक्षये निःसमहेतुत्वात् ॥२॥

नाणं च दंसणं चेव, चरित्तं च तवो तहा ।
एयमग्गमणुप्पत्ता, जीवा गच्छंति सोग्गइं ॥३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—एतदुक्तरूपं **ज्ञानदर्शनचारित्रतपसात्मकं मार्गमनुप्राप्ता** आश्रिता **जीवा गच्छन्ति सुगतिं** मुक्तिम् ॥३॥

ज्ञानभेदानाह—

तत्थ पंचविहं नाणं, सुयं आभिणिबोहियं ।
ओहिनाणं च तइयं, मणनाणं च केवलं ॥४॥

व्याख्या—**तत्र** ज्ञानादिषु मध्ये ज्ञानं **पञ्चविधं, श्रुतमाभिनिबोधिकं** मतिः, **अवधिज्ञानं, मनःपर्यवज्ञानं, केवलं च** । तत्र श्रुतं शब्दाद् ज्ञानं, मतिरिन्द्रियमनोभवं ज्ञानं, मर्यादया ज्ञानमवधिः, मनःपुद्गलदर्शनान्मनःपर्यवज्ञानं, अन्यज्ञानाऽभावः केवलं, आदौ श्रुतादानं शेषज्ञानस्वरूपज्ञानस्य श्रुतायत्तत्वेन प्राधान्यज्ञप्त्यै । ज्ञानव्याख्या-**ऽावश्यकदीपिका**तो ज्ञेया ॥४॥

ज्ञानविषयमाह—

एवं पंचविहं नाणं, दव्वाण य गुणाण य ।
पज्जवाणं च सव्वेसिं, नाणं नाणीहिं देसियं ॥५॥

व्याख्या—**एतत्पञ्चविधं ज्ञानं,** द्रवन्ति गच्छन्ति तान्स्तान् पर्यायान् इति **द्रव्याणि** वक्ष्यमाणानि **तेषां च गुणानां च** सहवर्त्तिनां रूपादीनां, **पर्यायाणां** द्रव्येषु गुणेषु क्रमभाविनो जीर्णा मान्द्यास्तेषां ज्ञानं **सर्वेषां** केवलापेक्षया, सर्वशब्दो द्रव्यकात्स्न्यें शेषज्ञानापेक्षयाऽनुप्रकारकात्स्न्यें ज्ञेयः, प्रतिनियतपर्यायग्राहित्वात्तेषां **ज्ञानम**वबोधकं **ज्ञानिभिः** केवलिभिर्**देशितम्** ॥५॥

द्रव्यादीनां लक्षणान्याह—

गुणाणमासयो दव्वं, एगदव्वस्सिया गुणा ।
लक्खणं पज्जवाणं तु, उभओ अस्सिया भवे ॥६॥

व्याख्या—**गुणानां** रूपरसस्पर्शादीना**माश्रयः** स्थानं **द्रव्यम**स्ति, यत्र गुणा उत्पद्यन्तेऽवतिष्ठन्ते विलीयन्ते च तद् द्रव्यं, इत्यनेन रूपादिवस्तु द्रव्यात् सर्वथा व्यतिरिक्तमपि नास्ति। द्रव्ये एव रूपादिगुणा लभ्यन्ते इत्यर्थः, गुणा हि **एकद्रव्याश्रिताः,** आधारभूते एकस्मिन् द्रव्ये आधेयतया स्थिता **गुणा** उच्यन्ते । इत्यनेन ये केचन द्रव्यमेवेच्छन्ति रूपादींश्च तद्व्यतिरिक्तानिच्छन्ति तेषां मतं दूरीकृतं । तस्माद्रूपादीनां गुणानां द्रव्येभ्यो भेदोऽप्यस्ति । **तु** पुनः पर्यायाणां नवपुरातनादिरूपणां भावानामेतल्लक्षणं ज्ञेयं । किं

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तल्लक्षणमित्याह–**पर्याया** हि **उभयाश्रिता भवेयुः**, उभयोरिति द्रव्यगुणयोराश्रिताः, अत एव चोभयाश्रिताः, यतो द्रव्येषु नवनवपर्याया नाम्ना आकृत्या च भवन्ति, गुणेष्वपि च नवपुराणादिपर्यायाः प्रत्यक्षं दृश्यन्ते एव ॥६॥

पूर्वं द्रव्यभेदानाह–

धम्मो १ अधम्मो २ आगासं ३, कालो ४ पुग्गल ५ जंतवो ६।
एस लोगु त्ति पन्नत्तो जिणेहिं वरदंसिहिं ॥७॥

व्याख्या–**धर्म** इति धर्मास्तिकायः १ **अधर्म** इति अधर्मास्तिकायः २ **आकाश**–मित्याकाशास्तिकायः ३ **कालः** समयादिरूपः ४ '**पुग्गल**'त्ति पुद्गलास्तिकायः ५ **जन्तव** इति जीवाः ६ एतानि षड् द्रव्याणि ज्ञेयानीति । **एष** इत्येवंरूपः षड्द्रव्यात्मको **लोको वरदर्शिभिर्यथास्थितवस्तुस्वरूपज्ञैर्जिनैरर्हद्भिः प्रज्ञप्तः** कथित **इति** ॥७॥

धम्मो अधम्मो आगासं, दव्वं इक्किक्कमाहियं ।
अणंताणि य दव्वाणि, कालो पुग्गलजंतवो ॥८॥

व्याख्या–**धर्मद्रव्यमधर्मद्रव्यमाकाशद्रव्यं** च, एतत्त्रय**मेकैकमि**त्येकत्वयुक्तमे**वाख्यातं** जिनैरिति शेषः, अग्रेतनानि **कालपुद्गलजन्तुद्रव्याणि** त्रिण्य**प्यनन्तानि** निजनिजानन्तभेदरूपाणि व्याख्यातानि । तत्र कालोऽतीताद्यपेक्षयाऽनन्तः, पुद्गला जन्तवश्चाऽनन्ताः प्रतीता एव ॥८॥

अथ षड्द्रव्याणां लक्षणमाह–

गइलक्खणो उ धम्मो, अहम्मो ठाणलक्खणो ।
भायणं सव्वदव्वाणं, नहं ओगाहलक्खणं ॥९॥

व्याख्या–**धर्मो** धर्मास्तिकायो **गतिलक्षणो** ज्ञेयः, लक्ष्यते ज्ञायतेऽनेनेति लक्षणं । एकस्माद्देशाज्जीवपुद्गलयोर्देशान्तरं प्रति गमनं गतिः, गतिरेव लक्षणं यस्य स गतिलक्षणः, **अधर्मो**ऽधर्मास्तिकायः स्थितिलक्षणो ज्ञेयः, स्थितिः स्थानं गतिरोधः, सैव लक्षणमस्येति स्थानलक्षणोऽधर्मास्तिकायोऽस्ति । स्थितिपरिणतानां जीवपुद्गलानां स्थितिलक्षणकार्येण यो ज्ञायते सोऽधर्मास्तिकाय इति भावार्थः, यच्च जीवादीनां **समस्तद्रव्याणां भाजनमा**धारभूतं तन्नभ आकाशमुच्यते । तन्**नभश्चावगाहलक्षणं** । अवगाढुं प्रवृत्तानां जीवपुद्गलानां य आलम्बनरूपो भवति सोऽवगाहः, स एव लक्षणं यस्य तदवगाहलक्षणं नभ उच्यते ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वत्तणालक्खणो कालो, जीवो उवओगलक्खणो ।
नाणेणं दंसणेणं च, सुहेण य दुहेण य ॥१०॥

व्याख्या—वर्त्ततेऽनवच्छिन्नत्वेन निरन्तरं भवतीति वर्त्तना, सा वर्त्तना एव लक्षणं लिङ्गं यस्येति **वर्त्तनालक्षणः कालः** कथ्यते, तथा उपयोगो मतिज्ञानादिरूपः, स एव लक्षणं यस्य स **उपयोगलक्षणो जीव** उच्यते, यतो जीवो हि ज्ञानादिभिरेव लक्ष्यते उक्तलक्षणत्वात्। पुनस्तस्य विशेषलक्षणमाह—**ज्ञानेन** विशेषावबोधरूपेण, च **दर्शनेन** सामान्यावबोधरूपेण, तथैव **सुखेन दुःखेन च** यो ज्ञायते स जीव इत्युत्यते ॥१०॥

पुनर्लक्षणान्तरमाह—

नाणं च दंसणं चेव, चरितं च तवो तहा ।
वीरियं उवओगो य, एयं जीवस्स लक्खणं ॥११॥

व्याख्या—**ज्ञानं च दर्शनं चैव चारित्रं च तपः, तथा वीर्यं** वीर्यान्तरायक्षयोपशमोत्थसामर्थ्यं, **उपयोगश्चा**ऽवहितत्वं, **एतद्** ज्ञानादि **जीवस्य लक्षणं**, एतेन हि जीवोऽनन्यसाधारणतया लक्ष्यते इति ॥११॥

इत्थं जीवलक्षणमुक्त्वा पुद्गलानां लक्षणमाह—

सद्दंधयार उज्जोओ, पहा छायातवे वि य ।
वन्नरसगंधफासा, पुग्गलाणं तु लक्खणं ॥१२॥

व्याख्या—**शब्दो** ध्वनिः, **अन्धकारः**, उभयत्र सुपो लुप्, **उद्योतो** रत्नादिप्रकाशः, **प्रभा** चन्द्रादिरुचिः, **छाया** शैत्यगुणा, **आतपो** रविबिम्बजोष्णप्रकाशः, **अपि**शब्दाच्च तत्सम्बन्धिवेदादीनां परिग्रहः, **वर्णो** नीलादिः, **रसस्तिक्तादिः**, **गन्धः** सुरभ्यादिः **स्पर्शः** शैत्यादिः, एषां द्वन्द्वः, **पुद्गलादीनां** स्कन्धादीनां **तु** पुनर्**लक्षणमे**भिरेव। तेषां लक्ष्यत्वात्। ननु शब्दादीनां पुद्गललक्षणत्वं कथं ? उच्यते—शब्दो मूर्त्तत्वात् पौद्गलिकः, मूर्त्तता च तस्य प्रतिघातकृत्त्वादिभ्यः, उक्तं च—

प्रतिघातविधायित्वा-ल्लोष्टवन्मूर्त्तता ध्वनेः ।
द्वारवतोऽनुपाताच्च, धूमवच्च परिस्फुटम् ॥१॥ [ ]

अन्धकारातपोद्योतप्रभास्तु पौद्गलिकाश्चक्षुर्विज्ञानविषयत्वात्, प्रयोगश्चात्र—यत्पौद्गलिकं न, तच्चक्षुर्विषयमपि न, यथात्माद्याः, चक्षुर्विषयाश्चान्धकाराद्याः, ततस्ते पुद्गलमयाः ।

अथालोकाभाव एवान्धकारं, ततोऽस्याऽरूपत्वं, उच्यते—रूपिणः सर्वथा निरन्वया-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ऽभावस्याऽभावेनाऽरूपत्वाऽसिद्धिः, यतो घटस्य कपालाख्यपर्यायन्तरोत्पत्त्या घटाऽभावेऽप्यरूपत्वाऽनुपपत्तेः, एवमालोकाऽपरपर्यायान्धकारेऽपि नाणुत्वहानिः, एवं परिणामित्वाद्वस्तुनः, परिणामे सत्येव वस्तुनः पूर्वरूपत्यागेन रूपान्तरोत्पत्तिः, यतः-

परिणामो ह्यर्थान्तर-गमनं न च सर्वथा व्यवस्थानं ।
न च सर्वथा विनाशः, परिणामस्तद्विदामिष्टः ॥१॥ [ ]

एवं छायातपयोरपि पौद्गलिकत्वं स्पष्टं, शीतोष्णत्वात् । एवं शब्दोऽम्बरगुण इत्यादि निराकृतम् ।

अणवः सर्वशक्तित्वा-द्भेदसंसर्गवृत्तयः ।
छायातपतमःशब्द-भावेन परिणामिनः ॥१॥ [ ]

वर्णादीनां च पौद्गलिकत्वं स्पष्टमेव ॥१२॥

एवं द्रव्यलक्षणमुक्तं, पर्यायलक्षणमाह-

एगत्तं च पुहत्तं च, संखासंठाणमेव य ।
संजोगा य विभागा य, पज्जवाण तु लक्खणं ॥१३॥

व्याख्या-एकत्वं भिन्नेष्वपि परमाण्वादिषु यदेकोऽयं घटादिरिति प्रतीतिहेतुः, **चः** समुच्चये, पृथग्भावः **पृथक्त्वं,** अयमस्मात् पृथगिति प्रतीतिहेतुः, **सङ्ख्या** एकद्वित्र्याद्याः, **संस्थानमा**कार एव, **चे**ति **पूर्त्तौ** । **संयोगो**ऽयमङ्गुल्यादिसंयोग इत्यादिः, व्यपदेशहेतवो **विभागाश्च,** अयमितो विभक्त इति बुद्धिहेतवः, अत्र व्यक्तिपक्षे बहुवचनं नवपुराणत्वाद्युपलक्षकं । एवंविधं **पर्यायाणां, तु**ः पूर्त्तौ, **लक्षणं** ज्ञेयं । अयं भावः-यः कोऽप्यस्खलत्प्रत्ययः स सनिबन्धनः, यथा घटादिप्रत्ययः, अस्खलत्प्रत्ययाश्चामी, एकोऽयमित्यादिप्रत्ययाः, ततोऽवश्यमेषां कारणेन भाव्यं । तच्च न द्रव्यमेव, तस्य सदा स्थितत्वेन प्रतिनियतकालैकत्वादिप्रत्ययाऽनुत्पत्तिप्रसङ्गात् । ततश्च यदेषां कालनियमेनोत्पत्तिरेतुर्न तत्पर्यवेभ्यस्तत्परिणतिविशेषरूपेभ्योऽन्यद्गुणा रूपरसगन्धस्पर्शाद्याः सहवर्त्तिनो रूपिणां अरूपिणां गतिस्थित्यवगाहज्ञानवर्त्तनाद्याः ॥१३॥

दर्शनमाह-

जीवाजीवा य बंधो य, पुण्णं पावासवो तहा ।
संवरो णिज्जरा मोक्खो, संते एए तहिया णव ॥१४॥

व्याख्या-जीवाः १ **अजीवाश्च** धर्मास्तिकायाद्याः २ **बन्धो** जीवकर्मणोः श्लेषः ३

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पुण्यं शुभप्रकृतयः सातवेदाद्याः ४ **पापम**शुभ**प्रकृति**रूपं मिथ्यात्वादिः ५ **आश्रवः** कर्मोपादानहेतुर्हिंसादिः ६ तथा **संवरो** गुप्त्यादिभिराश्रवनिरोधो, ७ **निर्जरा** विपाकात्तपसो वा कर्मपरिशाटो ८ **मोक्षः** कृत्स्नकर्मक्षयात् स्वात्मन्यवस्थानं ९ । **सन्त्येते तथ्या** अवितथा **नव** भावा नवसङ्ख्या मध्यमस्थानापेक्षया, जघन्यतस्तु जीवाऽजीवयोरेव बन्धादीनामन्तर्भावसम्भवाद् द्विसङ्ख्यैव । वक्ष्यति च—

जीवा चेव अजीवा य, एस लोगे वियाहिया ॥ [उत्त./गा.१३५७]

विस्तरतस्तु तदुत्तरोत्तरभेदविवक्षयाऽनन्त्यमेव स्यात् ॥१४॥

ततः—

तहियाणं तु भावाणं, सब्भावे उवएसणं ।
भावेण सद्दहंतस्स, सम्मत्तं तं वियाहियं ॥१५॥

व्याख्या—तथ्यानां तु भावानां जीवादीनां **सद्भावे** सद्भावविषयमवितथसत्ताभिधायक**मुपदेशनं** गुर्वाद्युपदेशं **भावेनान्तः**करणेन **श्रद्दधतस्तथेति** प्रतिपद्यमानस्य पुरुषस्य **सम्यक्त्वं** शुद्धदर्शनं **व्याख्यातं** जिनैरिति शेषः । सम्यक्त्वं हि सम्यक्त्वमोहनीयकर्मानुक्षयक्षयोपशमोत्थात्मपरिणामः, यतः—"**से य सम्मत्ते पसत्थसम्मत्तमोहणीयकम्माणुवेयणोवसमवेयसमुत्थे पसमसंवेगाइलिङ्गे सुभे आयपरिणामे पन्नत्ते**" । [ ] नूनं स कोऽप्यात्मनः परिणामोऽस्ति, येन सत्यपि जीवादिस्वरूपज्ञत्वे कस्यचिदेव सम्यक्त्वप्रतिपत्तिः स्यात्, न सर्वस्य, यथा दृक्सत्त्वेऽपि कोऽपि शङ्खं श्वेतं, रुजाक्रान्तश्च नीलादिमन्यथा वा पश्यति । एवं जीवादिपरिज्ञानस्य सम्यग्भावहेतुरात्मपरिणामविशेषः सम्यक्त्वं भवतीत्याख्यातं जिनैः ॥१५॥

एवं सम्यक्त्वस्वरूपमुक्त्वा तद्भेदानाह—

निसग्गुवएसरुई, आणारुइसुत्तबीयरुइमेव ।
अभिगमवित्थाररुई, किरियासंखेवधम्मरुई ॥१६॥

व्याख्या—रुचिशब्दः प्रत्येकं योज्यः, निसर्गः स्वभावस्तेन रुचिस्त्वत्वाभिलाषरूपाऽस्येति **निसर्गरुचिः** १ उपदेशेन गुर्वादिकथनेन रुचिर्यस्यासा**वुपदेशरुचिः** २ आज्ञया सर्वज्ञवाचा रुचिर्यस्यासौ **आज्ञारुचिः** ३ सूत्रेणागमेन रुचिर्यस्यासौ **सूत्ररुचिः** ४ बीजमिव बीजं यदेकमप्यनेकार्थप्रबोधकं वचस्तेन रुचिर्यस्यासौ द्वन्द्वे **बीजरुचिः** ५ **एवः** समुच्चये। अभिगमो ज्ञानं, विस्ताश्च ताभ्यां रुचिर्यस्यायं **अभिगमरुचिः** ६ **विस्तार-**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

रुचिः ७ क्रिया धर्मानुष्ठानं, सङ्क्षेपः सङ्ग्रहः, धर्मः श्रुतधर्मादिः, तेषु रुचिर्यस्यासौ **क्रियारुचिः** ८ **सङ्क्षेपरुचिः** ९ **धर्मरुचिश्च** १० । इह सम्यक्त्वस्य जीवाऽनन्यत्वेन यदाख्यानं तद्गुण-गुणिनोः कथञ्चिदभेदज्ञप्त्यै ॥१६॥

व्यासार्थमाह—

भूयत्थेणाहिगया, जीवाजीवा य पुण्णपावं च ।
सहसंमुइयाऽऽसवसंवरो, य रोएइ उ निसग्गो ॥१७॥

व्याख्या—भूतत्वेन सत्यत्वेन, सद्भूता अमी अर्था इत्येवंरूपेण, **अधिगता** येन **जीवाऽजीवाः पुण्यपापं च,** कथममी अधिगताः ? इत्याह—सूत्रत्वात् सहात्मनि या सङ्गता मतिः सा **सहसम्मतिस्तया,** कोऽर्थः ? परोपदेशनिरपेक्षया जातिस्मरणप्रतिभादिरूपया, **तथैवाश्रवसंवरौ,** चः अनुक्तबन्धादिसमुच्चये । **तुः** एवार्थे, **रोचत एव** यस्य, अर्थात् सत्यतया तत्त्वादधिगतान् जीवाऽजीवादीन् योऽभिरोचते स **निसर्गरुचिर्ज्ञेयः** ॥१७॥

अमुमेवार्थं स्पष्टयति—

जो जिणदिट्ठे भावे, चउव्विहे सद्दहाइ सयमेव ।
एमेय नन्नह त्ति य, स निसग्गरुइ त्ति नायव्वो ॥१८॥

व्याख्या—यो जिनदृष्टांस्तीर्थकरोपलब्धान् भावान् जीवादीन् **चतुर्विधान्** द्रव्य-क्षेत्रकालभावतो नामादितो वा **श्रद्दधति स्वयमेव** परोपदेशं विना, **एवमेतद्यथा** जिनैर्दृष्टं जीवादि, **नान्यथेति,** नैतद्विपरीतं, **चः** समुच्चये, **स निसर्गरुचिरिति ज्ञातव्यः** ॥१८॥

उपदेशरुचिमाह—

एए चेव उ भावे, उवइट्ठे जो परेण सद्दहइ ।
छउमत्थेण जिणेण व, उवएसरुइ त्ति नायव्वो ॥१९॥

व्याख्या—एतांश्चैव तु भावानुपदिष्टान् कथितान् **परेणाऽन्येन श्रद्दधाति, छद्म-स्थेनाऽनुत्पन्नकेवलेन, जिनेन चोत्पन्नकेवलेन,** स **उपदेशरुचिः** ॥१९॥

आज्ञारुचिमाह—

रागो दोसो मोहो, अण्णाणं जस्स अवगयं होइ ।
आणाए रोयंतो, सो खलु आणारुई नाम ॥२०॥

व्याख्या—रागः प्रीतिः, **द्वेषो**ऽप्रीतिः, **मोहः** शेषमोहनीयप्रकृतयः, **अज्ञानं** मिथ्याज्ञानरूपं, **यस्यापगतं भवति** देशतः, ततश्चाज्ञयैवाचार्यादिसम्बन्धिन्या **रोचमानो**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जीवाऽजीवादि तथेति प्रतिपद्यमानो **माषतुषादिवत्**, **नामेत्यभ्युपगमे**, **खलु** निश्चितं **स आज्ञारुचिः** ॥२०॥

सूत्ररुचिमाह–

जो सुत्तमहिज्जंतो, सुएण ओगाहइ उ सम्मत्तं ।
अंगेण बाहिरेण व, सो सुत्तरुइ त्ति नायव्वो ॥२१॥

व्याख्या–यः सूत्रमागममधीयानः पठन् **सूत्रेणा**धीयमाने**नावगाहते** प्राप्नोति **सम्यक्त्वं**, **तुः** पूर्त्तौ, **अङ्गेनाचारादिना**, **बाह्येनानङ्गप्रविष्टेनोत्तराध्ययनादिना** वा स **गोविन्दवाचकवत् सूत्ररुचिः** ॥२१॥

बीजरुचिमाह–

एगेण अणेगाइं, पयाइं जो पसरइ उ सम्मत्तं ।
उदए व तेल्लबिंदू, सो बीयरुइ त्ति नायव्वो ॥२२॥

व्याख्या–एकेन पदेन जीवादिना सुब्व्यत्ययः, **अनेकेषु पदेषु** जीवादिषु **यः प्रसरत्येव**, सम्यक्त्वशब्देन रुचिरत्रोक्ता, तदभिन्न आत्मापि **सम्यक्त्व**मुच्यते, [क्वेव कः प्रसरति ? **उदक इव तैलबिन्दुः**, यथोदकैकदेशगतोऽपि तैलबिन्दुः समस्तमुदकमाक्रामति] तथात्रैकदेशोत्पन्नरुचिरप्यात्मा क्षयोपशमवशादशेषतत्त्वेषु रुचिमान् स्यात्, **स बीजरुचिः**, यथा बीजं क्रमेणाऽनेकबीजानां जनकमेवमस्यापि रुचिर्विषयभेदतो भिन्नानां रुच्यन्तराणां जनयित्री ॥२२॥

अभिगमरुचिमाह–

सो होइ अभिगमरुई, सुअनाणं जेण अत्थओ दिट्ठं ।
एक्कारस अंगाइं, पइण्णगं दिट्ठिवाओ य ॥२३॥

व्याख्या–स भवत्यभिगमरुचिः, येन श्रुतज्ञानं अर्थतोऽर्थमाश्रित्य **दृष्टमु**पलब्धं, **एकादशाङ्गान्याचाराङ्गादीनि**, तथा **प्रकीर्णकं**, जातित्वादेकवचनं, प्रकीर्णका**न्युत्तराध्ययनादीनि**, **दृष्टिवादः**, च शब्दादुपाङ्गानि, **उपपातिकादीनि** सर्वाणि येनार्थतो ज्ञातानि भवन्ति सोऽभिगमरुचिर्भवतीत्यर्थः ॥२३॥

विस्ताररुचिमाह–

दव्वाण सव्वभावा, सव्वपमाणेहिं जस्स उवलद्धा ।
सव्वाहिं नयविहीहि य, वित्थाररुइ त्ति नायव्वो ॥२४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या–**द्रव्याणां** धर्मास्तिकायादीनां **सर्वभावा** एकत्वपृथक्त्वाद्यशेषपर्यायाः **सर्वप्रमाणैरशेषैः** प्रत्यक्षाद्यैर्**यस्योपलब्धा** यत्र **यस्य** प्रत्यक्षादेर्व्यापारस्तेनैव प्रमाणेन ते ज्ञाताः, **सर्वैर्नयविधिभिर्**नैगमादिभेदैः, **चः** समुच्चये, स **विस्ताररुचिर्ज्ञातव्यः** ॥२४॥

क्रियारुचिमाह–

दंसणनाणचरित्ते, तवविणए सच्चसमिइगुत्तीसु ।
जो किरियाभावरुइ, सो खलु किरियारुई नाम ॥२५॥

व्याख्या–**दर्शनज्ञानचारित्रे**, द्वन्द्वे, तथा **तपोविनये**, **सत्याश्च** ताः **समितिगुप्तयः**, **तासु यः क्रियाभावरुचिः**, कोऽर्थः ? दर्शनाद्याचारानुष्ठाने भावतो रुचिमान्, **स खलु** निश्चयेन **क्रियारुचिनामा** कथ्यते ॥२५॥

सङ्क्षेपरुचिमाह–

अणभिग्गहियकुदिट्ठी, संखेवरुइ त्ति होइ नायव्वो ।
अविसारओ पवयणे, अणभिग्गहिओ य सेसेसु ॥२६॥

व्याख्या–**अनभिगृहीता** अनङ्गीकृता **कुदृष्टिर्बौद्ध**मतादिर्येन स तथा, **सङ्क्षेप-रुचिरिति ज्ञातव्यो भवति, अविशारदो**ऽकुशलः **प्रवचने** जिनमते, अविद्यमानमाभिमुख्येन गृहीतं ग्रहणं ज्ञानमस्येत्यनभिगृहीतोऽनभिज्ञः **शेषेषु कपिलादि**मतेषु, कोऽर्थः ? य उक्त-विशेषणः स सङ्क्षेपेणैव **चिलातीपुत्र**वत् प्रशमादिपदत्रयेण तत्त्वरुचिमाप्नोति, स च सङ्क्षेपरुचिः कथ्यते ॥२६॥

धर्मरुचिमाह–

जो अत्थिकायधम्मं, सुतधम्मं खलु चरित्तधम्मं च ।
सद्दहइ जिणाभिहियं, सो धम्मरुइ त्ति नायव्वो ॥२७॥

व्याख्या–यो**ऽस्तिकायादीनां धर्मो** गत्युपष्टम्भादिरस्तिकायधर्म**स्तं**, जातावेकवचनं **श्रुतधर्ममङ्गप्रविष्टाद्या**गमस्वरूपं, **खलु**र्वाक्यालङ्कारे, **चारित्रधर्मं** वा **सामायिकादि, च** एवार्थे, **श्रद्दधाति जिनाभिहितं** तीर्थकरैः कथितं, स धर्मरुचिः, धर्मेषु पर्यायेषु, धर्मे वा श्रुतधर्मादौ रुचिरस्येति स **धर्मरुचिर्ज्ञातव्यः**, एवं शिष्यव्युत्पादनार्थं चेत्थमुपाधिभेदेन सम्यक्त्वभेदोक्तिः, अन्यथा निसर्गोपदेशयोरधिगमादौ वा क्वचित् केषाञ्चिदन्तर्भाव इति ॥२७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सम्यक्त्वलिङ्गान्याह–

परमत्थसंथवो वा, सुदट्ठपरमत्थसेवणा वा वि ।
वावण्णकुदंसणवज्जणा य सम्मत्तसद्दहणा ॥२८॥

व्याख्या–परमार्थास्तात्विकार्था जीवाद्यास्तेषु संस्तवो गुणोत्कीर्त्तनं, पुनःपुनस्तत्स्वरूपचिन्तनकृते कृतः परिचयो वा **परमार्थसंस्तवः, वा** समुच्चये । **सुदृष्टपरमार्था** आचार्याद्यास्**तेषां सेवनं,** इहाग्रे च सूत्रत्वात् स्त्रीलिङ्गता, **चे**त्यनुक्तसमुच्चये, ततो यथाशक्ति तद्वैयावृत्त्यप्रवृत्तिश्च, **अपि** समुच्चये, दर्शनशब्दो द्वयोर्योज्यः, ततो व्यापन्नं विनष्टं दर्शनं येषां ते **व्यापन्नदर्शना निह्नवा**द्याः, यैरापं सम्यक्त्वं कर्मोदयाद्वान्तं, तता **कुदर्शनाः शाक्या**द्यास्तेषां वर्जनं । **चः** समुच्चये, सम्यक्त्वं श्रद्धीयतेऽस्तीति प्रतिपद्यतेऽनेनेति **सम्यक्त्वश्रद्धानं** सम्यक्त्वलिङ्गमित्यर्थः, श्रद्धानस्य प्रत्येकं परमार्थसंस्तवादिभिः सम्बन्धादेकवचनम् ॥२८॥

सम्यक्त्वस्य माहात्म्यमाह–

नत्थि चरित्तं सम्मत्तविहूणं, दंसणे उ भइयव्वं ।
सम्मत्तचरित्ताइं, जुगवं पुव्वं व सम्मत्तं ॥२९॥

व्याख्या–**नास्ति** नासीन्न च भविष्यति **चारित्रं सम्यक्त्वविहीनं,** कोऽर्थः ? यावन्न सम्यक्त्वोत्पादो न तावच्चारित्रं, **दर्शने तु** सम्यक्त्वे पुनः सति **भक्तव्यं,** स्यान्न वा चारित्रं, अतो न तत्र नियतं । यतः **सम्यक्त्वचारित्रे** तु **युगपदेक**कालमुत्पद्येते । 'पुव्व व'त्ति **पूर्वं वा** चारित्रोत्पादात् सम्यक्त्वमुत्पद्येत ॥२९॥

अन्यच्च–

नादंसणिस्स नाणं, नाणेण विणा न होंति चरणगुणा ।
अगुणिस्स नत्थि मोक्खो, नत्थि अमोक्खस्स निव्वाणं ॥३०॥

व्याख्या–**नाऽदर्शनिनो** दर्शनरहितस्य **ज्ञानं** सम्यग्ज्ञानं, **ज्ञानेन विने**ति ज्ञानविरहिता **न भवन्ति चरणगुणाः,** अत्र चरणं व्रतादि, गुणाः पिण्डविशुद्ध्याद्याः, **अगुणिनो**ऽचरणगुणस्य **मोक्षः** कर्मक्षयो **नास्ति, अमुक्तस्य** च कर्मणा **निर्वाणं** मुक्ति**र्नास्ति** ॥३०॥

अष्टधा दर्शनाचारे उत्तरोत्तरगुणाप्तिरिति तान् दर्शयति–

निस्संकिय निक्कंखिय, निव्वितिगिच्छा अमूढदिट्ठी य ।
उववूहथिरीकरणे, वच्छल्लपभावणे अट्ठ ॥३१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—शङ्कितं देशसर्वशङ्का, तदभावो **निःशङ्कितं**, काङ्क्षितमन्याऽन्यदर्शनग्रहात्, तदभावो **निःकाङ्क्षितं**, विचिकित्सा फलं प्रति सन्देहः, यद्वा विदां साधूनां जुगुप्सा, तदभावो **निर्विचिकित्सं निर्विजुगुप्सं** वा, आर्षत्वादेवं पाठः, अमूढा दृष्टिः **अमूढदृष्टिः**, यत्परतीर्थिनां भूयसीं ऋद्धिं दृष्ट्वापि स्वकीयेऽकिञ्चने धर्मे मतेः स्थिरीभावः, चतुर्विधोऽप्ययमान्तराचारः, बाह्यं त्वाह—**उपबृंहा** प्रशंसा, तया तत्तद्गुणपरिवर्द्धनं, गुणवतां **स्थिरीकरणं**, स्वीकृतधर्मानुष्ठानं प्रति सीदतां **वात्सल्यं**, साधर्मिकाणां भक्तादिनोचितप्रतिपत्तिकरणं, **प्रभावना** स्वतीर्थोन्नतिहेतुचेष्टायाः प्रवर्त्तनं, **अष्टैते** दर्शनाचाराः स्युः ॥३१॥

इत्थं ज्ञानदर्शनाख्यमुक्तिमार्गमुक्त्वा चारित्ररूपं सभेदमाह—

सामाइयत्थ पढमं, छेओवट्ठावणं भवे बिइयं ।
परिहारविसुद्धीयं, सुहुमं तह संपरायं च ॥३२॥

व्याख्या—रागद्वेषरहिते समपरिणामे अयो गमनं समायः, स एव **सामायिकं**, सावद्यत्यागरूपं **प्रथमं**, तच्च द्विधा, इत्वरं यावत्कथितं च तत्रेत्वरं छेदोपस्थापनीयानां यावत्कथितं च मध्यमार्हत्तीर्थेषु महाविदेहेषु च, तथा छेदः सातिचारस्य यतेः, निरतिचारस्य वा तीर्थान्तरं प्रतिपद्यमानस्य पूर्वपर्यायव्यवच्छेदरूपः, तद्युक्ता उपस्थापना महाव्रतारोपणा यस्मिन् तच्**छेदोपस्थापनं** भवेद् **द्वितीयं**। परिहरणं परिहारो विशिष्टतपोरूपस्तेन विशुद्धिरस्मिन्निति **परिहारविशुद्धिकं**, अष्टादशमासैर्नवकगणसाध्यं श्री**आवश्यकदीपिका**व्याख्यातं। **तथे**त्यानन्तर्ये छन्दोभङ्गभयाच्चैवमुपन्यस्तः, सूक्ष्मः किट्टीकरणतः सम्पर्येति पर्यटत्यनेन संसारमिति सम्परायो लोभाख्यः कषायो यस्मिंस्तत् **सूक्ष्मसम्परायं**, एतच्चोपशमश्रेणिक्षपकश्रेण्योर्लोभाणुवेदनसमये स्यात् ॥३२॥

अकसायमहक्खायं, छउमत्थस्स जिणस्स वा ।
एयं चयरित्तकरं, चारित्तं होइ आहियं ॥३३॥

व्याख्या—अकषायं क्षपितोपशमितकषायावस्थाभावि, **यथाख्यातम**र्हत्कथितस्वरूपाऽनतिक्रमवत्, **छद्मस्थस्यो**पशान्तक्षीणमोहगुणस्थानद्वयवर्त्तिनो **जिनस्य वा** केवलिनः सयोग्ययोगिगुणस्थानद्वयस्थानिनः, **एतत्**सामायिकादि पञ्चविधमपि च यस्य राशेः कर्मणां रिक्तं विरेकोऽभाव इत्यर्थस्तत्करोतीति **चयरिक्तकरं चारित्रं भवत्याख्यातं** जिनैः ॥३३॥

अथ तुर्यं कारणं तप आह—

तवो य दुविहो वुत्तो, बाहिरब्भिंतरो तहा ।
बाहिरो छव्विहो वुत्तो, एवमब्भिंतरो तवो ॥३४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या–तपश्च द्विविधमुक्तं, बाह्यमभ्यन्तरं च, **बाह्यं षड्विधमुक्तं, एवमाभ्यन्तरं** चापि षोढा, तद्व्याख्यानमग्रे **तपो**ऽध्ययने व्याख्यास्यते ॥३४॥

एषां मुक्तिमार्गत्वे कस्य कतरो व्यापार इत्याह–

नाणेण जाणइ भावे, दंसणेण य सद्दहे ।
चरित्तेण य णिण्हाइ, तवेणं परिसुज्झइ ॥३५॥

व्याख्या–ज्ञानेन मत्यादिना **जानाति भावान्** जीवादीन्, **दर्शनेन** च तान् जिनोक्तान् **श्रद्दधते,** चारित्रेण च 'निण्हाइ'त्ति **निराश्रवो भवति** (पाठान्तरे-'ण गिण्हाइ' **न गृह्णाति,** नाऽदत्ते कर्म) **तपसा** च **परिशुद्ध्यति** कर्मक्षयाच्छुद्धो भवति ॥३५॥

मार्गस्य फलं मोक्ष उक्तः, तत्फलभूतां गतिमाह–

खवित्ता पुव्वकम्माइं, संजमेण तवेण य ।
सव्वदुक्खप्पहीणट्ठा, पक्कमंति महेसिणो ॥३६॥ त्ति बेमि

व्याख्या–क्षपयित्वा पूर्वकर्माणि पूर्वकृतज्ञानावरणादीनि, **संयमेन तपसा, चात्** ज्ञानदर्शनाभ्यां च, प्राकृतत्वात् प्रक्षीणानि सर्वदुःखानि यत्र तत्तथा सिद्धिक्षेत्रं, तदर्थयन्ते तद्गामितया ये ते **प्रक्षीणसर्वदुःखार्थाः प्रक्रामन्ति** सिद्धिं **महर्षयो महैषिणो** वा । **इति** समाप्तौ, **ब्रवीमी**ति प्राग्वत् ॥३६॥

इत्यष्टाविंशं मोक्षमार्गीयमध्ययनमुक्तम् ॥२८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एकोनत्रिंशं सम्यक्त्वपराक्रमाख्यमध्ययनम् ॥

यानि ज्ञानादीनि मुक्तिमार्गत्वेनोक्तानि तानि संवेगादिमूलानि अकर्मताफलानि च स्युस्तानीहोच्यन्ते । सा च वीतरागत्वपूर्विकेति यथा तत् स्यात्तथात्रोच्यते । इत्यनेन सम्बन्धत्रयेणायातमिदमेकोनत्रिंशं सम्यक्त्वोपेतानां पराक्रमवाचि **सम्यक्त्वपराक्रमा**ख्याध्ययनमाह–

आयाणपदनामं, सम्मत्तपरक्कमं ति अज्झयणं ।
गोणं तु अप्पमायं, एगे पुण वीयरायसुयं ॥१॥ [उत्त. नि./गा.५०३]

आदानपदे इति वक्तव्ये, रूढं नाम सम्यक्त्वं पराक्रमं गौणं तु

सुयं मे आउसं तेणं भगवया एवमक्खायं इह खलु सम्मत्ततपरक्कमे णाम अज्झयणे ॥

व्याख्या–**श्रुतमा**कर्णितं 'मे' **मया आयुष्यमन्निति** शिष्यामन्त्रणे, एतच्च **सुधर्म**स्वामी **जम्बू**स्वामिनं प्रत्याह–**तेन भगवता** श्रीवीरेण **एवमाख्यातमस्ति यदिह खलु** इहैव प्रवचने सम्यक्त्वे सति पराक्रम उत्तरोत्तरगुणैः कर्मारिजयो वर्ण्यतेऽस्मिन्निति **सम्यक्त्वपराक्रमं नामाऽध्ययनमस्ति** ॥

तच्च केन प्रणीतमित्याह–

समणेणं भगवया महावीरेणं कासवेणं पवेइअं, जं सम्मं सद्दहित्ता पत्तिइत्ता रोयइत्ता फासइत्ता पालइत्ता तीरइत्ता किट्टइत्ता सोहइत्ता आराहइत्ता आणाए अणुपालइत्ता बहवे जीवा सिज्झंति बुज्झंति मुच्चंति परिनिव्वायंति सव्वदुक्खणमंतं करेंति ॥

व्याख्या–श्रमणेत्यादि, **श्रमणेन भगवता महावीरेण काश्यपेन प्रवेदितं** ममेदमाख्यातमिति भावः । गणभृदपि, गुरूपदिष्टं गुरुमाहात्म्यं च ख्यापयद्भिः सूत्रमर्थश्च व्याख्येये इति ज्ञप्त्यै एवमुपन्यसति । **यदध्ययनं सम्यक् श्रद्धाय** शब्दार्थोभयरूपं

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सामान्येन प्रतिपद्य, **प्रतीत्य** विशेषतो निश्चित्य, **रोचयित्वा** तदध्ययनादिविषयमभिलाषमात्मन उत्पाद्य, **स्पृष्ट्वा** योगत्रिकेण, तत्र मनसा सूत्रार्थचिन्तनैः, वचसा वचनाद्यैः, कायेन भङ्गकरचनाद्यैः, **पालयित्वा** परावर्त्तादिनाऽभिरक्ष्य, **तीरयित्वा**ऽध्ययनादिना परिसमाप्य, **कीर्त्तयित्वा** गुरोर्विनयपूर्वकमिदमित्थं मयाऽधीतमिति निवेद्य, **शोधयित्वा** गुरुवदनभाषणाद्यैः शुद्धं कृत्वा, यद्वा तदुक्तक्रियया **पालयित्वा,** क्रियाया अतीचाररक्षया **तीरयित्वा** क्रियापारं नीत्वा, **कीर्त्तयित्वा** स्वाध्यायेन सभायां, **शोधयित्वा** उक्तक्रियया शुद्धगुणस्थानोत्तरोत्तराप्त्या, **आराध्योत्सर्गापवादाभ्यां**, एवमपि न स्वबुद्ध्या, किन्तु सम्यग् **गुर्वाज्ञयाऽनुपाल्य** सदाऽसेव्य, यद्वाऽराध्योत्सूत्रप्ररूपणादिपरिहारेण, **आज्ञया** जिनाज्ञयाऽ**नुपाल्य** सततमासेव्य, **बहवो जीवाः सिद्ध्यन्ति,** सिद्धत्वादिना च **बुद्ध्यन्ति,** घातिकर्मक्षयेण **मुच्यन्ते** भवोपग्राहिकर्मचतुष्टयेन, ततश्च **परिनिर्वान्ति** कर्मदावानलोपशमेन, अत एव **सर्वदुःखानां** शारीरमानसाना**मन्तं कुर्वन्ति** मुक्तत्वाप्त्या ।

तस्स णं अयमट्ठे एवमाहिज्जंति, तं जहा—संवेगे निव्वेगो धम्मसद्धाए गुरुसाहम्मियसुस्सूसणया आलोयणया निंदणया गरहणया सामाइए चउवीसत्थए वंदणए पडिक्कमणे काउस्सग्गे पच्चक्खाणे थयथुइमंगले कालपडिलेहणया पायच्छित्तकरणे खमावणया सज्झाए वायणया पडिपुच्छणया परियट्टणया अणुपेहा धम्मकहा सुयस्स आराहणया एगग्गमणसंणिवेसणया संजमे तवे वोदाणे सुहसाए अप्पडिबद्धया विवित्तसयणासणसेवणया विणियट्टणया संभोगपच्चक्खाणे उवहिपच्चक्खाणे आहारपच्चक्खाणे कसायपच्चक्खाणे जोगपच्चक्खाणे शरीरपच्चक्खाणे सहायपच्चक्खाणे भत्तपच्चक्खाणे सब्भावपच्चक्खाणे पडिरूवया वेयावच्चे सव्वगुणसंपुण्णया वीयरागया, खंती मुत्ती मद्दवे अज्जवे भावसच्चे करणसच्चे जोगसच्चे मणगुत्तया वयगुत्तया कायगुत्तया मणसमाहारणया वयसमाहारणया कायसमाहारणया नाणसंपण्णया दंसणसंपण्णया चरित्तसंपण्णया सोतिंदियनिग्गहे चक्खिंदीयनिग्गहे घाणिंदियनिग्गहे जिब्भिंदियनिग्गहे फासिंदियनिग्गहे कोहविजए माणविजए मायाविजए लोहविजए पेज्जदोसमिच्छादंसणविजए सेलेसी अकम्मया ॥

व्याख्या—तस्य सम्यक्त्वपराक्रमाध्ययनस्य **णमि**ति सर्वत्र वाक्यलङ्कारे ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अयमनन्तरमेव वक्ष्यमाणोऽर्थ **एवम**मुना वक्ष्यमाण प्रकारे**णाख्याते** श्रीवीरेण, तद्यथेति वक्ष्यमाणतदर्थोपन्यासे, **संवेगः १ निर्वेदः २ धर्मश्रद्धा ३ गुरुसाधर्मिकशुश्रूषणं ४** (आर्षत्वाच्चेहोत्तरत्र च सर्वेष्वन्यथा पाठः) **आलोचना ५ निन्दा ६ गर्हा ७ सामायिकं ८ चतुर्विंशतिस्तवः ९ वन्दनं १० प्रतिक्रमणं ११ कायोत्सर्गः १२ प्रत्याख्यानं १३ स्तवस्तुतिमङ्गलं १४ कालप्रत्युपेक्षणा १५ प्रायश्चित्तकरणं १६ क्षामणं १७ स्वाध्यायः १८ वाचना १९ परिपृच्छना २० परावर्त्तना २१ अनुप्रेक्षा २२ धर्मकथा २३ श्रुतस्याराधना २४ एकाग्रमनःसन्निवेशना २५ संयमः २६ तपः २७ व्यवदानं २८ सुखशायः २९ अप्रतिबन्धता ३० विविक्तशयनासनसेवना ३१ विनिवर्त्तना ३२ सम्भोगप्रत्याख्यानं ३३ उपधिप्रत्याख्यानं ३४ आहारप्रत्याख्यानं ३५ कषाय-प्रत्याख्यानं ३६ योगप्रत्याख्यानं ३७ शरीरप्रत्याख्यानं ३८ सहायप्रत्याख्यानं ३९ भक्तप्रत्याख्यानं ४० सद्भावप्रत्याख्यानं ४१ प्रतिरूपता ४२ वैयावृत्त्यं ४३ सर्वगुणसम्पूर्णता ४४ वीतरागता ४५ क्षान्तिः ४६ मुक्तिः ४७ मार्दवं ४८ आर्जवं ४९ भावसत्यं ५० करणसत्यं ५१ योगसत्यं ५२ मनोगुप्तता ५३ वाग्गुप्तता ५४ कायगुप्तता ५५ समनःसमाधारणा ५६ वाक्समाधारणा ५७ कायसमाधारणा ५८ ज्ञानसम्पन्नता ५९ दर्शनसम्पन्नता ६० चारित्रसम्पन्नता ६१ श्रोत्रेन्द्रियनिग्रहः ६२ चक्षुरिन्द्रियनिग्रहः ६३ घ्राणेन्द्रियनिग्रहः ६४ जिह्वेन्द्रियनिग्रहः ६५ स्पर्शनेन्द्रियनिग्रहः ६६ क्रोधविजयः ६७ मानविजयः ६८ मायाविजयः ६९ लोभविजयः ७० प्रेमद्वेषमिथ्यादर्शनविजयः ७१ शैलेशी ७२ अकर्मता ७३ प्रत्यक्षरसंस्कारः ॥

अथेदमेव प्रतिपदं फलोक्त्या व्याख्याति—

संवेगेणं भंते जीवे किं जणयइ ? संवेगेणं अणुत्तरं धम्मसद्धं जणयइ, अणुत्तराए धम्मसद्धाए संवेगं हव्वमागच्छइ, अणंताणुबंधिकोह-माणमायालोभे खवेइ, नवं कम्मं न बंधइ, तप्पच्चइयं च णं मिच्छत्त-विसोहिं काऊण दंसणाराहए भवइ, दंसणविसोहीएणं विसुद्धाए अत्थेगइए तेणेव भवग्गहणेणं सिज्झइ, सोहीए णं विसुद्धाए तच्चं पुणो भवग्गहणं नाइक्कमइ ॥१॥

व्याख्या—शिष्यः पृच्छति **हे भदन्त ! संवेगेन** मोक्षाभिलाषेण कृत्वा **जीवः किं जनयति** ? गुरुराह हे शिष्य ! **संवेगेन** कृत्वा जीवोऽनुत्तरां प्रकृष्टां **धर्मयोः** श्रुतचारित्रयोः **श्रद्धां** तत्करणेच्छां **जनयति** । **अनुत्तरधर्मश्रद्धया संवेगं** तमेवार्थाद्विशिष्टतरं 'हव्वं'ति

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

शीघ्रमागच्छति । अनन्तानुबन्धिक्रोधमानमायालोभान् क्षपयति । नवं कर्म अशुभं **न बध्नाति** । ततश्च कषायक्षयः प्रत्ययो निमित्तं यस्याः सा तथा, सैव **तत्प्रत्ययका,** ता, **चः** समुच्चये, **मिथ्यात्वस्य विशुद्धिः** सर्वथा क्षयस्तां **कृत्वा दर्शनस्य** क्षायिकसम्यक्त्व-स्याराधको **भवति, दर्शनविशुद्धया** च **विशुद्धया**ऽत्यन्तनिर्मलयाऽस्त्येककः कश्चिन्**मरु-देवी**वद्द्रव्यस्तेनैव **भवग्रहणेन सिद्धयति,** तस्मिन्नेव भवे मुक्तिं याति । यस्तु तद्भवे न सिद्धयति स **शुद्धया** दर्शनस्य **विशुद्धया तृतीयं पुनर्भवग्रहणं नातिक्रामति,** अवश्यं भवत्रयान्तः सिद्धयति । उत्कृष्टदर्शनाराधकापेक्षयैतत् । यतः—

उक्कोसदंसेणेणं भंते ! जीवे कइहिं भवग्गहणेहिं सेज्झिज्जा ? । गोयमा ! उक्कोसेणं तेणेव तओ मुक्के तइयं नाइक्कमइ ॥ [ ]

संवेगादवश्यं निर्वेदः स्यादिति तमाह—

निव्वेएणं भंते जीवे किं जणयइ ? निव्वेएण दिव्वमाणुसतेरिच्छिएसु कामभोगेसु निव्वेअं हव्वमागच्छइ, सव्वविसएसु विरज्जइ, सव्वविसएसु विरज्जमाणे आरंभपरिग्गहपरिच्चायं करेइ आरंभपरिग्गहपरिच्चायं करेमाणे संसारमग्गं वोच्छिंदइ, सिद्धिमग्गपडिवण्णे य भवइ ॥२॥

व्याख्या—हे भदन्त ! निर्वेदेन सामान्यतः संसारविरागेण **जीवः किं जनयति ?** गुरुराह-**निर्वेदेन** कदासौ संसारस्त्याज्यः ? इति धिया **दिव्यमानुष्यतैरश्चेषु कामेषु** निर्वेदं, यथाऽलमेतैरनर्थहेतुभिरिति भावं 'हव्वं'ति **द्रुतमागच्छति, सर्वविषयेषु विरज्यति, तेभ्यो विरज्यंश्च आरम्भपरिग्रहपरित्यागं करोति, तं कुर्वन् संसारमार्गं** मिथ्यात्वाऽविरत्यादिकं **व्यवच्छिनत्ति,** तत्त्यागवत एव तत्त्वत आरम्भपरित्यागात् तद्व्यवच्छित्तौ च सुप्राप एव सिद्धिमार्गः सम्यग्दर्शनादिरिति **सिद्धिमार्गप्रतिपन्नश्च भवति ॥**

सत्यपि निर्वेदे धर्मश्रद्धैव श्रेयोहेतुरिति तमाह—

धम्मसद्धाए णं भंते जीवे किं जणयइ ? धम्मसद्धाए णं साता-सोक्खेसु रज्जमाणे विरज्जइ, अगारधम्मं च णं चयइ, अणगारे णं जीवे सारीरमाणसाणं दुक्खाणं छेअणभेअणसंजोगादीणं वोच्छेदं करेइ, अव्वाबाहं च णं सुहं निव्वत्तेइ ॥३॥

व्याख्या—हे भदन्त ! धर्मश्रद्धया जीवः किं जनयति ? गुरुराह—हे शिष्य ! **धर्मश्रद्धया सातासुखेषु** वैषयिकसुखेषु **रज्यमानः** पूर्वं रागं कुर्वन् **विरज्यते** विरक्तिं

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

याति, **अगारधर्मं च** गार्हस्थ्यं, **णं** अलङ्कारे **त्यजति**, ततश्च प्राकृतत्वादनगारः सन् **जीवः शारीरमानसानां दुःखानां**, यथा **छेदनभेदनादीनां** शारीराणां, संयोगोऽनिष्टानां, आदेरिष्टवियोगादिः, ततः **संयोगादीनां** मानसदुःखानां **व्यवच्छेदं** करोति । **अव्याबाधं च सुखं** मोक्षं पुनर्**निवर्त्तयति** ॥३॥

धर्मश्रद्धायां चाऽवश्यं गुरवः शुश्रूषयितव्या इति गुरुशुश्रूषणामाह—

गुरुसाहम्मियसुस्ससणयाए णं भंते जीवे किं जणयइ ? गुरुसाहम्मियसुस्सूसणयाएणं विणयपडिवत्तिं जणयइ, विणयपडिवण्णे य णं जीवे अणच्चासायणसीले नेरइयतिरिक्खजोणियमणुस्सदेवदुग्गईओ निरुंभइ, वण्णसंजलणभत्तिबहुमाणयाए य मणुस्सदेवसुगईओ निबंधइ, सिद्धिसुग्गइं च विसोहेइ पसत्थाइं च णं विणयमूलाइं सव्वकज्जाइं साहेइ, अण्णे य बहवे जीवे विणइत्ता भवइ ॥४॥

व्याख्या—हे भदन्त ! गुरूणां आचार्याणां **साधर्मिकाणां** एकधर्मवतां **शुश्रूषया** सेवया **जीवः किं जनयति** ? **गुरुराह** हे शिष्य ! **गुरूणां साधर्मिकाणां** च **शुश्रूषयो**-पासनया **जीवो विनयप्रतिपत्तिं** उचितकृत्यकरणाङ्गीकाररूपां **जनयती**ति सर्वत्र ज्ञेयं । **प्रतिपन्नविनयः** पुनर्जीवोऽनत्यासातनाशीलो गुरुपरिवादादिपरिहारादत्यासातनात्यागी सन् **नैरयिकतिर्यग्योनी मनुष्यदेवदुर्गती** म्लेच्छकिल्बिषत्वादीनि **रुणद्धि**, तद्धेतोरत्यासातनाया अभावेन तत्राऽगमनात्। वर्णश्लाघा तेन संज्वलं गुणोद्भासनं, भक्तिरञ्जलिप्रग्रहादिः, बहुमान आन्तरप्रीतिः, एषां द्वन्द्वे भावप्रत्यये च **वर्णसञ्ज्वलनभक्तिबहुमानतया** गुरूणां विनयप्रतिपत्त्या **मनुष्यदेवसुगती** सकलैश्वर्येन्द्रत्वादीनि **बध्नाति, सिद्धिं सुगतिं च विशोधयति,** सन्मार्गसम्यग्दर्शनादेः शोधनेन च **प्रशस्तानि** प्रशंसास्पदानि **विनयमूलानि सर्वकार्याणीह** श्रुतज्ञानादीनि परत्र च मुक्तिं **साधयति, अन्यांश्च बहून् जीवान् विनेता** विनयं ग्राहयिता **भवति** स्वयं, उपादेयवचनत्वात् । **'उट्ठावइए परं'** इत्युक्तत्वात् ॥४॥

गुरुशुश्रूषकस्याऽतीचारसम्भवे आलोचनया विवक्षितफलाप्तिरिति तामह—

आलोयणयाए णं भंते जीवे किं जणयइ ? आलोयणयाए णं मायानियाणमिच्छादरिसणसल्लाणं मोक्खमग्गविग्घाणं अणंतसंसारवद्धणाणं उद्धरणं करेइ, उज्जुभावं जणयइ उज्जुभावपडिवन्ने य णं जीवे अमायी इत्थीवेदं णपुंसकवेदं च न बंधइ, पुव्वबद्धं च णं निज्जरेइ ॥५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—हे भदन्त ! आलोचनया गुर्वग्रे स्वदोषप्रकाशनरूपया **जीवः किं जनयति ?** गुरुराह—**आलोचनया** मायानिदानं मिथ्यादर्शनं सांशयिकादि, एतानि शल्यानीव शल्यानि **मायानिदानमिथ्यादर्शनशल्यानि,** तेषां **मोक्षमार्गं** प्रति **विघ्नभूतानां अनन्तसंसारवर्द्धनानां उद्धरणम**पनयनं **करोति** । **ऋजुभावं** सरलत्वं च जनयति । ततः प्रतिपन्नार्जवभावश्च **जीवोऽमायी,** पुंस्त्वहेतुत्वाच्चाऽमायित्वस्य, **स्त्रीवेदं नपुंसकवेदं च न बध्नाति, पूर्वबद्धं च** तदेव द्वयं सकलकर्म वा **निर्जरयति** क्षपयति, अर्वान्मुक्तिं प्राप्नोति ॥५॥

आलोचना निन्दावत एव सफलेति तामाह—

निंदणयाए णं भंते जीवे किं जणयई ? निंदणयाए णं पच्छाणुतावं जणयइ, पच्छाणुतावेणं विरज्जमाणो करणगुणसेढिं पडिवज्जइ, करण-गुणसेढीपडिवन्ने य अणगारे मोहणिज्जं कम्मं उग्घाएइ ॥ ६॥

व्याख्या—हे भदन्त ! निन्दनया जीवः किं जनयति ? गुरुराह-हे शिष्य ! **निन्दनेनात्मनैवात्मदोषपरिभावनेन, पश्चादनुतापं** हा दुष्टं कृतमिदं मयेत्यादि **जनयति** । **विरज्यमानो** वैराग्यं गच्छन् करणेनाऽपूर्वकरणेन गुणहेतुकां श्रेणिं **करणगुणश्रेणिं प्रपद्यते,** सा च सर्वोपरितनस्थितेर्मोहनीयादिकर्मदलिकान्यादायोदयसमयात् प्रभृति द्वितीयादिसमयेष्वसङ्ख्यातगुणपुद्गलप्रक्षेपरूपान्तर्मौहूर्त्तिकी, उपलक्षणत्वात् स्थितिघातरसघातगुणसङ्क्रमस्थितिवेदैश्च विशिष्टा, अथवा **करणगुणेना**ऽपूर्वकरणादिमाहात्म्येन **श्रेणिः** क्षपकश्रेणिरेव, **तां,** यद्वा **करणं** पिण्डविशुद्ध्यादि, गुणानां ज्ञानादीनां च **श्रेणि**रुत्तरोत्तरगुणालिस्तां **प्रतिपद्यते, प्रतिपन्नकरणगुणश्रेणिकश्चाऽनगारो** मोहनीयं दर्शनमोहनीयादिकर्मोद्घातयति क्षपयति, तत्क्षपणे च मुक्तिप्राप्तिः ॥६॥

कोऽप्यात्मनोऽत्यन्तदुष्टतां जानन्निन्दां कृत्वा गर्हामपि कुर्यादित्याह—

गरहणयाए णं भंते जीवे किं जणयइ ? गरहणयाए णं अपुरक्कारं जणयइ, अपुरक्कारगएणं जीवे अप्पसत्थेहिंतो जोगेहिंतो नियत्तेइ, पसत्थे य पवत्तेइ, पसत्थजोगपडिवन्ने य णं अणगारे अणंतघाइपज्जवे खवेइ ॥७॥

व्याख्या—हे स्वामिन् ! **गर्हणेन** परसमक्षमात्मनो दोषोद्भावनेन **जीवः किं जनयति** ? गुरुराह—**गर्हणेन,** पुरस्कारो गुणवानयमिति गौरवः, न तथाऽ**पुरस्कारः,** अवज्ञास्पदं **जनयत्यात्मनः, तद्गतश्च** कदध्यवसायोत्पत्तावपि तद्भीत्यैवाऽ**प्रशस्तेभ्यः**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कर्मबन्धहेतुभ्यो **योगेभ्यो निवर्त्तते, प्रशस्तयोगांस्तु प्रतिपद्यते । प्रतिपन्नप्रशस्तयोग-स्त्वनगारो**ऽनन्तविषयतयाऽनन्ते ज्ञानदर्शने घ्नन्तीत्येवंशीला **अनन्तघातिनस्तान् पर्यवान्** ज्ञानावरणादिकर्मणां परिणामान् क्षपयति, मुक्तिं चाप्नोतीति सर्वत्राऽनुक्तमपि ज्ञेयं तदर्थ-त्वात् सर्वप्रयासस्य ॥७॥

आलोचनादीनि सामायिकवत एव तत्त्वतः स्युरिति तदुच्यते—

सामाइएणं भंते जीवे किं जणयइ ? सामाइएणं सावज्जजोगविरइं जणयइ ॥८॥

व्याख्या—हे भदन्त ! सामायिकेन जीवः किं जनयति ? गुरुराह-**सामायिकेन सावद्ययोगविरतिं** कर्मबन्धहेतुव्यापारोपरमं **जनयति,** तद्विरतिसहितस्यैव सामायिक-सम्भवात्, न चैवं तुल्यकालत्वेनाऽनयोर्वृक्षच्छायादिवत् कार्यकारणभावाऽसम्भवः ॥८॥

सामायिकप्रतिपन्ना तत्प्रणेतारः स्तुत्यास्ते चार्हन्त इति तत्सूत्रमाह—

चउवीसत्थएणं भंते जीवे किं जणयइ ? चउवीसत्थएणं दंसणविसोहिं जणयइ ॥९॥

व्याख्या—हे भदन्त ! चतुर्विंशतिस्तवेन जीवः किं जनयति ? गुरुराह-हे शिष्य ! **चतुर्विंशतिस्तवेन** जीवो **दर्शनविशुद्धिं जनयति,** सम्यक्त्वनैर्मल्यं करोति ॥९॥

स्तुत्वा जिनान् गुरुवन्दनपूर्विका सामायिकप्रवृत्तिरित्याह—

वंदणएणं भंते जीवे किं जणयइ ? वंदणएणं नीयागोत्तं कम्मं खवेइ, उच्चागोत्तं निबंधइ, सोहग्गं च णं अप्पडिहयं आणाफलं निव्वत्तेइ, दाहिणभावं च णं जणयइ ॥१०॥

व्याख्या—हे भदन्त ! वन्दनेन जीवः किं जनयति ? गुरुराह—**वन्दनेन** गुरुभ्यो द्वादशावर्त्तपूर्वकं वन्दनेन जीवो **नीचैर्गोत्रं कर्म क्षपयति, उच्चैर्गोत्रं** कर्म च **बध्नाति, सौभाग्यं चाऽप्रतिहतं, आज्ञाफलमाज्ञासारं निवर्त्तयति** करोति, **दक्षिणभावं चानुकूल-भावं जनयति** लोकस्य ॥१०॥

सामायिकेऽत्र सामायिकप्रतिक्रमणे साधूनुद्दिश्योक्ते, न तु श्राद्धान्, यत आद्यान्ता-र्हतोः, अन्येषां त्वतीचारे एवेति कथनात् एतद्गुणस्थितेनापि मध्यमार्हतां तीर्थेऽतीचारे, **ऋषभवीर**योस्तु तदभावेऽपि प्रतिक्रमितव्यमिति प्रतिक्रमणमाह—

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पडिक्कमणेणं भंते जीवे किं जणयइ ? पडिक्कमणेणं च तच्छिद्दाइं पिहेइ, पिहियवयच्छिद्दे पुण जीवे निरुद्धासवे असबलचरित्ते अट्ठसु पवयणमायासु उवउत्ते अपुहत्ते सुप्पणिहिए विहरइ ॥११॥

व्याख्या–हे भदन्त ! प्रतिक्रमणेन जीवः किं जनयति ? गुरुराह हे शिष्य ! **प्रतिक्रमणेना**ऽपराधेभ्यः प्रतीपनिवर्त्तनेन जीवो **व्रतानां छिद्राण्य**तीचारान् **पिदधाति, पिहितव्रतच्छिद्रश्च जीवो** निरुद्धाश्रवो**ऽ**हिंसादिभावो**ऽशबलं** शबलस्थानैरकर्बुरीकृतं **चारित्रं** यस्य सो**ऽष्टप्रवचनमातृषूपयुक्तः** सन्, नास्ति पृथक्त्वं संयमयोगेभ्यो वियुक्तत्वं स्वरूपं यस्याऽसा**वपृथक्त्वः, सुप्रणिहितः** सुष्ठुसंयमे प्रणिधानवान् (पाठान्तरे–**सुप्रणिहितेन्द्रियः** सन्मार्गस्थापितेन्द्रियो) **विहरति** ॥११॥

अथातीचारशुद्ध्यर्थं कायोत्सर्गः कार्य इति तमाह–

काउसग्गेणं भंते जीवे किं जणयइ ? काउसग्गेणं तीयपडुप्पन्नं पायच्छित्तं विसोहेइ, विसुद्धपायच्छित्ते य जीवे निव्वुयहियए उहरियभर व्व भारवहे पसत्थज्झाणोवगए सुहं सुहेणं विहरइ ॥१२॥

व्याख्या–हे भदन्त ! कायोत्सर्गेण जीवः किं जनयति ? गुरुराह हे शिष्य ! कायोत्सर्गेण जीवोऽतीतं चिरकालीनं प्रत्युत्पन्नमिव **प्रत्युत्पन्नं,** वाऽासन्नकालभवं प्रायश्चित्तमिति प्रायश्चित्तार्हमतीचारं **विशोधयति, विशुद्धप्रायश्चित्तस्तु** जीवो निर्वृतं स्वस्थीभूतं हृदयमस्येति **निर्वृतहृदयः,** अपहृतो भर इति भारो यस्मात् **सोऽपहृतभरः, स इव भारवहो** वाहिकादिरिव, भारप्राया अतीचारास्तै रहितो यथा स्यात्तथा, **सद्धर्म-ध्यानोपगतः** प्रशस्तध्यानी सुखंसुखेन सुखपरम्पराप्त्या **विहरति,** इहपरलोकयोरवतिष्ठति, इहैव तन्मुक्त्यवाप्तेरित्यर्थः ॥१३॥

एवमप्यशुद्ध्यमाने प्रत्याख्यानं कार्यमिति तदाह–

पच्चक्खाणेणं भंते जीवे किं जणयइ ? पच्चक्खाणेणं आसव-दाराइं निरुंभइ, पच्चक्खाणेणं इच्छानिरोहं जणयइ, इच्छानिरोहं गएणं जीवे सव्वदव्वेसु विणीयतण्हे सीयलभूए विहरइ ॥१३॥

व्याख्या–हे भदन्त ! प्रत्याख्यानेन जीवः किं जनयति ? गुरुराह हे शिष्य ! **प्रत्याख्यानेन** मूलोत्तरगुणप्रत्याख्यानरूपेण, तत्रोत्तरगुणप्रत्याख्यानं नमस्कारसहितादि-प्रत्याख्यानकरणादिना **आश्रवद्वाराणि** जीवो **निरुणद्धि,** तथैव **प्रत्याख्यानेन** जीव

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इच्छानिरोधं आहारादिवाञ्छानिरोधं **जनयति, इच्छानिरोधं गतश्च जीवः सर्वद्रव्येषु विनीततृष्णोऽत्यन्तदूरीकृततृष्णः सन् शीतलीभूतो विहरति** बाह्याभ्यन्तरसन्तापरहितो विचरति ॥१३॥

प्रत्याख्यानकरणादनु यत्र चैत्यानि स्युस्तत्र तद्वन्दनं कार्यमित्युक्तं प्राक्, तच्च स्तुतिस्तवमङ्गलं विना नेति तदाह–

थयथुइमंगलेणं भंते जीवे किं जणयइ ? थयथुइमंगलेणं नाणदंसणचरित्तबोहिलाभं जणयइ, नाणदंसणचरित्तबोहिलाभसंपण्णे य जीवे अंतकिरियं कप्पविमाणोववत्तियं आराहणं आराहेइ ॥१४॥

व्याख्या–हे भदन्त ! स्तवस्तुतिमङ्गलेन जीवः किं जनयति ? गुरुराह हे शिष्य ! **स्तवस्तुतिमङ्गलेन,** तत्र स्तवा देवेन्द्रस्तवाद्याः, स्तुतय एकादिसप्तश्लोकान्ताः, प्राकृतत्वाद् व्यत्यये स्तुतिस्तवा एव मङ्गलं भावरूपं, तेन **ज्ञानदर्शनचारित्ररूपो बोधिस्तस्य लाभं** पूर्णार्हद्धर्माप्तिं जीवो **जनयति, ज्ञानादिसम्पन्नश्च जीवोऽन्तः** भवस्य कर्मणां वा, **तस्यान्तस्य क्रियां** मुक्तिं, कल्पा देवलोकाः, विमानानि ग्रैवेयकाऽनुत्तराणि तेषूपपत्तिर्यस्यास्तां **कल्पविमानोपपत्तिकां,** कोऽर्थः ? अन्तरभवे देवत्वफलं परम्परया तु मुक्तिप्रापिकामाराधनां ज्ञानाद्याराधनामाराधयति साधयति । अन्तक्रियाभाजनं च जीवस्तु चतुर्धा तथाहि–

कश्चित् प्रपद्यापि श्रामण्यं दीक्षां पालयन्नपि गाढगुरुकर्मत्वात् विशिष्टाऽध्यवसायाऽभावेन कर्मक्षयाऽभावान्न तद्भवे मुक्तिभाग्भवति, किं तु भवान्तरे दीर्घपर्यायावाप्त्या, यथा **सनत्कुमारचक्री** । तथा च **स्थानाङ्गम्**–

''तत्थ खलु इमे पढमे अंतकिरियावत्थू-महाकम्मे पच्चयाए यावि भवति, समणाउसो ! से णं समणे भवित्ता, अगाराओ अणगारियं पव्वइओ उवट्ठिए नेयाउयस्स मग्गस्स संजमबहुले संवरबहुले समाहिबहुले लूहे तीरट्ठीओ उवहाणवं दुक्खं खवेइ तवस्सी, तस्स णं तहप्पगारो तवे भवति णो तहप्पगारा वेयणा भवति, से णं तहप्पगारे पुरिसज्जाए दीहदीहेणं परियाएणं सिज्झइ बुज्झइ मुच्चइ परिणिव्वाइ, सव्वदुक्खाणमंतं करेइ, जहा से सणंकुमारे रायरिसी'' ॥ [ ]

अन्यस्तु गुरुकर्मापि व्रतमाप्य कर्मक्षयान्वितो विशिष्टाध्यवशात् तत्रैव भवेऽल्पेनैव कालेन मुक्तिमाप्नोति, यथा गजसुकुमालः, तदुक्तम्–

''अहावरे दोच्चे अंतकिरियावत्थू-महाकम्मे पच्चयाए यावि भवति, समणाउसे !

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

से णं मुंडे भवित्ता अगाराओ अणगारियं पव्वइओ उवट्ठिए नेयाउयस्स मग्गस्स जाव उवहाणवं दुक्खं खवेइ तवस्सी, तस्स णं तहप्पगारे तवे भवति, तहप्पगारा वेयणा भवति, से णं तहप्पगारे पुरिसजाए भवति, निरुद्धेणं परियाएणं सिज्झइ जाव सव्वदुक्खाणमंतं करेति जहा से गयसुकुमाले अणगारे'' ॥ [ ]

अन्यः पुनरल्पकर्मा श्रामण्यकष्टाऽभावं विना दीर्घपर्यायेण मुक्तिमाप्नोति यथा **भरतचक्री**, यथोक्तम्–

[**''अहावरे तच्चे अंतकिरियावत्थू-अप्पकम्मे पच्चयाए यावि भवति, समणाउसो से णं मुंडे भवित्ता अगाराओ अणगारियं पव्वए त्ति, उवट्ठिए णेयाउयस्स मग्गस्स संजमबहुले जाव सव्वदुक्खं खवेइ तवस्सी, तस्स णं णो तहप्पगारे तवे भवति नो तहप्पगारा वेयणा भवति, से णं तहप्पगारे पुरिसज्जाए, दीहेणं परियाएणं सिज्झति, जहा से भरहे राया चाउरंतचक्कवट्टी''** ३॥ [ ]

तदन्यस्त्वल्पकर्मा विरतिमवाप्य तथाविधविशुद्धाध्यवसायवशात्तथाविधतपस्तथाविधवेदना च लब्ध्वा झगित्येव मुक्तिमधिगच्छति यथा **मरुदेवी** स्वामिनी, तथा च तत्रैवोक्तम्–

''अहावरे चउत्थे अंतकिरियावत्थू-अप्पकम्मे पच्चयाए यावि भवति, समणाउसो से णं मुंडे भवित्ता अगाराओ अणगारियं पव्वए त्ति, उवट्ठिए णेयाउयस्स मग्गस्स संजमबहुले जाव सव्वदुक्खं खवे तवस्सी, तस्सणं तहप्पगारे तवे भवति तहप्पगारा चेव वेयणा भवति, से णं तहप्पगारे पुरिसजाए णिरुद्धेणं परियाएणं सिज्झइ जाव सव्वदुक्खाणं अतं करेति, जहा से मरुदेवी भगवति'' त्ति] [ ]

[पठन्ति च] 'अणंतकिरियं आराहणं आराहेइ'त्ति अविद्यमानाऽन्तक्रिया कर्मक्षयलक्षणा तद्भव एव यस्यां सा**ऽनन्तक्रिया तां** परम्परामुक्तिफलामित्यर्थः ॥१४॥

अर्हद्वन्दनादनु स्वाध्यायः कार्यः, स काले एव, तद्ज्ञानं च कालप्रत्युपेक्षणया स्यादिति तामाह–

कालपडिलेहणयाए णं भंते जीवे किं जणयइ ? कालपडिलेहणयाए णं णाणावरणिज्जं कम्मं खवेइ ॥१५॥

---

१. अत्र स्थाने मुद्रितप्रतमध्ये यः पाठोऽस्ति, सः पाठोऽशुद्धः खण्डितश्चैतादृशः–

अहावरे तच्चे अंतकिरिया वत्थू अप्पकम्मपच्चए यावि भवइ [जाव]नो तहप्पगारा वेयणा भवइ, से णं तहप्पगारे पुरिसज्जाए निरुद्धेणं परियाएणं सिज्झइ जाव सव्वदक्खाणं अंतं करेइ, जहा से मरुदेवी भगवई''त्ति एतत्पाठस्थाने [ ] कौंसद्वयवर्ती पाठ उत्त० बृहद्वृत्तितः पूरितः ॥ सम्पा०

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—हे भदन्त ! काले प्रतिलेखनया जीवः किं जनयति ? गुरुराह हे शिष्य ! **कालः** प्रादोषिकादिस्**तत्प्रत्युपेक्षणा**ऽऽगमविधिना यथावन्निरूपणा, ग्रहणप्रतिजागरणे, **तया ज्ञानावरणीयं कर्म क्षपयति** ॥१५॥

अकालपाठे प्रायश्चित्तं कार्यमिति तत्करणमाह—

पायच्छित्तकरणेणं भंते जीवे किं जणयइ ? पायच्छित्तकरणेणं पावकम्मविसोहिं जणयइ, निरईयारेयावि भवइ, सम्मं च पायच्छित्तं पडिवज्जमाणे मग्गं मग्गफलं च विसोहेइ, आयारं च आयारफलं आराहेइ ॥१६॥

व्याख्या—हे भदन्त ! प्रायश्चित्तकरणेन जीवः किं जनयति ? गुरुराह हे शिष्य ! प्रायश्चित्तं जीवं शोधयति, पापं छिनत्तीति वा प्रायश्चित्तं पापच्छिद्वा, तत्र **प्रायश्चित्त**मालोचनादि, **तस्य करणेन पापकर्मविशुद्धिं** निःपापतां **जीवो जनयति । निरतिचारश्चापि भवति,** उत्पद्यमानदोषत्यागात्, **सम्यक् प्रायश्चित्तं प्रतिपद्यमानो मार्गं** ज्ञानाप्तिहेतुसम्यक्त्वं **मार्गफलं च** ज्ञानं, दीपप्रकाशयोरिव युगपदुत्पत्तावपि, सम्यक्त्वस्य ज्ञानहेतुत्वात् **विशोधयति** निर्मलीकुरुते, **आचारं च** चारित्रं **आचारफलं** च **आराधयति,** यद्वा **मार्गं** चारित्राप्तिहेतोर्दर्शनज्ञानाख्यं, **तत्फलं** च चारित्रं, तत **आचारं च** ज्ञानाचारादि, **तत्फलं** च मोक्षमाराधयति । अथवा **मार्गं** च मुक्तिमार्गं क्षायोपशमिकं दर्शनादि, **तत्फलं** च तदेव प्रकर्षावस्थं क्षायिकदर्शनादि आराधयति ॥१६॥

प्रायश्चित्तं क्षामणायाः स्यादिति तामाह—

खमावणाए णं भंते जीवे किं जणयइ ? खमावणाए णं पल्हायणभावं जणयइ, पल्हायणभावगए य सव्वपाणभूयजीवसत्तेसु मित्तीभावं उप्पाएइ, मित्तीभावमुवगए यावि जीवे भावविसोहिं काऊण निब्भए भवइ ॥१७॥

व्याख्या—हे भदन्त ! क्षामणया जीवः किं जनयति ? गुरुराह **क्षामणया** जीवो दुःकृतादनु क्षन्तव्यमिदं ममेत्यादिना **प्रह्लादनभावं** चित्तप्रसत्तिं जनयति । **तद्गतश्च सर्वे प्राणा** द्वित्रिचतुरिन्द्रियाः, **भूतास्तरवः, जीवाः** पञ्चेन्द्रियाः, **सत्त्वाः** शेषजीवास्तेषु, यतः—

प्राणाद्वित्रिचतुः प्रोक्ता, भूताश्च तरवः स्मृताः ।
जीवाः पञ्चेन्द्रिया ज्ञेयाः, शेषाः सत्त्वा इतीरिताः ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मैत्रीभावा परिहितचिन्तामुत्पादयति, **तामुपगतश्च जीवो भावविशुद्धिं** रागद्वेषविगमं **कृत्वा निर्भय** इहपरलोकाद्यनेकभयविमुक्तो **भवति** ॥१७॥

एवं गुणाढ्येन स्वाध्याये यतितव्यमिति तमाह–

सज्झाएणं भंते जीवे किं जणयइ ? सज्झाएणं णाणावरणिज्जं कम्मं खवेइ ॥१८॥

व्याख्या–हे भदन्त ! स्वाध्यायेन जीवः किं जनयति ? गुरुराह हे शिष्य ! **स्वाध्यायेन** जीवो **ज्ञानावरणीयं कर्म** शेषं च कर्म **क्षपयति** । यतः–

कम्ममसंखिज्जभवं, खवेइ अणुसमयमेव आउत्तो ।
अन्नयरंमि वि जोए, सज्झायंमि विसेसेण ॥१॥ [य.च./गा.६] ॥१८॥

तत्रादौ वाचना कार्येति तामाह–

वायणाए भंते जीवे किं जणयइ ? वायणाए णं निज्जरं जणयइ, सुयस्स अणुसज्जयाए अणासायणाए वट्टइ, सुयस्स य अणुसज्जणयाए अणासायणाए वट्टमाणे तित्थधम्मं अवलंबइ, तित्थधम्मं अवलंबमाणे महाणिज्जरे महापज्जवसाणे भवइ ॥१९॥

व्याख्या–हे भदन्त ! वाचनया जीवः किं जनयति ? गुरुराह हे शिष्य ! **वाचना** पाठनं, **तया** जीवो **निर्जरां** कर्मपरिशाटं **जनयति,** तथैव **श्रुतस्याऽनाशातनायां** च वर्त्तते, तदकरणे ह्यवज्ञातः श्रुतमाशातितं भवेत् (पाठान्तरे–'**तं अणुसज्जणाए वट्टइ**'त्ति तत्रा**नुषञ्जनमनु**वर्त्तनं तत्र वर्त्तते) कोऽर्थः ? व्यवच्छेदं करोति, ततः **श्रुतस्याऽनाशातनायामनुषञ्जने वा वर्त्तमान**स्तीर्थं गणधरस्तस्य धर्ममाचारं श्रुतदानं **तीर्थधर्मं,** यद्वा **तीर्थं** श्रुतं **तद्धर्मं** च स्वाध्यायं **अवलम्बते** सेवते, **तमवलम्बमानश्चा**श्रयन् महती कर्मविषया निर्जराऽस्येति **महानिर्जरो,** महत्प्रशस्यं मुक्त्याप्त्या पर्यवसानमन्तः कर्मणो भवस्य वा यस्य स **महापर्यवसानश्च भवति** ॥१९॥

कृतवाचनः संशये पुनः पृच्छतीति पृच्छनामाह–

पडिपुच्छणाए णं भंते जीवे किं जणयइ ? पडिपुच्छणाए णं सुत्तत्थतदुभयाइं विसोहेइ, कंखामोहणिज्जं च कम्मं वोच्छिंदइ ॥२०॥

व्याख्या–हे भदन्त ! प्रतिपृच्छनया जीवः किं जनयति ? गुरुराह हे शिष्य ! प्रतिपृच्छनेति पूर्वं कथितस्य सूत्रादेः पुनः पृच्छनं **प्रतिपृच्छना, तया जीवः सूत्रार्थं**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तदुभयानि च **विशोधयति**, संशयादिमालिन्यहानेन विशुद्धानि कुरुते, **काङ्क्षा** इदमित्थं वा स्यादिति चिन्ता, सैव मोहयतीति **मोहनीयं कर्म** अनभिग्रहिकमिथ्यात्वरूपतां **छिनत्ति** ॥२०॥

विशोधितस्यापि सूत्रस्य कर्मक्षयाय परावर्त्तनामाह–

परियट्टणाए णं भंते जीवे किं जणयइ ? परियट्टणाए णं वंजणाइं जणयइ, वंजणलद्धिं च उप्पाएइ ॥२१॥

व्याख्या–हे पूज्य ! परावर्त्तनया जीवः किं जनयति ? गुरुराह हे शिष्य ! **परावर्त्तने**ति सिद्धान्तस्य गुणनं, **तया जीवो व्यञ्जनान्यक्षराणि जनयत्युत्पादयति**, तानि गलितान्यपि गुणयतस्तस्य झगित्युत्पतन्तीत्युत्पादितानि भवन्तीत्यर्थः, तथैव क्षयोपशमतो **व्यञ्जनलब्धिं** च पदानुसारितालक्षणां **उत्पादयति** ॥२१॥

सूत्रेऽर्थश्चिन्त्य इत्यनुप्रेक्षामाह–

अणुप्पेहाए णं भंते जीवे किं जणयइ ? अणुप्पेहाए णं आऊयवज्जाओ सत्तकम्मपयडीओ धणियबंधणबद्धाओ सिढिलबंधणबद्धाओ पकरेइ, दीहकालट्ठिईयाओ हस्सकालट्ठिईयाओ पकरेइ, तिव्वाणुभावाओ मंदाणुभावाओ पकरेइ, बहुप्पएसग्गाओ अप्पपएसग्गाओ पकरेइ, आऊयं च णं कम्मं सिय बंधइ, सिय णो बंधइ, असायावेयणिज्जं च कम्मं नो भुज्जो भुज्जो उवचिणइ, अणाईयं च णं अणवयग्गं दीहमद्धं चाउरंतसंसारकंतारं खिप्पामेव वीईवयइ ॥२२॥

व्याख्या–हे भदन्त ! अनुप्रेक्षया जीवः किं जनयति ? गुरुराह हे शिष्य ! **अनुप्रेक्षे**ति सूत्रार्थचिन्तनिका, **तया आयुर्वर्जाः सप्तकर्मप्रकृतीः**, 'धणियं'ति **बाढं बन्धनं** श्लेषणं, **तेन बद्धा** निकाचिता इत्यर्थः, **शिथिलबन्धनबद्धाः**, कोऽर्थः ? अपवर्त्तनादिकरणयोग्याः **प्रकरोति**, तपोभेदत्वादस्याः, तपसश्च निकाचितक्षपणेऽपि क्षमत्वात्, उक्तं च–"**तवसा उ निकाइयाणं च**" ताश्च **दीर्घकालस्थितिका ह्रस्वकालस्थितिकाः करोति**, शुभाध्यवसायवशात्, स्थितिखण्डकापहारेण, एतच्चैवं सर्वकर्मणां दीर्घस्थितेरशुभत्वात्, नृतिर्यक्देवायुषां तु न, यतः–

सुहअसुहाणं ठिईओ, असुहाओ संकिलेसओ जमई ।
हस्साओ विसोहीए, सुरनरतिरियाउए मोत्तुं ॥१॥ [ ]

अशुभप्रकृतयस्तीव्रानुभावाश्चतुःस्थानिकरसत्वे **मन्दानुभावाः**, त्रिस्थानिकरसत्वाद्यापादने ज्ञेयाः, शुभभावस्तु शुभाशुभतीव्रानुभावः स्यात्, क्वचिदिदं दृश्यते–'**बहुपएसग्गाओ**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अप्पपएसआउ पकरेइ' तत्र **बहुकर्मप्रदेशकाः** प्रकृतीरल्पप्रदेशकाः कुर्यादिति । आयुर्वर्जाः सप्तेत्युक्तिः शुभायुष एव संयतस्य सम्भवात्, न च शुभभावेन शुभप्रकृतीनां शिथिलतादि करणं, **आयुःकर्मस्याद्बध्नाति,** त्रिभागादिशेषायुष्कतायामेव तद्बन्धात्, तस्य च कादाचित्कत्वे विवक्षितत्वात्, कस्यचिन्मुक्तिप्राप्तेर्वा **असातवेदनीयं कर्म, चादन्याश्चाऽशुभ**प्रकृतीर्नो **नैव भूयो भूय उपचिनोति** बध्नाति, भूयोग्रहणं त्वन्यतमप्रमादतः प्रमत्तसंयतस्स तद्बन्धस्यापि सम्भवात् । (पाठान्तरे–**सायावेयणिज्जं च णं कम्मं भुज्जो भुज्जो उवचिणाइ) अनादिकं** आदेरभावात्, **चः** समुच्चयार्थे, अनवगच्छदग्रं परिमाणं यस्य, सदावस्थितानन्तपरिमाणवत्त्वेन, सोऽय**मनवदग्रो**ऽनन्त इत्यर्थः, **तं,** प्रवाहापेक्षं चैतत्, अत एव दीर्घोऽध्वा तत्परिभ्रमणहेतुकर्मरूपो मार्गो यस्मिंस्त**द्दीर्घाध्वं, मः** अलाक्षणिकः, दीर्घाध्वं दीर्घकालं वा, चत्वारश्चतुर्गतिलक्षणा अन्ता अवयवा यस्मिंस्त**च्चतुरन्तसंसारकान्तारं क्षिप्रमेव व्यतिव्रजते,** विशेषेणातिक्रामति मुक्तिं याति ॥२२॥

अभ्यस्तश्रुतेन च धर्मकथापि कार्येति तामाह–

धम्मकहाए णं भंते जीवे किं जणयइ ? धम्मकहाए णं पवयणं पहावेइ, पवयणपहावएणं जीवे आगमेसिस्सभद्दत्ताए कम्मं निबंधइ ॥२३॥

व्याख्या–हे भदन्त ! धर्मकथया जीवः किं जनयति ? गुरुराह हे शिष्य ! **धर्मकथया** व्याख्यानरूपया जीवः **प्रवचनं प्रभावयति** प्रकाशयति । (पाठान्तरे– **'णिज्जरं जणयइ'**–निर्जरां जनयति ।) आगमिष्यदित्यागामिकालभावि भद्रं यस्मिंस्तत्तथा तस्य भावस्य तयाऽ**गमिष्यद्भद्रतया,** यद्वा आगम **आगामिकालस्तस्मिन्, शश्वद्भद्रतयो**पलक्षितं **कर्म बध्नाति शुभानुबन्धि** ॥२३॥

इत्थं पञ्चधा स्वाध्यायरतेन श्रुतमाराधितं स्यात्तत्तदाराधनोच्यते–

सुयस्स आराहणयाए णं भंते जीवे किं जणयइ ? सुयस्स आराहणयाए णं अण्णाणं खवेइ, न य संकिलिस्सइ ॥२४॥

व्याख्या–हे भदन्त ! श्रुतस्याराधनया जीवः किं जनयति ? गुरुराह हे शिष्य ! **श्रुतस्याराधनया** सम्यगासेवनयाऽज्ञानं जीवः **क्षपयति, न च सङ्क्लिश्यते,** रागादिजनितसङ्क्लेशाऽभावात्, तद्वशतो नवनवसंवेगाऽवाप्तेः, यतः–

> **जह जह सुयमवगाहइ, अइसयरसपसरसंजुयमपुव्वं ।**
> **तह तह पल्हाअइ मुणी, नवनवसंवेगसद्धाए ॥१॥ [प.व./गा.५६०] ॥२४॥**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सा चैकाग्रमनःसन्निवेशनादेव भवत्यतस्तामाह–

एगग्गमणसंणिवेसणयाए णं भंते जीवे किं जणयइ ? एगग्गमण-संणिवेसणयाए णं चित्तनिरोहं करेइ ॥२५॥

व्याख्या–हे भदन्त ! **एकाग्रमनःसन्निवेशनया जीवः किं जनयति** ? गुरुराह हे शिष्य ! एकमग्रं शुभमालम्बनमस्येत्येकाग्रं, तच्च तन्मनश्च, तस्य सन्निवेशना स्थापना, तया **एकाग्रमनःसन्निवेशनया चित्तनिरोधं,** चित्तस्येतस्तत उन्मार्गितस्य नियन्त्रणं चित्तनिरोधं **जनयति** ॥२५॥

एकाग्रस्यापि संयमादेवेष्टफलाप्तिरिति तमाह–

संजमेणं भंते जीवे किं जणयइ, संजमेणं अणण्हत्तं जणयइ ॥२६॥

व्याख्या–हे भदन्त ! संयमेन जीवः किं जनयति ? गुरुराह हे शिष्य ! **संयमेन** पञ्चाश्रवविरत्या 'अणण्हय'त्ति **अनन्हस्कत्वं** अविद्यमानबद्ध्यमानकर्मत्वं **करोति** ॥२६॥

संयमिनोऽपि न तपो विना कर्मक्षय इति तदाह–

तवेणं भंते किं जणयइ ? तवेणं वोयाणं जणयइ ॥२७॥

व्याख्या–हे भदन्त ! तपसा जीवः किं जनयति ? गुरुराह हे शिष्य ! **तपसा** जीवो **व्यवदानं** पूर्वबद्धकर्मक्षयतो विशिष्टां शुद्धिं **जनयति** ॥२७॥

व्यवदानस्यैव फलमाह–

वोयाणेणं भंते जीवे किं जणयइ ? वोयाणेणं अकिरियं जणयइ, अकिरियाए भवित्ता तओ पच्छा सिज्झइ बुज्झइ मुच्चइ परिनिव्वाइ सव्वदुक्खाणमंतं करेइ ॥२८॥

व्याख्या–हे भदन्त ! व्यवदानेन जीवः किं जनयति ? गुरुराह हे शिष्य ! **व्यवदानेन** जीवोऽक्रियं व्युपरतक्रियाख्यं शुक्लध्यानतुर्यभेदं **जनयति, अक्रियाको भूत्वा सिद्ध्यति** निष्ठितार्थो भवति, **बुद्ध्यते** ज्ञानदर्शनाभ्यां वस्तुतत्वं, **मुच्यते** संसारात्, अत एव **परिनिर्वाति** कर्माग्निं निर्वाप्य शीतलो भवति, **सर्वदुःखानां चान्तं करोति** ॥२८॥

व्यवदानं सुखशायितायामेवातस्तामाह–

सुहसायाए णं भंते जीवे किं जणयइ ? सुहसायाए णं अणुस्सुयत्तं जणयइ, अणुस्सुए णं जीवे अणुकंपे अणुब्भडे विगयसोगे चरित्तमोह-णिज्जं कम्मं खवेइ ॥२९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—हे भदन्त ! सुखशायितया जीवः किं जनयति ? गुरुराह हे शिष्य ! सुखशायितयेति सुखं शेते प्रवचन १ परलाभ २ कामभोग ३ देहसम्बन्ध ४ स्पृहाख्यास्वशुभभावरूपासु चतसृषु सुखशय्यासु स्थितत्वेन मनःखेदाऽभावान्निराकुलतयास्ते इति सुखशायः, तद्भावः **सुखशायिता,** प्राकृतत्वात् सूत्रे यलोपः, **तयाऽनुत्सुकत्वं** परलाभदिव्यनृकामभोगनिःस्पृहत्वमित्यर्थः । यद्वा **सुखस्य** वैषयिकस्य **शातस्तद्गतस्पृहानिवारणेनापयनयनं, तेन अनुत्सुकत्वं** विषयेषु निस्पृहत्वं, अनु सह कम्पते **इत्यनुकम्पकः,** सुखोत्सुको हि म्रियमाणमपि परं दृष्ट्वा स्वसुखरसिक एव स्यात् , अयं तु दुःखितं परं दृष्ट्वा तदुःखदुःखितया स्वयमपि कम्पते, **अनुद्भटोऽनुल्बणो विगतशोको,** नैहिकार्थभ्रंशेऽपि शोचते, मुक्तिबद्धस्पृहत्वात् , एवं प्रकृष्टाध्यवसायत**श्चारित्रमोहनीयं कर्म क्षपयति** ॥२९॥

सुखशय्यास्थितस्याऽप्रतिबद्धता स्यात् , इति तामाह—

अप्पडिबद्धयाए णं भंते जीवे किं जणयइ ? अप्पडिबद्धयाए णं निस्संगत्तं जणयइ, निस्संगत्तेणं जीवे एगे एगग्गचित्ते दिया वा राउ वा असज्जमाणो अप्पडिबद्धयाए वि विहरइ ॥३०॥

व्याख्या—हे भदन्त ! अप्रतिबद्धतया जीवः किं जनयति ? गुरुराह हे शिष्य ! **अप्रतिबद्धतया** निरभिष्वङ्गतया जीवो **निःसङ्गत्वं** बहिःसङ्गाऽभावं **जनयति** ? **तेन** च स **जीव एको**ऽराग **एकाग्रचित्तो** धर्मैकतानमना **दिवसे वा रात्रौ वा असजन्** बहिःसङ्गं त्यजन् **अप्रतिबद्धतया विहरति** । विशेषतोऽप्रतिबद्धो मासकल्पाद्युद्यतविहारेण पर्यटति ॥३०॥

अप्रतिबद्धता विविक्तशयनासनतायां स्यादतस्तामाह—

विवित्तसयणासणसेवणयाए णं भंते जीवे किं जणयइ ? विवित्तसयणासणसेवणयाए चरित्तगुत्तिं जणयइ, चरित्तगुत्ते य णं जीवे विवित्ताहारे दढचरित्ते एगंतरए मोक्खे भावपडिवण्णे अट्ठविहकम्मगंठिं निज्जरेइ ॥३१॥

व्याख्या—हे भदन्त ! विविक्तशयनासनसेवनया जीवः किं जनयति ? गुरुराह हे शिष्य ! विविक्तानि स्त्याद्यसंसक्तानि शयनासनानि उपाश्रयश्च यस्य स विविक्तशयनासनस्तस्य भावो **विविक्तशयनासनता, तया जीवश्चरणगुप्तिं** चरणरक्षां **जनयति** व्यत्ययाद् **गुप्तचरित्रश्च विविक्तो** विकृत्यादिबृंहकवस्तुरहित **आहारो** यस्य सः, गुप्तचरित्रो हि सर्वत्र निस्पृह एव स्यात् , **दृढचरित्रः, एकान्तेन रतः** संयमे, **मोक्षे भावेनान्तःकरणेन प्रतिपन्न**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आश्रितो, मोक्ष एव मया साध्य इत्याशयी, **अष्टविधकर्मणां** ग्रन्थिरिव **ग्रन्थिर्दुर्भेदतया, तं निर्जरयति,** क्षपकश्रेणिप्रतिपत्त्या क्षपयति ॥३१॥

विविक्तशयनासनतायां विनिवर्त्तना स्यादिति तामाह–

विणिवट्टणयाए णं भंते जीवे किं जणयइ ? विणिवट्टणयाए णं पावकम्माणं अकरणयाए अब्भुट्ठेइ, पुव्वबद्धाण य निज्जरणया तं नियत्तेइ, तओ पच्छा चाउरंतं संसारकंतारं वीईवयइ ॥३२॥

व्याख्या–हे भदन्त ! विनिवर्त्तनया जीवः किं जनयति ? गुरुराह हे शिष्य ! **विनिवर्त्तनया** विषयेभ्य आत्मनः पराङ्मुखीकरणेन **पापकर्मणां** सावद्यानुष्ठानानां **अकरणतया,** न मया पापानि कार्याणि इत्य**भ्युत्तिष्ठते,** धर्मं प्रत्युत्सहते, यद्वा मोक्षायाऽभ्युत्तिष्ठते, **पूर्वबद्धानां निर्जरणया,** नवानां च अनादानेन **तत्पा**पकर्म **निवर्त्तयति** क्षपयति, **ततश्च पश्चाच्चातुरन्त-संसारकान्तारं** व्यतिव्रजति व्युत्क्रामतीत्यर्थः ॥३२॥

विषयनिवृत्तश्च कोऽपि सम्भोगप्रत्याख्यानवान् स्यादिति तदाह–

संभोगपच्चक्खाणेणं भंते जीवे किं जणयइ ? संभोगपच्च-क्खाणेणं आलंबणाइं खवेइ, निरालंबणस्स य आयतट्ठिया जोगा भवंति, सएणं लाभेणं संतुस्सइ, परलाभं नो आसाएइ, नो तक्केइ, नो पीहेइ, नो पत्थेइ, नो अहिलसइ, परस्स लाभं अणासाएमाणे अतक्केमाणे अपीहेमाणे अपत्थेमाणे अणभिलसमाणे दोच्चं सुहसेज्जं उवसंपज्जित्ताणं विहरइ ॥३३॥

व्याख्या–हे भदन्त ! सम्भोगप्रत्याख्यानेन जीवः किं जनयति ? गुरुराह हे शिष्य ! सङ्घरेण स्वान्यलाभमिलनेन भोगः **सम्भोगः,** एकमण्डलीभोक्तृत्वं, **तस्य प्रत्याख्यानं,** गीतार्थत्वे जिनकल्पाद्युद्यतविहारप्रतिपत्त्या परिहारस्**तेनालम्बनानि** ग्लानतादीनि **क्षपयति** तिरस्कुरुते । सदोद्यतत्वेन वीर्याचारमेवालम्बते, तस्य **आततार्थिका** मोक्षप्रयोजना **योगा** व्यापारा **भवन्ति, स्वकेन लाभेन** स **सन्तुष्यति, परस्य लाभं नास्वादयति** न वाञ्छयति, **न तर्कयति** मनसा न विकल्पयति, **न स्पृहयति, न प्रार्थयति, नाभिलषति,** तत्र तर्कणं मनसा यदिदं मह्यमसौ ददातीति विकल्पनं, स्पृहणं तत् श्रद्धालुतयाऽऽत्मन आविःकरणं, प्रार्थनं वाचा मह्यं देहीति याचनं, अभिलषणं तल्लालसतया वाञ्छनं, एकार्थिकान्येतानि नानादेशविनेयानुग्रहायोपात्तानि, **परस्य लाभम**नाशयमान आशाविषय-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मकुर्वाणोऽनास्वादयन् वाऽभुञ्जानोऽतर्कयन्नऽस्पृहयन्नऽप्रार्थयमानोऽनभिलषन्, 'दोच्चं'ति **द्वितीयां सुखशय्यामुपसम्पद्य विहरति,** एवंविधरूपत्वात्त्वस्य, यतः स्थानाङ्गे– **"अहावरे दोच्चा सुहसेज्जा, से णं मुंडे भवित्ता अगाराओ अणगारियं पव्वइओ समणो सएणं लाभेणं संतूसइ, परस्स लाभं न आसाएइ, नो तक्के"** इत्यादि ॥३३॥

सम्भोगप्रत्याख्यानिन उपधिप्रत्याख्यानं स्यादित्येतदाह–

उवहिपच्चक्खाणेणं भंते जीवे किं जणयइ ? उवहिपच्चक्खाणेणं अपलिमंथं जणयइ, निरुवहिएणं जीवे निक्कंखे उवहिमंतरेण य न संकिलिस्सइ ॥३४॥

व्याख्या–हे भदन्त ! उपधिप्रत्याख्यानेन जीवः किं जनयति ? गुरुराह हे शिष्य ! **उपधिप्रत्याख्यानेने**ति, उपधे रजोहरणमुखवस्त्रिकावर्जोपकरणस्य प्रत्याख्यानेन, परिमन्थः स्वाध्यायादिक्षतिः, तदभावोऽ**परिमन्थस्तं करोति । निरुपधिको जीवो निःकाङ्क्षो** वस्त्रादीच्छारहितः सन् [उपधिमन्तरेण] **न च सङ्क्लिष्यति** । उक्तं हि– **"तस्स णं भिक्खुस्स णो एवं भवइ, परिजुन्ने मे वत्थे, सूइं जाइस्सामि सन्धिस्सामि"** इत्यादि ॥३४॥

उपधिप्रत्याख्यातुर्जिनकल्पिकादेरेषणीयाऽलाभे बहूपवासाः स्युरत आहारप्रत्याख्यानमाह–

आहारपच्चक्खाणेणं भंते जीवे किं जणयइ ? आहारपच्चक्खाणेणं जीवियासंसप्पओगं वोच्छिंदइ, जीवियासंसप्पओगं वोच्छिंदित्ता जीवे आहारमंतरेण न संकिलिस्सइ ॥३५॥

व्याख्या–हे भदन्त ! आहारप्रत्याख्यानेन जीवः किं जनयति ? गुरुराह हे शिष्य ? **आहारप्रत्याख्यानेना**ऽनेषणीयभक्तपानत्यागेन, **जीविते आशंसा** अभिलाषस्तस्याः **प्रयोगः** करणं **तं,** [पठन्ति च] **'जीवियासविप्पओगं' जीविताशाया विप्रयोगं** विविधव्यापारं वा **व्युच्छिनत्ति, तं व्युच्छिद्य जीव आहारमन्तरेण न सङ्क्लेशयति,** विकृष्टतपोऽनुष्ठानेऽपि न बाधामनुभवति ॥३५॥

एतत्प्रत्याख्यानत्रयं कषायाऽभावे फलवदिति तत्प्रत्याख्यानमाह–

कसायपच्चक्खाणेणं भंते जीवे किं जणयइ ? कसायपच्चक्खाणेणं वीयरागभावं जणयइ, वीयरागभावं पडिवण्णे य णं जीवे समसुहदुक्खे भवइ ॥३६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—हे भदन्त ! कषायप्रत्याख्यानेन जीवः किं जनयति ? गुरुराह हे शिष्य ! **कषायप्रत्याख्यानेन** क्रोधमानमायालोभत्यागेन जीवो **वीतरागभावं जनयति, प्रतिपन्नवीतरागभावश्च जीवः समसुखदुःखो भवति** ॥३६॥

निःकषायोऽपि योगप्रत्याख्यानादेव मुक्तिसाधक इति तदाह—

जोगपच्चक्खाणेणं भंते जीवे किं जणयइ ? जोगपच्चक्खाणेणं अजोगत्तं जणयइ, अजोगीणं जीवे नवं कम्मं न बंधइ, पुव्वबद्धं निज्जरेइ ॥३७॥

व्याख्या—हे भदन्त ! योगप्रत्याख्यानेन जीवः किं जनयति ? गुरुराह हे शिष्य ! **योगा** मनोवाक्कायव्यापाराः, **तत्प्रत्याख्यानेन** तन्निरोधेनाऽयोगित्वं शैलेशीत्वं जीवो **जनयति, अयोगो जीवश्च नवं कर्म न बध्नाति, पूर्वबद्धं** भवोपग्राहिककर्म चतुष्कं च **निर्जरयति** क्षपयति ॥३७॥

योगप्रत्याख्याने शरीरं प्रत्याख्यातमेव, तथापि तदाधारत्वान्मनोवाग्योगयोः, अतः शरीरप्राधान्यज्ञप्त्यै तत्प्रत्याख्यानमाह—

सरीरपच्चक्खाणेणं भंते जीवे किं जणयइ ? सरीरपच्चक्खाणेणं सिद्धाइसयगुणत्तं निव्वत्तेइ, सिद्धाइसयगुणत्तसंपन्ने य णं जीवे लोगग्ग-मुवगए परमसुही भवइ ॥३८॥

व्याख्या—हे भदन्त ! शरीरप्रत्याख्यानेन जीवः किं जनयति ? गुरुराह हे शिष्य ! **शरीरप्रत्याख्यानेन** देहव्युत्सर्जनेन जीवः **सिद्धातिशयगुणत्वं निर्वर्त्तयति**, कोऽर्थः ? सिद्धानां येऽतिशयगुणाः सर्वोत्कृष्टगुणास्तेषां भावः सिद्धातिशयगुणत्वं 'न कृष्णो न नीलः' इत्यादिगुणत्वं निर्वर्त्तयति जनयति । **सिद्धातिशयगुणत्वसम्पन्नश्च जीवो लोकाग्रं** मुक्ति-पदमुपगतः सन् **परमसुखी भवति** ॥३८॥

सम्भोगादिप्रत्याख्यानानि प्रायः सहायप्रत्याख्यान एव सुकराणि स्युरिति तदुच्यते—

सहायपच्चक्खाणेणं भंते जीवे किं जणयइ ? सहायपच्चक्खाणेणं एगीभावं जणयइ, एगीभावं भूएणं जीवे एगग्गं भावेमाणे अप्पसद्दे अप्पझंझे अप्पकलहे अप्पकसाए अप्पतुमंतुमे संजमबहुले संवरबहुले समाहिए यावि भवइ ॥३९॥

व्याख्या—हे भदन्त ! सहायप्रत्याख्यानेन जीवः किं जनयति ? गुरुराह हे शिष्य ! **सहायाः** साहाय्यकारिणो यतयः, **तत्प्रत्याख्यानेन** योग्यभाविनाऽभिग्रहविशेषेण

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एकीभावमेकत्वं **जनयति, एकीभावभूत**श्चैकत्वप्राप्तश्च **जीव एकाग्र्यं** एकालम्बनत्वं **भावयन्न**ऽभ्यस्यन् **अल्पशब्दो**ऽशब्द इत्यर्थः, **अल्पझञ्झो**ऽल्पवाक्कलहः, **अल्पकलहः**, अरोषः, **अल्पकषायो**ऽविद्यमानकषायो, **अल्पम**विद्यमानत्वमिति स्वल्पापराधिन्यपि **त्वमेव सदा करोषी**त्यादि पुनः पुनः प्रलपनं न करोति । पुनः साहाय्यप्रत्याख्यानेन **संयमबहुलो** भवति, **संवरबहुलो** भवति, **समाधिबहुलो** भवति, **समाहितो** ज्ञानादि-समाधिमांश्च **भवति** ॥३९॥

इदक्षान्ते भक्तप्रत्याख्याता स्यादिति तत्प्रत्याख्यानमाह–

भत्तपच्चक्खाणेणं भंते जीवे किं जणयइ ? भत्तपच्चक्खाणेणं अणेगाइं भवसयाइं निरुंभइ ॥४०॥

व्याख्या–हे भदन्त ! भक्तप्रत्याख्यानेन जीवः किं जनयति ? गुरुराह हे शिष्य ! **भक्तप्रत्याख्यानेन** भक्तपरिज्ञादिनाऽनेकानि **भवशतानि निरुणद्धि,** शुद्धदृढाध्यवसायेन संसाराऽल्पत्वाऽापादनात् ॥४०॥

सर्वप्रत्याख्यानश्रेष्ठा शैलेशी, तां सद्भावप्रत्याख्यानमाह–

सब्भावपच्चक्खाणेणं भंते जीवे किं जणयइ ? सब्भावपच्चक्खाणेणं अनियट्टिं जणयइ, अनियट्टिपडिवन्ने य अणगारे चत्तारि केवलिकंमंसे खवेइ, तंजहा–वेयणिज्जं आउयं नामं गोत्तं तओ पच्छा सिज्झइ बुज्झइ मुच्चइ परिनिव्वाइ सव्वदुक्खाणमंतं करेइ ॥४१॥

व्याख्या–हे भदन्त ! सद्भावप्रत्याख्यानेन जीवः किं जनयति ? गुरुराह हे शिष्य ! सद्भावेन सर्वथा पुनःकरणाऽसम्भवात् परमार्थेन प्रत्याख्यानं **सद्भावप्रत्याख्यानं** सर्वसंवररूपं शैलेशीत्यर्थः, न विद्यते निवृत्तिर्मुक्तिमप्राप्य निवर्त्तनं यस्मिंस्तद**निवृत्तिरूपं** शुक्लध्यानतुर्यभेदं **जनयति** । (पाठान्तरे तु-**निवृत्तिं** द्विसमयस्थितिकस्यापि वेद्यकर्मणो बन्धव्यावृत्तिं) **प्रतिपन्नाऽनिवृत्तिकश्च** (पाठान्तरे तु-**प्रतिपन्नाऽनिवृत्तश्च**) **अनगारश्चत्वारि** केवलिनो, अंशशब्दस्य सत्पर्यायत्वात्सत्कर्माणि **केवलिसत्कर्माणि** भवोपग्राहीणि **क्षपयति,** तद्यथा–**वेदनीय**कर्म १ **आयुः**कर्म २ **नाम**कर्म ३ **गोत्र**कर्म ४ च । एतेषां चतुर्णामपि कर्मणां क्षयं कृत्वा **ततः पश्चात् सिद्ध्यति** सकलार्थं साधयति, **बुद्ध्यति** ज्ञाततत्त्वो भवति, **मुच्यते** कर्मभ्यः, **परिनिर्वाति** सम्मतात् कर्मसन्तापाऽभावाच्छीतलो भवति, **सर्वदुःखानां चान्तं करोति** ॥४१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

शैलेशी प्रायः प्रतिरूपतायां स्थविरकल्पे एव स्यादिति तामाह—

पडिरूवयाए णं भंते जीवे किं जणयइ ? पडिरूवयाए णं लाघवियं जणयइ, लहुब्भूएणं जीवे अप्पमत्ते पागडलिंगे पसत्थलिंगे विसुद्धसम्मत्ते सत्तसमिइसमत्ते सव्वपाणभूयजीवसत्तेसु विससणिज्जरूवे अप्पडिलेहे जिइंदिए विउलतवसमिइसमणागये यावि भवइ ॥४२॥

व्याख्या—हे भदन्त ! प्रतिरूपतया जीवः किं जनयति ? गुरुराह हे शिष्य ! प्रतिसादृश्ये, ततः प्रतीति स्थविरकल्पिकादिसदृशं रूपं वेषो यस्य स प्रतिरूपः, तद्भावः **प्रतिरूपता, तयाऽधिकोपकरणत्यागेन** जीवो लाघवमस्यास्तीति लाघवी, तद्भावो **लाघविता,** तान् द्रव्यतः स्वल्पोपकरणत्वेन, भावतस्त्वप्रतिबद्धतया **जनयति, लघूभूतश्च जीवोऽप्रमत्तस्तथा प्रकट-लिङ्गः** स्थविरकल्पादिवेषेण व्रतीति ज्ञायमानत्वात् **प्रशस्तलिङ्गो** जीवरक्षणहेतुरजोहरणादिवान्, **विशुद्धसम्यक्त्वः** क्रियया सम्यक्त्वविशोधनात्, सत्त्वं समितयश्च समाप्ताः परिपूर्णा यस्य स **समाप्तसत्त्वसमितिः,** तत एव **सर्वप्राणभूतजीवसत्त्वेषु विश्वसनीयरूपस्तत्पीडा-परिहारत्वात्, अल्पप्रत्युपेक्षोऽल्पोपधित्वात्, जितेन्द्रियः,** विपुलेन नैकभेदेन तपसा समितिभिश्च सर्वविषयत्वेन विपुलाभिः समन्वागतो युक्तो **विपुलतपःसमितिसमन्वागतश्चापि भवति,** पूर्वत्र समितीनां सामस्त्यमुक्तं, इह तु सार्वत्रिकत्वमिति न पौनरुक्त्यम् ॥४२॥

प्रतिरूपताया वैयावृत्त्यादेव विशिष्टफलाप्तिरिति तदाह—

वेयावच्चेणं भंते जीवे किं जणयइ ? वेयावच्चेणं तित्थयरनामगोत्तं कम्मं निबंधइ ॥४३॥

व्याख्या—हे भदन्त ! वैयावृत्त्येन जीवः किं जनयति ? गुरुराह हे शिष्य ! **वैयावृत्त्येन** जीवस्**तीर्थंकरनामगोत्रं कर्म निबध्नाति,** कुलादिकार्येषु व्यापारवान् व्यावृत्तस्तद्भावो वैयावृत्त्यम् ॥४३॥

वैयावृत्त्यवान् सर्वगुणभाक् स्यादिति सर्वगुणसम्पन्नतामाह—

सव्वगुणसंपन्नयाए णं भंते जीवे किं जणयइ ? सव्वगुणसंपन्नयाए णं अपुणरावत्तिं जणयइ, अपुणरावत्तिपत्तए णं जीवो सारीर-माणुसाणं दुक्खाणं णो भागी भवइ ॥४४॥

व्याख्या—हे भदन्त ! सर्वगुणसम्पन्नतया जीवः किं जनयति ? गुरुराह हे शिष्य ! **सर्वे गुणा** ज्ञानाद्यास्तत्**सम्पन्नतया जीवोऽपुनरावृत्तिं** [पुनरिहागमनाभावो मुक्ति-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

रिति यावत्तां जनयति, अपुनरावृत्ति] मुक्तिं प्राप्त एव **प्राप्तकः** सन् **शारीराणां** रोगादीनां, **मानसानां** क्लेशादीनां **दुःखानां भागी** प्रापको **न स्यात्** ॥४४॥

सर्वगुणसम्पन्नता नीरागद्वेषतया स्यादिति तामाह–

वीयरागयाए णं भंते जीवे किं जणयइ ? वीयरायया ए णं णेहाणुबंधणाणि य तण्हाणुबंधणाणि य वुच्छिंदइ, मणुण्णेसु सद्दफरिसरूवरसगंधेसु चेव विरज्जइ ॥४५॥

व्याख्या–हे भदन्त ! वीतरागतया जीवः किं जनयति ? गुरुराह हे शिष्य ! **वीतरागतया** रागद्वेषाऽभावतो जीवः **स्नेहस्य बन्धनानि, स्नेहमेव बन्धनानि** वा, **स्नेहः** पुत्रादिषु, **तृष्णा**द्रव्यादिषु, ते एवानुगतानि बन्धनानि **अनुबन्धनानि, तानि व्यवच्छिनत्ति,** ततो **मनोज्ञेषु शब्दादिषु** सचित्ताऽचित्तेषु, गन्धेषु **चैव विरज्यति,** कषायप्रत्याख्यानेनैव गतार्थत्वेऽपि रागस्यैव सकलाऽनर्थमूलत्वज्ञप्त्यै वीतरागतायाः पृथगादानम् ॥४५॥

वीतरागतायां तात्त्विकाः श्रमणगुणास्तेषां चाद्यव्रतपालनाय क्षान्तिराद्येति तामाह–

खंतीए णं भंते जीवे किं जणयइ ? खंतीए णं परीसहे जिणेइ ॥४६॥

व्याख्या–हे भदन्त ! क्षान्त्या जीवः किं जनयति ? गुरुराह हे शिष्य ! **क्षान्त्या** जीवः **परीषहान्** वधबन्धनादीन् **जयति** ॥४६॥

क्षान्तिस्थेनापि मुक्तिं विनाऽन्यव्रतानि दुःपाल्यानीति तामाह–

मुत्तीए णं भंते जीवे किं जणयइ ? मुत्तीए णं अकिंचणं जणयइ, अकिंचणेण य अत्थलोलाणं पुरिसाणं अपत्थणिज्जे भवइ ॥४७॥

व्याख्या–हे भदन्त ! मुक्त्या जीवः किं जनयति ? गुरुराह हे शिष्य ! **मुक्त्या** निर्लोभतयाऽ**किञ्चनं** निःपरिग्रहत्वं जीवो **जनयति, अकिञ्चनेन चाऽर्थलोलाश्चौराद्यास्तेषामप्रार्थनीयः** प्रार्थयितुमनभिलष्यः **स्यात्** ॥४७॥

लोभाद्विनाऽभाविनी मायेति तदभावे चार्जवत्वं स्यादतस्तदाह–

अज्जवयाए णं भंते जीवे किं जणयइ ? अज्जवयाए णं कायज्जुययं भावुज्जुययं भासुज्जुययं अविसंवायणं च जणयइ, अविसंवादणसंपण्णएणं जीवे धम्मस्स आराहए भवइ ॥४८॥

व्याख्या–हे भदन्त ! आर्जवेन जीवः किं जनयति ? गुरुराह हे शिष्य ! सूत्रत्वादार्जवेन **कायर्जुकतां** कुब्जादि चेष्टनभ्रूविकाराद्याकृतेः प्राञ्जलतां, **भावर्जुकतां** चित्त-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सरलतां, यदन्यद्विचिन्तयन् लोकभक्तिरञ्जनादिनिमित्तं नान्यद्भाषते करोति वा, **भाषर्जुकतां** यदुपहासादिहेतोरन्यदेशभाषया अभाषणं तां, तथाऽ**विसंवादनं** पराऽविप्रतारणं जीवो जनयति, **अविसंवादनसम्पन्नतया** कायर्जुकतादिना च **जीवो धर्मस्याराधकः स्यात्**, विशुद्धाशयत्वाद्भवान्तरेऽपि धर्माप्तेः ॥४८॥

सगुणस्यापि विनयं विना न सर्वफलाप्तिः, स मार्दवादिति तदाह—

मद्दवयाए णं भंते जीवे किं जणयइ ? मद्दवयाए णं अणुसियत्तं जीवे जणइ, अणुसियत्तेणं जीवेणं मिउमद्दवसंपण्णे अट्ठमयट्ठाणाइं निट्ठवेइ ॥४९॥

व्याख्या—हे भदन्त ! मार्द्दवेन जीवः किं जनयति ? गुरुराह हे शिष्य ! मार्द्दवेन मानपरिहारेणाभ्यस्यमानेन, द्रव्यतो मृदुः, भावतश्चावनमनशीलः, तस्य भावो **मार्द्दवं** सौकुमार्यं, **तेन जीवोऽनुत्सेकत्वमनुद्धतत्वं** जनयति, अनुत्सुकत्वेन च जीवो **मृदुगुणेन मार्दवेन च सम्पन्नः** सन्**नष्टमदस्थानानि निष्ठापयति** क्षपयति ॥४९॥

मार्द्दवं सत्यस्थस्यैव स्यात्, तत्रापि भावसत्यं प्रधानमिति तदाह—

भावसच्चेणं भंते जीवे किं जणयइ ? भावसच्चेणं भावविसोहिं जणयइ, भावविसोहिए वट्टमाणे जीवे अरहंतपण्णत्तस्स धम्मस्स आराहणयाए अब्भुट्ठेइ, अब्भुट्टित्ता परलोगधम्मस्स आराहए भवइ ॥५०॥

व्याख्या—हे भदन्त ! भावसत्येन जीवः किं जनयति ? गुरुराह हे शिष्य ! **भावसत्ये**न शुद्धान्तरात्मना पारमार्थिकाऽवितथत्वेन **भावविशुद्धिं** विशुद्धाध्यवसायं ज्ञानं **जनयति, भावविशुद्ध्या वर्द्धमानो जीवोऽर्हत्प्रज्ञप्तस्य धर्मस्याराधनायां** आराध्यतयाऽनुष्ठानेनाऽ**भ्युत्तिष्ठते,** मुक्त्यर्थमुत्सहते, **अभ्युत्थाय** च **परलोके** भवान्तरे **धर्मस्य** (पाठान्तरे-**परलोकस्य**) **आराधको भवति,** प्रेत्ये जिनधर्माप्त्या विशिष्टभावाप्तेः ॥५०॥

भावसत्ये च करणसत्यं स्यादिति तदाह—

करणसच्चेणं भंते जीवे किं जणयइ ? करणसच्चेणं करणसत्तिं जणयइ, करणसच्चे वट्टमाणो जीवो जहावाई तहाकारी यावि हवइ ॥५१॥

व्याख्या—हे भदन्त ! करणसत्येन जीवः किं जनयति ? गुरुराह हे शिष्य ! करणे प्रतिलेखनादिक्रियायां सत्यं यथोक्तविधिनाऽराधनं करणसत्यं, तेन **करणसत्येन** जीवः **करणशक्तिं** क्रियासामर्थ्यं **जनयति, करणसत्ये** च **वर्त्तमानो जीवः** सूत्रार्थमधीयानो यथैव क्रियाकलापवदनशीलो **यथावादी,** तथैव करणशीलस्**तथाकारी चापि भवति** ॥५१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

करणसत्ये योगसत्यमपि स्यादिति तदाह–

जोगसच्चेणं भंते जीवे किं जणयइ ? जोगसच्चेणं जोगं विसोहेइ ॥५२॥

व्याख्या–हे भदन्त ! योगसत्येन जीवः किं जनयति ? गुरुराह हे शिष्य ! **योगसत्येन, योगा** मनोवाक्कायास्तान् **विशोधयति,** क्लिष्टकर्मबन्धकत्वाऽभावान्निर्दोषान् करोति ॥५२॥

योगशुद्धिर्गुप्त्यान्वितस्य मनःसंवरणात् स्यादिति ता आह–

मणगुत्तयाए णं भंते जीवे किं जणयइ ? मणगुत्तयाए णं जीवे एगग्गं जणयइ, एगग्गचित्तेणं जीवे मणगुत्ते संजमाराहए भवइ ॥५३॥

व्याख्या–हे भदन्त ! मनोगुप्ततया जीवः किं जनयति ? गुरुराह हे शिष्य ! **मनोगुप्ततया** मनोगुप्त्या मनःसंवरेण **जीव एकाग्र्यं** धर्मैकतानचित्तत्वं **जनयति, एकाग्रचित्तेन** च **जीवो गुप्तमना** गुप्तमशुभाऽध्यवसायेषु गच्छद्रक्षितं मनो येनासौ गुप्तमनाः **संयमाराधको भवति** ॥५३॥

अथ वचोगुप्तिमाह–

वयगुत्तयाए णं भंते जीवे किं जणयइ ? वयगुत्तयाए णं निव्विकारत्तं जणयइ, निव्विकारे णं जीवे वयगुत्ते अज्झप्पजोगसाहणगुत्ते यावि हवइ ॥५४॥

व्याख्या–हे भदन्त ! वाग्गुप्ततया जीवः किं जनयति ? गुरुराह हे शिष्य ! **वाग्गुप्ततया** कुशलवागुदीरणरूपया **निर्विकारं** विकथाद्यात्मकवाग्विकाराभावं **जनयति, निर्विकारे** च सति, **णं** अलङ्कारे, **जीवो वाग्गुप्तः** सन् सर्वथा वाग्निरोधेन वाग्गुप्ति-समन्वितोऽध्यात्मं मनस्तस्य **योगा** धर्मध्यानाद्यास्तेषां **साधनान्ये**काग्रतादीनि, **तैर्युक्तश्चापि भवति** (पाठान्तरे-**निव्वियारेणं जीवो वयगुत्तयं जणयइ**) ॥५४॥

कायगुप्तिमाह–

कायगुत्तयाए णं भंते जीवे किं जणयइ ? कायगुत्तयाए णं संवरं जणयइ, संवरेणं कायगुत्ते पुणो पुणो पावासवनिरोहं करेइ ॥५५॥

व्याख्या–हे भदन्त ! कायगुप्ततया जीवः किं जनयति ? गुरुराह हे शिष्य !

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कायगुप्ततया शुभयोगप्रवृत्त्या कायगुप्त्या **संवरम**शुभयोगनिरोधं **जनयति** । **संवरेणाभ्य**स्यमानेन **कायगुप्तः** सर्वथा निरुद्धकायव्यापारस्सन् **पुनः पापाश्रवाणां** हिंसादीनां **निरोधं करोति** ॥५५॥

गुप्तयो यथाक्रमं मनःसमाधारणादेः स्युरिति ता आह–

मणसमाहारणयाए णं भंते जीवे किं जणयइ ? मणसमाहारणयाए णं एगग्गं जणयइ, एगग्गं जणयित्ता नाणपज्जवे जणयइ, नाणपज्जवे जणयित्ता सम्मत्तं विसोहेइ, मिच्छत्तं च निज्जरेइ ॥५६॥

व्याख्या–हे भदन्त ! मनःसमाधारणतया जीवः किं जनयति ? गुरुराह हे शिष्य ! **मनःसमाधारणतया,** मनसः सं इति सम्यक्, आङिति मर्यादयाऽऽगमोक्तभावैर्धारणा व्यवस्थापना मनःसमाधारणा, तया जीव **एकाग्र्यं जनयति, तच्च जनयित्वा ज्ञानपर्यवान्** विशिष्टविशिष्टतरश्रुतबोधान् **जनयति, तांश्च जनयित्वा सम्यक्त्वं विशोधयति,** विशुद्धां तत्वरुचिं करोतीत्यर्थः, ततश्च **मिथ्यात्वं निर्जरयति** क्षपयति ॥५६॥

वयसमाहारणयाए णं भंते जीवे किं जणयइ ? वयसमाहारणयाए णं जीवे वयसाहारणदंसणपज्जवे विसोहेइ, वयसाहारणदंसणपज्जवे विसोहित्ता सुलहबोहियत्तं निव्वत्तेइ, दुलहबोहियत्तं निज्जरेइ ॥५७॥

व्याख्या–हे भदन्त ! वाक्समाधारणया जीवः किं जनयति ? गुरुराह हे शिष्य ! **वाक्समाधारणया** स्वाध्याय एव वाग्निवेशेन वाक्साधारणान्मतेरिव वचसो विषयान् दर्शनपर्यवान् वाक्साधारणदर्शनपर्यवान् सम्यक्त्वभेदान् **विशोधयति,** द्रव्यानुयोगाभ्यासेन स्याद्वादाभ्यासात्तद्विषयशङ्काद्यपनयनेन विशुद्धान् करोति, **विशोध्य च तान् सुलभबोधित्वं निवर्त्तयति,** प्रेत्यजिनधर्माप्तिर्बोधिरुच्यते, ततो भवान्तरे सुलभबोधित्वं करोति, तत एव **दुर्लभबोधित्वं निर्जरयति** ॥५७॥

कायसमाहारणयाए णं भंते जीवे किं जणयइ ? कायसमाहारणयाए णं जीवे चरित्तपज्जवे विसोहेइ, चरित्तपज्जवे विसोहित्ता अहक्खायचरित्तं विसोहेइ, अहक्खायचरित्तं विसोहित्ता चत्तारि केवलिकम्मं से खवेइ, तओ पच्छा सिज्झइ बुज्झइ मुच्चइ परिनिव्वाइ सव्वदुक्खाणमंतं करेइ ॥५८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—हे भदन्त ! कायसमाधारणया जीवः किं जनयति ? गुरुराह हे शिष्य ! **कायसमाधारणया** संयमयोगेषु सम्यग्व्यवस्थानेन **जीवश्चारित्रपर्यवान्** चारित्रभेदान् क्षायोपशमिकान् **विशोधयति,** तथा **विशोध्य च यथाख्यातचारित्रं विशोधयति** । सर्वथा ह्यसत उत्पत्त्यसम्भव इति पूर्वमपि कथञ्चित् सदेव यथाख्यातचारित्रं चारित्रमोहोदयमलिनं तन्निर्जरणेन निर्मलीकुरुते । एवं च **यथाख्यातं** विशोध्य **केवलिकर्मांशांश्चतुरः क्षपयति,** ततश्च **पश्चात्सिद्धयति बुद्धयते मुच्यते परिनिर्वाति सर्वदुःखानां चान्तं करोतीत्यादि** पूर्ववत् ॥५८॥

एवं समाधारणत्रयात् क्रमेण ज्ञानादित्रयशुद्धिमुक्त्वाऽथ फलमाह—

नाणसंपण्णयाए णं भंते जीवे किं जणयइ ? नाणसंपण्णयाए णं जीवे सव्वभावाभिगमं जणयइ, नाणसंपण्णे जीवे चाउरंतसंसारकंतारे ण विणस्सइ,

जेहा[1] सूई ससुत्ता, पडियावि न विणस्सइ ॥
तहा जीवो वि ससुत्तो संसारे ण विणस्सइ ॥१॥ [ ]

नाणविणयतवचरित्तजोगे संपाउणइ, ससमयपरसमयसंघायणिज्जे भवइ ॥५९॥

व्याख्या—हे भदन्त ! ज्ञानसम्पन्नतया जीवः किं जनयति ? गुरुराह हे शिष्य ! **ज्ञानं** श्रुतज्ञानं **तत्सम्पन्नतया** सर्वभावानां जीवादितत्त्वानामभिगमं **ज्ञानं जनयति, ज्ञानसम्पन्नश्च जीवश्चातुरन्ते** चातुर्गतिके **संसारकान्तारे** संसाराऽरण्ये **न विनश्यति,** न मुक्तिमार्गाद्विशेषेण दूरीभवति, अत्र सूचीदृष्टान्तमाह—यथा सूची ससूत्रा दवरकसहिता कचवरादौ न विनश्यति द्रुतमेव लभ्यते, तथा जीवोऽपि ससूत्रः सश्रुतः संसारे न विनश्यति, संसारात् कदाचिदपि निर्याति, तथैव स **ज्ञानमवध्यादि, विनयं, तपः चारित्रयोग्यां**श्चारित्रप्रधानव्यापारा**स्तान् सम्प्राप्नोति** । पुनः स जीवः **स्वसमयपरसमययोः सङ्घातनीयः** प्रधानपुरुषतया मीलनयो विद्वत्सु गणनीयो **भवति,** अत्र स्वपरसमयशब्दाभ्यां तद्ववेदिनो नरा ज्ञेयाः ॥५९॥

दंसणसंपन्नयाए णं भंते जीवे किं जणयइ ? दंसणसंपन्नयाए णं भवमिच्छत्तच्छेयणं करेइ, परं न विज्झाइ, अणुज्झायमाणो अणुत्तरेणं णाणदंसणेणं अप्पाणं संजोएमाणे सम्मं भावेमाणेणं विहरइ ॥६०॥

व्याख्या—हे भदन्त ! दर्शनसम्पन्नतया जीवः किं जनयति ? गुरुराह हे

---

१. सूई जहा ससुत्ता ण णस्सई कयवरंमि पडियावि ।
जीवो तहा ससुत्तो ण णस्सइ गओ वि संसारे'' ॥ [चं.प/गा.८३] सम्पा.

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

शिष्य! **दर्शनसम्पन्नतया** क्षायोपशमिकसम्यक्त्वितया **भवहेतुमिथ्यात्वक्षपणं** करोति, कोऽर्थः ? क्षायिकसम्यक्त्वं प्राप्नोति, ततश्च **परमि**त्युत्तरकालं उत्कृष्टस्तस्मिन्नेव भवे, मध्यमजघन्यापेक्षया तृतीये चतुर्थे वा केवलाप्तौ ज्ञानदर्शनप्रकाशाऽभावरूपं **विध्यापनं नाप्नोति,** परं तत्प्रकाश**मविध्यापयन् अनुत्तरेण** क्षायिकत्वात् प्रधानेन **ज्ञानदर्शनेनात्मानं संयोजयन्** प्रतिसमयमपराऽपरेणोपयोगरूपतयोत्पद्यमानेन घटयन्, संयोजनं च भेदेऽपि स्यादित्याह **सम्यग्भावयंस्तेनात्मनाऽात्मसान्नयन् विहरति** भवस्थकेवलितया ।

चरित्तसंपण्णयाए णं भंते जीवे किं जणयइ ? चरित्तसंपण्णयाए णं सेलेसीभावं जणयइ, सेलेसिं पडिवण्णे य अणगारे चत्तारि केवलिकम्मं से खवेइ, तओ पच्छा सिज्झइ जाव सव्वदुक्खाणमंतं करेइ ॥६१॥

व्याख्या—हे भदन्त ! चारित्रसम्पन्नतया जीवः किं जनयति ? गुरुराह हे शिष्य! **चारित्रसम्पन्नतया** यथाख्यातचारित्रसहितत्वेन जीवः **शैलेशीभावं जनयति** । शिलानामिमे शैलाः पर्वतास्तेषामीशो मेरुः, स इव शैलेशो मुनिर्निरुद्धयोगतयाऽत्यन्तस्थैर्येण, तस्येयमवस्था शैलेशीभावस्तमुत्पादयति । एवंविधां **शैलेश्य**वस्थां **प्रतिपन्नश्चानगारश्चतुरः कर्मांशान् केवलिसत्कान् क्षपयति, ततः पश्चात् सिध्यतीति यावत् सर्वदुःखानामन्तं करोति** ॥६१॥

चारित्रं चेन्द्रियनिग्रहादेव स्यादिति प्रत्येकं तमाह—

सोइंदियनिग्गहेणं भंते जीवे किं जणयइ ? सोइंदियनिग्गहेणं मणुन्नामणुन्नेसु सद्देसु रागद्दोसनिग्गहं जणयइ, तप्पच्चइयं च कम्मं न बंधइ, पुव्वबद्धं च निज्जेरइ ॥६२॥

व्याख्या—हे भदन्त ! श्रोत्रेन्द्रियनिग्रहेण जीवः किं जनयति ? गुरुराह हे शिष्य! **श्रोत्रेन्द्रियस्य निग्रहः** स्वविषयाभिमुखमनुधावतो नियमनं, **तेन मनोज्ञाऽमनोज्ञेषु शब्देषु** स **रागद्वेषनिग्रहं जनयति, तत्प्रत्ययिकं** रागद्वेषनैमित्तिकं **कर्म** च नवं **न बध्नाति, प्राग्बद्धं** शब्दाश्रयेण रागादिना कर्म, तच्छ्रोत्रनिग्रहवान् **निर्जरयति,** तेनेन्द्रियनिग्रहे प्राक्तनतत्कर्मक्षयनवकर्माऽबन्धादनन्तो लाभः ॥६२॥

चक्खिंदियनिग्गहेणं भंते जीवे किं जणयइ ? चक्खिंदियनिग्गहेणं मणुण्णामणुण्णेसु रूवेसु रागद्दोसनिग्गहं जणयइ तप्पच्चइयं कम्मं न बंधइ, पुव्वबद्धं च निज्जेरेइ ॥६३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—हे भदन्त ! चक्षुरिन्द्रियनिग्रहेण जीवः किं जनयति ? गुरुराह हे शिष्य ! चक्षुरिन्द्रियनिग्रहेण जीवो मनोज्ञाऽमनोज्ञरूपेषु रागद्वेषनिग्रहं जनयति, तत्प्रत्ययिकं कर्म न बध्नाति, पूर्वबद्धं च निर्जरयति ॥६३॥

घाणिंदियनिग्गहेणं भंते जीवे किं जणयइ ? घाणिंदियनिग्गहेणं मणुण्णामणुण्णेसु गंधेसु रागद्दोसनिग्गहं जणयइ, तप्पच्चइयं कम्मं न बंधइ, पुव्वबद्धं च निज्जरेइ ॥६४॥

व्याख्या—हे भदन्त ! घ्राणेन्द्रियनिग्रहेण जीवः किं जनयति ? गुरुराह हे शिष्य ! घ्राणेन्द्रियनिग्रहेण जीवो मनोज्ञाऽमनोज्ञगन्धेषु रागद्वेषनिग्रहं जनयति, तत्प्रत्ययिकं कर्म न बध्नाति, पूर्वबद्धं च निर्जरयति ॥६४॥

जिब्भिंदियनिग्गहेणं भंते जीवे किं जणयइ ? जिब्भिंदियनिग्गहेणं मणुण्णामणुण्णेसु रसेसु रागद्दोसनिग्गहं जणयइ, तप्पच्चइयं कम्मं न बद्धइ, पुव्वबद्धं च णिज्जरेइ ॥६५॥

व्याख्या—हे भदन्त ! जिह्वेन्द्रियनिग्रहेण जीवः किं जनयति ? गुरुराह हे शिष्य ! जिह्वेन्द्रियनिग्रहेण जीवो मनोज्ञाऽमनोज्ञेषु रसेषु रागद्वेषनिग्रहं जनयति, तत्प्रत्ययिकं कर्म न बध्नाति, पूर्वबद्धं च निर्जरयति ॥६५॥

फासिंदियनिग्गहेणं भंते जीवे किं जणयइ ? फासिंदियनिग्गहेणं मणुण्णामणुण्णेसु फासेसु रागद्दोसनिग्गहं जणयइ, तप्पच्चइयं कम्मं न बंधइ, पुव्वबद्धं च निज्जरेइ ॥६६॥

व्याख्या—हे भदन्त ! स्पर्शेन्द्रियनिग्रहेण जीवः किं जनयति ? गुरुराह हे शिष्य ! स्पर्शेन्द्रियनिग्रहेण जीवो मनोज्ञाऽमनोज्ञेषु स्पर्शेषु रागद्वेषनिग्रहं जनयति, तत्प्रत्ययिकं स्पर्शसम्बन्धि रागद्वेषजं कर्म न बध्नाति, प्राग्बद्धं स्पर्शाश्रयणे रागादिना कर्म स्पर्शेन्द्रियनिग्रहवान् निर्जरयति ॥६६॥

एतन्निग्रहोऽपि कषायविजयात् स्यादिति तमाह—

कोहविजएणं भंते जीवे किं जणयइ ? कोहविजएणं खंतिं जणयइ, कोहवेयणिज्जं च कम्मं न बंधइ, पुव्वबद्धं च निज्जरेइ ॥६७॥

व्याख्या—हे भदन्त ! क्रोधविजयेन जीवः किं जनयति ? गुरुराह हे शिष्य !

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

क्रोधविजयेन, क्रोधस्य विजयो दुरन्ततादिभावेनोदयनिरोधस्तेन जीवः **क्षान्तिं जनयति**, पुनः **क्रोधवेदनीयं** मोहनीयकर्मणो भेदरूपं **कर्म न बध्नाति, पूर्वबद्धं च** तत्कर्म निर्जरयति ॥६७॥

माणविजएणं भंते जीवे किं जणयइ ? माणविजएणं मद्दवं जणयइ, माणवेयणिज्जं कम्मं ण बंधइ, पुव्वबद्धं च निज्जरेइ ॥६८॥

व्याख्या—हे भदन्त ! **मानविजयेन जीवः किं जनयति** ? गुरुराह हे शिष्य ! **मानविजयेन** जीवो **मार्दवं जनयति, मानवेदनीयं कर्म** च **न बध्नाति, पूर्वबद्धं च निर्जरयति** ॥६८॥

मायाविजएणं भंते जीवे किं जणयइ ? मायाविजएणं उज्जुभावं जणयइ, मायावेयणिज्जं च कम्मं न बंधइ, पुव्वबद्धं च निज्जरेइ ॥६९॥

व्याख्या—हे भदन्त ! **मायाविजयेन जीवः किं जनयति** ? गुरुराह हे शिष्य ! **मायाविजयेन** जीव **ऋजुभावं** सरलत्वं **जनयति**, ततश्च मायावेदनीयं **कर्म न बध्नानि, पूर्वबद्धं च** कर्म **निर्जरयति** ॥६९॥

लोभविजएणं भंते जीवे किं जणयइ ? लोभविजएणं संतोसीभावं जणयइ, लोभवेयणिज्जं कम्मं न बंधइ, पुव्वबधं च निज्जरेइ ॥७०॥

व्याख्या—हे भदन्त ! **लोभविजयेन जीवः किं जनयति** ? गुरुराह हे शिष्य ! **लोभविजयेन जीवः सन्तोषिभावं जनयति, लोभवेदनीयं कर्म न बध्नाति, पूर्वबद्धं च निर्जरयति** ॥७०॥

एतज्जयश्च न प्रेमद्वेषमिथ्यादर्शनविजयं विना यतस्तमाह—

पिज्जदोसमिच्छादंसणविजएणं भंते जीवे किं जणयइ ? पिज्जदोसमिच्छादंसणविजएणं नाणदंसणचरित्ताराहणयाए अब्भुट्ठेइ, अट्ठविहस्स कम्मस्स गंठिविमोयणट्ठाए तप्पढमयाएणं जहाणुपुव्विए अट्ठावीसतिविहं मोहणिज्जं कम्मं उग्घाएइ, पंचविहं नाणावरणिज्जं नवविहं दंसणावरणं पंचविह अंतरायं, एए तिन्नि वि कम्मं से जुगवं खवेइ, तओ पच्छा अणुत्तरं अणंतं कसिणं पडिपुन्नं निरावणं वितिमिरं विसुद्धं लोगालोगप्पभावगं केवलवरनाणदंसणं समुप्पाडेइ, जाव सजोगी भवइ ताव य

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इरियावहियं कम्मं बंधइ, सुहफरिसं दुसमयट्ठिईयं तं पढमसमए बद्धं बीइयसमए वेइयं तईयसमए निज्जिण्णं तं बद्धं पुट्ठं उदीरियं वेइयं निज्जिण्णं सेयाले अकम्मं वा भवइ ॥७१॥

व्याख्या—हे भदन्त ! **प्रेमद्वेषमिथ्यादर्शनविजयेन जीवः किं जनयति** ? गुरुराह हे शिष्य ! **प्रेम** रागः, **द्वेषो**ऽप्रीतिः, **मिथ्यादर्शनं** शांसयिकादि, **तद्विजयेन ज्ञानदर्शनचारित्राराधनायां जीवो**ऽभ्युत्तिष्ठते, प्रेमादि निमित्तत्वात्तद्विराधनायाः, ततश्चाष्टविधकर्मणां मध्यं **कर्मग्रन्थि**रतिदुर्भेदघातिकर्मजालं, **तस्य विमोचना** क्षपणा **तदर्थं** चाभ्युत्तिष्ठते (**अट्ठविहकम्मविमोहणाए** वा पाठः) **ततश्च प्रथमतया**, न हि तत्पुरा क्षपितमासीत्, **यथाऽनुपूर्वी** आनुपूर्व्यनतिक्रमेण **अष्टाविंशतिविधं मोहनीयं कर्म उद्घातयति** । क्षपकश्रेण्यारूढः "**अण मिच्छ मीस सम्मं**" [ ] इत्यावश्यकनिर्युक्त्युक्रमेण यावत् "**पढमे निद्दं पयलं**" [ ] क्षपयति । अत्रायं क्षपणक्रमः—

आदावनन्तानुबन्धिनः क्रोधादीन् युगपदन्तर्मुहूर्त्तेन क्षपयति, तदनन्तभागं च मिथ्यात्वे प्रक्षिपति, ततस्तेन सहैव मिथ्यात्वं क्षपयति । प्रवर्द्धमानोऽतितीव्रशुभपरिणामत्वात् सम्भृतवनानल इवार्द्धदग्धेन्धन इन्धनान्तरं, ततो मिथ्यात्वांशं सम्यग्मिथ्यात्वे प्रक्षिप्य तत् क्षपयति । ततोऽपि तदंशसहितसम्यक्त्वं, तदनु सम्यक्त्वावशिष्टदलिकसहितमप्रत्याख्यानप्रत्याख्यानावरणकषायाष्टकं युगपदेव क्षपयितुमारभते । तत्क्षपणं च कुर्वन्नेताः प्रकृतीः क्षपयति । तद्यथा—

गइ आणुपुव्वि दो दो, जाइणामं च जीव चउरिंदी ।
आयावं उज्जोयं, थावरणामं च सुहुमं च ॥१॥ [ ]

साहारणमप्पज्जत्तं, निद्दनिद्दं च पयलपयलं च ।
थीणं खवेइ ताहे, अवसेसं जं च अट्ठण्हं ॥२॥ [ ]

ततोऽपि किञ्चित् सावशेषं नपुंसकवेदमध्ये प्रक्षिप्य तं तत्समन्वितं क्षपयति, एवं तदुद्धरितसहितं स्त्रीवेदं, तदवशिष्टान्वितं च हास्यादिष्टकं, तदंशसहितं च पुरुषवेदखण्डद्वयं यदि पुरुषः प्रतिपत्ता, अथ स्त्री नपुंसकं वा ततः स्वस्ववेदखण्डद्वयं, ततः क्षप्यमाणवेदतृतीयखण्डसहितं सञ्ज्वलनं कोपं क्षपयति । एवं पूर्वपूर्वांशसहितमुत्तरोत्तरं क्षपयति, तावत्सञ्ज्वलनलोभतस्तृतीयखण्डं तु सङ्ख्येयानि खण्डानि कृत्वा पृथक्कालभेदेन क्षपयति, तत्र च क्षपणकालः प्रत्येकं सर्वत्र चान्तर्मुहूर्त्तमेव । इत्थं चैतदन्तर्मुहूर्त्तस्याऽसङ्ख्यभेदत्वात्ततस्तच्चरमखण्डमसङ्ख्येयखण्डानि करोति, तानि च प्रतिसमयेमेकैकतया क्षप-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

यति, तच्चरमखण्डमपि पुनरसङ्ख्येयसूक्ष्मखण्डानि कृत्वा तत्तथैव क्षपयति । एवं मोहनीयं क्षपयित्वान्तर्मुहूर्त्तं यथाख्यातचारित्रमनुभवन् छद्मस्थवीतरागता, द्विचरमसमययोः प्रथमसमये निद्राप्रचले प्रकृतीः क्षपयति, अथ चरमसमये तु यत् क्षपयति तत्सूत्रकृदाह—

पञ्चविधं ज्ञानावरणीयं, नवविधं दर्शनावरणीयं, पञ्चविधमन्तरायं, 'एए'त्ति लिङ्गव्यत्ययादेतानि त्रीण्यपि वक्ष्यमाणरूपाणि 'कम्मं से'त्ति सत्कर्माणि युगपत् क्षपयति । **ततः** क्षपणातः **पश्चा**दनन्तरं, नास्मादुत्तरं प्रधानं ज्ञानमस्तीत्यनुत्तरं, **अनन्तम**विनाशतया विषयानन्त्याच्च, **कृत्स्नं** कृत्स्नवस्तुविषयत्वात्, **परिपूर्णं** सकलस्वपरपर्यायपरिपूर्णवस्तुप्रकाशकत्वात्, **निरावरण**मशेषावरणविगमात्, **वितिमिरं** तस्मिन् सति क्वचिदप्यज्ञानतिमिराऽभावात्, **विशुद्धं** सर्वदोषविगमात्, **लोकाऽलोकप्रभावकं** तत्स्वरूपप्रकाशकत्वात्, **केवलम**सहायं, वरं शेषज्ञानापेक्षया, **ज्ञानं च दर्शनं** चेति समासः, **समु**त्पादयत्यात्मनि, स **यावत्सयोगी** मनोवाक्कायव्यापारवान् **भवति** तावदीर्यागतिस्तस्याः पन्था स्थानं ईर्यापथस्तस्मिन् भव**मीर्यापथिकं कर्म,** यतः सयोगिकेवलिनां सूक्ष्मगात्रसंचाराः स्युः, यतः **प्रज्ञप्त्यां**—

''केवली णं भंते ! अस्सिं समयंसि जेसु [आगास]पएसेसु हत्थं वा पायं वा ओगाहित्ताणं साहरिज्जा पहू णं भंते ! केवली तेसु चेवागासपएसेसु हत्थं वा पायं वा पडिसाहरित्तए, नो इणमट्ठे [समट्ठे] केवलिस्स णं चलाइं सरीरोवगरणाइं हवंति, चलोवगरणत्ताए केवली नो संचाएति, तेसु चेवागासपएसेसु हत्थं वा पायं वा पडिसाहरित्तए'' । तदेवं केवली पथि तिष्ठन्नैर्यापथिकं कर्म बध्नाति, तच्च कीदृगित्याह— सुखयतीति सुखस्पर्श आत्मप्रदेशैः सह संश्लेषो यस्य तत्**सुखस्पर्शं द्विसमयस्थितिकं प्रथमसमये बद्धं,** स्पर्शाऽविनाभावित्वाच्चास्पृष्टत्वं च, **द्वितीयसमये वेदितम**नुभूतं, **तृतीयसमये निर्जीर्णं** परिशाटितं, तदधिकस्थितेः कषायहेतुत्वात्, यतः—**''जोगा पयडिपएसं, ठियअणुभागं कसायओ कुणइ''** ॥ [ ] इति, **तद्बद्धं** जीवप्रदेशैः श्लिष्टं व्योम्ना घटवत्, **स्पृष्टं** मसृणमणिकुड्यां पतितशुष्कस्थूलशिलाचूर्णवत्, इति विशेषणद्वयेन तस्य निधत्तनिकाचितावस्थाऽभावमाह । **उदीरितमु**दयप्राप्तमुदीरणायास्तत्राऽसम्भवात्, वेदिततत्फलसुखानुभवेन, **निर्जीर्णं** क्षयमुपगतं । 'सेयाल'त्ति सूत्रत्वा**देष्यत्काले** तुर्यसमयादौ **अकर्मा वा भवति** । तज्जीवापेक्षया पुनस्तस्य तथाविधपरिणामभावात् तच्च सातवेद्यमेव । यतः—

अप्पं बायर मउयं, बहुं च लुक्खं च सुक्किलं चेव ।
मंदं महव्वयंति य, सायाबहुलं च तं कम्मं ॥१॥ [ ] ॥७१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

शैलेश्यकर्मताद्वारे व्याख्याति–

अहाउयं पालइत्ता अंतोमुहुत्तद्धावसेसाऊए जोगनिरोहं करेमाणे, सुहुमकिरियं अप्पडिवाइं सुक्कज्झाणं झायमाणे तप्पढमयाए मणजोगं निरुंभइ, वयजोगं निरुंभइ, वयजोगं निरुंभित्ता कायजोगं निरुंभइ, कायजोगं निरुंभित्ता आणपाणुनिरोहं करेइ, आणपाणुनिरोहं करित्ता ईसि-पंचरहस्सक्खरुच्चारद्धाए णं अणगारे समुच्छिण्णकिरियं, अनियट्टिं सुक्कज्झाणं ज्झियायमाणे वेयणिज्जं आउयं नामं गोतं च, एए चत्तारि वि कम्मं से जुगवं खवेइ, तओ ओरालियकम्माइं च सव्वाहिं विप्पजहणाहिं विप्पजहित्ता उज्जुसेढीपत्ते अफुसमाणगई उड्ढं एगसमएणं अविग्गहेणं गंता सागारोवउत्ते सिज्झइ बुज्झइ मुच्चइ परिनिव्वाइ सव्वदुक्खाणं अंतं करेइ ॥७२॥

व्याख्या–अथ केवलाप्तेरनु अन्तर्मुहूर्त्तादिदेशोनपूर्वकोटिं **यावदायुः पालयित्वा**, अन्तर्मुहूर्त्तं अद्धाकालो अवशेषं उद्धरितं यस्मिंस्तदन्तर्मुहूर्त्ताद्धावशेषं, तदायुरस्येत्यन्त-**र्मुहूर्त्ताद्धावशेषायुष्कः** सन् (पाठान्तरे-**अन्तर्मुहूर्त्तमात्रावशेषाद्धायां** वा) **योगनिरोधं करिष्यमाणः**, सूक्ष्मा क्रिया यत्र तत् **सूक्ष्मक्रियमप्रतिपाति शुक्लध्यानं** तृतीयभेदरूपं **ध्यायंस्तत्प्रथमतया मनोयोगं**, क्वापि हेतौ क्रियमाणं मनोव्यापारं **रुणद्धि**, पर्याप्तमात्र-सङ्ज्ञिनो जघन्यमनोयोगयुक्तस्य यावन्ति मनोद्रव्याणि, तत्कृतश्च यावान् व्यापारस्तद-सङ्ख्यगुणहीनानि मनोद्रव्याणि, तद्व्यापारं च प्रतिसमयं रुन्धन् असङ्ख्यसमयैर्मनसः सर्वरोधं कुर्यात्, तत्कृत्वा वाग्योगव्यापारं पर्याप्तमात्रद्वीन्द्रियजघन्यवाग्योगपर्यायेभ्यो-ऽसङ्ख्यगुणहीनांस्तत्पर्यायान् समये रुन्धन्नसङ्ख्यसमयैः सर्व**वाग्योगं निरुन्धति, तत्कृत्वा** आद्यसमयोत्पन्नसूक्ष्मपनकजघन्यकाययोगतोऽसङ्ख्यगुणहीनं काययोगमेकैक-समये निरुन्धन् सुषिरपूर्त्त्या देहत्रिभागं च मुञ्चन्नसङ्ख्यसमयैः सर्वं **रुणद्धि काययोगं, तत्कृत्वा आनपानयोरुच्छ्वासनिःश्वासयोर्निरोधं करोति**, सकलकाययोगनिरोध एवं कृतः स्यात्। एवं योगत्रयं रुद्ध्वा स शैलेशीकरणं करोति। यथा **ईषदिति** स्वल्पः, प्रयत्ना-पेक्षया **पञ्चानां ह्रस्वाक्षराणां** अइउऋऌरूपाणा**मुच्चारस्तस्याद्धा** कालस्तस्यां च, **णमिति** प्राग्वत्। **अनगारः समुच्छिन्नक्रियं अनिवर्त्ति शुक्लध्यानं** तुर्यं भेदं **ध्यायन्** शैलेश्यव-स्थामनुभवन्, ह्रस्वाक्षरोच्चारणं चाऽविलम्बिताऽद्रुतं मध्यमभावेन ज्ञेयं। तदा च

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सातावेदनीयं नरायुः नृगत्यादिनाम उच्चैर्गोत्रादिगोत्रं, एतानि चत्वारि **सत्कर्माणि युगपत् क्षपयति, ततो** वेदनीयादिक्षयादनु **औदारिककार्मणशरीरे** तैजसं च **सर्वाभिर्विशेषेण** प्रकर्षतो हानयस्त्यागादि**प्रहाणयो** व्यक्त्यपेक्षं बहुवचनं, **ताभिः**, कोऽर्थः ? सर्वथा शाटनेन प्रविहाय परिशाट्य, न तु प्राग्वद्देशत्यागेन, औदायिकादिभावांश्च त्यक्त्वा । यतः—

तस्सोदइया भावा, भव्वत्तं च विणियत्तए जुगवं ।
सम्मत्तनाणदंसणसुहसिद्धत्ताणि मोत्तूणं ॥१॥ [ ]

ऋजुरवक्रा श्रेणिराकाशप्रदेशपङ्क्तिस्तां प्राप्त **ऋजुश्रेणिप्राप्तो**ऽनुश्रेणिगत इत्यर्थः, **अस्पृशद्गतिः**, कोऽर्थः ? यावत् स्वाकाशप्रदेशेषु जीवोऽवगाढस्तावदेव स्पृशन् **ऊर्द्ध्वमेकसमयेनाऽविग्रहेण** विग्रहगत्यभावेन, अन्वयव्यतिरेकाभ्यामुक्तोऽर्थः स्पष्टतरः स्यादित्यविग्रहेणेत्युक्तं । तत्र मुक्तिपदे **गत्वा साकारोपयुक्तो** ज्ञानोपयोगवान् **सिद्ध्यति** । इह **चूर्णौ** "**सीलेसी णं भंते ! जीवे किं जणयइ, अकम्मं जणयइ, अकम्मयाओ जीवा सिज्झंति**" [ ] इति पाठः' एवं पाठा अनेके सन्ति ॥७२॥

उपसंहर्त्तुमाह—

एसो खलु सम्मत्तपरक्कमस्स अज्झयणस्स अट्ठे समणेणं भगवया महावीरेणं अग्घविए पन्नविए परूविए दंसिए निदंसिए उवदंसिए ॥७३॥ त्ति बेमि

व्याख्या—एष खलु सम्यक्त्वपराक्रमस्याध्ययनस्यार्थः श्रमणेन भगवता महावीरेण 'अग्घविए'त्ति आर्षत्वादा**ख्यातः** सामान्यविशेषाभ्यां पर्यायाभिव्याप्त्युक्त्या १ **प्रज्ञापितो** हेतुफलादिप्रकर्षज्ञापनेन २ **प्ररूपितः** स्वरूपकथनेन ३ **दर्शितो** नानाविधभेददर्शनेन ४ **निदर्शितो** दृष्टान्तोपन्यासेन ५ **उपदर्शित** एवं परैर्वाच्यमित्युपसंहारेण ६ **इति** समाप्तौ, **ब्रवीमी**ति प्राग्वत् ॥

इति साधुगुणवाचि सम्यक्त्वपराक्रमं गौणतोऽप्रमादं वीतरागश्रुतं चेति नामकमेकोनत्रिंशाध्ययनमुक्तम् ॥२९॥

• • •

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

त्रिंशत्तमं तपोमार्गगत्याख्यमध्ययनम् ॥

साधुगुणवद्धिरप्रमादैश्च मोक्षमार्गगत्यै तपः कार्यमिति त्रिंशं **तपोमार्गगत्य**ध्ययनमाह— निरुक्तमिदं—तपसा रत्नत्रयसहितो मार्गो मुक्तेस्तपोमार्गस्तेन गतिः सिद्धौ तपोमार्गगतिः—

जहा उ पावयं कम्मं, रागदोससमज्जियं ।
खवेइ तवसा भिक्खू, तमेगग्गमणो सुण ॥१॥

व्याख्या—यथा तुरेवार्थे, **पापकर्म** ज्ञानावरणादि **रागद्वेषाभ्यां समर्जितं** सम्यग्बद्धं **क्षपयति तपसा भिक्षुः, तत्तप एकाग्रमनाः शृणु !** ॥१॥

इहाऽनाश्रवः कर्म क्षपयतीत्याह—

पाणिवहमुसावाए, अदत्तमेहुणपरिग्गहा विरओ ।
राईभोयणविरओ, जीवो भवइ अणासवो ॥२॥

व्याख्या—प्राणिवधान्मृषावादाददत्तान्मैथुनात्परिग्रहाद्विरतश्च रात्रिभोजनाद्विरतो **जीवो भवत्यनाश्रवः** कर्मोपादानहेतुरहितः ॥२॥

पंचसमिओ तिगुत्तो, अकसाओ जिइंदिओ ।
अगारवो य निस्सल्लो, जीवो भवइ अणासवो ॥३॥

व्याख्या—पञ्चसमितिभिः समितस्त्रिगुप्तिभिर्गुप्तः, अकषायो जितेन्द्रियोऽगौरवो निःशल्यो जीवो भवत्यनाश्रवः ॥३॥

ईदृशश्च यादृक्कर्म यथा क्षपयति दृष्टान्तद्वारेण तदाह—

एएसिं तु विवच्चासे, रागदोससमज्जियं ।
खवेइ उ जहा भिक्खू, तमेगग्गमणो सुण ॥४॥

व्याख्या—**एतेषां** प्राणिवधविरत्यादीनां च **विपर्यासे** सति, **राग**-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

द्वेषाभ्यां समर्जितं कर्म तपसा **यथा भिक्षुः क्षपयति, तन्मे** कथयतः सत **एकमनाः शृणु** ! (पाठान्तरे-एकं अग्रं ध्येयं यस्य तदेकाग्रं, एकाग्रं च तन्मनश्चेति एकाग्रमनस्तदस्येत्येकाग्रमनाः **शृणु** !) ॥४॥

जहा महातलागस्स, सन्निरुद्धे जलागमे ।
उस्सिंचणाए तवणाए, कमेणं सोसणा भवे ॥५॥

व्याख्या–यथा महातटाकस्य सन्निरुद्धे पाल्यादिना निषिद्धे **जलागमे**, सूत्रत्वादुत्सेचनेनाऽरघट्टाद्यादिभिरुदञ्चनेन **तपनेना**र्कतापेन **क्रमेण** परिपाट्या **शोषणा** तस्य जलस्य **भवेत्** ॥५॥

एमेव संजयस्सावि, पावकम्मनिरासवे ।
भवकोडीसंचियं कम्मं, तवसा निज्जरज्जई ॥६॥

व्याख्या–एवमेव पूर्वोक्तप्रकारेण पापकर्मणामाश्रवाभावे **पापकर्मनिराश्रवे** सति **संयतस्यापि** साधोरपि **भवकोटीनां** बह्वीनां **सञ्चितं कर्म तपसा निर्जीर्यते** ॥६॥

किं तत्तप इति भेदानाह–

सो तवो दुविहो वुत्तो, बाहिरब्भिंतरो तहा ।
बाहिरो छव्विहो वुत्तो, एवमब्भिंतरो तहा ॥७॥

व्याख्या–तत्तपः, सूत्रत्वाल्लिङ्गव्यत्ययः, **द्विविधमुक्तं बाह्यमाभ्यन्तरं च**, तत्र **बाह्यं षड्विधमुक्तं**, तद्बाह्यत्वं च लोकैरपि स्वरीत्या क्रियमाणत्वात् परैर्ज्ञायमानत्वाच्च । **एवमिति** षड्विध**मभ्यन्तरं तथा** ॥७॥

बाह्यमाह–

अणसणमूणोयरिया, भिक्खायरिया य रसपरिच्चाओ ।
कायकिलेसो संलीणया य बज्झो तवो होइ ॥८॥

व्याख्या–अनशनं १ ऊनोदरिका २ भिक्षाचर्या ३ रसपरित्यागः ४ कायक्लेशः ५ संलीनता ६ च एवं षड्विधं **बाह्यं तपो भवति** ॥८॥

तत्रानशनमाह–

इत्तरियमरणकाला य, अणसणा दुविहा भवे ।
इत्तरिय सावकंखा, निरवकंखा उ बिइज्जिया ॥९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—इत्वरकं नियतकालावधि अनशनं, मरणावसानः कालो यस्य तन्**मरण-कालं** यावज्जीवमनशनं, एव**मनशनं द्विविधं भवेत्**, स्त्रीलिङ्गता सर्वत्र प्राकृत्वात्, अनशनशब्देन सामान्यत आहारत्यागो ज्ञेयः, इत्वरकं सहावकाङ्क्षया, घटिकाद्वयाद्युत्तरकालं भोजनेच्छया वर्त्तत इति **सावकाङ्क्षं**, ततो (तुशब्दस्य) भिन्नक्रमत्वाद् **द्वितीयं** पुन**र्निरव-काङ्क्षं**, तज्जन्मन्याहारशंसाऽभावात् ॥९॥

जो सो इत्तिरिओ तवो, सो समासेण छव्विहो ।
सेढितवो पयरतवो, घणो य तह होइ वग्गो य ॥१०॥

व्याख्या—यत्तदित्वरिकं तप इत्वरिकाऽनशनं **तत्समासेन** सङ्क्षेपेण **षड्विधं**, विस्तरेण च बहुतरभेदं षड्भेदानाह—श्रेणिः पङ्क्तिस्तदुपलक्षितं तपः **श्रेणितपः**, तच्चतुर्थादि षण्मासान्तं, श्रेणिरेव श्रेण्या गुणिता प्रतर उच्यते, तदुपलक्षितं **प्रतरतपः**, यथा द्विपर्यन्तप्रतरे श्रेणिद्वयं, त्रिपर्यन्ते श्रेणित्रयं, चतुःपर्यन्ते श्रेणिचतुष्कं, इत्यादि । १८० प्रतरान् यावदिहाऽव्यामोहार्थं चतुर्थषष्ठामदशमाख्यपदचतुष्टयश्रेणिर्विवक्ष्यते, सा चतुर्भिर्गुणिता षोडशपदात्मकः प्रतरः स्यात्, अस्य स्थापनोपायश्चेत्थम्—

एकाद्याद्या व्यवस्थाप्याः, पङ्क्तयोऽत्र यथाक्रमं ।
एकादींश्च निवेश्यानन्तः, क्रमात् पङ्क्तिं प्रपूरयेत् ॥१॥

यन्त्रस्थापना—

१	२	३	४
२	३	४	१
३	४	१	२
४	१	२	३

घन इति घनतपो, भवतीति प्रतिपदं योज्यं । षोडशपदात्मकः प्रतरः पद-चतुष्टयात्मकतया गुण्या गुणितो घनः स्यात्, आगतं ६४, स्थापना पूर्विकैव नवरं बाहल्यतोऽपि पदचतुष्टयात्मकं, यथा एककेन प्रथमश्रेणिचतुष्कमारभ्यते, द्वितीयवारं द्विकेन श्रेणिचतुष्कमारभ्यते, तृतीयं श्रेणिचतुष्कं त्रिकेणारभ्यते, तुर्यं श्रेणिचतुष्कं चतुष्केणारभ्यते । एवं श्रेणिचतुष्कचतुष्केण चतुःपर्यन्तघने १६ ओल्यः ६४ उपवासाः स्युः, स्थापना चेयं—

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

१	२	३	४	२	३	४	१	३	४	१	२	४	१	२	३
२	३	४	१	३	४	१	२	४	१	२	३	१	२	३	४
३	४	१	२	४	१	२	३	१	२	३	४	२	३	४	१
४	१	२	३	१	२	३	४	२	३	४	१	३	४	१	२

घन एव घनेन गुणितो **वर्गस्तपः** ४०९६ ॥१०॥

तत्तो य वग्गवग्गो य, पंचमो छट्ठओ उ पइण्णतवो ।
मणइच्छियचित्ततथो, नायव्वो होइ इत्तरिओ ॥११॥

व्याख्या—ततश्च वर्गतपसोऽनन्तरं वर्गो वर्गेण ताडितो **वर्गवर्गतपो** यथा—१६७७७२१६ एवं पञ्चादिश्रेण्यादिभावना कार्या । **षष्ठकं प्रकीर्णतपः** श्रेण्यादिनियतरचनारहितं स्वशक्त्यपेक्षं नमस्कारसहितादि पूर्वपुरुषादिचरितं यवमध्यवज्रमध्यचन्द्रप्रतिमादि, **मनस इप्सित** इष्टश्चित्रोऽनेकप्रकारोऽर्थः स्वर्गापवर्गादिस्तेजोलेश्यादिर्वा यस्मात्तदित्वरिकमनशनाख्यं तपः ॥११॥

मरणकालमनशमाह—

जा सा अणसणा मरणे, दुविहा सा वियाहिया ।
सवियारा अवियारा, कायचेट्ठं पई भवे ॥१२॥

व्याख्या—**यत्तदनशनं मरणे** मरणावसरे **तद् द्विविधं विशेषेणाख्यातं**, सहविचारेण चेष्टया वर्त्तते यत्तत्**सविचारं**, तद्विपरीतं चाऽ**विचारं**, विचारः कायवाग्मनोभेदात्त्रिधेति, तद्विशेषज्ञप्त्यै आह—**कायचेष्टामुद्वेष्टनपरिवर्त्तनादि प्रतीत्याश्रित्य भवेत्**, तत्र सविचारं भक्तप्रत्याख्यानमिङ्गिनीमरणं च । तथाहि—भक्तप्रत्याख्याने गच्छमध्यवर्त्ती गुरुदत्तालोचनो मरणायोद्यतो विधिना संलेखनां विधाय, ततस्त्रिविधं चतुर्विधं चाहारं प्रत्याचष्टे, स च समास्तृतमृदुसंस्तारकः समुत्सृष्टशरीराद्युपकरणममत्वः स्वयमुच्चरितनमस्कारः समीपवर्त्तिसाधुदत्तनमस्कारो वा, सत्यां शक्तौ स्वमुद्वर्त्तते, शक्तेरभावे परैरपि किञ्चित् कारयति । यत उक्तम्—

वियडणमब्भुट्ठाणं, उचियं संलेहणं च काऊणं ।
पच्चक्खइ आहारं, तिविहं (च) चउव्विहं वावि ॥१॥ [पञ्च. व./गा.१६७१]
उव्वत्तइ परियत्तइ, सयमन्नेणावि कारए किंचि ।
जत्थ समत्थो नवरं, समाहिजणयं अपडिबद्धो ॥२॥ [पञ्च. व./गा.१६७२]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इङ्गिनीमरणं च विधिना प्रपद्य शुद्धस्थण्डिलस्थ एकाक्येव कृतचतुर्विधाहार-प्रत्याख्यानः स्थण्डिलस्यान्तश्छायात उष्णं, उष्णाच्च छायां स्वयं सङ्क्रामति । तथा चाह—

इंगियमरणविहाणं, आपव्वज्जं तु वियडणं दाउं ।
संलेहणं च काउं, जहासमाही जहाकालं ॥१॥ [पञ्च. व./गा.१६२३]
पच्चक्खइ आहारं, चउव्विहं नियमओ गुरुसगासे ।
इंगियदेसंमि तहा, चिट्ठं पि हु इंगियं कुणइ ॥२॥ [पञ्च. व./गा.१६२४]

इङ्गितां तत्कालयोग्यां चेष्टाम्

उव्वत्तइ परियत्तइ, काईयमाईसु होई (उ) विभासा ।
किच्चं पि अप्पण च्चिअ, जुंजइ नियमेण धीबलिओ ॥३॥ [पञ्च. व./गा.१६२५]

अविचारं तु पादपोपगमं, तत्र हि सव्याघाताऽव्याघातभेदाद् द्विभेदे पादपवन्निश्चेष्टतयैव स्थीयते, तथा च तद्विधिः—

अथ वंदिऊण देवे, जहाविहिं सेसए य गुरुमाई ।
पच्चक्खाइत्तु तओ, तयंतिए सव्वमाहारं ॥१॥ [पञ्च. व./गा.१६१५]
समभावंमि ठियप्पा, सम्मं सिद्धंतभणियमग्गेणं ।
गिरिकंदरं तु गंतुं, पायवगमणं अह करेइ ॥२॥ [पञ्च. व./गा.१६१६]
सव्वत्थपडिबद्धो, दंडाययमाइट्ठाणमिह ठाउं ।
जावज्जीवं चिट्ठइ, निच्चिट्ठो पायवसमाणो ॥३॥ [पञ्च. व./गा.१६१७]

पुनर्द्वैविध्यमेव प्रकारान्तरेणाह—

अहवा सपरिकम्मा, अपरिकम्मा य आहिया ।
नीहारिमणीहारी, आहारछेओ दोसु वि ॥१३॥

व्याख्या—**अथवा** सह परिकर्मणा स्थाननिषदनत्वग्वर्त्तनादिना विश्रामणादिना च वर्त्तते यत्तत्**सपरिकर्म, अपरिकर्म** च तद्वीपरीत**माख्यातं**, तत्र सपरिकर्म भक्तपरिज्ञा, इङ्गिनीमरणं चैकत्र स्वयमन्येन वा कृतस्याऽन्यत्र तु स्वयं विहितस्योद्वर्त्तनादिचेष्टापरिकर्मणोऽनुज्ञानात्, तथाह—

आयपरपरिकम्मं, भत्तपरिन्नाए दो अणुण्णाया ।
पडिवज्जिया य इंगिणि, चउव्विहाहारविरई य ॥१॥ [ ]
ठाणनिसीयतुयट्टण, इत्तिरियाइं जहासमाहीए ।
सयमेव य सो कुणइ, उवसग्गपरीसहऽहियासो ॥२॥ [ ]

अपरिकर्म च पादपोपगमने निःप्रतिकर्मतयैव तत्राभिधानात्, तथा चागमः—

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

समविसमंमि य पडिओ, अच्छइ जह पायवो व निक्कंपो ।
निच्चलनिप्पडिकम्मो, निक्खिवई जं जहिं अंगं ॥१॥ [ ]

तं चिय होइ तह च्चिय, न वरं चलणं परप्पओगाओ ।
वायाईहिं तरुस्स व, पडिणीयाईहिं तहिं तस्स ॥२॥ [ ]

यद्वा परिकर्म संलेखना, सा यत्रास्ति तत्**सपरिकर्म**, तद्वीपरीतं **त्वपरिकर्म**, तत्राऽव्याघाते त्रयमप्येतत्, सूत्रार्थोभयनिष्ठितो निष्पादितशिष्यः संलेखनापूर्वकमेव विधत्ते, अन्यथा आर्त्तध्यानसम्भवात्, उक्तं च–

देहंमि असंलिहिए, सहसा धाऊहिं खिज्जमाणेहिं ।
जायइ अट्टज्झाणं, सरीरिणो चरिमकालंमि ॥१॥ [पञ्च. व./गा.१५७०]

इति सपरिकर्मोच्यते । यत्पुनर्व्याघाते गिरिभित्तिपतनाघातादिरूपे संलेखनामकृत्वैव भक्तप्रत्याख्यानादि क्रियते तदपरिकर्म, उक्तं चागमे–

उग्घाओ वा विज्जूगिरि-भित्तीकोणगा य वा होज्जा ।
संबद्धहत्थपायादयो व वाएण होज्जाहि ॥१॥ [ ]

सर्वाङ्गपिण्डकवातेन वा हस्तपादाद्या अवयवाः सम्बद्धा भवेयुः ।

एएहिं कारणेहिं, वाघाइममरणं होइ नायव्वं ।
परिकम्ममकाऊणं, पच्चक्खाइ तओ भत्तं ॥१॥ [ ]

तथा निर्हरणं निर्हारो गिरिकन्दरादौ गमनेन ग्रामादेर्बहिर्निर्गमनं, तद्विद्यते यत्र **तन्निर्हारि**, यदुत्थातुकामे व्रजिकादौ विधीयते **तदनिर्हारि**, एतच्च प्रकारद्वयमपि पादपोपगमनं ज्ञेयं । यतः–

पव्वज्जाइ काउं, णेयव्वं जाव होइ वोच्छित्ती ।
पंच तुले काऊण य, सो पाओवगमं परिणओ य ॥१॥ [ ] ॥१३॥

इत्युक्तमनशनं, ऊनोदरतामाह–

उमोयरिणं पणहा, समासेण वियाहियं ।
दव्वओ खित्तकालेणं, भावेणं पज्जवेहि य ॥१४॥

व्याख्या–अवमं न्यूनमुदरमवमोदरं, तद्भावोऽवमौदर्यं न्यूनोदरता, **तत्पञ्चधा समासेन व्याख्यातं, द्रव्यतः**, क्षेत्रं च कालं च **क्षेत्रकालं तेन, भावेन पर्यायैश्चो**पधिभूतैः ॥१४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तत्र द्रव्यत आह—

जो जस्स उ आहारो, तत्तो ऊणं तु जो करे ।
जहण्णेणेगसित्थाई, एवं दव्वेण ऊ भवे ॥१५॥

व्याख्या—**यो यस्य तुः** पूर्त्तौ, **आहारो** भोजनं, **ततः** स्वाहारादवममूनं, **तुरेवार्थे, यः कुर्यात्** भुञ्जानः, यतः—

बत्तीसं किर कवला, आहारो कुच्छिपूरओ भणिओ ।
पुरिसस्स महिलियाए, अट्ठावीसं भवे कवला ॥१॥ [पि. नि./गा. ६४२]

कवलाण य परिमाणं, कुक्कुडिअंडगपमाणमित्तं तु ।
जो वा अविगयवयणो, वयणंमि छुहेज्ज वीसत्थो ॥२॥ [प्र.सा.गा.२७०वृ.]

तत एतावन्मानादूनं यः कुर्यात्, तथा '**तन्दुलसहस्रद्वयेनैकः कवलः**' इत्यापि सङ्ख्यास्ति । तत्र य ऊनाहारस्तस्**यैवं द्रव्येण भवेद**वमौदर्यं, एतच्च **जघन्येनैकसिक्थत्वं,** यत्रैकसिक्थं भुज्यते **तदादि,** आदिशब्दाच्छिक्थद्वयादारभ्य यावदेककवलभोजनं, एकेन कवलेन जघन्या, अष्टभिस्तैरुत्कृष्टा, शेषैर्मध्यस्थैरजघन्योत्कृष्टोनोदरिका, तथा नवभिर्जघन्या, द्वादशभिरुत्कृष्टा, शेषैरजघन्योत्कृष्टाः, अत्राल्पाहारा ऊनोदरी अष्टकवलान् यावत्, शेषाण्यूनोदरीनामानि कवलसङ्ख्या च यावत् किञ्चिदूना अन्त्योनोदरी, एवमपार्धोनोदर्याद्याः प्रकारा **नवतत्त्वविवरणा**दिभ्यः स्पष्टा ज्ञेयाः ।

अप्पाहार १ अवड्ढा २, दुभाग ३ पत्ता ४ तहेव किंचूणा ५ ।
अट्ठ १ दुवालस २ सोलस ३, चउवीस ४ तहेक्कतीसा य ५ ॥१॥ [द.वै.नि.गा.४७वृ.] ॥१५॥

क्षेत्रावमौदर्यमाह—

गामे नगरे तह रायहाणि, निगमे य आगरे पल्ली ।
खेडे कवडुदोणमुह, पट्टणमडंबसंबाहे ॥१६॥

व्याख्या—गम्योऽष्टादशकराणामिति **ग्रामः**, नाऽत्र करोऽस्तीति **नकरस्तस्मिन्**, राजधान्यां राज्ञः पीठिकास्थाने, निगमे प्रभूतवणिग्निवासे, समाहारे **राजधानीनिगमे, आकरे** हिरण्याद्युत्पत्तिस्थाने, **पल्ल्यां** वृक्षगहनान्तःस्थप्रान्तजननिवासे, **खेटे** धूलिप्रकारवति, कर्बटे कुनगरे, **द्रोणमुखे** जलस्थलनिर्गमप्रवेशे भृगुकच्छतामलिप्तप्राये, **पत्तने** जलस्थलपत्तनभेदे, **मडम्बे** सर्वतोऽसदर्धतृतीययोजनान्तग्रामे, **सम्बाधे** प्रभूतचातुर्वर्ण्यनिवासे ॥१६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आसमपए विहारे, सन्निवेसे समायघोसे य ।
थलि सेणाखंधावारे, सत्थे संवट्टकोट्टे य ॥१७॥

व्याख्या—**आश्रमपदं** तापसाद्युपलक्षितं पदं स्थानं **तस्मिन्**, विहारो देवगृहं भिक्षुनिवासो वा, तत्प्रधानो ग्रामादिरपि **विहारस्तत्र, सन्निवेशे** यात्राद्यायातजनावासे, **समाजे** पथिकसमूहे, **घोषे** गोकुले, **स्थल्यामु**च्चभूभागे, सेना चतुरङ्गबलसमूहः, स्कन्धावारः स एवाऽशेषखेटादिजनपूर्णः, अनयोः समाहारे **सेनास्कन्धावारं तस्मिन्**, **सार्थे** गणिमधरिमादिभृतगवादिसङ्घाते, संवर्त्तन्ते पिण्डीभवन्त्यस्मिन् भयत्रस्ता जनास्तत्र **संवर्त्ते, कोट्टे** प्राकारे, क्षेत्रप्रस्तावादत्र समाजादिषु क्षेत्रमेवोपलक्ष्यते ॥१७॥

वाडेसु व रत्थासु व, घरेसु वा एवमित्तियं खित्तं ।
कप्पइ उ एवमाई, एवं खित्तेण ऊ भवे ॥१८॥

व्याख्या—**वाटेषु** पाटेषु वा वृत्तिवरण्डकावृतगृहसमूहेषु, **रथ्यासु** सेरिकासु, **गृहेषु,** सर्वत्र वा विकल्पार्थः, एवमित्यनेन हृदयस्थप्रकारेण, **एतावन्नियतप्रमाणं क्षेत्रं** पर्यटितुं भिक्षायै मे **कल्पते, तुः** पूर्त्तौ **एवमादि,** आदितो गृहशालादि, **एवं क्षेत्रेण** क्षेत्रविषमवमौदर्यं, **तुः** पूर्त्तौ, **भवेत्** ॥१८॥

पुनरन्यथेदमाह—

पेडा य अद्धपेडा, गोमुत्तिपयंगवीहिया चेव ।
संबुक्कावट्टाययगंतुंपच्चागया छट्ठा ॥१९॥

व्याख्या—**पेटा** पेटिका इव चतुष्कोणा १ **अर्द्धपेटा** इमैव न वरं अर्धसंस्थिता गृहपरिपाटी २ **गोमूत्रिका** वक्रवलिता ३ **पतङ्गविहिता** पतङ्गोड्डयनसदृशा ४ शम्बूकः शङ्खस्तद्वदावर्त्तो यस्यां सा **शम्बूकावर्त्ता** ५, सा द्विधा शङ्खनाभिरूपे क्षेत्रे मध्याद्बहिर्गम्यते साऽभ्यन्तरशम्बूका, विपरीता बहिःशम्बूका । पुनः षष्ठी **आयतगन्तुं प्रत्यागमा** ज्ञेया । आदित एव आयतं सरलं गत्वा यस्यां प्रत्यागमो भवति सा **षष्ठी** गोचरभूमिर्ज्ञेया । यदुक्तं—"**जत्थ उज्जुयं गंतूण नियट्टइ छट्ठ**" [ ] त्ति भिक्षाचर्यात्वेऽपि आसां अवमौदर्यं ममास्त्वित्याशयेन क्रियमाणत्वादवमौदर्यव्यपदेशोऽप्यदुष्ट एव, निमित्तभेदादेकत्रापि पितृपुत्रादिव्यपदेशवत्, इदमेवोत्तरं सर्वत्र कालादौ वाच्यम् ॥१९॥

[कालावमौदर्यमाह-]

दिवसस्स पोरिसीणं, चउण्हं पि उ जत्तिओ भवे कालो ।
एवं चरमाणो खलु, कालोमाणं मुणेयव्वं ॥२०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—दिवसस्य पौरुषीणां चतसृणां अपि, तुः पूर्त्तौ, **यावान् भवेत् कालो**-ऽभिग्रहविषयः **एवं** कालेन **चरतः खलु कालावमत्वं** कालावमौदर्यं **मुणितव्यं** ज्ञेयम् ॥२०॥

एतदेव प्रकारान्तरेणाह—

अहवा तईयाए पोरिसीए, ऊणाइ घासमेसंतो ।
चउभागूणाए वा, एवं कालेण ऊ भवे ॥२१॥

व्याख्या—अथवा तृतीयपौरुष्यामूनायां ग्रासमाहारमेषयतः, वा शब्दाच्चतुः-पञ्चादि**भागोनायां वा** तृतीयपौरुष्यां, **एवं** कालाभिग्रहेण चरतः **कालेन तु भवेत्** कालावमौदर्यं स्यात् ॥२१॥

भावावमौदर्यमाह—

इत्थी वा पुरिसो वा, अलंकिओ वा अणलंकिओ वावि ।
अण्णयरवयत्थो वा, अण्णयरेणं च वत्थेणं ॥२२॥

व्याख्या—स्त्री वा पुरुषो वाऽलङ्कृतोऽनलङ्कृतो वा, बाल्याद्यन्यतरवयस्थो **वा, अन्यतरेण वा** पट्टवाचकादि**वस्त्रेणो**पलक्षितः ॥२२॥

अन्नेण विसेसेणं, वण्णेणं भावमणुमुयंतो तु ।
एवं चरमाणो खलु, भावोमोणं मुणेयव्वं ॥२३॥

व्याख्या—अन्येन विशेषेण कुपितहसितादिनाऽवस्थाभेदेन, **वर्णेन** कृष्णादिना अन्यतरेणोपलक्षितो **भावमु**क्तरूपमेवालङ्कृतत्वाद्य**नुन्मुञ्चन्नेव,** यदि दाता दास्यति ततोऽहं गृहीष्ये नान्यथा, **एवं चरतो** मुनेर्**भावावमत्वं मुणितव्यम्** ॥२३॥

[पर्यवावमौदर्यमाह-]

दव्वे खित्ते काले, भावंमि य आहिया उ जे भावा ।
एएहिं ओमचरओ, पज्जवचरओ भवे भिक्खू ॥२४॥

व्याख्या—द्रव्येऽनशनादौ, **क्षेत्रे** ग्रामादौ, **काले** पौरुष्यादौ, **भावे** च स्त्रीत्वादौ **आख्यातः, तुः** पूर्त्तौ, **ये भावाः** पर्याया एकसिक्थोनत्वाद्या**स्तैः** सर्वै**रवमौदर्यचरकः पर्यवचरको भवेद्भिक्षुः**। इह च पर्यवप्राधान्यविवक्षया पर्यवावमौदर्यमुक्तं, इह क्षेत्रादि यदाश्रित्यावमौदर्यं चिन्तितं, तन्नाम्नायविवक्षया तदवमौदर्यं ज्ञेयं, मुख्यतस्त्वाहारावमौदर्यमेव ॥२४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भिक्षाचर्यामाह–

अट्ठविहगोयरग्गं तु, तहा सत्तेव एसणा ।
अभिग्गहा य जे अण्णे, भिक्खायरियमाहिया ॥२५॥

व्याख्या–अष्टविधोऽग्रः प्रधानोऽकल्पनीयपरिहारेण, सचासौ गोचरश्चाष्टविधाग्रगोचरः, स्तोकस्तोकग्राहः, तु समुच्चये, अत्र चाष्टावग्रगोचरगा भेदाः पेटादय एव, शम्बूकावर्त्ताया द्वैविध्याश्रयणात्, **तथा** ऋज्वाश्चापरायां वलमानत्वे चिन्तितायाः प्रक्षेपात् । **सप्तैषणाश्च** संस्पृष्टादयः–

संसट्ठ १ मसंसट्ठा २, उद्धड ३ तह अप्पलेविया चेव ४ ।
उग्गहिया ५ पग्गहिया ६, उज्झियधम्मा ७ य सत्तमिया ॥१॥ [प्र.सा./गा.७३९]

अभिग्रहाश्च द्रव्याद्याः, द्रव्यक्रमेण कुन्ताग्रादिस्थितिमण्डखण्डादि ग्रहीष्ये, क्षेत्रे देहलीजङ्घयोरन्तःकृत्वा दास्यति तदा ग्रहीष्ये, सर्वभिक्षाचरनिवर्त्तनकाले मया विहर्त्तव्यं, भावे हसन् रुदन् बद्धो वा दाता चेद्दास्यति तदा ग्राह्यमित्याद्या **भिक्षाचर्या**वृत्तिसङ्क्षेपा **व्याख्याताः** ॥२५॥

रसत्यागमाह–

खीरदहिसप्पिमाई, पणीयं पाणभोयणं ।
परिवज्जणं रसाणं तु, भणियं रसविवज्जणं ॥२६॥

व्याख्या–**क्षीरं, दधि, सर्पिः, आदितो** गुडपक्वान्नादि, **प्रणीतमिति** बृंहकं **पानं** खर्जुररसादि, **भोजनं** गलबिन्द्वोदनादि, **एषां रसानां परिवर्जनं, तुः** पूर्त्तौ, **रसविवर्जनं** नाम बाह्यं तपो **भणितं** जिनैः ॥२६॥

कायक्लेशमाह–

ठाणा वीरासणाईया, जीवस्स उ सुहावहा ।
उग्गा जहा धरिज्जंति, कायकिलिसं तमाहियं ॥२७॥

व्याख्या–**स्थानानि** कायावस्थितिभेदाः, **वीरासनं, आदितो** गोदोहदण्डासनादि, तत्र वामांहिर्दक्षिणोरूद्ध्वं, वामोरूद्ध्वं च यत्र दक्षिणोंऽहिः क्रियते तद्वीरासनं, यत्र भूम्यां श्लिष्टाङ्गुलीश्लिष्टगुल्फश्लिष्टोरू अंह्री प्रसारयेत्तद्दण्डासनं । सूत्रत्वाल्लिङ्गव्यत्ययः, लोचादीनि **जीवस्य तु सुखावहानि** मुक्तिसुखहेतुत्वात् । **उग्राणि** दुःकरतया **यथा धार्यन्ते** सेव्यन्ते यतिभिः, **कायक्लेशः स आख्यातो** जिनैः ॥२७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

संलीनतामाह—

एगंतमणावाए, इत्थीपसुविवज्जिए ।
सयणासणसेवणया, विवित्तं सयणासणं ॥२८॥

व्याख्या—एकान्ते जनाऽनाकुले, **अनापाते** स्त्र्याद्यापातरहिते **स्त्रीपशुविवर्जिते** शून्यागारारामोद्यानादौ, सूत्रत्वात् **शयनासनसेवनं विविक्तशयनासनं,** बाह्यं तप उच्यते, एषणीयफलादिग्रहणं च, अनेन विविक्तचर्यानामसंलीनतोक्ता, शेषसंलीनता अप्येवं ज्ञेयाः ॥२८॥

संलीनता चतुर्धा—

इंदियकसायजोगो, पडुच्च संलीनता मुणेयव्वा ।
तह जा विवित्तचरिया, पन्नत्ता वीयराएहिं ॥२९॥

व्याख्या—इन्द्रियसंलीनता शब्दादिषु रागद्वेषाऽकृतेः ।१। **कषायसंलीनता** कषायोदयरोधः ।२। **योगसंलीनता** मनोवाक्कायानां शुभप्रवृत्तेरशुभनिवृत्तेः ।३। एवमिन्द्रिय-संलीनतादित्रयं **प्रतीत्य संलीनता ज्ञेया, तथा याऽनन्तरोक्ता विविक्तचर्याख्या** संलीनता चतुर्थी, एवं **वीतरागैश्चतुर्धा** संलीनता **प्रज्ञप्तास्ति** ॥२९॥

उत्तरग्रन्थसम्बन्धायाह—

एसो उ बाहिरतवो, समासेण वियाहिओ ।
अब्भिंतरो तवो इत्तो, वोच्छामि अणुपुव्वसो ॥३०॥

व्याख्या—एतदनन्तरोक्तं **बाह्यं तपः समासेन** सङ्क्षेपेण **व्याख्यातं** । बाह्य-तपःफलं च निःसङ्गतादेहलाघवेन्द्रियजयसंयमरक्षादिगुणयोगात् शुभध्यानस्थस्य कर्म-क्षपणा । **इतोऽनन्तरमभ्यन्तरं तप आनुपूर्व्या वक्ष्यामि** ॥३०॥

पायच्छित्तं विणओ, वेयावच्चं तहेव सज्झाओ ।
झाणं उस्सग्गो वि य, अब्भिंतरओ तवो होइ ॥३१॥

व्याख्या—पापमालोच्य तपसोऽङ्गीकरणं **प्रायश्चित्तं,** तथा **विनयो** वृद्धानाम-भ्युत्थानादिकरणं, **वैयावृत्त्यं** वृद्धग्लानादिभ्य आहारौषधाद्यानीय दानं, **तथैव स्वाध्यायस्य** चतुर्विधस्य **विधानं, ध्यानं** धर्मशुक्लादिचिन्तनं, **उत्सर्गः** कायोत्सर्गकरणं, **अपि चेति** पूर्त्तौ, एवं षड्विध**मभ्यन्तरं तपो भवति** ॥३१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तदेव विस्तरत आह–

आलोयणारिहादीयं, पायच्छित्तं तु दसविहं ।
जे भिक्खू वहइ सम्मं, पायच्छित्तं तमाहियं ॥३२॥

व्याख्या–आलोचनार्हं, यत्पापमालोचनया शुद्ध्यति, **आदि**शब्दात् प्रतिक्रमणार्हादिग्रहः, तत्पापमाश्रित्य यदालोचनादि दशविधं प्रायश्चित्तं तु, दशविधत्वं चेत्थम्–

आलोयण १ पडिक्कमणे २, मीस ३ विवेगे ४ तहा विउस्सग्गे ५ ।
तव ६ छेय ७ मूल ८ अणव-ट्ठया य ९ पारंचिए १० चेव ॥१॥ [सं.प्र./गा.१५२५]

अस्य व्याख्याऽऽवश्यकदीपिकानवतत्त्वविवरणादेर्ज्ञेया । एवं **यद्दशविधं प्रायश्चित्तं भिक्षुः सम्यक्** कायया **वहति, तत्प्रायश्चित्तमाख्यातं** जिनैरिति शेषः ॥३२॥

विनयमाह–

अब्भुट्ठाणं अंजलिकरणं, तहेव आसणदायणं ।
गुरुभत्ति भावसुस्सूसा, विणओ एस वियाहिओ ॥३३॥

व्याख्या–अभ्युत्थानं, अञ्जलिकरणं, तथैवासनदानं, गुरुभक्तिः, भावोऽन्तःकरणं तेन **शुश्रूषा** तदादेशं प्रति श्रोतुमिच्छा पर्युपासना च **भावशुश्रूषा** वा, **एष विनय आख्यातः** ॥३३॥

वैयावृत्त्यमाह–

आयरियमाइयंमि, वेयावच्चंमि दसविहे ।
आसेवणं जहात्थामं, वेयावच्चं तमाहियं ॥३४॥

व्याख्या–मः अलाक्षणिकः, **आचार्यादिके** आचार्यादिविषये **वैयावृत्त्यं**, विधिना धर्मसाधनहेतुमन्नादिसम्पादनं, व्यावृतस्य भावो वैयावृत्त्यं, तस्मिन् दशविधे–

आयरिय १ उवज्झाय २, थेर ३ तवस्सी ४ गिलाण ५ सेहाणं ६ ।
साहम्मिय ७ कुल ८ गण ९, संघ १० संगयं तमिह कायव्वं ॥१॥ [उ.र./गा.३४वृ.]

एवंरूपे दशविधे **आसेवनमे**तद्विषयमनुष्ठानं **यथास्थाम** सामर्थ्याऽनतिक्रमेण, **तद्वैयावृत्त्यमाख्यातम्** ॥३४॥

स्वाध्यायमाह–

वायणा पुच्छणा चेव, तहेव परियट्टणा ।
अणुप्पेहा धम्मकहा, सज्झाओ पंचहा होइ ॥३५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—वाचना पृच्छना तथैव परिवर्त्तना अनुप्रेक्षा धर्मकथा च, एवं **पञ्चधा स्वाध्यायो भवति**, तद्व्याख्या तु प्रागुक्तैव ॥३५॥

ध्यानमाह—

अट्टरुद्दाणि वज्जित्ता, झाइज्जा सुसमाहिए ।
धम्मसुक्काइं झाणाइं, झाणं तं तु बुहा वए ॥३६॥

व्याख्या—ऋतं दुःखं, तत्र भवं आर्त्तं, रोदयत्यन्यं हिंसादिनेति रुद्रो हिंसादिप्रवृत्त आत्मा, तस्य कर्म रौद्रं, एवंविधे **आर्त्तरौद्रे** ध्याने वर्जयित्वा **ध्यायेत् सुसमाहितः** स्थिरो, धर्मः क्षान्त्यादिदशधा, तत्सहित ध्यानं धर्म्यं, शुचं शोकं कर्मणां क्लमयतीति शुक्लं, एवंविधयोरष्टकर्मघ्न**धर्मशुक्लध्यानयो**र्यच्चिन्तनं **तदेव बुधा ध्यानाख्यं** तपो **वदन्ति** ॥३६॥

उत्सर्गमाह—

सयणासण ठाणे वा, जे उ भिक्खू ण वावरे ।
कायस्स विउस्सग्गो, छट्ठो सो परिकित्तिओ ॥३७॥

व्याख्या—**शयने, आसने** उपवेशने, सुपो लुक्, **स्थाने** ऊर्द्ध्वस्थाने स्थितः सन्, वा विकल्पे, प्रत्येकं योज्यः, **यत्तु भिक्षुर्न व्याप्रियते**, न चलनादिक्रियां कुरुते, यथाशक्ति **कायस्य व्युत्सर्गो** ममत्वस्य त्यागः स्यात्, तत् **षष्ठं** कायोत्सर्गाख्यं **तपः परिकीर्त्तितं** शेषा व्युत्सर्गा अत्र ज्ञेयाः, यथा—

दव्वे भाव य तहा, दुविहुस्सग्गो चउव्विहो दव्वो ।
गणदेहोवहिभत्ते, भावे कोहाइचाउ त्ति ॥१॥ [ ]

एतद्व्याख्या**ऽवश्यकदीपिका**तो ज्ञेया ॥३७॥

अथाध्ययनार्थमुपसंहरन् तपःफलमाह—

एयं तवं तु दुविहं, जं सम्मं आयरे मुणी ।
खिप्पं से सव्वसंसारा, विप्पमुच्चइ पंडिए ॥३८॥ त्ति बेमि

व्याख्या—**यो मुनिर्यः** साधुः **एवम**मुनाप्रकारेण बाह्याभ्यन्तरभेदेन द्विविधं तपः **सम्यगाचरति, स** पण्डितस्तत्ववेत्ता मुनिः **क्षिप्रं** तूर्णं(**सर्व**)**संसाराच्च**तुर्गतिभ्रमणा-**द्विशेषेण प्रमुच्यते, इति** समाप्तौ, **ब्रवीमी**ति प्राग्वत् ॥३८॥

इति तपोमार्गगत्याख्यं त्रिंशत्तममध्ययनमुक्तम् ॥३०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एकत्रिंशत्तमं चरणविधिनामकमध्ययनम् ॥

तपश्चरणवतामेव सम्यक् स्यादित्येकत्रिंशं **चरणविध्य**ध्ययनमाह–

अत्र निर्युक्तिः– द्रव्यादिनिक्षेपादनु–

पगयं तु भावचरणे, भावविहीए अ होइ नायव्वं ।
चइऊण अचरणविहिं, चरणविहीए उ जइयव्वं ॥१॥ [उ.नि./गा.५१८]

भावचरणे चारित्राचारे, अचरणविधिं अनाचारानुष्ठानं त्यक्त्वा चरणविधौ यत्यम् ।

चरणविहिं पवक्खामि, जीवस्स उ सुहावहं ।
जं चरित्ता बहू जीवा, तिण्णा संसारसागरं ॥१॥

व्याख्या–अथाहं **चरणविधिं** चारित्रस्य विधानं **प्रवक्ष्यामि**, कीदृशं ? **जीवस्य सुखावहं** सुखकारकमेव, **यं** चारित्रविधिं **चरित्वा**ङ्गीकृत्य **बहवो जीवाः संसारसागरं तीर्णाः** सन्ति ॥१॥

यथा–

एगओ विरइं कुज्जा, एगओ य पवत्तणं ।
असंजमे नियत्तिं च, संजमे य पवत्तणं ॥२॥

व्याख्या–**एकत** एकस्मात् स्थानाद्विरतिं **कुर्यात्** **एकतश्चै**कस्मिंश्च **प्रवर्त्तनं कुर्यात्**, 'तसिः सप्तम्याः', **असंयमात्**, पञ्चम्यर्थे सप्तमी, **निवृत्तिं, च संयमे प्रवर्त्तनं** मुनिः कुर्यात् । **चौ** समुच्चये ॥२॥

रागद्दोसो य दो पावे, पावकम्मपवत्तणे ।
जे भिक्खू रुंभइ निच्चं, से न अच्छइ मंडले ॥३॥

व्याख्या–**रागद्वेषौ, चः** पूर्त्तौ, **द्वौ पापौ** मलिनौ पापकर्माणि मिथ्यात्वादीनि प्रवर्त्तयत

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इति **पापकर्मप्रवर्त्तकौ**, (पाठान्तरे-**सर्वसङ्गावबन्धने**) **यो भिक्षुस्तपस्वी रुणद्धि** तिरस्कुरुते नित्यं, **स नास्ते** न तिष्ठति मण्डले संसारे (पाठान्तरे-**न गच्छति** न भ्राम्यति) ॥३॥

दंडाणं गारवाणं च, सल्लाणं च तियं तियं ।
जे भिक्खू चयई निच्चं, से ण अच्छइ मंडले ॥४॥

व्याख्या—दण्ड्यते चारित्रैश्वर्याद्यपहारतोऽसारीक्रियते एभिरात्मेति **दण्डाः**, दुःप्रणिहितमानसादिरूपा मनोदण्डाद्याः, उक्तं हि—

जह लोए दंडिज्जइ, दव्वं हीरइ य वज्झए यावि ।
इय दंडंतऽप्पाणं, मणमाई दुप्पणिहिएहिं ॥१॥ [ ]

तेषां त्रिकं मनोदण्डवाग्दण्डकायदण्डरूपं, तथा गुरुर्लोभाभिमानात्तच्चित्त आत्मा, तस्यैतान्यध्यवसायानि **गौरवाणि, तेषां त्रिकं**, ऋद्धिगौरवरसगौरवसातगौरवाः, तथा शल्यतेऽनेकार्थत्वाद्वायते जन्तुरेभिरिति **शल्यानि, तेषां त्रिकं**, मायाशल्यनिदानशल्यमिथ्यात्वशल्यानि, **चौ** समुच्चये, एवं त्रिकं त्रिकं त्रिकं **यो भिक्षुस्त्यजति नित्यं, स संसारे न तिष्ठति** ॥४॥

दिव्वे य जे उवस्सग्गे, तहा तेरिच्छमाणुसे ।
जे भिक्खू सहई निच्चं, से ण अच्छइ मंडले ॥५॥

व्याख्या—दिव्यांश्च, हास्यप्रद्वेषविमर्शपृथग्विमात्राभिरुप सामीप्येन सृज्यन्ते देवाद्यैरुत्पाद्यन्त इत्युपसर्गाः, **तांस्तथा** तिरश्चामेते, भयप्रद्वेषाहारहेत्वपत्यलयनसंरक्षणहेतोस्तैः क्रियमाणास्तैरश्चाः, तथा मनुष्याणामेते हास्यप्रद्वेषविमर्शकुशीलप्रतिसेवनानिमित्तास्तैः क्रियमाणत्वान्मानुष्यकाः, **तान्**, **च**शब्दादात्मसंवेद्यांश्च घट्टनप्रपतनस्तम्भनश्लेषणोद्भवानुपसर्गान् **यो भिक्षुः सहते** सम्यगध्यास्ते **स संसारे न भ्राम्यति** ॥५॥

विगहाकसायसन्नाणं, झाणाणं च दुयं तहा ।
जे भिक्खू वज्जइ निच्चं, से ण अच्छइ मंडले ॥६॥

व्याख्या—विरुद्धा विरूपा वा कथा **विकथा**, स्त्रीभक्तदेशराजभेदाच्चतुर्धा, **कषायाः** क्रोधमानमायालोभः, **सङ्ज्ञा** आहारभयमैथुनपरिग्रहाख्याः, एषां प्रत्येकं चतुष्कं, **ध्यानयोश्च द्विकमार्त्तरौद्रे तथा यो भिक्षुर्वर्जयति** त्यजति **स संसारे न भ्राम्यति** ॥६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वएसु इंदियत्थेसु, समिईसु किरियासु य ।
जे भिक्खू जयई निच्चं, से ण अच्छइ मंडले ॥७॥

व्याख्या—**व्रतेषु** हिंसाऽनृतस्तेयाऽब्रह्मपरिग्रहविरतिषु **इन्द्रियार्थेषु** शब्दरूपसगन्ध-स्पर्शेषु, **समितिषु** समित्यध्ययनोक्तासु, **क्रियासु च** कायिक्याधिकरणिकी प्राद्वेषि-कीपरितापनिकीप्राणातिपातिकीषु **यो भिक्षुर्यतते** यत्नं कुरुते, सम्यक् पालनातो व्रतसमितिषु, माध्यस्थ्यविधानतश्चेन्द्रियार्थेषु, परिहारतश्च क्रियासु, **स संसारे न भ्राम्यति** ॥७॥

लेसासु छस्सु काएसु, छक्के आहारकारणे ।
जे भिक्खू जयई निच्चं, से न अच्छइ मंडले ॥८॥

व्याख्या—**लेश्यासु** वक्ष्यमाणासु, **षट्सु कायेषु** पृथिव्यादिषु वक्ष्यमाणेष्वेव, **षट्के** षट्परिमाणे **आहारकारणे** वेदनादावुक्ते, **यो भिक्षुर्यतते नित्यं**, यथायोगं निरोधोत्पादनरक्षानुरोधविधानेन यत्नं कुरुते **स संसारे न भ्राम्यति** ॥८॥

पिंडुग्गहपडिमासु, भयट्ठाणेसु सत्तसु ।
जे भिक्खू जयई निच्चं, से ण अच्छइ मंडले ॥९॥

व्याख्या—**पिण्डावग्रहप्रतिमासु** आहारग्रहणाभिग्रहेषु संसृष्टादिषु प्रागुक्तासु, **सप्तसु भयस्थानेषु**, भयस्य मोहनीयोच्छात्मपरिणामस्योत्पत्तिनिमित्ताश्रयेषु, इहलोकभय १ परलोकभय २ आदानभय ३ अकस्माद्भय ४ आजीवनभय ५ मरण ६ अश्लोकभयेषु ७ **सप्तसु यो भिक्षुर्यतते**, एकत्र पालने, अन्यत्र त्वकरणे **स संसारे न भ्राम्यति** ॥९॥

मयेसु बंभगुत्तीसु, भिक्खुधम्ममि दसविहे ।
जे भिक्खू जयई निच्चं, से ण अच्छइ मंडले ॥१०॥

व्याख्या—मदेषु जात्याद्यष्टसु, ब्रह्मगुप्तिषु नवसु—

१ २ ३ ४ ५ ६ ७
वसहिकहनिसिज्जिंदिय, कुड्डिंतरपुव्वकीलियपणीए ।
८ ९
अइमायाहारविभूसणा य, नव बंभगुत्तीओ ॥१॥ [आ. नि. सं. गा.]

भिक्षुधर्मे क्षान्त्यादौ दशविधे—

१ २ ३ ४ ५ ६
खंती य मद्दवज्जव, मुत्ती तव संजमे य बोधव्वे ।
७ ८ ९ १० १
सच्चं सोयं आकिंचणं च बंभं जइधम्मो ॥१॥ [आ. नि. सं. गा.]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स्पष्टत्वाच्चेहान्यत्र च सूत्रे सङ्ख्याऽनुक्तिः, **यो भिक्षुर्नित्यं यतते** सम्यक् त्याग-सेवनपालनैः, **स संसारे न भ्राम्यति** ॥१०॥

उवासगाणं पडिमासु, भिक्खूणं पडिमासु य ।
जे भिक्खू जयई निच्चं, से ण अच्छइ मंडले ॥११॥

व्याख्या—उपासते सेवन्ते यतीनित्युपासकाः श्रावकास्तेषां **प्रतिमास्व**भिग्रह-विशेषेष्वेकादशसु । यथा—

१ २ ३ ४ ५ ६ ७
दंसणवयसामाईय, पोसहपडिमाअबंभसच्चित्ते ।
८ ९ १० ११
आरंभपेसे उद्दिट्ठवज्जए समणभूए अ ॥१॥ [आ. नि. सं. गा.]

आसु, **भिक्षूणां द्वादशसु प्रति**मासु । यतः—

७ १ १० ८
मासाई सत्तंता, पढमा बिइ तइय सत्तराइदिणा ।
११ १२
अहराइ एगराई य, भिक्खूपडिमाण बारसगं ॥२॥ [आ. नि. सं. गा.]

आसु सम्यग् ज्ञानोपदेशपालनाद्यैर्यो **भिक्षुर्नित्यं यतते स संसारे न भ्राम्यति** ॥११॥

किरियासु भूयगामेसु, परमाहम्मिएसु य ।
जे भिक्खू जयई निच्चं, से ण अच्छइ मंडले ॥१२॥

व्याख्या—क्रियाष्वर्थाऽनर्थादिषु त्रयोदशसु, **भूतग्रामेषु परमाधार्मिकेषु च** यथाक्रमं त्यागरक्षापरिज्ञानाद्यैर्यो **भिक्षुर्नित्यं** यतते **स संसारे न भ्राम्यति** । क्रियाश्चैताः—

१ २ ३ ४ ५ ६ ७
अट्ठाणट्ठाहिंसाऽकम्हा, दिट्ठी य मोसऽदिण्णे य ।
८ ९ १० ११ १२ १३
अज्झत्थमाणमित्ते, मायालोभेरियावहिया ॥१॥ [आ. नि. सं. गा.]

भूतग्रामाश्चेमे चतुर्दश—

१ २ ३ ४ ५ ६ ७
एगिंदिय सुहुमियरा, सण्णियरा पणिंदिया सबितिचऊ ।
७
पज्जत्तापज्जत्तग-भेएणं चउद्दसग्गामा ॥१॥ [आ. नि. सं. गा.]

परमाधार्मिकाः पञ्चदश, धर्मेण चरन्तीति धार्मिकाः, न तथा तेऽधार्मिकाः, परमाश्च ते सकलाऽधार्मिकप्रधानतया परमाधार्मिकाः, अत्यन्तसङ्क्लिष्टचेतः, यथा—

१ २ ३ ४
अंबे अंबरिसी चेव, सामे य सबलि त्ति य ।
५ ६ ७ ८
रुद्दोवरुद्दकाले य, महाकाले त्ति आवरे ॥१॥ [आ. नि. सं. गा.]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

१ ९ १० ११ १२ १३
असिपत्ते धणु कुंभे, वालू वेयरणी इय ।
१४ १५
खरस्सरे महाघोसे, पनरस परमाहम्मिया ॥१॥ [आ. नि. सं. गा.] ॥१२॥

गाहासोलसहिं च, तहा असंजमंमि य ।
जे भिक्खू जयई निच्चं, से ण अच्छइ मंडले ॥१३॥

व्याख्या—गीयते उच्यते स्वपरसमयस्वरूपमस्यामिति गाथा, **सूत्रकृतो**ऽङ्गस्य षोडशाध्ययनं **गाथा**ख्यमध्ययनं षोडशमेषामिति **गाथाषोडशकानि** सूत्रकृताद्यश्रुतस्कन्धे, **तेषु** तदुक्तक्रियया तत्प्ररूपणया यतते, असंयमे च सप्तदशभेदे परिहाराद्यो **भिक्षुर्नित्यं** यतते, स **संसारे न भ्राम्यति** । गाथाषोडशकं चेत्थं—

१ २ ३ ४ ५ ६ ७
समओ वेयालीयं, उवसग्गपरिण्ण थीपरिण्णा य ।
८ ९
निरयविभत्ती वीरत्थओ य, कुसीलाण य परिभासा ॥१॥ [आ. नि. सं. गा.]
१० ११ १२ १३ १४
वीरिय धम्म समाही, मग्ग समोसरण अहतहं गंथा ।
१५ १६
जमईयं तह गाहा, सोलसमं होइ अज्झयणं ॥२॥ [आ. नि. सं. गा.]

असंयमसप्तदशकं चेत्थं—

१ २ ३ ४ ५ ६ ७ ८ ९ १०
पुढविदगअगणिमारुयवणसइबितिचउपणिंदिअजीवे ।
११ १२ १३ १४ १५ १६ १७
पेहोपेहपमज्जण परिट्ठवणमणो वइकाए ॥१॥ [आ. नि. सं. गा.] १३॥

बंभंमि नायज्झयणेसु, ठाणेसु असमाहिए ।
जे भिक्खू जयई निच्चं, से ण अच्छइ मंडले ॥१४॥

व्याख्या—**ब्रह्मण्य**ष्टादशभेदे, तथा **ज्ञाताध्ययनेषु** एकोनविंशतिसङ्ख्येषु, तथा **असमाधिस्थानेषु** विंशतिसङ्ख्येषु समवायाङ्गोक्तेषु **यो भिक्षुर्यत्नं कुरुते स संसारे न भ्राम्यति**। ब्रह्माष्टादशभेदा यथा—

१ २ ३ ४ ५
ओरालियं च दिव्वं, मयणवयकाएण करणजोएणं ।
६
अणुमोयणकारावण-करणाणऽट्ठारसाबंभं ॥१॥ [आ. नि. सं. गा.]

ज्ञाताध्ययनानि यथा—

१ २ ३ ४ ५
उक्खित्तणाए संघाडे, अंडे कुम्मे य सेलए ।
६ ७ ८ ९ १०
तुंबेय रोहणी मल्ली, माकंदी चंदिमा इय ॥१॥ [आ. नि. सं. गा.]
११ १२ १३ १४
दावद्दाए उदगणाए, मंडुक्के तेयली इय ।
१५ १६ १७ १८ १९
नंदिफल अमरकंका, आइन्ने सुंसु पुंडरीए ॥२॥ [आ. नि. सं. गा.]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

असमाधिस्थानान्यमूनि–"दवदवचारी यावि भवइ १ अपमज्जियचारी यावि भवइ २ दुपमज्जियचारी यावि भवइ ३ अतिरित्तसिज्जासणिए ४ रायणियपरिहासी ५ थेरोवघाइए ६ भूतोवघाइए ७ संजलणे ८ कोहणे ९ पिट्ठिमंसिए १० अभिक्खणं अभिक्खणं ओहारइत्ता भवइ ११ णवाणं अहिगरणं अणुपन्नाणं उप्पाइत्ता भवइ १२ पोराणाणं अगिगरणाणं खामियवि उसवियाणं पुणो उदीरित्ता भवइ १३ ससरक्खे पाणिपाए १४ अकालसज्झायकारए यावि भवइ १५ सद्दकरे १६ कलहकरे १७ झंझकरे १८ सूरप्पमाणभोई १९ एसणाअसमियाई वि भवइ"२० [ ] ॥१४॥

एक्कवीसाए सबलेसु, बावीसाए परीसहे ।
जे भिक्खू जयई निच्चं, से ण अच्छइ मंडले ॥१५॥

व्याख्या–**एकविंशतौ**, शबलयन्ति कर्बुरीकुर्वन्ति अतिचारैश्चारित्रमिति **शबलाः** क्रियाविशेषास्**तेषु**, तथा चाह–

अवराहंमि य पयणुगे, जेण य मूलं न वच्चए साहू ।
सबलेंति तं चरित्तं, तम्हा सबल त्ति णं भणियं ॥१॥ [द.नि./गा.१३]

तानि च हस्तकर्मादीन्येकविंशतिः । तथा चागमः-

तं जह उ हत्थकम्मं, कुव्वंते १ मेहुणं च सेवंते २ ।
राइं च भुंजमाणे ३, आहाकम्मं वि भुंजंते ४ ॥१॥

तत्तो य रायपिंडं ५, कीयं ६ पामिच्च ७ अभिहडं ८ ऽछेज्जं ९ ।
भुंजंते सबले ऊ, पच्चक्खियऽभिक्खं भुंजंते १० ॥२॥

छम्मासब्भंतरओ, गणा गणं संकमं करंते य ११ ।
मासब्भंतर तिन्नि य, दगलेवा ऊ करेमाणो १२ ॥३॥

मासब्भंतरओ या, माइट्ठाणाइं तिन्नि कुणमाणो १३ ।
पाणाइवायआउट्टिं कुव्वंते, १४ मुसं वयंते य १५ ॥४॥

गिण्हंते य अदिण्णं, आउट्टिं १६ तह अणंतरहियाए ।
पुढवीए ट्ठाणं सेज्जं, निसीहियं वावि चेएइ ॥५॥

एवं ससिणिद्धाए, ससरक्खाए चित्तमंतसिललेलू ।
कोलावासपइट्ठा, कोला घुणा तेसिं आवासे ॥६॥

संडसपाणसबीए, जाव उ संताणए भवे तहियं ।
ठाणाइ चेयमाणे, सबले आउट्टियाए उ १७ ॥७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आउट्टिमूलकंदे, पुप्फे य फले य बीय हरिए य ।
भुंजंते सबले ऊ १८, तहेव संवस्सरस्संते ॥८॥

दस दगलेवे कुव्वं १९, तह माइट्ठाण दस य वरिसंते २० ।
आउट्टिय सीओदग-वग्घारियहत्थमत्ते य ॥९॥

दव्वीए भायणेण व, दिज्जंतं भत्तपाण घेत्तूणं ।
भुंजइ सबलो एसो, इगवीसो होइ नायव्वो २१ ॥१०॥ [आ.नि.सं.गा.]

द्वाविंशतिपरीषहाश्चेत्थं–

खुहा[१] पिवासा[२] सीउण्हं[३], दंसा[४] चेला[५] रइ[६] इत्थिओ[७] ।
चरिया[८] निसिहीया[९] सेज्जा[१०], अक्कोस[११] वह[१२] जायणा[१३] ॥१॥

अलाभ[१४] रोग[१५] तणफासा[१६], मलसक्कार[१७](पुरक्कार)परीसहा[१८] ।
पन्ना[१९] अन्नाण[२०] सम्मत्तं[२१], इइ बावीस परीसहा ॥२॥ [आ.नि.सं.गा.]

एवंविधेषु द्वाविंशतिपरीषहेषु परीषहाध्ययनोक्तेषु यो भिक्षुर्यतते उत्पन्नान् नित्यं सहते स संसारे न भ्राम्यति ॥१५॥

तेवीसइ सूयकडे, रूवाहिए सुरेसु य ।
जे भिक्खू जयई निच्चं, से ण अच्छइ मंडले ॥१६॥

व्याख्या–त्रिभिरधिका विंशतिस्त्रयोविंशतिः, एवंविधानि **सूत्रकृता**ध्ययानानि, तानि **पुण्डरीका**दीनि सप्त, षोडश च समयादीनि । यथा–

पुंडरिय[१] किरिय[२] ट्ठाणं[३], आहार[४] परिण्ण[५] पच्चक्खाण[६] किरिया य ।
अणगार[७] अद्द[८] नालिंद[९], सोलसाइं च तेवीसं ॥१॥ [आ.नि.सं.गा.]

तेषु, तथा रूपमेकस्तेनाधिकाः, **सूत्रकृता**ऽध्ययनेभ्यो **रूपाधिका**श्चतुर्विंशतिस्तेषु **सुरेषु** देवेषु, तत्र दीव्यन्ति क्रीडन्तीति देवा **भवनपत्या**द्यास्तेषु, यदि वा दीव्यन्ते स्तूयन्ते जगत्त्रयेणापीति देवा अर्हन्तस्तेषु **ऋषभाद्येषु** । उक्तं च–

भवण[१०] वण[८] जोइ[५] वेमाणिया[११] य, दस अट्ठ पंच एग विहा ।
इइ चउवीसं देवा, केइ पुण बिंति अरहंता ॥१॥ [आ.नि.सं.गा.]

तेषु **यो भिक्षुर्यतते** सत्प्ररूपणादिना **स संसारे न भ्राम्यति** ॥१६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पणवीस भावणाहिं, च उद्देसेसु दसाइणं ।
जे भिक्खू जयई निच्चं, से ण अच्छइ मंडले ॥१७॥

व्याख्या—**पञ्चविंशतौ** भावनासु महाव्रतविषयासु । यथा—"पणवीसं भावणाओ तं पाणाइवायविरमणे इरियासमिइ १ मणगुत्ती २ वयगुत्ती ३ आलोइऊण पाणभोयणं ४ आयाणभण्डनिक्खेवणासमिई ५, मुसावायविरमणे अणुवीईभासणया १ कोहविवेगे २ भयविवेगे ३ लोगविवेगे ४ मोहविवेगे ५, अदिण्णदाणविरमणे उग्गहमणुन्नवयणा १ उग्गहसीमं जाणणया २ सयमेव उग्गहं अणुगिण्हणया ३ साहम्मियउग्गहं अणुन्नविय परिभुज्जणया ४ साहारणभत्तपाणं अणुन्नविय परिभुज्जणया ५, मेहुणवेरमणे इत्थिपसुपंडयसंसत्तसयणासणवज्जणया १ इत्थिकहविवज्जणया २ इत्थीणं इंदियाणं आलोयणवज्जणया ३ [पुव्वरय]पुव्वकीलियाणं विसयाणं असरणया ४ पणीयाहारविवज्जणया ५, परिग्गहवेरमणे सोइंदियरागविरईए, एवं पंचेहिं वि इंदिएहिमुद्दिस्स रागविरईए" ॥ [ ] **उद्देषेष्विति** उद्देशनकालेषु **दशादीनां दशाश्रुतस्कन्धकल्पव्यवहाराणां** षड्विंशतिसङ्ख्येषु । यथा—

१०दसउद्देसणकाला दसाण, ६कप्पस्स होंति छच्चेव ।
१०दस चेव ववहारस्स, होंति सव्वे वि छव्वीसं ॥१॥ [आ. नि. सं. गा.]

एतेषु **यो भिक्षुर्नित्यं** परिभावनाप्ररूपणाकालग्रहणाद्यैर्यतते **स संसारे न भ्राम्यति** ॥१७॥

अणगारगुणेहिं य, पकप्पंमि तहेव उ ।
जे भिक्खू जयई निच्चं, से ण अच्छइ मंडले ॥१८॥

व्याख्या—**अनगारगुणाः सप्तविंशतिः**, सुव्व्यत्ययात्तेषु, यतः—

६वयछक्कमिंदियायाणं ११च, निग्गहो १२भावकरणसच्चं १३च ।
१४खमया १५विरागया वि य, १८मणमाईणं निरोहो य १८ ॥१॥
२४कायाण छक्क २५जोगंमि, जुत्तया २६वेयणाऽहियासणया ।
तह २७मारणंतियऽहियासणा य एए ऽणगारगुणा ॥२॥ [आ. नि. सं. गा.]

प्रकृष्टः कल्पो यतिव्यवहार यस्मिन्नसौ **प्रकल्पः**, स चेहाचाराङ्गमेवाष्टाविंशत्यध्ययनैः, यतः—

१सत्थपरिण्णा २लोगविजओ य, ३सीओसणिज्ज ४सम्मत्तं ।
५आवंति ६धुवविमोहो, ७उवहाणसुयं ८महपरिण्णा ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

[१०] [११] [१२] [१३] [१४] [१५]
पिंडेसणासिज्जारिया, भासा वत्थेसणा य पाएसा ।
[१६] [२३] [२४] [२५]
उग्गहपडिमा सत्तेक्क-सत्तयं भावण विमुत्ती य ॥२॥
[२६] [२७] [२८]
उग्घायमणुग्घायं, आरोवण तिविहमो निसीहं तु ।
इइ अट्ठावीसविहो, आयारपकप्पनामो उ ॥३॥ [आ. नि. सं. गा.]

मासिक्याद्यारोपणादौ वा नानाभेदे **समवायाङ्गोक्तेऽष्टाविंशतिविधे प्रकल्पे, तथैव** सम्यगासेवनाप्ररूपणादिना प्रकारेण, **तुः** समुच्चये **यो भिक्षुर्नित्यं यतते स संसारे न भ्राम्यति** ॥१८॥

पापसुयपसंगेसु, मोहट्ठाणेसु आवरे ।
जे भिक्खू जयई निच्चं, से ण अच्छइ मंडले ॥१९॥

व्याख्या—पापोपादानानि श्रुतानि पापोपादानश्रुतानि तेषु, प्रसजनानि प्रसङ्गास्तथाविधासक्तयः **पापश्रुतप्रसङ्गाः, तेष्वष्टाङ्गनिमित्तसूत्रादिविषयभेदादेकोनत्रिंशत्तेषु,** यतः—

[१] [२] [३] [४]
अट्ठनिमित्तंगाइं, दिव्वुप्पायंतलिक्खभोमं च ।
[५] [६] [७] [८]
अंगं सरं लक्खण-वंजण तिविहं पुणोक्किक्कं ॥१॥
[१६] [२५]
सुत्तं वित्ती तह वत्तियं च, पावसुयं अउणतीसविहं ।
[२५] [२६] [२७] [२८] [२९]
गंधव्वनट्टवत्थुं, आउं धणुवेयसंजुत्तं ॥२॥ [आ. नि. सं. गा.]

मोहो मोहनीयं तिष्ठति निमित्ततया वर्त्तते एष्विति **मोहस्थानानि** त्रिंशत् तेषु, यथा—

[१]वारिमज्झेवगाहित्ता, तसे पाणे य हिंसइ ।
[२]छाएउ मुहं हत्थेणं, अंतोणायं गलेरवं ॥१॥

[३]सीसावेढेण वेढत्ता, संकिलेसेण मारए ।
[४]सीसंमि जे य आहंतुं, दुहमारेण हिंसए ॥२॥

[५]बहुजणस्स नेयारं, दीवं ताणं च पाणिणं ।
[६]साहारणे गिलाणंमि, पहू किच्चं न कुव्वई ॥३॥

[७]साहुं अकम्मधम्माओ, जो भंसिज्ज उवट्ठियं ।
[८]नेयाउयस्स मग्गस्स, अवगारंमि वट्टइ ॥४॥

[९]जिणाणं णंतनाणीणं, अवण्णं जो पभासए ।
आयरियउवज्झाए, खिंसए मंदबुद्धीए ॥५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

[१०]तेसिमेव य णाणीणं, सम्मं णो परितप्पइ ।
[११]पुणो पुणो अहिगरणं, उप्पाए [१२]तित्थभेयए ॥६॥

[१३]जाणं आहंमिए जोए, पउंजइ पुणो पुणो ।
[१४]कामे वमित्ता पत्थेइ, इहऽण्णभविए इ वा ॥७॥

[१५]अभिक्खं बहुसुएऽहं ति, जे भासंतऽबहुस्सुए ।
[१६]तहा य अतवस्सी उ, जे तवस्सि त्ति हं वए ॥८॥

[१७]जायतेएणं बहुजणं, अंतोधूमेण हिंसए ।
[१८]अकिच्चमप्पणा काउं, कयमेएण भासए ॥९॥

[१९]नियडुवहिपणिहीए, पलिउंचे सादिजोगजुत्ते य ।
[२०]बेइ सव्वं मुसं वयसि, [२१]अक्खीणझंझए सया ॥१०॥

[२२]अद्धाणंमि पवेसित्ता, जो धणं हरइ पाणिणं ।
[२३]वीसंभित्ता उवाएणं, दारे तस्सेव लुब्भइ ॥११॥

[२४]अभिक्खमकुमारे उ, कुमारेहं ति भासए ।
एवमबंभयारिं बंभयारि त्ति भासए ॥१२॥

[२५]जेणेविस्सरियं णीए, वित्ते तस्सेव लज्झए ।
[२६]तप्पहावुट्ठिए वावि, अंतरायं करेइ से ॥१३॥

[२७]सेणावइं पसत्थारं, भत्तारं वावि हिंसए ।
[२८]रट्ठस्स वावि णिगमस्स, नायगं सिट्ठिमेव वा ॥१४॥
[२९]अपस्समाणो पस्सामि, अहं देव त्ति वा वए ।
[३०]अवन्नेणं च देवाणं, महामोहं पकुव्वइ ॥१५॥

एवं तत्त्यागेन यो भिक्षुर्नित्यं यतते स संसारे न भ्राम्यति ॥१९॥ [आ.नि.सं.गा.]

सिद्धाइगुणजोएसु, तित्तीसासायणासु य ।
जे भिक्खू जयई निच्चं, से ण अच्छई मंडले ॥२०॥

व्याख्या—सिद्धिपदप्राप्तास्तेषामाद्यैः, आद्यसमय एवातिशायिभिर्गुणैः **सिद्धादि-गुणैः**, सिद्धातिशयगुणा वा संस्थानादिनिषेधरूपा एकत्रिंशत् यतः—

पडिसेहेण संठाणवण्णगंधरसफासवेए य ।
पणपणदुपणट्ठतिहा, इगतीसमकायसंगरूहा ॥१॥ [आ. नि. सं. गा.]

यद्वा-कंमे णव दरिसणंमि चत्तारि आउए पंच ।
आइम अंते सेसे दो दो खीणभिलावेण इगतीसं ॥ [आ. नि. सं. गा.]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तथा 'जोग'त्ति पदैकदेशे पदप्रयोगदर्शनात् **योगसङ्ग्रहाः**, यैर्योगाः शुभमनोवाक्कायव्यापाराः सम्यग् गृह्यन्ते स्वीक्रियन्ते ते द्वात्रिंशत्, यतः—

१आलोयणा २निरवलावे, ३आवईसु ४दढधम्मया ।
५अणिस्सिओवहाणे य, ६सिक्खा ७निप्पडिकम्मया ॥ [आ. नि./गा. १२७४]
८अण्णायया ९अलोभे य, १०तितिक्खा ११अज्जवे १२सुती ।
१३सम्मद्दिट्ठी १४समाही य, १५आयारे १६विणओवए ॥ [आ. नि./गा. १२७५]
१७धिती १८मती य १९संवेगे, २०पणिही २१सुविहि २२संवरे ।
२३अत्तदोसोवसंहारे, २४सव्वकामविरत्तया ॥ [आ. नि./गा. १२७६]
२५पच्चक्खाणे २६विउस्सग्गे, २७अप्पमाए २८लवालवे ।
२९झाणसंवरजोगे य, ३०उदए ३१मारणंतिए ॥ [आ. नि./गा. १२७७]
३२संगाणं च परिण्णा ३३य, ३४पायच्छित्तकरणे ३५इय ।
३६आराहणया ३७मरणंते, ३८बत्तीसं जोगसंगहा ॥ [आ. नि./गा. १२७८]

ततो द्वन्द्वे **सिद्धादिगुणयोगास्तेषु**, 'तेत्तीसासायणासु'त्ति—

त्रयस्त्रिंशत्सङ्ख्यास्वासातनास्वर्हदादिविषयासु, तत्रार्हतामासातना यथा—नासन् जिनाः, ज्ञानिनोऽथ कथमूढाः ? केवले सति किं धूपपुष्पच्छत्रादिभोग आहारश्च ? निर्दया वा उग्रव्रतोक्तेः, अत्रोत्तरं—अभूवन् जिनाः, अनन्यवाच्याऽविसंवादिमार्गदेशनाया अन्यथाऽनुपपत्तेः, भोग्यफलकर्मण एवार्हन् भुङ्क्ते, तीर्थकृन्नामकर्मोदयादेव ऋद्धिः, वेद्यकर्ममात्रभावादाहारं च भुङ्क्ते, कर्मरोगनाशाय क्रियौषधं च कृपयोचे इत्यादि ज्ञैर्ज्ञेयं ।१। सिद्धानां तु आसातना-न सन्ति सिद्धाः, निश्चेष्टानां कथं सुखं ? शुभाऽशुभज्ञाने रागद्वेषौ स्तः, एकसमये ज्ञानदर्शने किं न ? इत्यादि । अत्रोत्तरं—सन्ति सिद्धाः, आबालगोपालसिद्धकर्मक्षयाऽन्यथानुपपत्तेः, शेषे उत्तरे अकर्मत्वाज्जीवस्वाभाव्याच्च ।२। आचार्याणामासातना त्वित्थं—परेभ्यो वैयावृत्त्यमुपदिशन्ति, स्वयं तु सुखशीलाः, यद्वा—

डहरो अकुलीणो त्ति य, दुम्मेहो दमगमंदबुद्धि त्ति ।
अविप्पलाभलद्धी, सीसो परिभवइ आयरियं ॥१॥ [ ]

अत्रोत्तरं—[१]**डहरो वि नाणवुड्ढो, अकुलीणो त्ति य गुणालओ किह णु ॥**
दुम्मेहाईण वित्ते, भणंतसंताइं दुम्मेहा ॥१॥ [ ]

---

१. डहरो लघुरपि ज्ञानवृद्धः, यद्यकुलीनस्तदा कथं गुणालयः ? ।
दुर्मेधा गुरोर्दुर्मेधत्वादीन्यसंति दूषणानि भणन्ति ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जाणंति न वि य एवं, निद्धम्मा मोक्खकारणं नाणं ।
निच्चं पगासयंता, वेयावच्चाइं कुव्वंति ॥१॥ [ ]

(ज्ञानं प्रकाशयन्तः परैर्वैयावृत्त्यादि कारयन्तो नृपवत् स्वयमेव कुर्वन्तः सन्ति ।)

तथा—**छट्ठट्ठमदसमदुवालसेहिं, अबहुस्सुयस्स जा सोही ।**
तत्तो बहुतरियगुणा, हवइ जिमियस्स नाणस्स ॥३॥ [ ]

एवं उपाध्यायानामपि ।४। साधूनां तु अन्यप्रेरणया कर्मबन्धः, तथा मिथो न सहन्ते, तत एव विहारं कुर्युः, अन्यथैकत्र तिष्ठेयुः, अत्वरितगतयः, श्वान इव पृथग् भुञ्जन्ते, विरूपवेषाः, अत्रोत्तरं—साधवोऽकषायत्वादप्रमत्तत्वात् सर्वत्र दोषहीनाः ॥५॥ एवं साध्वीनामपि-साध्वीनां कलहो, बहूपकरणता, यद्वा साधूनां साध्व्य उपद्रवः, अत्रोत्तरं—विधिना साधूनां निर्वाहयतां साध्व्यो नोपद्रवः ।६। तथा श्राद्धानां श्राद्धीनां सारम्भाणां कुतः सुगतिः ? अत्रोत्तरं—तेऽप्याराधका देशविरत्यादिनाऽर्हद्धर्मार्गद्वयस्योक्तेः ।७।८। देवानां तु अविकुर्व्य किञ्चित् कर्त्तुमशक्ताः, कामगर्द्दभा वाऽनिमेषा वा, अनुत्तरसुरा वा निश्चेष्टाः, सामर्थ्ये वा सति कथं तीर्थोन्नतिं न कुर्युः ? अत्रोत्तरं—देवगतिस्वाभाव्यात्, तथा यद्यपि कालस्वाभाव्यादत्रोन्नतिं न कुर्युः, तथाऽन्यत्राऽधुनापि न कुर्युः ।९।१०। इहपरलोकासातना लोकद्वयविरुद्धाचरणेन ।११।१२। धर्मस्य-यथा प्राकृतबद्धशास्त्रोक्तो धर्मः, को वेद केनोक्तः ? किं क्रियया दानहीनया ? अत्रोत्तरम्—

बालस्त्रीमूढमूर्खाणां नृणां चारित्रकाङ्क्षिणां ।
अनुग्रहार्थं तत्त्वज्ञैः, सिद्धान्तः प्राकृतः कृतः ॥१॥ [ ]

संस्कृतज्ञमिथ्यादृग्बोधनार्थं च केवलोक्तश्च, अविसंवादवचनान्यथाऽनुपपत्तेः, तथा दानेष्व-भयदानान्नान्यदधिकं, तस्य चार्हद्धर्मत्वात्, यतः—

दानमौरभ्रिकेणापि, चाण्डालेनापि दीयते ।
येन वा तेन वा शीलं, न शक्यमभिरक्षितुं ॥१॥ [ ]

दानेन भोगानाप्नोति, यत्र तत्रोपपद्यते ।
शीलेन भोगान् स्वयं च, निर्वाणं चाधिगच्छति ॥२॥ [सु.अ.१०।१०]

ततोऽर्हद्धर्मः शीलादिमयः ।१३। लोकस्य सप्तद्वीपमयस्य सकर्तृत्वं ब्रह्मेश्वरादिकर्तृत्वमिति जीवत्वादि भाषायां आसातना ।१४। प्राणास्त्रसा व्यक्तश्वासत्वात्, भूताः स्थावरा भवन्ति भूता भविष्यन्ति इति च व्युत्पत्तेः, जीवाः सायुःकर्माणः सर्वे भवस्थाः सत्वा सिद्धा भवस्थाश्च, तत्रासातना विपरीतप्ररूपणादिना, तथा ह्यङ्गुष्ठपर्वमात्रो द्वीन्द्रियाद्यात्मा,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पृथ्व्याद्यास्त्वजीवा एव, स्पन्दनादिचैतन्यकार्याऽनुपलब्धेः, जीवाः क्षणिका इति सिद्धा न सन्ति, विध्यातदीपकल्पो मोक्ष इति । अत्रोत्तरं—देहमात्र आत्मा, सुखदुःखादितदभिन्नकार्योपलब्धेः, न दीपादिना व्यभिचाराः, तेजस्कायस्य कार्यव्यापकत्वात्, पृथ्व्यादीनां त्वल्पचैतन्यत्वात् तत्कार्याऽनुपलब्धिः, जीवा एकान्तक्षणिका अपि न स्युः, निरन्वयनाशे उत्तरक्षणस्याऽनुत्पत्तेः, निर्हेतुकत्वादेकान्तनष्टस्याऽसदविशेषात्, तथाऽन्यैरप्युक्तम्—

नाऽसतो विद्यते भावो, नाऽभावो विद्यते सतः ।
उभयोरपि दृष्टान्तो, निश्चितस्तत्त्वदर्शिभिः ॥१५॥ [शा.स.१।७६]

कालस्य—कालाऽभावकालैकान्तस्थापनादिप्ररूपणया ॥१६॥ श्रुतस्य—अकाल-पाठादिना, यया श्रुतमधिष्ठितं तस्याः श्रुतदेवताया आसातना । यथा—नास्ति सा, अकिञ्चित्करी वा तामालम्ब्य प्रशस्तमनसः कर्मक्षयदर्शनात् ।१७।

वायणायरिओ नाम, जो उवज्झायसंदिट्ठो ।
उद्देसाइ करेइ, तस्स न दुक्ख सुहो बहु ॥१॥ [ ]

वन्दनादिना दापयेत् ।१८। अथ विशेषात् पठ्यमानस्य सूत्रस्य १४ आसातनायाह—यद्दीपरीतं भणितं सूत्रतोऽर्थतो वा १ व्यत्ययाग्रेडितं मौढ्याद् द्विरुक्तं २ हीनाक्षरं ३ अत्यक्षरं ४ पादेन पादैर्वा हीनं ५ विनयहीनं ६ घोषहीनं ७ योगहीनं ८, तत्र घोषो यत्र स्वरः, योगस्तपः, सुष्ठु अतिशयेन पाठकधारणातिरेकेण मया दत्तं, सुष्ठु अभियोगाद् गुरुणा वा दत्तं ९ मया त्वविनयेन प्रतीष्टं १०, अत्र यद् गुरोर्मां प्रतिपन्नोऽभून्मया च न प्रतीतस्तेन गुरूणां दानमपि शिष्यस्य मुधाकारणदोषायेत्यासातना १० अकाले स्वाध्यायः ११ कालेऽस्वाध्यायः १२ अस्वाध्यायिकेऽनध्याये स्वाध्यायितं १३ स्वाध्यायिके न स्वाध्यायितं १४ इत्यासातना, तथा रत्नाधिकस्य पुरत शिष्यागमादिषु वा यथा—

पुरओ पक्खासन्ने, [३]गंता [६]चिट्ठण [९]निसीयणाय[१०]मणे ।
[११]आलोयण [१२]पडिसुणणे, [१३]पुव्वालवणे य [१४]आलोए ॥१॥ [गु.भा./गा.३५]
तह [१५]उवदंस [१६]निमंतण, [१७]खद्धाय[१८]यणे तहा [१९]अपडिसुणणे ।
[२०]खद्धत्ति य [२१]तत्थ गए [२२]किं [२३]तुम [२४]तज्जाय [२५]नो सुमणे ॥२॥ [गु.भा./गा.३६]
[२६]नो सरसि [२७]कहं छेत्ता, [२८]परिसंभित्ता [२९]अणुट्ठियाए कहे ।
[३०]संथारपायघट्टण [३१]चिट्ठुच्चे [३२]समासणे यावि [३३] ॥३॥ [गु.भा./गा.३७]

आसु यो **भिक्षुर्नित्यं** सम्यक् **यतते**, सम्यक् श्रद्धानासेवनादिना **स संसारे न भ्राम्यति** ॥२०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अथ निगमयति—

इइ एएसु ठाणेसु, जे भिक्खू जयई सया ।
खिप्पं से सव्वसंसारा, विप्पमुच्चइ पंडिए ॥२१॥ त्ति बेमि

व्याख्या—इत्यमुना प्रकारेण **अत्राध्ययनप्रोक्तेषु असंयमादिस्थानेषु यो भिक्षुर्यतते सदा** यत्नं कुरुते, **स क्षिप्रं** शीघ्रं **सर्वसंसारात्** सर्वचतुर्गतिभ्रमणाद्विशेषेण **प्रमुच्यते** प्रमुक्तो भवतीति समाप्तौ, **ब्रवीमी**ति प्राग्वत् ॥२१॥

इति चरणविध्याख्यमेकत्रिंशाध्ययनमुक्तम् ॥३१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

द्वात्रिंशत्तमं प्रमादस्थानाख्यमध्ययनम् ॥

चरणं चाऽप्रमादिनः साधोः स्यात्, इति द्वात्रिंशं **प्रमादस्थानाख्यम**ध्ययनमाह–

अत्र निर्युक्तिः–

जाणगसरीरभविए, तव्वइरित्ते य मज्जमाईसु ।
निद्दाविगहकसाया विसएसु भावओ पमाओ ॥१॥ [उत्त. नि./गा.५२०]

वाससहस्सं उग्गं, तवं चरंतस्स उसभसामिस्स ।
जो सो पमायकालो, अहोरत्तं तु संकलिअं ॥२॥ [उत्त. नि./गा.५२३]

बारसवासे अहिए, तवं चरंतस्स वद्धमाणस्स ।
जो सो पमायकालो, अंतमुहुत्तं तु संकलिअं ॥३॥ [उत्त. नि./गा.५२४]

जेसिं तु पमाएणं, गच्छइ कालो निरत्थओ धम्मे ।
ते संसारमणंतं, हिंडंति पमायदोसेणं ॥४॥ [उत्त. नि./गा.५२५]

धर्मविषये प्रमादात्

तम्हा खलु प्पमायं, चइऊणं पंडिएण पुरिसेण ।
दंसणनाणचरित्ते, कायव्वो अप्पमाओ य ॥५॥ [उत्त. नि./गा.५२६]

अत्र सूत्रम्–

अच्चंतकालस्स समूलगस्स, सव्वस्स दुक्खस्स उ जो पमोक्खो ।
तं भासओ मे पडिपुन्नचित्ता, सुणेह एगंतहियं हियत्थं ॥१॥

व्याख्या–वस्तुनो हि द्वावन्तौ, आरंभक्षणो निष्ठा च, इहारम्भक्षणोऽन्तः, तमतिक्रान्तोऽत्यन्तोऽनादिकालो यस्य सोऽ**त्यन्तकालस्तस्य**, सह मूलेन कषायाऽविरतिरूपेण वर्त्तते इति समूलः, स एव **समूलकस्तस्य, सर्वस्य**, दुःखयतीति दुःखं संसारस्तस्य यः **प्रमोक्षोऽ**पगमस्तं भाषमाणस्य 'मे' मम, प्रतिपूर्णं विषयान्तराऽगमनेनाऽखण्डितं चित्तं येषां ते **प्रतिपूर्णचित्ताः**, एवंविधा हे भव्या ! इति शेषः, यूयं **शृणुत** ! एकाग्र्यं धर्मध्यानं, तस्मै हित**मेकाग्र्यहितं, एकान्तहितं** वा, **हित**स्तत्त्वतो मोक्ष**स्तदर्थम्** ॥१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

नाणस्स सव्वस्स पगासणाए, अण्णाणमोहस्स विवज्जणाए ।
रागस्स दोसस्स य संखएणं, एगंतसोक्खं समुवेइ मोक्खं ॥२॥

व्याख्या—ज्ञानस्य मत्यादेः **सर्वस्य प्रकाशकतया** निर्मलीकरणेन, **अज्ञानं** मत्यज्ञानादि, **मोहो** दर्शनमोहनीयं, अनयोः समाहारस्तस्य **विवर्जनया,** मिथ्याश्रुतश्रवणकुदृष्टिसङ्गत्यागादिना, **रागद्वेषयोः** कषायरूपत्वेन चारित्राघातकयोः **सङ्क्षयेण,** सम्यग्ज्ञानदर्शनचारित्रैरे**कान्तसौख्यं मोक्षं समुपैति** जीव इति शेषः, मोक्षो दुःखक्षयात् स्यात्, दुःखक्षयो रागद्वेषहान्या चेत्यर्थः ॥२॥

नन्वस्तु ज्ञानाद्यैर्दुःखप्रमोक्षः, अमीषां तु कः प्राप्तिहेतुः ? इत्याह—

तस्सेस मग्गो गुरुविद्धसेवा, विवज्जणा बालजणस्स दूरा ।
सज्झायएगंतनिसेवणा य, सुत्तत्थसंचिंतणया धिई य ॥३॥

व्याख्या—योऽयं प्राग् मोक्षोपाय उक्तस्**तस्यैष** वक्ष्यमाणो **मार्गः** प्राप्तिहेतुः, क इत्याह—**गुरवो** यथावच्छास्त्रार्थदेशकाः, **वृद्धाः** श्रुतपर्यायादिवृद्धास्**तेषां सेवा,** गुरुकुलवास इत्यर्थः, यतस्तत्रैव सुप्राप्याणि ज्ञानादीनि । उक्तञ्च—

नाणस्स होई भागी, थिरयरओ दंसणे चरित्ते य ।
धन्ना एव कहिं वि, गुरुकुलवासं न मुंचंति ॥१॥ [पञ्चा.११/गा.१६]

सत्यपि गुरुकुलवासे कुसङ्गाद्विनाश एवेत्याह—**विवर्जना बालजनस्य** पार्श्वस्थादे**र्दूराद्**रेण, पुनः **स्वाध्यायस्यैकान्तेने**काग्रचित्तेन **निषेवणा**ऽभ्यसनं, तत्राप्यनुप्रेक्षैव प्रधानेत्याह—**सूत्रार्थसञ्चिन्तनां,** तस्यामपि धृतिं विना न ज्ञानादिलाभ इत्याह—**धृतिश्चा**ऽनुद्विग्नत्वं धार्यं । एतानि पूर्वोक्तानि सर्वाण्यपि ज्ञानाप्तिकारणानि ॥३॥

एतानीच्छता पुनरियं क्रिया कार्या—

आहारमिच्छे मियमेसणिज्जं, सहायमिच्छे निउणत्थबुद्धिं ।
निकेयमिच्छेज्ज विवेगजोगं, समाहिकामे समणे तवस्सी ॥४॥

व्याख्या—आहारमिच्छेन्मितमेषणीयं, अपेर्गम्यत्वादिच्छेदपीदृगेव, आदानभुक्ती तु दूरे एव, **सहायमिच्छेद्** गच्छान्तर्वर्त्ती सन्, निपुणार्थेषु जीवादिषु बुद्धिरस्येति **निपुणार्थबुद्धिस्तं,** जीवाऽजीवादितत्त्वज्ञं शिष्यादिकं सहायकारकमिच्छेत् । **निकेतनमा**श्रय**मिच्छेद्विवेकयोग्यं** स्त्र्याद्यसंसर्गोचितं, **समाधिकामो** ज्ञानादीच्छुः **श्रमणस्तपस्वी** ॥४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ईदृक्सहायाऽप्राप्तौ तु–

ण वा लभिज्जा निउणं सहायं, गुणाहियं वा गुणओ समं वा ।
इक्को वि पावाइं विवज्जयंतो, विहरिज्ज कामेसु असज्जमाणो ॥५॥

व्याख्या–न, वा चेदर्थे, ततश्च **न चेल्लभेत निपुणं** बुद्धिमन्तं **गुणाधिकं** ज्ञानादि-गुणैरधिकं, वा **गुणतो** विनयादिगुणानाश्रित्यात्मनः **समं** तुल्यं सहायं, **वा** विकल्पे, तदा **एकोऽप्य**सहायोऽपि **पापानि** पापहेत्वनुष्ठानानि **विवर्जयन् विहरेत्, कामेषु असजन्** प्रतिबन्धमकुर्वन्, तथाविधगीतार्थविषयं चेदं अन्यथैकाकिविहारस्यागमे निषेधात्, एतदुक्तौ च **'मध्याऽदाने आद्यन्ताऽदानं'** इति न्यायेनाहारवसत्योरप्यपवादो ज्ञेयः ॥५॥

दुःखप्रमोक्षहेतुज्ञप्त्यै मोहोत्पत्तिमाह–

जहा य अंडप्पभवा बलागा, अंडं बलागप्पभवं जहा य ।
एमेव मोहाययणं खु तण्हा, मोहं च तण्हाययणं वयंति ॥६॥

व्याख्या–यथा च अण्डप्रभवा बलाका पक्षिविशेषा, **अण्डं बलाकाप्रभवं यथा च,** यथा अनयोर्मिथ उत्पत्तिस्थानता, **एवमेव** मोहोऽज्ञानमायतनमुत्पत्तिस्थानं यस्याः सा **मोहायतनरूपा तृष्णा, खु**ः एवार्थे, **मोहं च तृष्णायतनं वदन्ति** जिनाः तृष्णा हि सति वस्तुनि मूर्छा, सा च रागप्रधाना, अतस्तया राग उपलक्ष्यते, सति च तत्र द्वेषोऽपि स्यात्, इति तृष्णाग्रहणेन रागद्वेषवुक्तावेव, तदुत्कटतायां च सिद्ध एव मोहः ॥६॥

अथैषां दुःखहेतुमाह–

रागो य दोसो वि य कम्मबीयं, कम्मं च मोहप्पभवं वयंति ।
कम्मं च जाईमरणस्स मूलं, दुक्खं च जाईमरणं वयंति ॥७॥

व्याख्या–रागश्च मायालोभात्मको, **द्वेषोऽपि च** क्रोधमानात्मकः कर्मणो बीजं कारणं **कर्मबीजं कर्म मोहप्रभवं च** मोहकारणं **वदन्ति, कर्म च जातिमरणस्य** जन्मजरामरणानां **मूलं, जातिं मरणं च, तु**रेवार्थे **दुःखं वदन्ति** विज्ञाः यतः–

जायमाणस्स जं दुक्खं, मरणस्स य जं पुणो ।
तेण दुक्खेण संततो, न सरइ जाइमप्पणो ॥१॥ [दे.कु./गा.१७] ॥७॥

ततः–

दुक्खं हयं जस्स ण होइ मोहो, मोहो हओ जस्स ण होइ तण्हा ।
तण्हा हया जस्स ण होइ लोभो, लोभो हओ जस्स ण किंचणाइं ॥८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—दुःखं हतमिव **हतं यस्य** तस्य न **भवति मोहः, यस्य च मोहो हतस्तस्य न स्यात्तृष्णा, यस्य च तृष्णा हता** तस्य **लोभो न भवति, यस्य च लोभो हतस्तस्य न किञ्चनानि** द्रव्याणि सन्ति । सत्सु हि तेषु स्यादभिकाङ्क्षा, तद्रूप एव च लोभो, यत्तु तत्सद्भावेऽपि लोभहननं **भरतादी**नां तत्कादाचित्कम् ॥८॥

दुःखहेतुमोहादीनां सविस्तरमुन्मूलनोपायं विवक्षुराह—

रागं च दोसं च तहेव मोहं, उद्धत्तुकामेण समूलजालं ।
जे जे उवाया पडिवज्जियव्वा, ते कित्तइस्सामि अहाणुपुव्विं ॥९॥

व्याख्या—रागं द्वेषं तथैव मोहं चोद्धर्त्तुकामेनोन्मूलयितुमिच्छता, सह मूलानां तीव्रकषायादीनां जालेन समूहेन वर्त्तते इति **समूलजालं** यथास्यात्तथा, **ये ये उपायास्त**दुद्धरणहेतवः **प्रतिपत्तव्यास्तान् कीर्त्तयिष्याम्यथानुपूर्व्या** । (पाठान्तरे—'**अपाया परिवज्जियव्वा' अपाया**स्तदुद्धरणप्रवृत्तानां विघ्नकारिणोऽनर्थाः **परिवर्जयितव्याः**) ॥९॥

यथा—

रसा पकामं ण वि सेवियव्वा, पायं रसा दित्तिकरा णराणं ।
दित्तं च कामा समभिद्दवंति, दुमं जहा साउफलं व पक्खी ॥१०॥

व्याख्या—रसाः क्षीरादिविकृतयः **प्रकाममत्यर्थं न निषेवितव्या** नासेव्याः, प्रकामग्रहणेन वातादिक्षोभे रसा अपि सेव्या एव, निःकारणं नैव सेव्याः, किमेवमुच्यते ? इत्याह—**प्रायो रसा** निषेव्यमाणा **दृप्तिकरा** धातूद्रेककरणशीलाः (पाठान्तरे-'**दित्तकरा' वा-दीप्तं** दीपनं मोहानलज्वलनं **तत्करणशीलाः, दीप्तकरा** वा) **नराणां** नृस्त्रीक्लीवानां मनुजानां, **दृप्तं** नरं **च** पुनः, जातित्वाद्बहुवचनप्रक्रमेऽप्येकवचनं, **कामाः समभिद्रवन्ति** समीपमयान्ति, **द्रुमं यथा स्वादुफलं पक्षिण इव,** इह द्रुमोपमो नरः स्वादुफलतुल्यं दृप्तत्वं दीप्त्वं वा, पक्षितुल्याः कामाः ॥१०॥

रसप्रकामे दोष उक्तः, अथ सामान्येन भोजनप्रकामे दोषमाह—

जहा दवग्गी पउरिंधणे वणे, समारुओ णोवसमं उवेइ ।
एविंदियग्गी वि पगामभोइणो, ण बंभयारिस्स हियाय कस्सइ ॥११॥

व्याख्या—यथा दवाग्निः प्रचुरेन्धने वने समारुतः सवायुर्नोपशममुपैति, **एवं** दवाग्निवत् इन्द्रियं इन्द्रियजनितो राग एवाग्निर्धर्मतरुदाहकत्वात् **इन्द्रियाग्निः,** सोऽपि **प्रकामभोगिनो**ऽत्याहारस्य, वायुप्रायेन तदुदरिकत्वात्, **ब्रह्मचारिणः कस्याप्य**तिसुस्थितस्यापि **न हिताय स्यात्** ॥११॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

रागमुद्धर्त्तुकामस्य त्याज्यमुक्त्वा कर्त्तव्यमाह–

विवित्तसेज्जासणजंतियाणं, ओमासणाणं दमिइंदियाणं ।
न रागसत्तू धरिसेइ चित्तं, पराइओ वाहिरिवोसहेहिं ॥१२॥

व्याख्या–विविक्ता स्त्र्यादिविकला शय्या वसतिस्तस्यामासनमवस्थानं, तेन यन्त्रिताः, तेषां **विविक्तशय्यासनयन्त्रितानां अवमाशनानां** ऊनोदरिकाभाजां **दमितेन्द्रियाणां**, एवंविधानां साधूनां चित्तं मनो **रागशत्रुर्न धर्षयति**, न पराभवति । क इव ? **औषधैर्गडूच्यादिभिः** पराजितः पराभूतो **व्याधिः** कुष्ठादिर्देहमिव ॥१२॥

विविक्तविपर्ययदोषमाह–

जहा बिरालावसहस्स मूले, ण मूसगाणं वसही पसत्था ।
एमेव इत्थीनिलयस्स मज्झे, न बंभयारिस्स खमो निवासो ॥१३॥

व्याख्या–**यथा बिडालावसथस्य** मार्जाराश्रयस्य **मूले** समीपे **न मूषकाणां वसतिः** स्थितिः **प्रशस्ता**ऽवश्यं तत्र तेषामपायः, **एवमेव** स्त्रीणां पण्डकादीनां निलयो निवासः **स्त्रीनिलयः, तस्य मध्ये ब्रह्मचारिणो निवासो न क्षमो** न युक्तो ब्रह्मचर्यबाधनात् ॥१३॥

विविक्तेऽपि कदाचित् स्त्रीसम्पाते यत् कर्त्तव्यं तदाह–

न रूवलावण्णविलासहासं, ण जंपियं इंगिय पेहियं वा ।
इत्थीण चित्तंसि निवेसइत्ता, दट्ठुं ववस्से समणे तवस्सी ॥१४॥

व्याख्या–न नैव रूपं, लावण्यं, विलासान् विशिष्टनेपथ्यरचनाद्यान्, हासं च, एषां समाहारे **रूपलावण्यविलासहासं न जल्पितं** मन्मनोल्लापादि, **इङ्गितमङ्गभङ्गादि, वीक्षितं** कटाक्षवीक्षितादि, **वा** समुच्चये, **स्त्रीणां** सम्बन्धि **चित्ते निवेश्या**ऽहो सुन्दरमिदमिति विकल्पतः स्थापयित्वा **द्रष्टुं** इन्द्रियविषयतां नेतुं **व्यवस्येद**ध्यवस्येत् । अत्र निवेश्येत्युक्त्वा रागाद्याशयं विनैव तद्दर्शनमपि न दोषाय ॥१४॥

किमेवमुपदिश्यते इत्याह–

अदंसणं चेव अपत्थणं च, अचिंतणं चेव अकित्तणं च ।
इत्थीजणस्सारियज्झाणजुग्गं, हियं सया बंभवए रयाणं ॥१५॥

व्याख्या–**अदर्शनं, चः समुच्चये, एव** निश्चये, तथाऽ**प्रार्थनम**नभिलषणं, **अचिन्तनं** रूपाद्यपरिभावनं, **अकीर्त्तनं** नाम्ना गुणैश्च **स्त्रीजनस्य**, एवंविधमार्यं यद्ध्यानं धर्म्यादि, तस्य योग्यं तद्धेतुत्वेनोचितं **आर्यध्यानयोग्यं हितं** पथ्यमस्ति [**सदा** सर्वकालं] **ब्रह्मव्रते** ब्रह्मचर्ये **रतानां** मुनीनामिति ॥१५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ननु विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः, तत् किं विविक्त-शयनाद्यैरित्याशङ्क्याह–

कामं तु देवीहिं विभूसियाहिं, न चाईया खोभइउं तिगुत्ता ।
तहावि एगंतहियं ति णच्चा, विवित्तवासो मुणीणं पसत्थे ॥१६॥

व्याख्या–अनुमतमेवैतद्यदुत **देवीभिरप्यास्तां** मानुषीभिः, **भूषिताभिर्न** नैव 'चाइय'त्ति **शकिताः क्षोभयितुं** चालयितुं संयमात्, तिसृभिर्गुप्तिभिर्गुप्ता**स्त्रिगुप्ता** मुनयः, **तथापि एकान्तहितमिति ज्ञात्वा,** कोऽर्थः ? किल योगिनोऽपि तत्सङ्गात् क्षुभ्यन्ति, येऽपि च न भुक्ष्यन्ति तेऽप्यवर्णादिभाजः स्युः, अतो **विविक्तस्थानवासो मुनीनां प्रशस्तः,** अन्तर्भावितण्यर्थतया प्रशंसितोऽर्हदाद्यैः ॥१६॥

यतः–

मुक्खाभिकंखिस्स वि माणवस्स, संसारभीरुस्स ठियस्स धम्मे ।
नेयारिसं दुत्तरमत्थि लोए, जहित्थिओ बालमणोहराओ ॥१७॥

व्याख्या–मोक्षाधिकाङ्क्षिणोऽपि मानवस्य संसारभीरोः, धर्मे श्रुतधर्मादौ स्थितस्यापि **नचैवैतादृशमीदृशं दुस्तरं** दुरतिक्रममन्यद**स्ति लोके, यथा स्त्रियो बाल-मनोहरा** निर्विवेकिचित्ताक्षेपिण्यो दुस्तराः सन्ति ॥१७॥

स्त्रीसङ्गातिक्रमे गुणमाह–

एए य संगे समइक्कमित्ता, सुहुत्तरा चेव भवंति सेसा ।
जहा महासागरमुत्तरित्ता, णई भवे अवि गंगासमाणा ॥१८॥

व्याख्या–एतांश्च सङ्गान् सम्बन्धान् स्त्रीविषयान् **समतिक्रम्य शेषा** द्रव्यादिसङ्गाः **सुखोत्तरा भवन्ति** । सर्वसङ्गानां रागरूपत्वे समानेऽपि स्त्रीसङ्गानामेवैतेषु प्राधान्यात्, दृष्टान्तमाह–**यथा महासागरं** स्वयम्भूरमणसमुद्र**मुत्तीर्य** पश्चात् **गङ्गासमानापि महानदी,** आस्तां लघुनदी सुखोत्तारैव **भवेत्** ॥१८॥

रागस्य दुःखहेतुत्वं दर्शयति–

कामाणुगिद्धिप्पभवं खु दुक्खं, सव्वस्स लोगस्स सदेवगस्स ।
जं काइयं माणसियं च किंचि, तस्संतगं गच्छइ वीयरागो ॥१९॥

व्याख्या–कामेष्वनुगृद्धिः सतताभिकाङ्क्षां, **तत्प्रभवमेव** 'खु' **निश्चयेन दुःखं सर्वस्य लोकस्य** प्राणिगणस्य **देवैः सहितस्य, यत् कायिकं** रोगादि, **मानसिकं**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चेष्टवियोगादिजन्यं **किञ्चिदल्पमपि, तस्य** द्विविधस्यापि दुःखस्यान्तमेवान्तकं पर्यन्तं **गच्छति वीतरागो** विगतकामेच्छः ॥१९॥

ननु कामाः सुखरूपास्तत्कथं तत्प्रभवमेव दुःखमुच्यतेऽत आह–

जहा य किंपायफला मणोरमा, रसेण वन्नेण य भुज्जमाणा ।
ते खुद्दए जीविअ पच्चमाणा, एओवमा कामगुणा विवागे ॥२०॥

व्याख्या–यथा चेति यथैव **किम्पाकफलानि**, अपेर्गम्यत्वात्, **मनोरमाण्यपि रसेन वर्णेन, चाद्** गन्धादिना च, **भुज्यमानानि,** 'ते' इति **तानि** लोकप्रतीतानि **क्षुद्रके** सोपक्रमे जीविते **पच्यमानानि** विपाकावस्थाप्राप्तानि मरणान्तदुःखदायीनि यद्वाऽार्षत्वात् **क्षोदयन्ति** नाशयन्ति **जीवितं पच्यमानानि** विपाकावस्थाप्राप्तानि, **एतदुपमा** विपाकदारुणतासाम्ये, तत्तुल्याः **कामगुणा विपाके** फलदानकाले ॥२०॥

अथ सद्वेषरागस्योद्धरणोपायमभिधित्सुर्दमितेन्द्रियत्वं सिंहावलोकितन्यायेनाह–

जे इंदियाणं विसया मणुन्ना, न तेसु भावं निसिरे कयाई ।
न यामणुस्सेसु मणं पि कुज्जा, समाहिकामे समणे तवस्सी ॥२१॥

व्याख्या–ये इन्द्रियाणां विषया मनोज्ञाः, न तेषु, अपेर्गम्यत्वाद्भावमपि अभिप्रायमपि इन्द्रियाणि प्रवर्त्तयितुं, किं पुनस्तत्प्रवर्त्तनं ? **निसृजेत्** कुर्यात्, **नैवाऽमनोज्ञेषु मनोऽपि** सद्वेषं चित्तमपि **कुर्यात्,** अत्रापीन्द्रियाणि प्रवर्त्तयितुं, अप्यर्थः प्राग्वत्, **समाधिश्चित्तैकाग्र्यं**, स च रागद्वेषाऽभाव एवेति **तत्कामो** रागद्वेषोद्धरणाभिलाषी **श्रमणस्तपस्वी** ॥२१॥

अथेन्द्रियेषु तत्प्रवर्त्तने रागद्वेषाऽनुद्धरणे च यो दोषस्तं प्रत्येकमिन्द्रियाणि, तत्प्रसङ्गतो मनश्चाश्रित्याह–

चक्खुस्स रूवग्गहणं वयंति, तं रागहेउं तु मणुन्नमाहु ।
तं दोसहेउं अमणुन्नमाहु, समो उ जो तेसु स वीयराओ ॥२२॥

व्याख्या–चक्षुषो लक्षणं **रूपग्रहणं** तीर्थङ्करा वदन्ति, रूपं वर्णः संस्थानं वा, तद् गृह्यतेऽनेनेति रूपग्रहणं चक्षुरिन्द्रियस्यैतल्लक्षणं, 'तं'इति **तद्रूपं रागहेतुकं मनोज्ञमाहुः,** यस्मिन् रूपे दृष्टे राग उत्पद्यते तद्रूपं मनोज्ञमाहुः, **तदेव** रूपं **द्वेषहेतुकममनोज्ञमाहुः,** यस्मिन् रूपे दृष्टे द्वेष उत्पद्यते तद्रूपममनोज्ञमित्यर्थः, यः साधु**स्तेषु** मनोज्ञाऽमनोज्ञेषु रूपेषु **समः** सदृशवृत्तिः स्यात् **स** साधु**र्वीतराग** उच्यते ॥२२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ननु यदि रूपमेव रागद्वेषकृत्, तदा रागद्वेषजयार्थिनो रूपाशा चाचिन्त्यैवास्तु, किं चक्षुर्निग्रहेण ? अत्रोत्तरम्–

रूवस्स चक्खुं गहणं वयंति, चक्खुस्स रूवं गहणं वयंति ।
रागस्स हेउं समणुन्नमाहु, दोसस्स हेउं अमणुन्नमाहु ॥२३॥

व्याख्या–**रूपस्य चक्षुः**, गृह्णातीति **ग्रहणं**, तथा **चक्षुषो रूपं** गृह्यत इति **ग्रहणं** ग्राह्यं **वदन्ति**, एवं रूपचक्षुषोर्ग्राह्यग्राहकभावदर्शनतः परस्परमुपकार्योपकारभाव उक्तः, ततो यथा रूपं रागद्वेषकारणं तथा चक्षुरपीत्युक्तं स्यात्, अत एवाह–**रागस्य हेतुं** चक्षुः, सह मनोज्ञेन ग्राह्येण रूपेण वर्त्तते इति **समनोज्ञं आहुर्ब्रुवते**, **अमनोज्ञरूपग्राहकं** च **द्वेषस्य हेतुं कथयन्ति** ॥२३॥

रूवेसु जो गिद्धिमुवेइ तिव्वं, अकालियं पावइ सो विणासं ।
रोगाउरे से जह वा पयंगे, आलोगलोले समुवेइ मच्चुं ॥२४॥

व्याख्या–**रूपेषु यो गृद्धिं** गार्द्धर्यमुपैति तीव्रां, उक्तञ्च–

> **इच्छा मूर्छा कामः, स्नेहो गार्द्धर्यं ममत्वमभिनन्दः ।**
> **अभिलाष इत्यनेकानि, रागपर्यायवचनानि ॥१॥** [प्र.र./श्लो.१८]

अकाले भव**मकालिकं**, यथास्थित्यायुरुपक्रमादर्वागेव **प्राप्नोति स विनाशं रोगातुरः** सन् (पाठान्तरे–**रागातुरः** सन्) **स** इति लोकप्रतीतो, **वा** एवार्थे, **यथैव पतङ्गः** शलभः, आलोको दीपशिखादर्शनं, तत्र **लोलो** लम्पटः सन् **समुपैति मृत्युम्** ॥२४॥

जे यावि दोसं समुवेइ तिव्वं, तंसि क्खणे से उ उवेइ दुक्खं ।
दुद्दंतदोसेण सएण जंतू, न किंचि रूवं अवरज्झइ से ॥२५॥

व्याख्या–**यश्च** यस्तु **अपि**, यस्मिन्नित्यत्र योज्यं, **दोषं** द्वेषं रूपेषु **समुपैति तीव्रं, तस्मिन्नेव क्षणे स दुःखमुपैति** चित्तसन्तापादिकं प्राप्नोति । न तु रूपमेव दुःख-हेतुरित्याह–दुष्टदमनं दुर्दान्तं चक्षुस्तदेव दोषस्तेन **दुर्दान्तदोषेण स्वकेन** जन्तुर्दुष्यति, **न किञ्चित्** स्वल्पमपि **रूपम**मनोज्ञ**मपराध्यति** दुष्यति 'से' **तस्य** जन्तोः ॥२५॥

रागद्वेषयोर्द्वयोरनर्थहेतुत्वमुक्त्वा द्वेषस्य रागहेतुकत्वान्महाऽनर्थमूलतेति तत्त्यागमाह–

एगंतरत्तो रुइरंसि रूवे, अतालिसे से कुणई पओसं ।
दुक्खस्स संपीलमुवेइ बाले, ण लिप्पई तेण मुणी विरागे ॥२६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या–**एकान्तरक्तो** यो **रुचिरे रूपे**, 'अतालिसे'त्ति मागधदेश्युक्त्याऽतादृशेऽसुन्दरे **स करोति प्रदोषं** द्वेषं, **सुन्दरीनन्दन** इव सुरसुन्दरीं दृष्ट्वा सुन्दर्यां । यथा स सुन्दर्यां रक्तोऽपि भ्रातृसाधुना विद्यातो मेरुं नीयमानो वानरवानरीकिन्नरकिन्नरीदेवदेवीरूपाणि स्वप्रियाया अधिकानि दृष्ट्वा दुःखी सन् देवीकृते प्रियां त्यक्त्वाऽदीक्षि । **दुःखस्य संपीडं** सङ्घातं, समिति भृशं पीडां सम्पीडामुपैति **बालो**ऽज्ञानी, परं **न लिप्यते तेन** द्वेषकृतदुःखेन **मुनिर्विरागः** ॥२६॥

रागस्यैवाश्रवनिमित्तस्य दुःखकृत्त्वं सूत्रषट्केनाह–

रूवाणुगासाणुगए य जीवे, चराचरे हिंसइ णेगरूवे ।
चित्तेहिं ते परितावेइ बाले, पीलेइ अत्तट्ठगुरू किलिट्ठे ॥२७॥

व्याख्या–रूपं मनोज्ञमनुगच्छतीति रूपानुगा, सा चासावाशा च **रूपानुगाशा** रूपविषयोऽभिलाषः, तदनुगतश्च **जीवांश्चराऽचरान्** त्रसस्थावरान् **हिनस्त्यनेकरूपान्** , जात्यादिभेदादनेकविधान् काञ्चित् , गमनागमनभूषणवस्त्रादिसौधादिपुष्पादिवल्गनादिसन्नानाद्यैः, तथा **चित्रैर**नेकप्रकारैः स्वपरकायशस्त्राद्युपायैः [**तानि**ति चराचरजीवान्] **परितापयति** दुःखयति **बालो**ऽज्ञोऽन्यांश्च **पीडयति** एकदेशे दुःखोत्पादनेन, **आत्मार्थं गुरुः** स्वप्रयोजननिष्ठः, **क्लिष्टो** रागबाधितः ॥२७॥

अन्यच्च–

रूवाणुराए ण परिग्गहेण, उप्पायणे रक्खणसंनियोगे ।
वए विओगे य कहं सुहं से, संभोयकाले य अतत्तिलाभे ॥२८॥

व्याख्या–**रूपेऽनुरूपतो**ऽनुरागस्तस्मिन् सति, **णः** पूर्त्तौ **परिग्रहेण** मूर्छात्मकेन हेतुना, **उत्पादने** उपार्जने, **रक्षणं** चाऽपायेभ्यः, सन्नियोगश्च स्वपरप्रयोजनेषु सम्यग्व्यापारणं, समाहारे **रक्षणसन्नियोगस्तस्मिन्** , **व्यये** विनाशे, **वियोगे** विरहे, सर्वत्र रूपस्येति ज्ञेयं । **क्व सुखं** ? सर्वत्र दुःखमेवेत्यर्थः, 'से' **तस्य** जन्तोः, रूपवद् गजाश्वादिकलत्राद्युत्पादनादिदुःखमेव जन्तुराप्नोतीति भावः, **सम्भोगकाले** चोपभोगप्रस्तावे चाऽतृप्तिलाभे तृप्तिप्राप्त्यभावे सति क्व सुखं ? बहुधापि रूपदर्शने रागिणां न तृप्तिरस्ति उत्तरोत्तरेच्छया हि खिद्यते एव रागी । यतः–

न ज्ञातकामः कामाना-मुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव, भूय एवाभिवर्द्धते ॥१॥ [ ] २८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

रूवे अतित्ते य परिग्गहंमि, सत्तोवसत्तो ण उवेइ तुट्ठिं ।
अतुट्ठिदोसेण दुही परस्स, लोभाविले आययई अदत्तं ॥२९॥

व्याख्या—**रूपे अतृप्तश्च, परिग्रहे** च तद्विषयमूर्छायां च **सक्तः** सामान्येनाऽऽसक्तिमान्, **उपसक्तश्च** गाढमासक्तः, **सक्तश्च** पूर्वं, **उपसक्तश्च** पश्चात्, एवंविधो जनो **नोपैति तुष्टिं**, तथा चाऽतुष्टिरेव **दोषः, तेन च दुःखी**, यदि ममेदमिदं च रूपवद्वस्तु स्यादित्याकाङ्क्षातोऽतिशयदुःखवान्, **परस्य** सम्बन्धिरूपवद्वस्तु**लोभाविलो** लोभकलुषः, यद्वा परेषां स्वं परस्वं यद्यद्रूपवद्वस्तु, तस्मिन् यो लोभो गार्द्ध्यं, तेनाविलः **परस्व-लोभाविलः** सन् **आदत्ते** गृह्णाति **अदत्तं** परकीयम् ॥२९॥

दोषान्तरमस्याह—

तण्हाभिभूयस्स अदत्तहारिणो, रूवे अतित्तस्स परिग्गहे य ।
मायामुसं वड्ढइ लोभदोसा, तत्थावि दुक्खा ण विमुच्चई से ॥३०॥

व्याख्या—**तृष्णाभिभूतस्य**, अदत्तं हर्तुंशीलस्याऽदत्तहारिणो **रूपे** रूपविषये **परिग्रहेऽतृप्तस्य, च** एवार्थे, मायया प्रधाना मृषाऽलीकभाषा **मायामृषा वर्द्धते**, कुत इत्याह—**लोभदोषात्**, लुब्धो ह्यन्यस्वमादत्ते, लात्वा च तद्गोपनपरो मायामृषां वक्ति, **तत्र** मृषोक्ता**वपि स दुःखान्न विमुच्यते**, यतस्तस्यैवं मृषा वदतोऽपि, कदाचिदपि मां कोऽपि वेत्स्यतीति तन्मनसि चिन्तादुःखमेव भवति। इह रागाधिकारे सर्वत्र लोभोक्तिः रागेऽपि लोभांशस्यैवाति-दुष्टताज्ञप्त्यै ॥३०॥

दुःखाविमुक्तिं भावयति—

मोसस्स पच्छा य पुरत्थओ य, पओगकाले य दुही दुरंते ।
एवं अदत्ताणि समाययंतो, रूवे अतित्तो दुहिओ अणिस्सो ॥३१॥

व्याख्या—रूपाकृष्टो जनो रुचिरं वस्तु दृष्ट्वा, अदत्तं च तल्लात्वाऽपलपन् **मृषायाः पश्चादिदं** कूटं किं मया स्थापितमिति पश्चात्तापाद् दुःखी, **पुरस्ताच्च** कथमयं स्व्यादिस्वामी मया वञ्च्य इति चिन्तया दुःखी, **प्रयोगकाले** तद्भाषणप्रस्तावे च माऽसौ ममालीकभाषितं लक्षयत्विति क्षोभतो **दुःखी, दुरन्तो** दुष्टोऽन्तः इहाऽनेकविधविडम्बनातोऽमुत्र च नरकाप्त्या यस्यासौ दुरन्तो जन्तुः, तदेवं मृषाद्वारेणाऽदत्तादानस्य दुःखहेतुत्वमुक्तं । **एवमदत्तानि समाददानो रूपेऽतृप्तः** सन् **दुःखितः** स्यात्, **अनिश्रो** दोषवत्तया कस्यचिदप्यवष्टम्भेन हीनः, एवं च मैथुनाश्रवोऽपि ज्ञापितो यतो रागिण्येतस्यापि प्रसिद्धत्वात्, यद्वा रूपसम्भोगो देवानां मिथुनकर्मोक्तो मैथुनमेव । यतः—

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

रागिवाक्-आलोए च्चिय सा तेण, पिययमा नेहनिब्भरमणेणं ।
आवासिय व्व अवगूहिय व्व रमिय व्व पीय व्व ॥१॥ [ ]

यथा रूपसम्भोगस्तथा स्त्रीशब्दादिसम्भोगा अपि मैथुनमेव ज्ञेयाः ॥३१॥

निगमयितुमाह-

रूवाणुरत्तस्स णरस्स एवं, कत्तो सुहं होज्ज कयाइ किंचि ।
तत्थोवभोगे वि किलेसदुक्खं, निवित्तए जस्स कए ण दुक्खं ॥३२॥

व्याख्या-रूपानुरक्तस्य नरस्यैवं कुतः सुखं भवेत् कदाचित्किञ्चिदपि ? सर्वदा दुःखमेव भवतीत्यर्थः, यतस्तत्र रूपानुरागे **उपभोगेऽपि क्लेशदुःखमतृप्तिः** स्यात्,बाधाकृतं दुःखमेव विशिनष्टि-स **निवर्त्तयत्युत्पादयति यस्योपभोगस्य कृते, णं** अलङ्कारे, **दुःखमात्मनः** ॥३२॥

द्वेषस्याऽनर्थहेतुत्वमाह-

एमेव रूवंमि गओ पदोसं, उवेइ दुक्खोहपरंपराओ ।
पदुट्ठचित्तो य चिणाई कम्मं, जं से दुहं होइ पुणो विवागे ॥३३॥

व्याख्या-एवमेव यथानुरक्तस्तथैव **रूपे गतः प्रद्वेषं उपैति**, तत इहैव च **दुःखौघपरम्परातः प्रदिष्टचित्तश्च** सन् **चिनोति** बध्नाति तत्**कर्म, यत्तस्य पुनर्भवति दुःखं** दुःखहेतुः **विपाके**ऽनुभवकाले, इहामुत्र चेत्यर्थः, पुनर्ग्रहणमैहिकदुःखापेक्षम् ॥३३॥

अशुभकर्मोपचयश्च हिंसाद्याश्रवोत्थः, आश्रवो हेतुश्चैवमुक्तः, अथ रागद्वेषोद्धरणे गुणमाह-

रूवे विरत्तो मणुओ विसोगे, एएण दुक्खोघपरंपरेण ।
ण लिप्पइं भवमज्झे वि संतो, जलेण वा पुक्खरिणीपलासं ॥३४॥

व्याख्या-रूपे विरक्तश्च अद्विष्टश्च **मनुजो विशोकः** शोकरहित **एतया** प्रागुक्तया **दुःखौघपरम्परया न लिप्यते भवमध्येऽपि सन्** संसारान्तर्वर्त्त्यपि । दृष्टान्तमाह-**जलेनैव पुष्करिणीपलाशं** पद्मिनी पत्रं जलमध्येऽपि सत् ॥३४॥

एवं श्रोत्रेन्द्रियादीनां मनसश्च त्रयोदश त्रयोदश सूत्राणि ज्ञेयानि । इत्थं चक्षुराश्रित्य त्रयोदश सूत्राण्युक्तानि, चक्षुषो बहुदोषज्ञप्त्यै श्रोत्रात् पूर्वं चक्षुरुक्तम्-

सोयस्स सद्दं गहणं वयंति, तं रागहेउं समणुन्नमाहु ।
तं दोसहेउं अमणुन्नमाहु, समो उ जो तेसु स वीअराओ ॥३५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—श्रोत्रस्य **शब्दं ग्रहणं विषयं वदन्ति** जिनाः, **तं मनोज्ञं** काकली-गीत्यादि, **अमनोज्ञं** च खरस्वरविस्वराद्यं **रागद्वेषयोर्हेतुमाहुर्जिनाः**, ततः **शुभाऽशुभशब्द-योर्यः समः स वीतरागः** सुखी स्यात् ॥३५॥

सद्दस्स सोयं गहणं वयंति, सोयस्स सद्दं गहणं वयंति ।
रागस्स हेउं समणुन्नमाहु, दोसस्स हेउं अमणुण्णमाहु ॥३६॥

व्याख्या—शब्दस्य **श्रोत्रं ग्रहणं** ग्राहकं **वदन्ति, श्रोत्रस्य च ग्राह्यं शब्दं वदन्ति,** ततस्तत् श्रोत्रप्रसन्नं हर्षयुज् **रागहेतुं,** अप्रसन्नं सखेदं च **द्वेषहेतुं,** इति **कथयन्ति** ॥३६॥

सद्देसु जो गिद्धिमुवेइ तिव्वं, अकालियं पावइ से विणासं ।
रागाउरे हरिणमिए व मुद्धे, सद्दे अतित्ते समुवेइ मच्चुं ॥३७॥

व्याख्या—**रागातुरो हरिणमृग इव मुग्धः शब्देऽतृप्तः** सन् **समुपैति मृत्युं,** मृगशब्दः सामान्येन पशुवाची, ततो हरिणनाम्ना मृगो हरिणमृगः, (पाठान्तरे—**लुब्धो**—लुब्धकगीत्याकृष्टस्तस्मान्मृत्युकष्टाऽनभिज्ञः) एवं **यो** जनः **शब्देषु तीव्रां गृद्धिमुपैति सोऽपि अतृप्तः सन्नकाले विनाशं** मृत्युं **प्राप्नोति** ॥३७॥

जे यावि दोसं समुवेइ तिव्वं, तंसि क्खणे से उ उवेइ दुक्खं ।
दुद्दंतदोसेण सएण जंतू, ण किंचि सद्दं अवरज्झई से ॥३८॥

व्याख्या—**यश्चापि** अशुभशब्दे यस्मिन्नेव क्षणे **तीव्रं द्वेषं समुपैति तस्मिन्नेव क्षणे स दुःखमुपैति, दुर्दान्तमनसो** दोषेण **स्वकेन स जन्तुस्तादृग्** दुःखी स्यात्, न **किञ्चिच्छब्दस्तस्मै अपराध्यति** ॥३८॥

एगंतरत्तो रुइरंमि सद्दे, अतालिसे से कुणई पदोसं ।
दुक्खस्स संपीलमुवेइ बाले, न लिप्पई तेण मुणी विरागो ॥३९॥

व्याख्या—यो **रुचिरे शब्दे एकान्तरक्तोऽत्यन्तमासक्तः सोऽतादृशेऽमनोज्ञे शब्दे प्रद्वेषं कुरुते,** एवं च स बालो **दुःखस्य सम्पीडामुपैति, मुनिस्तु विरागस्तेन** स कुशब्दोत्थदुःखेन **न लिप्यते** ॥३९॥

सद्दाणुयासाणुगए य जीवे, चराचरे हिंसइ णेगरूवे ।
चित्तेहि तं परितावेइ बाले, पीलेइ अत्तट्ठगुरू किलिट्ठे ॥४०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या–**शब्दानुगाशामनुगतो जीवश्चराऽचरान् हिनस्त्यनेकरूपान्** जीवान्, दीपादिनिर्मितौ, वाद्यादिकृतौ, उल्ललनादौ, गात्रभूषादिवस्त्रादिस्नानादिसौधादिनिर्माणैश्च, तथैव **चित्रैर्नानाप्रकारैः** स्वपरकायशस्त्राद्युपायैर्जीवान् **परितापयति,** आक्रमणप्रेरणादिना **पीडयत्येकदेशेन** मार्जारादीन् सीत्कारयन्, स **बालोऽज्ञ आत्मार्थपरायणो** रागद्वेषोपहतश्च ॥४०॥

सद्दाणुवाएण परिग्गहेण, उप्पायणे रक्खणसंनियोगे ।
वए विजोगे य कहिं सुहं से, संभोगकाले य अतित्तलाभे ॥४१॥

व्याख्या–**शब्दानुतापेन परिग्रहेण** शब्देच्छयैव परिग्रहभावेन तदुत्पादने उपार्जने, **रक्षणे** वाद्यगाथकादीनां धारणे, **सम्प्रयोगे** स्वाऽन्यकार्येषु सम्यग्व्यापारणे, **व्यये** विनाशे **विरहे** च **क्व सुखं तस्य** ? **सम्भोगकाले** शब्दोपभोगप्रस्तावे **चाऽतृप्तिलाभे** सति क्व सुखं ? रागिणां शब्दरूपादौ सदाऽतृप्तिरेव ॥४१॥

तथा देवानां कायस्पर्शशब्दरूपमनोभवा विषयास्ततः शब्दरूपविषयेष्वपि मैथुनदोषो ज्ञेयः, तथा–

सद्दे अतित्ते य परिग्गहंमि, सत्तोवसत्तो ण उवेइ तुट्ठिं ।
अतुट्ठिदोसेण दुही परस्स, लोभाविले आययइ अदत्तं ॥४२॥

व्याख्या–**शब्दे अतृप्तश्च परिग्रहे** तद्विषयमूर्छया च **सक्तः** सामान्येन, **उपसक्तश्च** गाढं **नोपैति तुष्टिं, अतुष्टिदोषेण** शब्दाकाङ्क्षया च **दुःखी** सन् **परस्य अदत्तं** शब्दवद्वस्तु **लोभाविलः सन्नादत्ते** ॥४२॥

तण्हाभिभूयस्स अदत्तहारिणो, सद्दे अतित्तस्स परिग्गहे य ।
मायामुसं वड्ढइ लोभदोसा, तत्थावि दुक्खा न विमुच्चइ से ॥४३॥

व्याख्या–**तृष्णाभिभूतस्याऽदत्तहारिणः शब्देऽतृप्तस्य** जनस्य **परिग्रहे च** मायामृषा **वर्द्धते लोभदोषाददत्तं** लात्वा तद्गोपनेन, **तत्रापि च स दुःखान्न विमुच्यते,** रक्षेः कोऽपि स्तेनं मां वक्तीति ॥४३॥

मोसस्स पच्छा य पुरत्थओ य, पओगकाले य दुही दुरंते ।
एवं अदत्ताणि समाययंते, सद्दे अतित्तो दुहिओ अणिस्सो ॥४४॥

व्याख्या–शब्दविषयगृद्धः केनापि वारितो मया न श्रुतमिदं गीतादि, इदं वीणादि च नात्तं मयेत्यात्मानमपलन् **मृषायाः पश्चात्** कथं कूटं मया स्थाप्यमिति, **पुरस्ताच्च** कथं

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

गीतादि श्रव्यं ? वीणादिस्वामी च कथं वज्ज्यः ? इत्यादि चिन्तया दुःखी, **प्रयोगकाले तु** मृषाभाषाप्रस्तावे तु माऽयं मे कूटं जानात्विति **दुःखी**, एवंविधोऽसौ जनो **दुरन्तो** दुर्गत्यन्तरहितः स्यात्, **एवं चाऽदत्तानि समाददानः शब्देऽतृप्तः** सन् स **दुःखी** भवेत्, **अनिश्रो** दोषवत्त्वेन पुण्यनिश्राहीनः ॥४४॥

सद्दाणुरत्तस्स नरस्स एवं, कत्तो सुहं होज्ज कयाइ किंचि ।
तत्थोवभोगे वि किलेसदुक्खं निव्वत्तए जस्स कए ण दुक्खं ॥४५॥

व्याख्या—शब्दानुरक्तस्य नरस्य एवं पूर्वोक्तप्रकारेण **कुतः कदाचित्किञ्चिदपि सुखं भवेत्** ? न भवेदेव । **तत्र** शब्दानुरागे **उपभोगेऽपि** अतृप्तिलाभरूपं **क्लेशदुःखमेव** तस्य स्यात्, **यस्य** भोगस्य **कृते** स आत्मनो **दुःखं निवर्त्तयत्युत्पादयति** ॥४५॥

एमेव सद्दंमि गओ पदोसं, उवेइ दुक्खोहपरंपराओ ।
पदुट्ठचित्तो उ चिणाइ कम्मं, जं से दुहं होइ पुणो विवागे ॥४६॥

व्याख्या—एवमेवाऽनेन प्रकारेणैव यथा मनोज्ञशब्दोपरि रागमुपगतस्तथाऽमनोज्ञे **शब्दे प्रद्वेषं गतो** जीवो **दुःखौघपरम्परामुपैति**, ततश्च **प्रदुष्टचित्तो** द्वेषोपहतचित्तः सन् स **कर्माष्टविधं चिनोति** बध्नाति, **यत्** कर्म च **तस्य** पुरुषस्य **पुनर्विपाके** इहामुत्र च **दुःखं** दुःखदायि **भवती**ति, एवं तत्र हिंसाद्याश्रवा अपि ज्ञेयाः खरविस्तरभाषकादिषु ॥४६॥

सद्दे विरत्तो मणुओ विसोगो, एएण दुक्खोहपरंपरेण ।
ण लिप्पई भवमज्झे वि संतो, जलेण वा पुक्खरिणीपलासं ॥४७॥

व्याख्या—यो जनः **शब्दे विरक्तो**ऽरागोऽद्वेषश्च भवति स **विशोकः** शोकरहितः सन् **भवमध्ये वसन्नपि एतया** पूर्वोक्त**दुःखौघपरम्परया न लिप्यते**, किमिव ? **जले** वसदपि **पुष्करिणीपत्रमिव** ॥४७॥

एवं त्रयोदश सूत्राणि गन्धविषयमाश्रित्यापि ज्ञेयानि, तत्र—

घाणस्स गंधं गहणं वयंति, तं रागहेउं तु मणुण्णमाहु ।
तं दोसहेउं मणुण्णमाहु, समो उ जो तेसु स वीयरागो ॥४८॥

व्याख्या—जिना **घ्राणस्य** नासिकाया **ग्रहणं** विषयं **गन्धं वदन्ति, मनोज्ञं** गन्धं च **तं रागहेतुमाहुः, अमनोज्ञं च तं द्वेषहेतुमाहुः, तेषु** मनोज्ञाऽमनोज्ञेषु गन्धेषु च **यो समस्तुल्यवृत्तिः स वीतरागो** ज्ञेयः ॥४८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

गंधस्स घाणं गहणं वयंति, घाणस्स गंधं गहणं वयंति ।
रागस्स हेउं समणुन्नमाहु, दोसस्स हेउं अमणुन्नमाहु ॥४९॥

व्याख्या—तीर्थङ्करा **गन्धस्य** सुरभ्यसुरभिपुद्गलस्य **ग्रहणं** ग्राहकं **घ्राणं वदन्ति,** तथा **घ्राणस्य** नासिकाया **गन्धं ग्रहणं** ग्राह्यं **वदन्ति,** एवं गन्धघ्राणयोर्ग्राह्यग्राहकभावः कथितः, तत्र **मनोज्ञं रागस्य हेतुमाहुः, अमनोज्ञं च द्वेषस्य हेतुमाहुः** ॥४९॥

गंधस्स जो गिद्धिमुवेइ तिव्वं, अकालियं पावइ से विणासं ।
रागाउरे ओसहिगंधगिद्धो, सप्पे बिलाओ इव निक्खमंतो ॥५०॥

व्याख्या—**यो** मनुष्यो **गन्धेषु तीव्रां गृद्धिं** गन्धद्रव्यपरिग्रहादिभावाद् अत्यासक्त्यादे**श्चोपैति गन्धप्रियकुमार**वत्, यथा स पुष्पकन्दुकं जिघ्रन्निलिकासर्पेण दष्टः, **सुबन्धु**वत्, यथा **सुबन्धुश्चाणक्य**कृतवासयोगसुरभितो विषयासक्तस्तद्भोगे मृतिभीत्या रङ्कीभूय देशान् बभ्राम । **अकालिकं विनाशं** कष्टं **चाप्नोति** रागातुरः सन्, यथा **औषधयो** नागदमन्याद्यास्तासामत्यन्तप्रियेण **गन्धेन गृद्धः सर्पो भोगाय बिलान्निः-क्रामन्** विनाशं कष्टं चाप्नोति ॥५०॥

जे यावि दोसं समुवेइ तिव्वं, तंसि क्खणे से उ उवेइ दुक्खं ।
दुद्दंतदोसेण सएण जंतू, ण किंचि गंधो अवरज्झई से ॥५१॥

व्याख्या—**यश्चापि जन्तुर्यस्मिन्** क्षणेऽमनोज्ञं गन्धमाघ्राय **तीव्रं द्वेषं समुपैति स** जीवस्त**स्मिन्नेव क्षणे स्वकीयेन दुर्दान्तघ्राणेन्द्रियदोषेण दुःखमुपैति,** तस्मिन् क्षणे **न किञ्चिद् गन्धस्तस्यापराध्यति,** तस्य घ्राणेन्द्रियस्यैवायं दोषोऽस्ति । यच्च गाढतीव्रौषधादिगन्धो नरं पीडयति, तेनेह नाधिकारः, किन्तु कुगन्धमात्रेणैव देहमलादेरधिकारः ॥५१॥

एगंतरत्तो रुइरंमि गंधे, अतालिसे से कुणइ पदोसं ।
दुक्खस्स संपीडमुवेइ बाले, न लिप्पइ तेण मुणी विरागे ॥५२॥

व्याख्या—यो मनुष्यो **रुचिरे** मनोज्ञे **गन्धे एकान्तरक्तो**ऽत्यन्तं रागवान् भवति सोऽ**तादृशे**ऽमनोज्ञे गन्धे **प्रद्वेषं करोति,** तदा **स बालो** दुःखस्य **पीडाम**सातामुपैति, तेन हेतुना **निरागी मुनिस्तेन** रागद्वेषोद्भवेन दुःखेन **न लिप्यते** ॥५२॥

गंधाणुयासाणुगए य जीवे, चराचरे हिंसइ णेगरूवे ।
चित्तेहि ते परितावेइ बाले, पीलेइ अत्तट्ठगुरू किलिट्ठे ॥५३॥

Jain Education International '2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—बालोऽज्ञानी जीवो **गन्धानुगाशानुगतः** कर्पूरकस्तूरिकादिमनोज्ञगन्धेषु लोलुपः सन् गत्यागत्यादौ **अनेकरूपान् सचराचरजीवान् हिनस्ति,** तथा **चित्रै**र्विविध-शस्त्राद्युपायैरातपदानैश्च **परितापयति पीडयति** च मार्जारादीन्, कीदृशः सः ? **आत्मार्थ-गुरुः** स्वार्थैकपरायणो रागाद्युपहतचित्तश्च ॥५३॥

गंधाणुरागेण परिग्गहेण, उप्पायणे रक्खणसंनिओगे ।
वए वियोगे य कहिं सुहं से, संभोगकाले य अतित्तलाभे ॥५४॥

व्याख्या—गन्धानुरागेण गन्धविषयपरिग्रहेण **उत्पादने** तदुपार्जने, **रक्षणे** गन्धद्रव्याणां, **सन्नियोगे** परेभ्योऽर्पणे, **व्यये** तस्य न्यूनतायां, **वियोगे**ऽलाभे **कुतस्तस्य** जनस्य **सुखं** ? तथैव **सम्भोगकाले** गन्धविषयोपभोगकाले **चाऽतृप्तिलाभे** सति तस्य सुखं नैव भवति ॥५४॥

गंधे अतित्ते य परिग्गहंमि, सत्तोवसत्तो ण उवेइ तुट्ठिं ।
अतुट्ठिदोसेण दुही परस्स, लोभाविले आययइ अदत्तं ॥५५॥

व्याख्या—गन्धे तत्परिग्रहे मूर्छायां **चाऽतृप्तः सक्तः** सामान्येनोपसक्तश्च बाढं **नोपैति तुष्टिं, अतुष्टिदोषेण** च दुःखी सन् **लोभाकृष्टः परस्याऽदत्तं** गन्धद्रव्यमादत्ते ॥५५॥

तण्हाभिभूयस्स अदत्तहारिणो, गंधे अतित्तस्स परिग्गहे य ।
मायामुसं वड्ढइ लोभदोसा, तत्थावि दुक्खा न विमुच्चइ से ॥५६॥

व्याख्या—तृष्णाभिभूतस्य अदत्तग्राहिणश्च गन्धविषये परिग्रहे चाऽतृप्तस्य लोभदोषाद्रागभावान्**मायामृषा वर्द्धते, तत्रापि** एवं मृषाकथनेऽपि **स दुःखान्न विमुच्यते,** रक्षेः कोऽपि मां गन्धहारिणं चौरं वेत्तीति ॥५६॥

मोसस्स पच्छा य पुरत्थओ य, पओयकाले य दुही दुरंते ।
एवं अदत्ताणि समाययंतो, गंधे अतित्तो दुहिओ अणिस्सो ॥५७॥

व्याख्या—मृषायाः पश्चात् पुरस्ताच्च प्रयोगकाले च मृषाभाषाप्रस्तावे च रक्षेः कूटं मे कोऽपि वेत्तीति सोऽत्यन्तं **दुःखी** सन्, **एवमदत्तानि** परकीयानि गन्धान्याद-**दानोऽतृप्तः** सन् **अनिश्रः** सहायरहितो **दुःख्येव** भवति ॥५७॥

गंधाणुरत्तस्स नरस्स एवं, कुत्तो सुहं हुज्ज कयाइ किंचि ।
तत्थोवभोगे वि किलेसदुक्खं, निवत्तए जस्स कए ण दुक्खं ॥५८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—**एवं** पूर्वोक्तप्रकारेण **गन्धानुरक्तस्य** नरस्य **कुतः कदाचित्किञ्चिदपि सुखं भवेत्** ? अपि तु न भवेदेव । **तत्रोपभोगेऽपि क्लेशदुःखमतृप्तिरूपं** स्यात्, **यस्योपभोगस्य कृते दुःखं** स्वस्य गन्धप्राप्त्यादिना **निवर्त्तयति** ॥५८॥

एमेव गंधंमि गओ पदोसं, उवेइ दुक्खोहपरंपराओ ।
पदुट्ठचित्तो य चिणाइ कम्मं, जं से दुहं होइ पुणो विवागे ॥५९॥

व्याख्या—**एवमेव** यथा गन्धानुरक्तो नरो दुःखौघपरम्परां प्राप्नोति, तथैव **गन्धे** दुष्टगन्धे **प्रद्वेषं गतो दुःखौघपरम्परा** वमनाद्या **उपैति, प्रदुष्टचित्तश्च** सन् दुष्टं **कर्म चिनोति, यत्कर्म तस्य** पुरुषस्य **विपाके** विपाकावसरे **पुनर्दुःखं** निन्दोपद्रवादिभिर्दुःखकारि **भवति** ॥५९॥

गंधे विरत्तो मणुओ विसोगो, एएण दुक्खोहपरंपरेण ।
न लिप्पई भवमज्झे वि संतो, जलेण वा पुक्खरिणीपलासं ॥६०॥

व्याख्या—**गन्धे विरक्तो** गन्धाद्विरागी **मनुज एतया** पूर्वोक्तदुःखौधपरम्परया **न लिप्यते** न स्पृश्यते **संसारमध्ये वसन्नपि,** किमिव ? **जले** वसत् **पुष्करिणीपत्रमिव** पद्मिनीपत्रमिव जलेनेति ॥६०॥

अत रसनेन्द्रियमाश्रित्य दूषणमाह—

जिहाए रसं गहणं वयंति, तं रागहेउं तु समणुन्नमाहु ।
तं दोसहेउं अमणुन्नमाहु, समो य जो तेसु स वीअराओ ॥६१॥

व्याख्या—रस्यते आस्वाद्यते इति रसो मधुरादिः, तं **रसं** जिना **जिह्वाया ग्रहणं** विषयं **वदन्ति, तं मनोज्ञं** रसं च **रागहेतुमाहुः, अमनोज्ञं** च **तमेव दोषहेतुमाहुः, यश्च तेषु** रसेषु **समस्तुल्यवृत्तिः स वीतराग** उच्यते ॥६१॥

रसस्स जीहं गहणं वयंति, जिहाए रसं गहणं वयंति ।
रागस्स हेओ समणुण्णमाहु, दोसस्स हेओ अमणुण्णमाहु ॥६२॥

व्याख्या—**रसस्य जिह्वां ग्राहिकां वदन्ति, जीह्वाया रसं च ग्राह्यं वदन्ति, पुनर्मनोज्ञां** प्रसन्नां जिह्वां **रागस्य हेतुमाहुः, अप्रसन्नां च दोषस्य हेतुमाहुः** ॥६२॥

रसस्स जो गिद्धिमुवेइ तिव्वं, अकालियं पावइ से विणासं ।
रागाउरे बडिसविभिन्नकाये, मच्छे जहा आमिसभोगगिद्धे ॥६३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—**रसेषु यो** जनो **गृद्धिमुपैति तीव्रां, सोऽकालिकमकस्माद्विनाशं प्राप्नोति** कुपथ्याशिवत्, **रागातुरो, बडिशं** प्रान्तन्यस्तामिषो लोहकीलस्तेन **विभिन्नकायो यथा मत्स्य आमिषभोगगृद्धो** म्रियते । उक्तञ्च—

सचित्ताहारेणं, मच्छा गच्छंति सत्तमीं पुहवीं ।
सचित्तो आहारो, न खमो मणसा वि पत्थेओ ॥१॥ [ ] ॥६३॥

जे यावि दोसं समुवेइ तिव्वं, तंसि क्खणे से उ उवेइ दुक्खं ।
दुद्दंतदोसेण सएण जंतू, रसं न किंची अवरज्झइ से ॥६४॥

व्याख्या—**यश्चापि जन्तुर**मनोज्ञरसास्वादनो यस्मिन्नेव क्षणे **तीव्रं द्वेषमुपैति, तस्मिन्नेव क्षणे स स्वकीयेन दुर्दान्तरसनेन्द्रियदोषेण दुखमुपैति,** परं **तस्य** तदवस्थायां **रसः** सामान्यरसः **किञ्चिन्नाषराध्यति,** किन्तु तस्य रसनेन्द्रियस्यैव स दोषः, अत्र रसशब्देन कुरूपकुरसाद्या एव ज्ञेयाः, न विषाणि यतस्तैर्भव्यैरभव्यैश्च रसाद्यैः कष्टमेव ॥६४॥

एगंतरत्तो रुइरे रसंमि, अतालिसे से कुणइ पदोसं ।
दुक्खस्स संपीलमुवेइ बाले, न लिप्पइ तेण मुणी विरागो ॥६५॥

व्याख्या—यो जीवो **रुचिरे** मनोज्ञे **रसे** मधुरादा**वेकान्तरक्तो**ऽत्यन्तमासक्तो भवति, **स बालो**ऽज्ञानी जीवो**ऽतादृशे**ऽमनोज्ञे रसे **प्रद्वेषं करोति,** ततश्च स **दुःखस्य सम्पीडामुपैति** प्राप्नोति, **तेन** कारणेन **विरागी मुनिस्तेन** रसेन **न लिप्यते** आसक्तो न भवतीति ॥६५॥

रसाणुयासाणुगए य जीवे, चराचरे हिंसइ णेगरूवे ।
चित्तेहिं ते परितावेइ बाले, पीलेइ अत्तट्ठगुरू किलिट्ठे ॥६६॥

व्याख्या—**रसानुगाशानुगतो** मधुरादिरसास्वादाभिलाषयुतो बालोऽज्ञानी **जीवो विविधै-रुपायै**श्छेदनपाटनत्वगपनयनाद्यै**रनेकरूपान् चराऽचरादिजीवान् हिनस्ति परितापयति पीडयति** चाम्रादिवत्, कीदृशः स बालः ? केवल**मात्मार्थमेव परायणो** रागद्युपहतमानसश्च ॥६६॥

रसाणुराएण परिग्गहेण, उप्पायणे रक्खणसंनियोगे ।
वए वियोगे य कहिं सुहं से, संभोगकाले य अतित्तलाभे ॥६७॥

व्याख्या—रसानुरक्तस्य जीवस्य **रसानुरागेण परिग्रहेण** सरसवस्तुमूर्छया, तेषा**मुत्पादने** उद्यानिकादिकरणे, रक्षणे म्लान्यादिभ्यः, **सन्नियोगे** स्वस्याऽन्येषां च व्यापारणे, **व्यये** न्यूनत्वे, **वियोगे** रसाऽप्राप्तौ च **कुतस्तस्य** जीवस्य **सुखं** ? केवलं क्लेश एव । तथैव **सम्भोगकालेऽपि** तस्य रसस्य परिभोगाऽवसरेऽपि **अतृप्तिलाभरूपं** दुःखमेवेति ॥६७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

रसे अतित्ते य परिग्गहंमि, सत्तोवसत्तो न उवेइ तुट्ठिं ।
अतुट्ठिदोसेण दुही परस्स, लोभाविले आययइ अदत्तं ॥६८॥

व्याख्या—**रसे अतृप्तो** जीवस्तस्य **परिग्रहे** सञ्चये **सक्तो** भवति, ततश्च क्रमेणोप-**सक्तो**ऽपि भवति, एवं च स **तुष्टिं नोपैति, अतुष्टिदोषेण** च स पुमान् **दुःखी लोभा-विलो** लोभकलुषश्च सन् **परस्याऽदत्तं** फलघृतनवनीताद्यादत्ते ॥६८॥

तण्हाभिभूयस्स अदत्तहारिणो, रसे अतित्तस्स परिग्गहे य ।
मायामुसं वड्ढइ लोभदोसा, तत्थावि दुक्खा ण विमुच्चइ से ॥६९॥

व्याख्या—**तृष्णाभिभूतस्य अदत्तहारिणो रसे** रसविषये **परिग्रहे**ऽतृप्तस्य पुरुषस्य लोभदोषान्**मायामृषा वर्द्धते, तत्रापि** मायामृषायामपि **सो**ऽसन्तोषी **दुःखान्न विमुच्यते** ॥६९॥

मोसस्स पच्छा य पुरत्थओ य, पओगकाले य दुही दुरंते ।
एवं अदत्ताणि समाययंतो, रसे अतित्तो दुहिओ अणिस्सो ॥७०॥

व्याख्या—**मृषावचनस्य पश्चात् पुरतश्च प्रयोगकाले** च स **दुरन्तो दुःखी भवति, एवं** चाऽमुना प्रकारेण रसेऽतृप्तोऽदत्तानि **समाचरन्** चौर्याणि कुर्वन् **रसे चाऽतृप्तो** जीवाऽजीवयतनेहपरभव**निश्रारहितः** सन् **दुःखी** भवति ॥७०॥

रसाणुरत्तस्स नरस्स एवं, कत्तो सुहं होज्ज कयाइ किंचि ।
तत्थोवभोगे वि किलिस्सदुक्खं, निवत्तइ जस्स कए ण दुक्खं ॥७१॥

व्याख्या—**एवम**न्तरोक्तप्रकारेण **रसानुरक्तस्य जन्तोः कुतः कदापि किञ्चित् सुखं भवति** ? कुतोऽपि न भवतीत्यर्थः, पुनस्तत्र **रसोपभोगसमयेऽपि** अतृप्तिलाभरूपं रोगोत्पत्तेश्च **क्लेशदुःखं निवर्त्तयत्यु**त्पादयति, **यस्योपभोगस्य कृते दुःखं** धत्ते जन्तुः, कदाहं तदन्नादिकं लप्स्येऽहमिति ॥७१॥

एमेव रसंमि गओ पदोसं, उवेइ दुक्खोघपरंपराओ ।
पदुट्ठचित्तो य चिणाइ कम्मं, जं से पुणो होइ दुहं विवागे ॥७२॥

व्याख्या—**एवमेव रसे गृद्धो** जीवोऽमनोज्ञरसलाभे सति **प्रद्वेषं गच्छति, प्रदुष्ट-चित्तश्च** सन् **दुःक्खौघपरम्परया** तत्**कर्म चिनोति, येन** कर्मणा **पुनस्तस्य विपाके दुःखमेव भवति,** कटुतुम्बदात्री**नागश्री**वत्, यथा तया **धर्मरुचि**मुनये कटुतुम्बं स्वादेना-ऽनर्हमिति ज्ञात्वा दत्त्वा चानन्तभवोऽर्जितः, अनन्ताद्धया च सा **द्रौपदी** जाता ॥७२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

रसे विरत्तो मणुओ विसोगो, एएण दुक्खोहपरंपरेण ।
न लिप्पए भवमज्झे वि संतो, जलेण वा पुक्खरिणीपलासं ॥७३॥

व्याख्या—रसे विरक्तो मनुजो विशोकः सन् **भवमध्ये वसन्नपि** एतया पूर्वोक्तया **दुःखौघपरम्परया न लिप्यते** किमिव ? जलमध्ये स्थितमपि **पुष्करिणीपत्रं जलेन वेति** ॥७३॥

अथ स्पर्शनेन्द्रियमाश्रित्याह—

कायस्स फासं गहणं वयंति, तं रागहेउं समणुण्णमाहु ।
तं दोसहेउं अमणुण्णमाहु, समो उ जो तेसु स वीअराओ ॥७४॥

व्याख्या—कायस्य सर्वशरीरस्य स्पर्शनेन्द्रियस्य **स्पर्शं ग्रहणं वदन्ति** जिनाः, तत्र **तं मनोज्ञं** स्पर्शं **रागहेतुमाहुः, अमनोज्ञं च द्वेषहेतुमाहुः, तत्रापि यः समः स वीतरागो** वीतद्वेषश्च, न तावत् कायं स्पर्शे प्रवर्त्तयेत्, कथञ्चित् प्रवर्त्तने समतां कुर्यादिति ॥७४॥

ननु चेत् स्पर्श एव रागद्वेषहेतुस्तर्हि स्पर्शनिन्दैवास्तु, किं कायनिग्रहेणेत्युच्यते—

फासस्स कायं गहणं वयंति, कायस्स फासं गहणं वयंति ।
तं रागहेउं समणुण्णमाहु, दोसस्स हेउं अमणुण्णमाहु ॥७५॥

व्याख्या—जिनाः **स्पर्शस्य** शीतोष्णादेर्ग्रहणं ग्राहकं **कायं वदन्ति**, तथा **कायस्य** च स्पर्शनेन्द्रियस्य **ग्राह्यं स्पर्शं वदन्ति**, तत्र **मनोज्ञं तं रागहेतुकमाहुः, अमनोज्ञं च तं द्वेषहेतुकमाहुः** ॥७५॥

फासेसु जो गिद्धिमुवेइ तिव्वं, अकालियं पावइ से विणासं ।
रागाउरे सीयजलावसन्ते गाहग्गहिए महिसेव रन्ने ॥७६॥

व्याख्या—यो मनुष्यः **स्पर्शेषु** स्पर्शनेन्द्रियविषयेषु स्त्र्यादिषु **तीव्रामुत्कटां गृद्धिमुपैति स** रागातुरः सन्**अकालिकं विनाशं प्राप्नोति,** यथा **शीतलजलावसक्तो महिषोऽरण्ये** पल्वलादौ पतितो **ग्राहैर्मकरादिजलचरजीवविशेषैर्गृहीतो** म्रियते, वसतिप्रदेशे तु केनापि कदाचिन्मोच्यतेऽपि ॥७६॥

जे यावि दोसं समुवेइ तिव्वं, तंसि क्खणे से उवेइ दुक्खं ।
दुद्दंतदोसेण सएण जंतू, ण किंचि फासं अवरज्झई से ॥७७॥

व्याख्या—यश्चापि जन्तुर्जीवो यस्मिन् क्षणे अमनोज्ञे स्पर्शे जाते सति तीव्रं **द्वेषं उपैति, तस्मिन्नैव क्षणे स जन्तुः स्वकीयेन दुर्दान्तदोषेण** अवश्यदेहत्वदोषेण **दुःखं**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

प्राप्नोति, परं **नाऽमनोज्ञः स्पर्शस्तस्य किञ्चिदप्यपराध्यति**, तस्य स्पर्शनेन्द्रियस्यैव स दोषोऽस्ति । ये च कटुकरसाद्या इन्द्रियोपघातकाः स्युस्तैर्नात्राधिकारः, किन्तु जीवस्य शुभाऽशुभरसादिषु देहार्त्त्यनुत्पादकेषु ये रत्यरती स्तस्तैरेवेहाधिकारः, तथा ये शब्दाद्या इन्द्रियाणि पीडयन्ति तानपि सहेत न तु द्विष्यात् ॥७७॥

एगंतरत्तो रुइरंमि फासे, अतालिसे से कुणइ पदोसं ।
दुक्खस्स संपीलमुवेइ बाले, न लिप्पई तेण मुणी विरागो ॥७८॥

व्याख्या—यो मनुष्यो **रुचिरे स्पर्शे एकान्तरक्तो** भवति **सोऽतादृशेऽसुन्दरे** स्पर्शे **प्रद्वेषं करोति**, स च बालोऽज्ञानी **दुःखस्य सम्पीडामुपैति, तेन** कारणेन **विरागी मुनिः** स्पर्शेन **न लिप्यते** ॥७८॥

फासाणुगासाणुगए य जीवे, चराचरे हिंसइ णेगरूवे ।
चित्तेहिं ते परितावेइ बाले, पीलेइ अत्तट्ठगुरू किलिट्ठे ॥७९॥

व्याख्या—स्पर्शानुगाशानुगतो जीवोऽनेकरूपान् सचराचरजीवान् हिनस्ति, स्त्रीभोगादौ पुष्पस्रग्भूषादौ च, तथैव **चित्रैः** प्रकारैस्तापनस्नानाद्यैः स **बालोऽज्ञानी जीवान् परितापयति**, कांश्चित् **पीडयति** च तूलिकागद्दिकाकदलीदलादिषु । कीदृशः सः ? **आत्मार्थगुरुः** केवलं स्वार्थैकपरायणो रागाद्युपहतचित्तश्च ॥७९॥

फासाणुरागेण परिग्गहेणं, उप्पायणे रक्खणसंनिओगे ।
वए विओगे य कहं सुहं से, संभोगकाले य अतित्तलाभे ॥८०॥

व्याख्या—स्पर्शानुरागेण स्पर्शपरिग्रहेण स्पर्शासक्तस्य जीवस्य स्पर्शना**मुत्पादने** स्त्रीवाहनसुखासनादीनां, तथैव **रक्षणे सन्नियोगे** स्वपरार्थं व्यापारणे च, **व्यये** न्यूनत्वे, **वियोगे** विनाशे च **तस्य** जीवस्य **कुतः सुखं** भवेत् ? न कुतोऽपीत्यर्थः, **च** पुनः **सम्भोगकालेऽपि तदतृप्तिलाभरूपं** दुःखमेव ॥८०॥

फासे अतित्ते य परिग्गहंमि, सत्तोवसत्तो ण उवेइ तुट्ठिं ।
अतुट्ठिदोसेण दुही परस्स, लोभाविले आययई अदत्तं ॥८१॥

व्याख्या—स्पर्शविषये चाऽतृप्तः सन् पुमान् तत्**परिग्रहे सक्त उपसक्तश्च** भूत्वापि **तुष्टिं न प्राप्नोति, अतुष्टिदोषेण** च **दुःखीभूय लोभाविलो** लोभेन मलीनमानसोऽसौ परस्य वस्तु स्त्रीवस्त्राद्यादत्ते ॥८१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तण्हाभिभूयस्स अदत्तहारिणो, फासे अतित्तस्स परिग्गहे य ।
मायामुसं वड्ढइ लोभदोसा, तत्थावि दुक्खा ण विमुच्चइ से ॥८२॥

व्याख्या—**तृष्णाभिभूतस्य** मनुष्यस्य पुनरदत्तहारिणश्च, पुनः **स्पर्शसम्बन्धिनि परिग्रहे अतृप्तस्य च** परस्त्र्यादिभोगलोलुपस्य **लोभदोषान्मायामृषा वर्द्धते, तत्रापि** मायामृषावादेऽपि **स दुःखान्न विमुच्यते**ऽविश्वास दुःकार्याद्यैः ॥८२॥

मोसस्स पच्छा य पुरत्थओ य, पओगकाले य दुही दुरंते ।
एवं अदत्ताणि समाययंतो, फासे अतित्तो दुहिओ अणिस्सो ॥८३॥

व्याख्या—मायामृषावादी पुमान् **मृषावचसः पश्चात् पुरतश्च** पुनः **प्रयोगकाले**ऽपि भाषणप्रस्तावेऽपि **दुरन्तो**ऽत्यन्तं **दुःखी** भवति, **एवं चादत्तानि** परस्त्रीवस्त्रादीनि **समाददानः स्पर्शेऽतृप्तः** सन् **दुःखी** भवति, **अनिश्रः** पुण्यहीनः ॥८३॥

फासाणुरत्तस्स नरस्स एवं, कत्तो सुहं होज्ज कयाइ किंचि ।
तत्थोवभोगे वि किलेसदुक्खं, निवत्तइ जस्स कए ण दुक्खं ॥८४॥

व्याख्या—**एवमनन्तरोक्तप्रकारेण स्पर्शानुरक्तस्य नरस्य कुतः कदाचित् किञ्चिदपि सुखं भवेत्** ? नैव भवेदिति । **तत्र स्पर्शोपभोगेऽपि क्लेशदुःखं** तृप्त्यभावरोगोत्पत्तिभ्यां भवति, **यस्य कृते** जन्तुर्दुःखं **निवर्त्तयत्युत्पादयति**, कामवशस्य सदा स्त्रीध्यातृत्वात् ॥८४॥

एमेव फासंमि गओ पदोसं, उवेइ दुक्खोघपरंपराओ ।
पदुट्ठचित्तो य चिणाइ कम्मं, जं से पुणो होइ दुहं विवागे ॥८५॥

व्याख्या—**एवमेव** यथा मनोज्ञे स्पर्शे रागवान्, तथाऽमनोज्ञे **स्पर्शे गतः** सन् स **प्रद्वेषमुपैति**, ततो **दुःखौघपरम्परया** च **प्रदुष्टचित्तः** सन् निन्दादिना **तत्कर्म चिनोति यत्कर्म** पुनस्तस्य **विपाकावसरे दुःखहेतुर्भवति**, मत्कुणस्पर्शादौ जीवहिंसादिकारकत्वात् ॥८५॥

फासे विरत्तो मणुओ विसोगो, एएण दुक्खोघपरंपरेण ।
न लिप्पइ भवमज्झे वि संतो, जलेण वा पुक्खरिणीपलासं ॥८६॥

व्याख्या—**स्पर्शे विरक्तो मनुष्यो विशोकः** सन् **एतया दुःखौघपरम्परया संसारमध्ये वसन्नपि** भरतादिवन्न लिप्यते, किमिव, जले वसत् **पुष्करिणीपत्रमिव जलेने**ति ॥८६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मणस्स भावं गहणं वयंति, रागस्स हेउं समणुन्नमाहु ।
तं दोसहेउं अमणुन्नमाहु, समो उ जो तेसु स वीयरागो ॥८७॥

व्याख्या—मनसो ग्रहणं ग्राह्यं **भावमाशयं वदन्ति** जिनाः **तं मनोज्ञमाशयं रागहेतुमाहुः**, यतो जीवस्य स्वोत्कर्षर्द्धिस्त्र्यादिचिन्ता मनोज्ञा स्यात्, एवं यद्यस्य शुभमशुभं वाऽभीष्टं, तस्य च यच्चिन्तनं तत्तस्य रागहेतु, **अमनोज्ञं** भावं च **द्वेषहेतुकमाहुर्जिनाः**, यतो रौद्रध्यायी निन्दको वा परद्यूत्कर्षधर्मादीन् द्वेषधिया चिन्तयति, ततो यावत् शुभाशुभचिन्तनं तावद्रागद्वेषदुःखे एव ततस्तयोः **शुभाऽशुभयोर्यः समस्तत्राऽप्रवर्त्तको** धर्मध्यानी **स वीतरागः** सुखी च ॥८७॥

भावस्स मणं गहणं वयंति, मणस्स भावं गहणं वयंति ।
तं रागहेउं समणुण्णमाहु, दोसस्स हेउं अमणुण्णमाहु ॥८८॥

व्याख्या—भावस्य शुभाशुभचिन्तनस्य **मनो ग्रहणं** ग्राहकं **वदन्ति, मनसश्च ग्राह्यं भावं वदन्ति, तन्मनस्तु मनोज्ञं** प्रमादप्रवर्तितं **रागहेतुमाहुः, अमनोज्ञं** कुभावपरं च निन्दाद्यैर्द्वेषहेतुमाहुः, तथा स्वप्नकामदशादिषु भावागतो रूपरसादिरपि भाव उच्यते, यतस्तत्र मनस एव सर्वतो व्यापारात् ॥८८॥

भावेसु जो गिद्धिमुवेइ तिव्वं, अकालियं पावइ से विणासं ।
रागाउरे कामगुणेसु गिद्धे, करेणुमग्गावहिए गए व ॥८९॥

व्याख्या—यो भावेषु विषयाद्याशयेषु **तीव्रां गृद्धिमुपैति सोऽकालिकं विनाशमुपैति,** रागाध्यवसाने **स्त्रीत्वादि**वत्, भयाध्यवसाने **सोमिला**दिवत्, स्नेहाध्यवसाने **मातृपुत्र**वत्, तथा **रागातुरः कामगुणेषु** सुशब्दरूपादिषु **गृद्धः करेणुमार्गेण** हस्तिन्या निजाध्वना**ऽपहृतः** कृष्टो **गज इव** । इभो मदान्धो दूरात् करिणीदर्शनात्तद्रूपादिमोहितस्तन्मार्गानुगामित्वेन गृह्यते । सङ्ग्रामादिषु प्राविश्यते, विनाश्यते च, अत्र चक्षुरिन्द्रियवशादेव गजस्य प्रवृत्तावपि मनः प्राधान्यज्ञप्त्यै भावस्य दृष्टान्तोक्तिः ॥८९॥

जे यावि दोसं समुवेइ तिव्वं, तंसि क्खणे से उ उवेइ दुक्खं ।
दुद्दंतदोसेण सएण जंतू, ण किंचि भावं अवरज्झइ से ॥९०॥

व्याख्या—यश्चापि मनुष्यो यस्मिन् क्षणेऽशुभे भावे **तीव्रं द्वेषं समुपैति, तस्मिन्नेव क्षणे स** जन्तुर्**दुःखमुपैति,** सर्वकार्यकरणहानेः, **दुर्दान्तत्वदोषेण** अवशचित्तत्वेन **स्वकेन**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दुःखी भवति, परं तस्मिन् विषये **तस्य भावः किञ्चिन्नापराध्यति,** तस्य मनस एव दोषोऽस्ति ॥९०॥

एगंतरत्तो रुइरंमि भावे, अतालिसे से कुणई पदोसं ।
दुक्खस्स संपीलमुवेइ बाले, न लिप्पई तेण मुणी विरागो ॥९१॥

व्याख्या—एकान्तरक्तोऽत्यन्तमासक्तो **रुचिरे भावे,** सदा ऋद्धिरससातगौरवाभिलाषुको नरोऽतादृशेऽनृद्धिगौरवादौ चित्तचिन्तिताऽलाभे सति **स** चिन्तयिता जीवः स्वयमेव **प्रद्वेषं करोति,** किमत्रोहमायातः ? अहमभाग्य एवेत्यादि च **दुःखस्य सम्पीडां** स **बालो**ऽज्ञानी **समुपैति,** अत एव **रागरहितो मुनी** रागद्वेषाभ्यां **न लिप्यते** ॥९१॥

भावाणुगासाणुगए य जीवे, चराचरे हिंसइ णेगरूवे ।
चित्तेहिं से परितावेइ बाले, पीलेइ अत्तट्ठगुरू किलिट्ठे ॥९२॥

व्याख्या—भावानुगाशानुगतोऽभिप्रायानुकूलेच्छाविवशो **जीवः** क्वापि चित्तचिन्तायां प्रवर्त्तमानोऽनुपयोगाच्च**राऽचरान् जीवान् हिनस्ति,** चिन्तया क्व यामीति ध्यायन् यत्र तत्र व्रजन् जीवान् हन्ति, **चित्रै**र्विविधविकल्पनैस्तान् जीवान् **स परितापयति,** यथैवं करणतो धातुर्निष्पाद्यते, एवं कुर्वतो यदि पुनर्मे लाभः स्यात् पुत्रः स्यादित्यादि चिन्तयन् **पीडयत्ये**कदेशेन स बालोऽज्ञानी कांश्चिज्जीवान् मनसा वाचा कायेन वा, यथाऽयं दूरे भूयादित्यादिमनोवचनकाययोगैरात्मनोऽर्थमात्रं कार्यमात्रमेव गुरुः श्रेष्ठं, न परपीडेति यस्य स **आत्मार्थगुरुः क्लिष्टः** कषायवशगश्च सन् ॥९२॥

भावाणुवाएण परिग्गहेणं, उप्पायणे रक्खणसंनियोगे ।
वए वियोगे य कहं सुहं से, संभोगकाले य अतित्तलाभे ॥९३॥

व्याख्या—भाव एव **परिग्रहो** मीलनचिन्तात्मक**स्तेन, उत्पादने,** कथं मे मिलिष्यत्ययं सञ्चयः ? तत्कृतेऽहमिति बुद्धिमुपार्जयामि, यद्वाऽनिद्रस्य निद्रां कथमर्जयामि ? एवं बलं सुखं राज्यं सुतादि मृषाभाषां हास्यादि प्रज्ञाप्रतिभामोक्षादि वा कथमहमुपार्जयामी**त्युत्पादने,** निद्राऽरोग्यसुबुद्धित्वादिभावानां **रक्षणे, सन्नियोगे** परेषां कुबुद्ध्यादिभावे, **व्यये** निद्रास्मृत्यादिव्यये, उत्तरदातृत्वप्रज्ञास्फुर्त्तिमुख्यभावानां **वियोगे च कुतः सुखं** ? 'से' **तस्य** चिन्तयितुः, **सम्भोगकाले**ऽपि चिन्ताकरणकालेऽप्यतृप्तिलाभे तृप्त्यभावे सत् **कुघटभञ्जक**वन्न सुखं, तथा देवेषु—

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दो कप्प कायसेवी, दो दो दो फरिसरूवसद्देहिं ।
चउरो मणेणुवरिमा, अप्पवियारा अणंतसुहा ॥१॥ [बृ.सं./गा.१६६] ॥९३॥

भावे अतित्ते य परिग्गहंमि, सत्तोवसत्तो ण उवेइ तुट्ठिं ।
अतुट्ठिदोसेण दुही परस्स, लोभाविले आययई अदत्तं ॥९४॥

व्याख्या—भावे शुभाशुभाध्यवसायेऽतृप्तः सन् तत्**परिग्रहे सक्त उपसक्तश्च** गाढासक्तो **नोपैति तुष्टिं** मनोऽसन्तोषात्तुष्टिं न याति, **अतुष्टिदोषेण** च **दुःखी** सन् **लोभाविलो** लोभाकृष्टः परस्व**मदत्तमादत्ते**, मनसा वाचा कायेन च, तत्र द्रव्यतः परस्वं, क्षेत्रतो भूम्यादि, कालत आयुःकालादि नामतस्तन्नामादि, पदतस्तत्पदं, भवतस्तद्भवं, भावतः प्रज्ञादि, यथा—

आशामोदकतृप्तत्वं, स्निग्धमण्डकचिन्तनं ।
स्वप्नराज्यप्रकृष्टत्वं, परवर्णनसोष्ठवं ॥१॥ [ ] ॥९४॥

तण्हाभिभूयस्स अदत्तहारिणो, भावे अतित्तस्स परिग्गहे य ।
मायामुसं वड्ढइ लोभदोसा, तत्थावि दुक्खा ण विमुच्चइ से ॥९५॥

व्याख्या—तृष्णाभिभूतस्य मनसोऽदत्तहारिणो **भावे** महत्त्वादौ **परिग्रहेऽतृप्तस्य लोभदोषाद्रागान्मायामृषा वर्द्धते**, यथाहं प्रौढः कविर्दाता विद्वान् मान्यो मुनिर्वीतरागो जिन इत्यादिमृषावादाभिलाषी भवति, **तत्रापि** मृषोक्तावपि स **दुःखान्न विमुच्यते गोशालक**वत्, स्वदोषाऽपलपने **पाण्डु**राजा**मथुरा**मङ्गुहस्तशाटिकाचोक्षतावाचि**धनश्री**वत् ॥९५॥

मोसस्स पच्छा य पुरत्थओ य, पओगकाले य दुही दुरंते ।
एवं अदत्ताणि समाययंतो, भावे अतित्तो दुहिओ अणिस्सो ॥९६॥

व्याख्या—मृषायाः पश्चाद्यथा मयाऽमुकोपरि विरूपं नास्ति चिन्तितं, इति मृषोक्तेः पश्चात्, तथैवं **पूर्वं, प्रयोगकाले** च मृषाभाषायां च **दुःखी** स्वकृतपश्चात्तापेन जननिन्दया च **दुरन्तो** दुर्गतिभ्रमकः स्यात्, यतः—

आकारैरिङ्गितैर्गत्या, चेष्टया भाषणेन च ।
नेत्रवक्त्रविकारैश्च, लभ्यतेऽन्तर्गतं मनः ॥१॥ [ ]

एवं अदत्तानि समाददन् परगुणान् स्वगुणत्वेनाख्यान्,

तवतेणे वयतेणे, रूवतेणे य जे नरे ।
आयारभावतेणे य, कुव्वई देवकिव्विसं ॥१॥ [द.वै.अ.५उ.२गा.४६]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

लद्धूण वि देवत्तं, उववन्नो देवकिव्विसे ।
तत्थावि से न याणाइ, किं मे किच्चा इमं फलं ॥२॥ [द.वै.अ.५उ.२गा.४७]
तत्तो वि से चइत्ताणं, लब्भई एलमूलगं ।
नरगं तिरिक्खजोणिं वा, बोही जत्थ सुदुल्लहा ॥३॥ [द.वै.अ.५उ.२गा.४८]
एयं च दोसं दट्ठूणं, नायपुत्तेण भासियं ।
अणुमायं पि मेहावी, मायामोसं विवज्जए ॥४॥ [द.वै.अ.५उ.२गा.४९]

एवं तपःस्तैन्यादि चिन्तयन् कुर्वन् **भावे** विकल्पसङ्कल्पपूरेऽतृप्तो **दुःखी अनिश्रो** धर्म्यशुक्लहीन आर्त्तरौद्री स्यात् ॥९६॥

भावाणुरत्तस्स नरस्स एवं, कत्तो सुहं होज्ज कयाइ किंचि ।
तत्थोवभोगे वि किलेसदुक्खं, निवत्तइ जस्स कए ण दुक्खं ॥९७॥

व्याख्या—स्वाभिप्रायभावानुरक्तस्य स्वविमृष्टमेव प्रमाणं ध्यायतो **नरस्यैवं कुतो** द्रव्यक्षेत्रकालनामपदभवभावादेः **सुखं कदापि कस्मिन्नपि** काले **किञ्चिन्म**नागपि भवेत् ? न भवेदेव । **तत्र** भावानुरागे **उपभोगे** बहुकालचिन्तनेऽपि **क्लेशदुःखं**, अतृप्तिशोक-भयक्रोधविषयकामज्वरदुष्कर्मबन्धाद्यं स्यात्, **यस्य** भावचिन्तनस्य **कृते, णं** वाक्यालङ्कारे **दुःखं** दधाति मनो जन्तुश्च ॥९७॥

एमेव भावंमि गओ पदोसं, उवेइ दुक्खोहपरंपराओ ।
पदुट्ठचित्तो य चिणाइ कम्मं, जं से दुहं होइ पुणो विवागो ॥९८॥

व्याख्या—एवमेव रागवत् **प्रद्वेषं भावे गतः** प्रद्वेषभाववानित्यर्थः, **दुःखौघपरम्परा जमाल्या**दिवदुपैति, यतः—स श्री**वीरोक्ते** भावे द्वेषं गतः किल्बिषिकेषु त्रयोदश-सागरायु**र्लान्तके**ऽस्ति, ततः परं च नृदेवभवेभ्यः सेत्स्यति, **प्रदुष्टचित्तः** सदाऽकुर्वन्नपि **कर्म चिनोति तन्दुलमत्स्य**वत्, यथा स महामत्स्यस्य मुखासन्ने मत्सीकुक्षौ अन्त-र्मुहूर्त्तमध्ये चैव गर्भे भूत्वा पर्याप्तो भूत्वोत्पद्य सङ्ज्ञी प्रौढमत्स्यमुखविशन्मत्स्यलक्षान् दृष्टाऽयं धन्यो यस्यास्ये इयन्तो मत्स्या विशन्ति, इत्यादि ध्यायन् तेषु मत्स्येष्यु पुनर्निस्सरत्सु रे मूर्ख ! इदृगऽज्ञोऽयं कथमेतान् मुञ्चति, अहं चेदेतावन्मात्रः स्यां तदैतावता न मुञ्चे, इत्यादि चिन्तयन्नन्तर्मुहूर्त्तेनैव सप्तम्यायुरुत्कृष्टं बद्ध्वान्तर्मुहूर्त्तमबाधां भुक्त्वान्तर्मुहूर्त्तमध्य एव मृत्वा सप्ततम्यामुत्पद्यते, अथ **यत्तस्य** नरस्य **दुःखहेतु विपाके,** तदिहभवे क्षयादिनाऽन्यभवे रोगादिदुर्गत्यादिना च **कण्डरीकवद्भवति** ॥९८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भावे विरत्तो मणुओ विसोगो, एएण दुक्खोहपरंपरेण ।
न लिप्पइ भवमज्झे वि संतो, जलेण वा पुक्खरिणीपलासं ॥९९॥

व्याख्या–**भावे** सङ्कल्पभावे **विरक्तो** मनोगुप्तो **मनुजो विशोको**ऽहर्षश्चैतया प्रागुक्तया **दुःखौघपरम्परया** नवनवदुःखभङ्ग्या, **संसारमध्ये वसन्नपि न लिप्यते**, यथा जलमध्ये वसदपि **पुष्करिणीपत्रं जलेनेव** ॥९९॥

इह पञ्चेन्द्रियार्थेषु सङ्कल्पविकल्पस्य चाऽनर्थहेतुत्वान्नवधालोचः श्रेष्ठः, भोगिनामेकस्यां स्त्रीतनावपि पञ्चविषयाणां दुःसङ्कल्पस्य दुःखश्रेणिर्दृश्यते एव । अथ निगमयति–

एविंदियत्था य मणस्स अत्था, दुक्खस्स हेऊ मणुयस्स रागिणो ।
ते चेव थोवं पि कयाइ दुक्खं, न वीयरागस्स करिंति किंचि ॥१००॥

व्याख्या–**एवमिन्द्रियार्था** रूपाद्याः, **चः** भिन्नक्रमः, **मनसोऽर्था** विकल्पाश्च, इन्द्रियमनांसि च **दुःखस्य हेतवो मनुष्यस्य रागिणो** द्वेषिणश्च, विपर्यये गुणमाह–**ते चैवेन्द्रियार्था** मनोऽर्थाश्च **स्तोकमपि कदाचिद् दुःखं वीतरागस्य** विगतरागद्वेषस्य **न कुर्वन्ति किञ्चिदिति** शारीरं मानसं च ॥१००॥

न कश्चन कामभोगेषु सत्सु वीतरागः स्यात्तत्कथमस्य दुःखाभाव उच्यते–

न कामभोगा समयं उवेंति, न यावि भोगा विगइं उविंति ।
जे तप्पओसी य परिग्गही य, सो तेसु मोहा विगइं उवेइ ॥१०१॥

व्याख्या–**न** नैव **कामभोगाः समतां** रागद्वेषाऽभावरूपामुपयान्त्युपगच्छन्ति, हेतुत्वेन, तद्धेतुत्वे हि तेषां न कश्चिद्रागद्वेषवान् भवेत्, **न चापि भोगाः** शब्दादयो **विकृतिं** क्रोधादिरूपां हेतुत्वेनोपयान्ति, अन्यथा न कश्चिद्रागद्वेषरहितः स्यात्, कोऽनयोस्तर्हि हेतुरित्याह–**यतस्तत्प्रद्वेषी** तेषु विषयेषु प्रद्वेषवान् **परिग्रहबुद्धिमान् तेष्वेव** रागीत्यर्थः, स **मोहाद्**रागद्वेषान्मोहनीयाद्**विकृतिमुपैति**, रागद्वेषरहितस्तु समतामित्यर्थादुक्तं ज्ञेयम् ॥१०१॥

किंरूपां विकृतिमुपैतीत्याह–

कोहं च माणं तहेव मायं, लोभं दुगुंछं अरतिं रतिं च ।
हासं भयं सोगपुमित्थिवेयं, नपुंसवेयं विविहे य भावे ॥१०२॥

व्याख्या–विषयासक्तो जीवः कदाचित् **क्रोधं च मानं च तथैव मायां लोभं**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

'दुगुंछं'इति **जुगुप्सां** विचिकित्सां, **अरतिम**स्वास्थ्यं, **रतिं** विषयासक्तिं, **हास्यं भयं शोकं पुंस्त्रीवेदं नपुंसकवेदं**, तत्र शोकं प्रियवियोगजं मनोदुःखं, पुंवेदः स्त्रीविषयाभिलाषः, स्त्रीवेदः पुरुषाभिष्वङ्गः, नपुंसकवेदश्चोभयाभिलाषरूपस्तान्, तथैवाऽन्यानपि **विविधान् भावान्** हर्षविषादादीन् प्राप्नोतीत्यग्रेतनगाथया सह सम्बन्धः ॥१०२॥

आवज्जई एवमणेगरूवे, एवंविहे कामगुणेसु सत्तो ।
अण्णे य एयप्पभवे विसेसे, कारुण्णदीणे हिरिमे वइस्से ॥१०३॥

व्याख्या—आपद्यते प्राप्नोति **एवम**नुरागादिवत्ताप्रकारेणाऽ**नेकरूपान**न्तानुबन्ध्यादिभेदेन तारतम्यभेदेन वा, **एवंविधानु**क्तप्रकारान् विकारान्, **कामगुणेषु सक्तो** द्विष्टश्चैतत्प्रभवान् क्रोधादिकृतान् विशेषान् परितापदुर्गतिपातादीन् प्राप्नोतीति सम्बन्धः, कथम्भूतोऽसावित्याह—**कारुण्यास्पदीभूतो दीनो**, मध्यमपदलोपीसमासोऽत्र, अत्यन्तदीन इत्यर्थः, **ह्रीमान्**, कोपाद्यापन्नो हि प्रीतिविनाशादिकमिहैवानुभवन्, परत्र च तद्विपाकमतिकटुकं च परिभावयन् प्रायोऽतिदैन्यं लज्जां च भजते । आर्षत्वाद् **द्वेष्यः** सर्वस्याऽप्रीतिकृत् ॥१०३॥

यतश्चैवं रागद्वेषावेव दुःखमूलमतः प्रकारान्तरेण तयोरुद्धरणोपायं तद्विपर्यये दोषं चाह—

कप्पं न इच्छेज्ज सहायलिच्छू, पच्छाणुतावेण य तवप्पभावं ।
एवं विकारे अमियप्पगारे, आवज्जइ इंदियचोरवस्से ॥१०४॥

व्याख्या—कल्पते स्वाध्यायादिक्रियासु क्षमः स्यादिति कल्पो योग्यस्तमिति, अपेर्गम्यत्वात् **कल्पमपि**, किं पुनरकल्पं ? शिष्यादि **नेच्छेत्**, **सहायलिप्सु**र्ममायं विश्रामणादिसाहाय्यं करिष्यतीत्यभिलाषुकः सन्, **पश्चा**दिति व्रतस्य तपसो वाङ्गीकारादुत्तरकाल**मनुतापः**, किमेतावन्मया कष्टमङ्गीकृतमिति चित्तसन्तापो यस्य स पश्चात्तापः, **सम्भूत**यतिवत् भवान्तरे भोगेच्छु**स्तपःप्रभावं** चेच्छन्, इहैव वाऽऽमर्षौषद्ध्यादिलब्धिरस्तु, प्रेत्य च चक्रितेत्यादि नेच्छेत् । किमेवं निषिद्ध्यते ? इत्याह—**एवं विकारान्** दोषान् **अमितप्रकारानापद्यते**, कः ? इत्याह—**इन्द्रियचौरवश्यः** पुमान्, इन्द्रियाणि चौरा धर्मसर्वस्वहरणादिन्द्रियचौरास्तद्वश्य इन्द्रियचौरवश्यः, इन्द्रियवशस्य ह्यवश्यं भावी चित्तविप्लवोऽपि, एवं ब्रुवतोऽयमाशयः—तदनुग्रहबुद्ध्या कल्पं, पुष्टालम्बनेन च तपःप्रभावं चेच्छतोऽपि मुनेर्न दोषः, यद्वा जिनकल्पिकादिः कल्पं शिष्यं धर्मसहायलिप्सुमपि नेच्छेत्

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

किमुतान्यमित्यर्थः, एवमन्यानपि रागद्वेषहेतूंस्त्यजेत्, एवं सिद्धं रागद्वेषोद्धरणं, विपर्यये दोषोक्तिः ॥१०४॥

दोषान्तरमाह–

तओ से जायंति पओयणाइं, निमज्जिउं मोहमहन्नवंसि ।
सुहेसिणो दुक्खविणोयणट्ठा, तप्पच्चयं उज्जमए य रागी ॥१०५॥

व्याख्या–ततो विकारापत्तेरनु 'से' **तस्य प्रयोजनानि** विषयसेवाहिंसादीनि **जायन्ते,** अन्तर्भावितण्यर्थत्वान्**निमज्जयितुं** स्वयमेव स्वं **मोहमहार्णवे,** यैर्जन्तुर्मोहाब्धौ मज्यते, स ह्युत्पन्नविकारत्वान्मूढ एवासीत्, विषयसेवनाद्यैस्तु कार्यैः सुतरां मुह्यति, किम्भूतस्य तस्य ? इत्याह–**सुखेषिणो दुःखस्य विमोचनार्थं विनोदनार्थं** वा, सुखेषितायां हि दुःखत्यागाय विषयसेवादिकार्यसम्भवः, कदाचिदीदृक् कार्योत्पत्तावपि तत्रायमुदासीनः स्यादत्रोच्यते–**तत्प्रत्ययमुक्तरूपकार्यनिमित्तं, चस्य** एवार्थत्वात् **उद्यच्छत्येव** तत्प्रवृत्तावुत्सहते एव, **रागी द्वेषी** च सन् ॥१०५॥

किमिति रागद्वेषवत एव सकलाप्यनर्थपरम्परोच्यते ? उच्यते–

विरज्जमाणस्स य इंदियत्था, सद्दाइया तावइयप्पगारा ।
न तस्स सव्वे वि मणुन्नयं वा, निव्वत्तयंती अमणुन्नयं वा ॥१०६॥

व्याख्या–विरज्यमानस्याऽद्विषतश्च पुनरिन्द्रियार्थाः **शब्दाद्यास्तावत्प्रकारा** लोकसिद्धाः खरमधुरादिभेदैर्बहुभेदाः, **न तस्य** नरस्य **सर्वेऽपि मनोज्ञतां** वा **अमनोज्ञतां** वा **निर्वर्त्तयन्ति** कुर्वन्ति, स्वरूपेण हि रूपादयो न मनोज्ञताऽमनोज्ञते कर्तुं क्षमाः, किं तु रक्तेतरनराशयादेव । उक्तं चान्यैरपि–

परिव्राट्कामुक-शुनामेकस्यां प्रमदातनौ ।
कुणपं कामिनी भक्ष्य-मिति तिस्रो विकल्पनाः ॥१॥ [ ]

ततो वीतरागस्य तत्कार्यहेत्वभावात् कथममी शब्दाद्या मनोज्ञताममनोज्ञतां वा कुर्युः ? तदभावे च कथं विषयसेवाऽऽक्रोशदानादिकार्योत्पत्तिः ? एवं पूर्वं समस्य मनोज्ञा-ऽमनोज्ञरूपादीनामकिञ्चित्करत्वमुक्तं, इह तु तस्येष्टाऽनिष्टत्वे न स्त एवेत्युच्यते ॥१०६॥

उपसंहरन्नाह–

एवं ससंकप्पविकप्पणासु, संजायइ समयमुवट्ठियस्स ।
अत्थे च संकप्पयओ तओ से, पहीयए कामगुणेसु तण्हा ॥१०७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—एवं स्वस्यात्मनः सङ्कल्पा रागद्वेषमोहाध्यवसायास्तेषां **विकल्पनाः** सकलदोषमूलत्वादिपरिभावनास्तासूपस्थितस्योद्यतस्य **सञ्जायते** 'समयं'ति **समता** माध्यस्थ्यं, सर्वानिन्द्रियार्थान् शब्दादीन् **सङ्कल्पयतश्च,** यथा नैते शब्दाद्याः कर्मबन्ध-हेतवः, किन्तु रागादय एवेति । यद्वा **समता** मिथस्तुल्याऽध्यवसायता, सा चाऽनिवृत्ति-बादरसम्परायगुणस्थाने एव, एतत्प्रपतृणां बहूनामप्येकरूपाऽध्यवसायत्वात्, तथाऽर्थान् जीवादीन् **सङ्कल्पयतश्च** शुभध्यानेनाऽध्यवस्यतस्तत इति समतायाः 'से' **तस्य** साधोः **प्रहीयते कामगुणेषु तृष्णा,** लोभसमतायां द्विधाप्याप्तायां गुणस्थानचटनेन क्षीण एव लोभः । यद्वा उक्तरीत्या **समकमेककालं उपस्थितस्योद्यतस्य** रागादिजयाय, यद्वा **समयं** सिद्धान्तं प्रति **उपस्थितस्य** तदुक्ताऽनुष्ठानोद्यतस्य, **स्वसङ्कल्पानां** रागादीनां **विकल्पनं** विशेषेण छेदनं **आशु** आशु **सञ्जायते** । यतः—

सामर्थ्ये वर्णनायां च, छेदने करणे तथा ।
औपम्ये अधिवासे च, कल्पशब्दं विदुर्बुधाः ॥१॥ [ ] ॥१०७॥

ततः—

स वीयरागो कयसव्वकिच्चो, खवेइ नाणावरणं खणेणं ।
तहेव जं दंसणमावरेई, जं चंतरायं पकरेइ कम्मं ॥१०८॥

व्याख्या—स प्रहीणतृष्णो **वीतरागः** स्यात्, तृष्णा लोभस्तत्क्षये च क्षीणकषाय-गुणस्थानाप्तिरिति **कृतसर्वकृत्य** इव प्राप्तप्रायत्वादनेन मुक्तौ, **क्षपयति ज्ञानावरणं क्षणेन** समयेन, **तथैव यद्दर्शनमावृणोति** तद्दर्शनावरणं, **यच्चान्तरायं** दानादिलब्धिविघ्नं **प्रकरोति** तदन्तरायकर्म च **क्षपयति** । स हि क्षपितमोहनीयस्तीर्णभवाब्धिरिव श्रमोपेतो विश्रम्यान्त-र्मुहूर्त्तं तद्विचरमसमये निद्राप्रचले क्षपयति, चरमसमये च ज्ञानावरणादित्रयम् ॥१०८॥

ततः—

सव्वं तओ जाणइ पासई य, अमोहणे होइ निरंतराए ।
अणासवे झाणसमाहिजुत्ते, आउक्खए मोक्खमुवेइ सुद्धे ॥१०९॥

व्याख्या—सर्वं ततो ज्ञानावरणादिक्षयाज्**जानाति** विशेषेण, द्वितीयसमये **पश्यति च** सामान्येन, यतः—**प्रज्ञप्तौ**—"**जं समयं जाणाइ नो तं समयं पासइ**" तथा "**केवली णं भंते ! इमं रयणप्पभं पुढविं अगारेहिं पमाणेहिं हेऊहिं संठाणेहिं परिवारेहिं जं समयं जाणइ, नो तं समयं पासइ हंत गोयमा केवली णं**" इत्यादि । **अमोहनो** मोहरहितः **स्यात्, निरन्तरायः,**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अनाश्रवो, ध्यानेन शुक्लेन या **समाधिः** स्वास्थ्यं, तेन **युक्तः, आयुर्नामगोत्रवेद्यानां** च **क्षये मोक्षमुपैति, शुद्धो** विगतकर्ममलः ॥१०९॥

मोक्षगतश्च यादृक् स्यात्तदाह—

सो तस्स सव्वस्स दुहस्स मुक्को, जं वाहई सययं जंतुमेयं ।
दीहामयविप्पमुक्को पसत्थो, तो होइ अच्चंतसुही कयत्थो ॥११०॥

व्याख्या—स मोक्षं प्राप्तस्तस्माज्जातिजरादेः **सर्वस्माद्दुःखान्मुक्तः** स्यात्, **यद्** दुःखं **बाधते सततं जन्तुमेतं** प्रत्यक्षं दृश्यमानं, दीर्घाणि स्थितितः कर्माणि, तान्येवामया रोगास्तेभ्यो विप्रमुक्तो **दीर्घामयविप्रमुक्तो**ऽत एव **प्रशस्तः** प्रशंसाऽर्हस्ततो दीर्घामयाऽभावाद्भवत्यत्यन्तसुखी, तत एव **कृतार्थः** कृतसकलकृत्यः सर्वसुखमयत्वात् ॥११०॥

अथाध्ययनार्थं निगमयति—

अणादिकालप्पभवस्स एसो, सव्वस्स दुक्खस्स पमोक्खमग्गो ।
वियाहिओ जं समुविच्च सत्ता, कमेण अच्चंत सुही भवंति ॥१११॥ त्ति बेमि

व्याख्या—अनादिकालप्रभवस्य सर्वदुःखस्यैष प्रमोक्षमार्गः प्रमोक्षोपायो **व्याख्यातः, यं** दुःखप्रमोक्षमार्गं **समुपेत्य** सम्यक् प्रतिपद्य **सत्त्वाः** क्रमेणोत्तरोत्तरगुणप्रतिपत्तिरूपेणाऽत्यन्तसुखिनो भवन्ति, **इति** समाप्तौ, **ब्रवीमी**ति प्राग्वत् ॥१११॥

इति द्वात्रिंशत्तमं प्रमादस्थानाख्यमध्ययनमुक्तम् ॥३२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

त्रयस्त्रिंशं कर्मप्रकृतिनामाध्ययनम् ॥

प्रमादाद्यैः कर्मप्रकृतयो बद्ध्यन्ते, इति त्रयस्त्रिंशं **कर्मप्रकृत्य**ध्ययनमाह–

अट्ठ कम्माइं वोच्छामि, आणुपुव्विं जहक्कमं ।
जेहिं बद्धो अयं जीवो, संसारे परिवत्तइ ॥१॥

व्याख्या–[**अष्ट** इत्यष्टसङ्ख्यानि]क्रियन्ते मिथ्यात्वादिहेतुभिर्जीवेनेति **कर्माणि, वक्ष्यामि आनुपूर्व्या**, सा च पश्चानुपूर्वादिरपि स्यादित्याह–**यथानुक्रमं** पूर्वानुपूर्व्या, **यैः** कर्मभि**र्बद्धः** श्लिष्टोऽयमिति प्रतिप्राणिस्वसंवेद्यो **जीवः संसारे परिवर्त्तते**, अज्ञतादि-विविधपर्यायानुभवतोऽन्यथाऽन्यथा स्यात् । (पठान्तरे–**परिभ्रमति** वा) ॥१॥

नाणस्सावरणं चेव, दंसणावरणं तहा ।
वेयणिज्जं तहा मोहं, आउकम्मं तहेव य ॥२॥

व्याख्या–ज्ञायतेऽनेनेति **ज्ञानम**वबोधस्तदाव्रियते सदप्याच्छाद्यतेऽनेन पटेनेव प्रकाश इ**त्यावरणीयं**, 'कृत्ये पुटो बहुलमिति वचनात् करणेऽनीयः' । दृश्यतेऽनेनेति दर्शनं सामान्यबोधः, तदाव्रियते, प्रतीहारेणेव नृपदर्शनमनेनेति **दर्शनावरणं, तथा** वेद्यते सुखदुःखतयाऽनुभूयते लिह्यमानमधुलिप्तासिधारावदति वेदनीयं । तथा मोहयति जनान् मद्यपानवद्विचित्रताजननेनेति **मोहः** । आयात्यागच्छति स्वकृतकर्मावाप्तनरकादिकुगतोर्निस्सरितुमनसोऽप्यात्मो निगडवत् प्रतिबन्ध इत्यायुः, तदेव कर्मे**त्यायुःकर्म** ॥२॥

नामकम्मं च गोत्तं च, अंतरायं तहेव य ।
एवमेयाइं कम्माइं, अट्ठेव उ समासओ ॥३॥

व्याख्या–तथैव नमयति गत्यादिविविधभावानुभावं प्रवणयति चित्रकर इवेभा-ऽश्वादिभावं प्रति रेखाभिरिति **नामकर्म** । **चः** समुच्चये । गीयते शब्द्यते उच्चावचशब्दैः

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कुलालादिवन्मृद्द्रव्यमनेनात्मेति **गोत्रं** । अन्तरा दातृग्राहकयोरन्तर्भाङ्गागारकवद्विघ्नहेतुनाऽयते गच्छतीत्यन्तरायं । **तथैव च, एवं** [**एतानि**] **कर्माण्यष्टैव, तुः** पूर्त्तौ, **समासतः** सङ्क्षेपेण । विस्तरतस्तु यावन्तो जन्तुभेदास्तावन्त्येव तानि, इत्यनन्तान्येवेति भावः । अत्र च ज्ञानोपयोग एव सर्वलब्धीनामाद्यो हेतुरिति प्राधान्यादादौ **ज्ञानावरणं,** ततो **दर्शनावरणं,** ततः केवलिनोऽप्येकविधबन्धकस्य सातबन्धोऽस्तीति व्यापित्वाद्वेदनीयं, ततोऽपि प्रायः संसारिणामिष्टाऽनिष्टविषयसम्बन्धात् सुखदुःखे, इष्टाऽनिष्टता च रागद्वेषाभ्यां, ततो **मोहनीयं** मोहप्रकर्षापकर्षभावित्वात्, आयुर्निबन्धनानां बह्वारम्भपरिग्रहत्वादीनां तदुद्भवमायुःकर्म, तत्प्रायो गत्यादिनामोदयाऽविनाभावीति ततो **नामकर्म,** ततो नरकादिनामोदयसहभाव्येव गोत्रकर्मोदय इति **गोत्रं** । तस्मादुच्चनीचभेदभिन्नात् प्रायो दानादिलब्धिभावाऽभावौ, तयोश्चान्तरायक्षयोदयावन्तरङ्गहेतू इति ततोऽन्तरायम् ॥३॥

इत्थं कर्मणो मूलप्रकृतीरुक्त्वोत्तरप्रकृतीराह–

नाणावरणं पंचविहं, सुयं अभिणिबोहियं ।
ओहिनाणं च तइयं, मणनाणं च केवलं ॥४॥

व्याख्या–ज्ञानावरणं पञ्चविधं, आवार्यभेदादेवावरणस्य भेद इत्यावार्यभेदस्य ज्ञानस्यैव भेदानाह–**श्रुतमाभिनिबोधिकमवधिज्ञानं** तृतीयं, **मनोज्ञानं, केवलं च,** आवरणमिति शब्दः प्रत्येकं योज्यः ॥४॥

अथ दर्शनावरणीयकर्मणो भेदानाह–

निद्दा तहेव पयला, निद्दानिद्दा य पयलपयला य ।
तत्तो य थीणगिद्धी उ, पंचमा होइ नायव्वा ॥५॥

व्याख्या–निद्रा सुखप्रतिबोधरूपा, यतः–"**सुहपडिबोहो निद्दा**" [ ] त्ति **तथैवेति** निद्रावत् **प्रचला,** या स्थितस्योपविष्टस्य च समायाति, यतः–"**पयला होइ ठियस्स उ**" [ ] त्ति **निद्रानिद्राऽवगाढनिद्रा** दुःखप्रतिबोधरूपा, यतः–"**दुहपडिबोहो य निद्दनिद्द**" [ ] त्ति **प्रचलाप्रचला** चङ्क्रम्यमाणस्य चलतो गाढनिद्रा, यतः–"**पयलापयला उ चंकमउ**" [ ] त्ति **ततः** प्रकृष्टतराऽशुभानुभावा स्त्याना पुष्टा ऋद्धिर्गृद्धिर्वा यस्यां सा **स्त्यानर्द्धिः,** एतदुदये केशवार्द्धबलो बहुरागद्वेषोदयो जन्तुः स्यात्, इयं दिनचिन्तितार्थसाधिनी **पञ्चमी ज्ञेया, तुः** पूर्त्तौ ॥५॥

चक्खुमचक्खूओहिस्स-दंसणे केवले य आवरणं ।
एवं तु नवविगप्पं, नायव्वं दंसणावरणं ॥६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—**म**कारोऽलाक्षणिकः, चक्षुश्चाऽचक्षुश्चावधिश्च **चक्षुरचक्षुरवधि**रिति समाहारः, **तस्य दर्शनं**, ततश्चक्षुर्दर्शने चक्षुषा रूपासामान्यग्रहणे, अचक्षूंषि चक्षुःसदृशानि शेषेन्द्रियमनांसि, तद्दर्शने, तेषां स्वस्वविषयसामान्यबोधे, अवधिदर्शने अवधिना रूपिद्रव्याणां सामान्यग्रहणे, तथा 'केवलेय'त्ति **केवलदर्शने** सर्वद्रव्यपर्यायाणां सामान्यबोधे, **आवरणं** तच्चक्षुर्दर्शनावरणादि, [**एवमि**त्यनेन] निद्रापञ्चकचक्षुर्दर्शनावरणादिचतुष्केण, **तुः** पूर्त्तौ, **नवविकल्पं** नवभेदं **दर्शनावरणं** भवति ॥६॥

वेयणिज्जं वि य दुविहं, सायमसायं च आहियं ।
सायस्स उ बहूभेया, एमेवासायस्स वि ॥७॥

व्याख्या—**वेदनीयं** कर्मापि, **चेति** पूर्त्तौ, **द्विविधं** द्विभेदं । स्वाद्यते आह्लादकत्वेनास्वाद्यते इति निरुक्त्या **सातं** सुखं शारीरं मानसं च, इहोपचारात्तन्निबन्धनं कर्मैवमुक्तम्, **असातं दुःखं चाख्यातं** जिनैः, **सातस्यापि बहवो भेदाः**, न केवलं ज्ञानदर्शनावरणयोः, तद्धेतुभूतभूतानुकम्पादिबहुभेदत्वात्, **एवमेव** बहवोऽसातस्यापि, दुःखार्त्तौ शोकतापादितद्धेतुबहुविधत्वात् ॥७॥

मोहणिज्जं पि दुविहं, दंसणे चरणे तहा ।
दंसणे तिविहं वुत्तं, चरणे दुविहं भवे ॥८॥

व्याख्या—**मोहनीयमपि द्विविधं** वेदनीयवत्, **दर्शने** तत्त्वरुचिरूपे **चरणे** चारित्रे [तथा], दर्शनमोहनीयं चारित्रमोहनीयं चेत्यर्थः । तत्र **दर्शने** दर्शनमोहनीयं **त्रिविधमुक्तं**, **चरणे** चरणमोहनीयं **द्विविधं भवेत्** ॥८॥

दर्शनमोहनीयत्रैविध्यमाह—

सम्मत्तं चेव मिच्छत्तं, सम्मामिच्छत्तमेव य ।
एयाओ तिन्नि पगडीओ, मोहणिज्जस्स दंसणे ॥९॥

व्याख्या—सम्यग्भावः **सम्यक्त्वं** शुद्धदलिकानि, यदुदयेऽपि तत्त्वरुचिः स्यात्, **चैवे**ति पूर्त्तौ, मिथ्याभावो **मिथ्यात्वम**शुद्धदलिकानि, यैरतत्त्वे तत्त्वमिति स्यात् । **सम्यग्मिथ्यात्वं** शुद्धाऽशुद्धदलिकानि, यैरुभयस्वभावता जन्तोः स्यात्, इह सम्यक्त्वाद्या जीवधर्मास्तद्धेतुत्वाच्च दलिकेषु एतद्व्यपदेशः, **एतास्तिस्रः प्रकृतयो मोहनीयस्य दर्शने** दर्शनविषयस्य ॥९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चरित्तमोहणं कम्मं, दुविहं तु वियाहियं ।
कसायवेयणिज्जं च, नोकसायं तहेव य ॥१०॥

व्याख्या—चरित्रे मुह्यतेऽनेनेति **चरित्रमोहनं कर्म**, येन जानन्नपि च तत्फलादि न तत्प्रतिपद्यते तत् **तु द्विविधं व्याख्यातं** जिनैः (पाठान्तरे-**चरित्तमोहणिज्जं दुविहं । वोच्छामि अणुपुव्वसो**) कषायाः क्रोधाद्यास्तद्रूपेण वेद्यतेऽनुभूयते तत् **कषायवेदनीयं, चः** समुच्चये, **नोकषायवेदनीयं** नोकषायाः कषायैः सहवर्त्तिनो हास्यादयस्तैर्वेद्यते । **तथे**ति समुच्चये, **एवे**ति पूर्त्तौ ॥१०॥

अनयोर्भेदानाह—

सोलसविहभेएणं, कम्मं तु कसायजं ।
सत्तविह नवविहं वा, कम्मं च नोकसायजं ॥११॥

व्याख्या—षोडशविधभेदेन, [षोडशप्रकारो यो भेदो-नानात्वं तेन, लक्षणे तृतीया यद्वा षोडशविधं भेदेन भिद्यमानतया चिन्त्यमाने प्राकृतत्वाद्] अनुस्वारलोपः **कर्म तु** पुनः, कषायेभ्यो जायते इति **कषायजं, "जं वेयइ तं बन्धइ"** [ ] इत्युक्तेः कषायवेदनीयं । षोडशभेदास्तु—क्रोधमानमायालोभानां चतुर्णां प्रत्येमनन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानावरण-सञ्ज्वलनभेदैश्चतुर्विधचतुर्विधत्वात् । 'सत्तविह'त्ति प्राग्वद्विन्दुलोपात् **सप्तविधं नवविधं वा कर्म नोकषायजं** नोकषायवेदनीयं । तत्र सप्तविधं हास्यरत्यरतिभयशोकजुगुप्साः षट्, वेदश्च सामान्यविवक्षयैक एवेति । यदा तु वेदः स्त्रीपुरुषनपुंसकभेदेन त्रिधा गण्यते तदा नव-विधम् ॥११॥

नेरइयतिरिक्खाउं, मणुस्साउं तहेव य ।
देवाउयं चउत्थं तु, आउकम्मं चउव्विहं ॥१२॥

व्याख्या—आयुःशब्दः प्रत्येकं योज्यते । निःक्रान्तं आयादिष्टफलात्, तत्रोत्पन्नानां सुखाऽभावेन निरया नरकावासास्तेषु भवा नैरयिकास्तेषामायु**र्नैरयिकायुः**, येन जीवास्तत्र म्रियन्ते । एहन्ति रोचन्ति गच्छन्तीति तिर्यञ्चः, व्युत्पत्तिनिमित्तं चैतत्, प्रवृत्तिनिमित्तं तु तिर्यग्गतिनामैकेन्द्रियाद्यास्तेषामायुस्**तिर्यगायुः**, तथा **मनोः** श्री**ऋषभस्या**ऽपत्यानि मनुष्याः, **'मनोर्जातावण्यतौ सुकचा'** इति यत्प्रत्ययः सुगागमनश्च तेषामायु**र्मनुष्यायुः**, देवानामायु-**र्देवायुः**, येन तेषु स्थीयते, **चतुर्थं, तुः** पूर्त्तौ, एव**मायुःकर्म चतुर्विधम्** ॥१२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

नामं कम्मं तु दुविहं, सुह असुहं च आहियं ।
सुहस्स उ बहू भेया, एमेव असुहस्स वि ॥१३॥

व्याख्या—नामकर्म द्विविधं, शोभते सर्वावस्थास्वनेनात्मेति **शुभं, अशुभं च** तद्विपरीत**माख्यातं, शुभस्यापि बहवो भेदाः, एवमेवाऽशुभस्यापि** बहुभेदाः, तत्रोत्तरोत्तरभेदतः शुभनाम्नोऽनन्तभेदत्वेऽपि मध्यमविवक्षातः सप्तत्रिंशद्भेदा यथा—नृगतिः १ देवगतिः २ पञ्चेन्द्रिजातिः ३ औदारिक ४ वैक्रिय ५ आहारक ६ तैजस ७ कार्मण ८ शरीराणि पञ्च। समचतुरस्रसंस्थानं ९ वज्रऋषभनाराचसंहननं । १० औदारिक ११ वैक्रिय १२ आहारक १३ अङ्गोपाङ्गानि त्रीणि । प्रशस्तवर्ण १४ गन्ध १५ रस १६ स्पर्शाः १७ चत्वारः, मनुष्यानुपूर्वी १८ देवानुपूर्वी १९ चेत्यानुपूर्वीद्वयं । अगुरुलघु २० पराघातं २१ उच्छ्वासं २२ आतपः २३ उद्योतः २४ प्रशस्तविहायोगतिः २५ । तथा त्रसं २६ बादरं २७ पर्याप्तं २८ प्रत्येकं २९ स्थिरं ३० शुभं ३१ सुभगं ३२ सुस्वरं ३३ आदेयं ३४ यशःकीर्त्तिः ३५ निर्माणं ३६ तीर्थङ्करनाम चेति ३७ । एताश्च सर्वा अपि शुभानुभावत्वाच्छुभाः, तथा अशुभनाम्नोऽपि मध्यमविवक्षया चतुस्त्रिंशद्भेदाः, यथा—नरकगतिः १ तिर्यग्गतिः २ एकेन्द्रियजातिः ३ द्वीन्द्रियजातिः ४ त्रीन्द्रियजातिः ५ चतुरिन्द्रियजातिः ६ ऋषभनाराचं ७ नाराचं ८ अर्द्धनाराचं ९ कीलिका १० सेवार्त्तं ११ न्यग्रोधमण्डलं १२ साति १३ वामनं १४ कुब्जं १५ हुण्डं १६ अप्रशस्तवर्ण १७ गन्ध १८ रस १९ स्पर्श २० चतुष्कं। नरकानुपूर्वी २१ तिर्यगानुपूर्वी २२ उपघातं २३ अप्रशस्तविहायोगतिः २४ स्थावरं २५ सूक्ष्मं २६ साधारणं २७ अपर्याप्तं २८ अस्थिरं २९ अशुभं ३० दुर्भगं ३१ दुःस्वरं ३२ अनादेयं ३३ अयशःकीर्त्तिश्च ३४ इत्येतानि चाशुभनारकत्वादिहेतुत्वेनाऽशुभानि । अत्र बन्धनसङ्घाते शरीरेभ्यो वर्णाद्यवान्तरभेदाश्च वर्णादिभ्यः पृथग् न विवक्ष्यन्ते इति नोक्तः सङ्ख्यातिक्रमः ॥१३॥

गोत्तं कम्मं दुविहं, उच्चं नीयं च आहियं ।
उच्चं अट्ठविहं होइ, एवं नीयं पि आहियं ॥१४॥

व्याख्या—गोत्रकर्म द्विविधं, उच्चमिक्ष्वाकुजात्यादि, **नीचं च** नीचजात्यादि **आख्यातं** । तत्रोच्चमुच्चैर्गोत्रमष्टविधं, एवं नीचगोत्रमप्यष्टविधमाख्यातं । अष्टविधत्वं चानयोर्बन्धहेत्वष्टविधत्वात्, तत्राष्टौ जात्यऽमदाद्या उच्चैर्गोत्रस्य बन्धहेतवः, जातिमदाद्याश्च नीचैर्गोत्रस्य बन्धहेतवः, तथाच **प्रज्ञापना—"उच्चागोयकम्मसरीरपुच्छा-गोयमा जाइअमएणं कुलअमएणं बलअमएणं रूवअमएणं तवअमएणं ईसरियअमएणं**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सुयअमएणं लाभअमएणं **उच्चागोयकम्मपभोगवं होइ । णीयागोयकम्मसरीरपुच्छा**– "गोयमा जाइमएणं कुलमएणं" इत्याद्यालापका विपर्ययेणाष्टौ यावत् "**णीयागोय-कम्मपभोगवं होइ**" [ ] त्ति ॥१४॥

दाणे लाभे य भोगे य, उवभोगे वीरिए तहा ।
पंचविहमंतरायं, समासेण वियाहियं ॥१५॥

व्याख्या–दीयते इति **दानं, तस्मिन्**, लभ्यते इति **लाभस्तस्मिन्**, भुज्यते सकृदुपयुज्यते इति **भोगः**, सकृद्भोग्यपुष्पाहारादिविषयः, उपेत्यधिकं पुनः पुनरुपभुज्य-मानतया भुज्यते इत्**युपभोगः**, पुनरुपभोग्यगृहस्त्र्यादिविषयः, उक्तं हि–

सइ भुज्जइ त्ति भोगो, सो पुण आहारपुप्फमाइओ ।
उवभोगो उ पुणो पुण, उवभुज्जइ भवणविलयाई ॥१॥ [क.प्रा./१६५गा.]

तस्मिन्, तथा विशेषेण ईर्यते चेष्ट्यतेऽनेनेति **वीर्यं, तस्मिन्**, चः समुच्चये, यदन्तरायं तत्**पञ्चविधमन्तरायं समासेन व्याख्यातं** । विस्तरतस्तु भेदानन्त्यमपि तरतमादि-भावैः, तत्र यस्मिन् सति चतुरे ग्रहीतरि, देये वस्तुनि, तस्य फलं जानन्नपि दाने न प्रवर्त्तते **तद्दानान्तरायं** । यस्मिन् विशिष्टेऽपि दातरि सति याचनानिपुणोऽपि याचको न लभते **तल्लाभान्तरायं** । पुनर्विभवादौ सत्यपि भोक्तुं न शक्यते **तद्भोगान्तरायं** । येन उपभोगयोग्ये वस्तुनि सति उपभोक्तुं न शक्यते **तदुपभोगान्तरायं** । यद्बशाद्बलवान् नीरोगस्तरुणोऽपि तृणमपि भङ्क्तुं न शक्नोति तस्य पुरुषस्य **वीर्यान्तरायं** कर्म ज्ञेयम् ॥१५॥

एयाओ मूलपयडीओ, उत्तराओ य आहिया ।
पएसग्गं खित्तकाले य, भावं वा उत्तरं सुण ॥१६॥

व्याख्या–**एता मूलप्रकृतयो** ज्ञानावृत्त्याद्याः, **उत्तरप्रकृतयः** श्रुतावृत्त्याद्या **आख्याताः**, प्रदेशाः परमाणवस्तेषामग्रं परिमाणं **प्रदेशाग्रं**, 'खित्तकाले य'त्ति **क्षेत्रकालौ च**, तत्र क्षयन्ति निवसन्ति तस्मिन्निति क्षेत्रमाकाशं, कालश्च बद्धस्य कर्मणो जीव-प्रदेशाऽविचटने स्थितिः, **भावं चा**नुभागं कर्मपर्यायं चतुःस्थानिकादिरसं, अत **उत्तरमि**ति अतः प्रकृत्यभिधानादुत्तरं शृणु कथ्यमानम् ॥१६॥

तत्रैकसमयग्राह्यं कर्मप्रदेशाग्रमाह–

सव्वेसिं चेव कम्माणं पएसग्गमणंतयं ।
गंठियसत्ताइयं च, अंतो सिद्धाण आहियं ॥१७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—सर्वेषामपि कर्मणां ज्ञानावरणादीनां **प्रदेशाग्रं** अणुमानमनन्तमेवा-**ऽनन्तकं,** अनन्तपरमाणुनिष्पन्नत्वाद्वर्गणानां, तच्चानन्तकं ग्रन्थिरिव ग्रन्थिर्घनो रागद्वेष-परिणामस्तं गच्छन्तीति ग्रन्थिगास्ते च ते सत्वाः, ये ग्रन्थिदेशं गत्वा तद्भेदाऽकृतेर्न कदाप्यग्रे गन्तारस्ते चाऽभव्या एवात्र गृह्यन्ते, तानतीतं तेभ्योऽनन्तगुणत्वेनातिक्रान्तं **ग्रन्थिगसत्त्वातीतं, तथान्तर्मध्ये सिद्धानां** सिद्धिप्राप्तानां **आख्यातं** जिनैः, सिद्धेभ्यो हि कर्माणवोऽनन्तभाग एव, तदपेक्षया सिद्धानामनन्तगुणत्वात्, अतः सङ्ख्यामपेक्ष्य सिद्धान्तर्वर्त्ति तदनन्तकमुच्यते, एकसमयग्राह्यकर्माण्वपेक्षं चैतत् । उक्तं हि—"**तेयाकम्मपोग्गला अभव्वसिद्धिएहिं अणन्तगुणा, सिद्धाणमणन्तभागमेत्ता एकेकम्मि समए गहणमिंति** । [ ] (पाठान्तरे—**गंठिपसत्ताऽणाइ**'त्ति—ग्रन्थिप्रसक्तानां घनरागद्वेषपरिणामं ग्रन्थिं तादृक्परिणामाऽभावाद-ऽभिन्दानानां सत्त्वानां यो बन्धोऽनाद्यन्त आद्यन्तहीनो ज्ञेयः, सिद्धानां पुनर्भविष्यत्सिद्धीनां बन्धोऽनादिरपि सान्तस्तादृक्परिणामतो व्याख्यातोऽर्हद्भिः ॥१७॥

क्षेत्रमाह—

सव्वजीवाण कम्मं तु, संगहे छद्दिसागयं ।
सव्वेसु वि पएसेसु, सव्वं सव्वेण बद्धगं ॥१८॥

व्याख्या—सर्वजीवानामेकेन्द्रियाद्यशेषाणां **कर्म** ज्ञानावृत्त्यादि, **तुः** पूर्त्तौ, **सङ्ग्रहे** सङ्ग्रहणक्रियायां भवति, यद्वा **सर्वजीवाः, णे**ति वाक्यभूषायां, **कर्म** संगहे'ति **संगृह्णन्ति,** कीदृशं सदित्याह—'छद्दिसागयं'ति षण्णां दिशां समाहारः **षड्दिशं,** तत्र गतं स्थितं षड्दिशगतं, अत्र च दिशः पूर्वाद्या ऊर्ध्वाधोदिग्द्वयं चेति, इयं चात्मावष्टब्धाकाश-प्रदेशाऽपेक्षयोच्यते । यत्र ह्याकाशे जीवोऽवगाढस्तत्रैव ये कर्मपुद्गलास्ते रागादिस्नेहयोगा-दात्मनि लगन्ति, न क्षेत्रान्तरावगाढभिन्नदेशस्य, तद्भावपरिणामाऽभावात्, यथा ह्यग्निः स्वदेशस्थितान् प्रायोग्यपुद्गलानात्मभावेन परिणमयति, एवं जीवोऽपि, अल्पत्वाच्चेह विदिशामविवक्षितत्वेन षड्दिशगतमित्युक्तिः, यतो विदिक्स्थितमपि कर्मात्मा लाति । उक्तं हि **गन्धहस्तिना—"सर्वासु दिक्ष्वात्मावधिकासु व्यवस्थितान् पुद्गलानादत्त"** [ ] इति । तथा क्षेत्रप्रस्तावे यद्दिगुक्तिस्तत्तासां व्योमाऽभेदज्ञप्त्यै । तथा षड्दिग्गतं द्वीन्द्रियादीनेवाश्रित्य नियमेन व्याख्येयं, एकेन्द्रियाणामन्यथापि सम्भवात्, तथागमः—"**जीवा णं भंते ! तेया-कम्मपोग्गलाणं गहणं करेमाणे किं तिदिसिं करेइ ? [चउद्दिसिं करेइ पंचदिसिं करेइ] छद्दिसिं करेइ गोयमा ! सिय तिदिशिं सिय चउद्दिसिं सिय पंचदिसिं सिय छद्दिसिं करेति । एगिन्दियाणं भंते तेयाकम्मपोग्गलाणं गहणे करेमाणे किं तिदिसिं जाव छद्दिसिं करेइ,**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

गोयमा ! सिय तिदिसिं सिय चउद्दिसिं सिय पञ्चदिसिं सिय छदिसिं करेइ । बेइंदिय-तेइंदियचउरिंदियपंचेन्दिय नियमा छद्दिसिं'' [ ] ति । तच्च षड्दिग्गतं **सर्वेष्वपि** न तु कतिपयेषु **प्रदेशेषु** आकाशस्यात्मावष्टब्धेषु कर्म सर्वजीवानां सङ्ग्रहे योग्यं स्यात्, जीवास्तत्सङ्गृह्णन्ति, तत्स्थकर्माणून् प्रत्यात्मनो ग्रहणहेत्वविशेषात्, तथा **सर्वं** समस्तं आयुर्बन्धेऽष्टविधं, अन्यथा सप्तविधं ज्ञानावरणादि नत्वेकमेव ।

आत्मा हि सर्वप्रकृतियोग्याणून् सामान्येनादाय तान्येवाध्यवसायविशेषात् पृथग् पृथग् ज्ञानावृत्त्यादित्वेन परिणमयति, तच्चैवंविधं कर्म सङ्गृहीतं सत् किं कैश्चिदेवात्म-प्रदेशैर्बद्धं स्यात् ? यद्वा सर्वेणात्मनेत्याह—**सर्वेण** समस्तेनात्मना बद्धमेव **बद्धकं** क्षीराम्भोवदात्मप्रदेशैः श्लिष्टं मिथः सम्बद्धानामात्मप्रदेशानां सहैव योगौ स्तः, नत्वेकैकेन ताभ्यां च कर्मबन्ध इति सर्वात्मना ग्रहणबन्धौ स्यातां । यद्वा 'सव्वेसु वि पएसेसु'त्ति सुब्व्यत्ययात्तत्**सर्वैरपि प्रदेशैरात्मनः सर्वं** सर्वप्रकृतिरूपं सर्वेण प्रकृतिस्थित्यादिना प्रकारेण बद्धकम् ॥१८॥

कालमाह—

उदहीसरिनामाणं, तीसई कोडीकोडीओ ।
उक्कोसिया होइ ठिई, अंतोमुहुत्तं जहन्निया ॥१९॥

व्याख्या—उदधिः समुद्रस्तेन सदृक् नामाह्वानमेषां तानि **उदधिसदृक्नामानि** सागरोपमाणि तेषां **त्रिंशत्कोटीकोट्यः उत्कृष्टा भवति स्थितिः**, मुहूर्तस्यान्तरं [**अन्तर्मुहूर्त्तं**] मुहूर्त्तं न्यूनं **जघन्यिका** ॥१९॥

केषामित्याह—

आवरणिज्जाणं दुण्हं पि, वेयणिज्जे तहेव च ।
अंतराए य कम्मंमि, ठिइ एसा वियाहिया ॥२०॥

व्याख्या—**आवरणीययो**र्ज्ञानावरणदर्शनावरणीययो**र्द्वयोरपि, वेदनीये तथैव च, अन्तराये च कर्मणि स्थितिरेषा व्याख्याता** । इह षष्ठीप्रक्रमेऽपि वेदनीयादौ सप्तमी तत्त्वतोऽर्थैक्याद्वेद्यान्तराययोः, यतः—

राजा भर्त्ता मनुष्यस्य, तेन राज्ञः स उच्यते ।
वृक्षस्तिष्ठति शाखासु, भवेत्तत्रेति तस्य ताः ॥१॥ [ ]

तथा—वेद्यस्य जघन्या स्थितिरन्तर्मुहूर्त्तं सूत्रकारेणोक्ता, अन्यैस्तु जघन्या द्वादश-मुहूर्ता ॥२०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

उदहिसरिसनामाणं, सत्तरिं कोडिकोडीओ ।
मोहणिज्जस्स उक्कोसा, अंतोमुहुत्तं जहण्णिया ॥२१॥

व्याख्या—उदधिसदृशनाम्नां सप्ततिः कोटीकोट्यो मोहनीयस्योत्कृष्टा स्थितिः, अन्तर्मुहूर्त्तं च जघन्यिका ॥२१॥

तेत्तीससागरोवमा, उक्कोसेणं वियाहिया ।
ठिई आउकम्मस्स, अंतमुहुत्तं जहण्णिया ॥२२॥

व्याख्या—त्रयस्त्रिंशत्सागरोपमाणि उत्कृष्टानि आयुषः स्थितिः, आर्षे सुपो लुक्, उत्कृष्टेनाख्याता स्थितिः, तुः पूर्त्तौ, आयुःकर्मणोन्तर्मुहूर्त्तं जघन्यिका च ॥२२॥

उदहिसरिसनामाणं, वीसई कोडिकोडीओ ।
नामगोयाण उक्कोसा, अट्ठमुहुत्तं जहण्णिया ॥२३॥

व्याख्या—उदधिसदृशनाम्नां विंशतिः कोटीकोट्यो नामगोत्रयोरुत्कृष्टा । अष्टमुहूर्त्ता च जघन्यिकेति ॥२३॥

इत्थमुत्कृष्टा जघन्या चावस्थितिमूलविषया सूत्रकारेणोक्ता, उत्तरप्रकृतिविषया प्रदर्श्यते । तत्रोत्कृष्टा स्त्रीवेदसातवेद्यनृगत्यानुपूर्वीणां चतसृणामुत्तरप्रकृतीनां पञ्चदशसागरोपमकोटीकोट्यः, षोडशकषायाणां चत्वारिंशत्, क्लीबाऽरतिभयशोकजुगुप्सानां पञ्चानां विंशतिः, पुंवेदहास्यरतिदेवगत्यानुपूर्वीद्वयाद्यसंहननसंस्थानशुभखगतिस्थिरसुभगसुस्वरादेययशःकीर्त्युच्चैर्गोत्राणां पञ्चदशानां दश, न्यग्रोधसंस्थानद्वितीयसंहननयोर्द्वादश, सातिसंस्थाननाराचसंहननयोश्चतुर्दश, कुब्जार्धनाराचयोः षोडश, वामनसंस्थानकीलिकासंहननद्वित्रिचतुरिन्द्रियजातिसूक्ष्माऽपर्याप्तसाधारणानामष्टानामष्टादश, तिर्यगायुषः पल्योपमत्रयं, शेषाणां तु मूलप्रकृतिवदुत्कृष्टा स्थितिः ।

जघन्या तु निद्रापञ्चकाऽसातावेद्यानां षण्णां सागरसप्तभागास्त्रयः पल्याऽसङ्ख्येयभागोनाः, सातस्य तु द्वादश मुहूर्त्ताः, मिथ्यात्वस्य पल्याऽसङ्ख्येयभागोनं सागरोपमं, आद्यद्वादशकषायाणां चत्वारः सागरोपमाः सप्तभागास्तावतैवोनाः, क्रोधस्य सञ्ज्वलनस्य मासद्वयं, मानस्य मासो, मासार्द्धं मायायाः, पुंवेदस्याष्टौ वर्षाणि, शेषनोकषायनृतिर्यग्गतिजातिपञ्चकौदारिकशरीरतदङ्गोपाङ्गतैजसकार्मणसंस्थानषट्कसंहननषट्कवर्णचतुष्कतिर्यग्मनुष्यानुपूर्व्यगुरुलघूपघातपराघातोच्छ्वासातपोद्योतशुभाशुभखगतियशःकीर्त्तिवर्जत्रसादि-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

विंशतिनिर्माणनीचैर्गोत्रदेवगत्यानुपूर्वीद्वयवैक्रियाङ्गतदङ्गोपाङ्गानां अष्टषष्ट्युत्तरप्रकृतीनां सागराः सप्तभागौ द्वौ पल्योपमाऽसङ्ख्येयभागोनौ, वैक्रियषट्कस्य सागरोपमसहस्रं सप्त भागौ द्वौ पल्याऽसङ्ख्येयभागोनौ, आहारकतदङ्गोपाङ्गाऽर्हन्नाम्नामन्तःसागरकोटी जघन्योत्कृष्टा च, किन्तूत्कृष्टातः सङ्ख्येयगुणहीना जघन्या ज्ञेयाः, एवं कर्मणां प्रदेशाग्रं क्षेत्रकालौ चोक्तौ । अथ भावमाश्रित्याह—

सिद्धाणणंतभागे, अणुभागा भवंति उ ।
सव्वेसु वि पएसग्गं, सव्वजीवे अइच्छियं ॥२४॥

व्याख्या—सिद्धानां मुक्तानामनन्तमो **भागोऽनुभागा** रसभेदा **भवन्ति, तुः** पूर्त्तौ, अयं चानन्तभागोऽनन्तसङ्ख्य एव, ते चानुभागा अनन्ता ज्ञेयाः, प्रदेशपरिमाणमाह—**सर्वेष्व**नुभागेषु प्रदेश्यन्त इति **प्रदेशा** बुद्ध्या विभज्यमानास्तदविभागैकदेशास्**तेषामग्रं** 'सव्वजीवे अइच्छियं'त्ति **सर्वजीवेभ्यो** भव्याऽभव्येभ्योऽ**तिक्रान्तं,** ततोऽपि तेषामनन्तगुणत्वात् ॥२४॥

एवं [प्रकृत्युक्त्या] प्रकृतिबन्ध(न्धं) प्रदेशाग्रोक्त्या प्रदेशबन्ध(न्धं) कालोक्त्या स्थितिबन्धं भावेनानुभागबन्धमुक्त्वा कर्मबन्धायोपसंहरन्नुपदिशति—

तम्हा एएसि कम्माणं, अणुभागा वियाणिया ।
एएसिं संवरे चेव, खवणे य जए बुहे ॥२५॥ त्ति बेमि

व्याख्या—यस्मादीदृशः प्रकृतिबन्धाद्यास्**तस्मादेतेषां कर्मणां** ज्ञानावृत्त्यादीना-**मनुभागान्** प्रकृतिबन्धादींश्च **विज्ञाय** विशेषेण कटुविपाकत्वेन भवहेतुत्वेन ज्ञात्वा-ऽनुभागोक्तिरशुभानुभागानां प्रायो भवनिर्वेदहेतुत्वा**देतेषां** कर्मणां **संवरे**ऽनुपपत्तानां ग्रहण-निरोधे, **चः** समुच्चये, **एवे**ति निश्चये, **क्षपणे चा**त्तानां निर्जरणे **यतेत** यत्नं कुर्यात् **बुधस्तत्वज्ञः, इति** समाप्तौ, **ब्रवीमी**ति प्राग्वत् । अत्र निर्युक्तिः—

पगइठिइमणुभागे, पएसकम्मं च सुट्ठु नाऊणं ।
एएसिं संवरे खलु, खवणे उ सयावि जइयव्वं ॥१॥ [उ.नि./गा.५३३]

गाथा स्पष्टैव ॥२५॥

इति कर्मप्रकृत्याख्यं त्रयस्त्रिंशमध्ययनमुक्तम् ॥३३॥

---

१. नीचैर्गोत्राणां षट्षष्ट्युत्तरप्रकृतीनां सागरोपमसप्तभागौ द्वौ पल्योपमासङ्ख्येयभागन्यूनौ वैक्रियषट्कस्य सागरोपमसहस्रभागौ द्वौ पल्योपमासङ्ख्येयभागन्यूनौ आहारकतदङ्गोपाङ्गतीर्थकरनाम्ना-मन्तःसागरोपमकोटीकोटी, ननूत्कृष्टाऽपि एतावत्येवासां तिसृणां स्थितिरभिहिता, सत्यं, तथाऽपि ततः सङ्ख्येयगुणहीनत्वेनास्या जघन्यत्वमिति सम्प्रदायः । उत्त.बृ.वृत्तौ गा.२३ मध्ये ॥ सम्पा.

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चतुस्त्रिंशं लेश्याध्ययनम् ॥

कर्मप्रकृतीनां स्थितिर्लेश्याभिः स्यादिति चतुस्त्रिंशं लेश्याध्ययनमाह—अत्र निर्युक्तिः—

लेसाणं निक्खेवो, चउव्विहो दुविहो होइ दव्वंमि ।
आगमनोआगमतो, नोआगमतो य सा तिविहा ॥१॥ [उ. नि./गा.५३४]

जाणगसरीरभविए, तव्वइरित्ते य सा पुणो दुविहा ।
कम्मा नोकम्मे य नोकम्मे होइ दुविहा उ ॥२॥ [उ. नि./गा.५३५]

जीवाणमजीवाण य, दुविहा जीवाण होइ नायव्वा ।
भवमभवसिद्धियाणं, दुविहाण वि होइ सत्तविहा ॥३॥ [उ. नि./गा.५३६]

अजीवकम्मणो दव्व-लेसा दसविहा उ नायव्वा ।
चंदाण य सूराण य, गहगणनक्खत्ततारागं ॥४॥ [उ. नि./गा.५३७]

आभरणाच्छादणा, दंसगाणमणिकागिणीण जा लेसा ।
अजीववदव्वलेसा, नायव्वा दसविहा एसा ॥५॥ [उ. नि./गा.५३८]

जा कम्मदव्वलेसा, [सा] नियमा छव्विहा उ नायव्वा ।
किन्हा नीला काऊ, तेऊ पम्हा य सुक्का य ॥६॥ [उ. नि./गा.५३९]

दुविहा उ भावलेसा, विसुद्धलेसा तहेव अविसुद्धा ।
दुविहा विसुद्धलेसा, उवसमखइया कसायाणं ॥७॥ [उ. नि./गा.५४०]

अविसुद्धभावलेसा, [सा] दुविहा नियमसो उ नायव्वा ।
पिज्जंमि अ दोसंमि अ अहिगारो कम्मलेसाए ॥८॥ [उ. नि./गा.५४१]

नोकम्मदव्वलेसा, पओगओ वीससाए नायव्वो ।
भावे उदओ भणिओ, छण्हं लेसाणजीवेसु ॥९॥ [उ. नि./गा.५४२]

अज्झयणे निक्खेवो, चउक्कओ दुविहो य होइ दव्वंमि ।
आगमनोआगमतो, नोआगमतो य तं तिविहं ॥१०॥ [उ. नि./गा.५४३]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जाणगसरीरभविय, तव्वइरित्तं च पोत्थगाइसुं ।
अज्झप्पस्साणयणं, नायव्वं भावमज्झयणं ॥११॥ [उ. नि./गा.५४४]

व्याख्या—तत्र 'लेसाणं'ति, सूत्रत्वाल्लेश्यायाः, कोऽर्थः ? लेश्याशब्दस्य निक्षेपश्चतुर्विधः, नामादिदुविहो इत्यादि **आवश्यकदीपिका**वत्, तत्रागमतोऽन्य(?)लेश्याशब्दार्थज्ञाः, तत्र चानुपयुक्तो, नोआगमतो द्रव्यलेश्या त्रिधा १ ज्ञशरीरद्रव्यलेश्या, २ भव्यशरीरद्रव्यलेश्या, ३ तद्व्यतिरिक्तद्रव्यलेश्या आद्या लेश्या शब्दार्थज्ञस्याजीवा देहा १ द्वितीया येन देहेन लेश्याशब्दार्थं ज्ञास्यति सा २ तृतीया ज्ञभव्यदेहातिरिक्ता ३ सा पुणो दुविहे त्ति, सा ज्ञभव्यदेहव्यतिरिक्तद्रव्यलेश्या पुनर्द्विविधा कर्मणि नोकर्मणि च, तत्र कर्मण्यल्पवक्तव्या इत्यादौ । नोकर्मविषयमाह—

नोकर्मणि कर्माऽभावरूपे भवति द्विविधा लेश्या, तुरेवार्थे, जीवानामजीवानां च, तत्रापि द्विधा जीवानां भवति ज्ञातव्या । 'भवमभवसिद्धियाणं 'मस्याऽलाक्षणिकत्वात् सिद्धशब्दस्य प्रत्येकं सम्बन्धाद्भविष्यतीति भवा भाविनीत्यर्थः [तादृशी] सिद्धिर्येषां ते भवसिद्धिका भव्यास्तेषां, अभवसिद्धिकानामभव्यानां द्विविधानां भव्याऽभव्यजीवानां भवति सप्तविधाः, कृष्णाद्याः षट्, सप्तमी देहच्छाया, अन्यत्वौदारिकौदारिकमिश्रादिभेदतः, सप्तविधत्वेन जीवशरीरस्य तच्छायैव कृष्णादिवर्णरूपाणि ।

तथा अजीवानां 'कम्मणो'त्ति आर्षत्वान्नोकर्मणि द्रव्यलेश्या अजीवनोकर्मद्रव्यलेश्या, तुशब्दस्येह सम्बन्धात् सा पुनर्दशविधा ज्ञातव्या, चन्द्राणां च सूर्याणां च, ग्रहा भौमाद्यास्तद्गणश्च, नक्षत्राणि च कृत्तिकादीनि, ताराश्च प्रकीर्णानि ज्योतींषि ग्रहगणनक्षत्रतारास्तेषां, आभरणानि चैकावल्यादीनि, आच्छादनानि स्वर्णखचितादीनि, आदर्शका दर्पणाः, ते चाभरणाच्छादनादर्शकास्तेषां, तथा मणिर्मरकतादिः, काकिणिश्चक्रिरत्नं, मणिकाकिण्यौ तयोर्या लेशयति श्लेषयत्यात्मनि जनाक्षीणीति लेश्याऽतीवचक्षुराक्षेपिकी स्निग्धदीप्तरूपा छाया अजीवद्रव्यलेश्या नोकर्मणि, अत्र चन्द्रादिशब्दैस्तद्विमानानि 'तात्स्थ्यात्तद्व्यपदेशः' इति न्यायेनोच्यन्ते । तेषां पृथ्वीकायरूपत्वेऽपि स्वकायपरकायशस्त्रापातभवा, तत्प्रदेशानां केषाञ्चिदचेतनत्वेन अजीवद्रव्यलेश्याद्वये दशविधत्वेऽपि तेजोवद्द्रव्याणां रूप्यताम्रादीनां बहूनां तच्छायाया अपि बहुतरभेदा ज्ञेयाः ।

कर्मद्रव्यलेश्यामाह—या कर्मद्रव्यलेश्या, अग्रेतनतुशब्दसम्बन्धात् सा पुनर्नियमात् षड्विधा, कृष्णा नीला कापोती तैजसी पद्मा च शुक्ला चेति कर्मद्रव्यलेश्येति सामान्येनोक्तावपि कर्मचयापचयजाता, अशुभशुभकर्मयोगाद् ये ये परिणामाः कर्मद्रव्याणि लेश्या जीवस्य तादृक् तादृक् परिणामप्रभावकारीणि । यथोक्तम्—

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ताः कृष्णनीलकापोत-तैजसीपद्मशुक्लनामानः ।
श्लेष इव वर्णबन्धस्य, कर्मबन्धस्थितिविधात्र्यः ॥१॥ [प्र.र./३८]

भावलेश्यामाह–

द्विविधा च भावलेश्या, अविशुद्धलेश्या कलुषद्रव्ययोगजात्मपरिणामः, तथैव विशुद्धलेश्या कषायोपशमजा कषायक्षयजा क्षायोपशमिकी च, शुक्लतेजःपद्माख्या विशुद्धा लेश्याः, अविशुद्धभावलेश्याः कृष्णनीलकापोताख्याः, सा बहुजीवसिद्धा द्विविधा नियमेन ज्ञातव्या । प्रेमणि च रागे, दोषे च द्वेषे, रागद्वेषविषयेत्यर्थः, नामादिलेश्यानां मध्ये इहाधिकारः कर्मद्रव्यलेश्याया प्रायस्तस्या अत्र वर्णादिरूपेण विचारणात् । अथ वैचित्र्यात् सूत्रकृतेर्नोकर्मद्रव्यलेश्यायां च यत् प्राग् नोक्तं तदाह–नोकर्मद्रव्यलेश्या देहाभरणादिच्छाया-प्रयोगो जीवव्यापारो गृहादिषु तैलाभ्यञ्जनमनःशिलाघर्षणादिः, तेन विश्रसाजीवव्यापार-निरपेक्ष्याभ्रेन्द्रधनुरादीनां तथा वृत्तिस्तया च ज्ञातव्या भावलेश्या, उदयो विपाक [इह तूपचाराद्] उदयोत्थपरिणामो भणितः, षण्णां लेश्यानां जीवेषु, लेश्यानां अध्ययनमित्यत्र निक्षेपो नामाध्ययनादिरावश्यकवत्, नोआगमतो द्रव्याध्ययनं पुस्तकादि लिखितं, नोआगमतो भावाध्ययनं, इदं अध्यात्मनः परमार्थस्य आनयनं पृषोदरादित्वादध्ययनं । अथोपसंहरन्नुपदिशति–

एयासिं लेसाणं, नाऊण सुभासुभं तु परिणामं ।
चइऊण अप्पसत्थं, पसत्थलेसासु जइयव्वं ॥१॥ [उत्त. नि./गा.५४५]

अथ सूत्रम्–

लेसज्झयणं पवक्खामि, आणुपुव्विं जहक्कमं ।
छण्हं पि कम्मलेसाणं, अणुभावे सुणेह मे ॥१॥

व्याख्या–लेश्याध्ययनं प्रवक्ष्यामि आनुपूर्व्या यथाक्रमं, तत्र च **षण्णामपि लेश्यानां** कर्मस्थितिविधातृतत्तद्विशिष्टपुद्गलमयानाम**नुभावान्** रसविशेषान् **शृणुत** 'मे' वदतः ॥१॥

लेश्यानामादिद्वारण्याह–

नामाइं वण्णरसगंध-फास परिणामलक्खणं ।
ठाणं ठिइं गइं चायुं, लेसाणं तु सुणेह मे ॥२॥

व्याख्या–नामानि, वर्णः कृष्णादिः, **रसः**स्तिक्तादिः, **गन्धः** सुरभ्यादिः, **स्पर्शः** कर्कशादिः, **परिणामो** जघन्यादिः, **लक्षणं** पञ्चाश्रवासेवनादिः, एषां समाहारः, **स्थान-**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मुत्कर्षापकर्षौ, **स्थिति**मवस्थानकालं, **गतिं** च नरकादिकां, यतो याऽवाप्यते, **आयु**र्यावत्या-युष्यवशिष्यमाणे आगामिभवलेश्यापरिणामः स्यात्, **लेश्यानां तुः** पूर्त्तौ, **शृणुत** 'मे' ॥२॥

द्वारगाथा—

किण्हा नीला य काऊ य, तेऊ पउमा तहेव य ।
सुक्कलेसा उ छट्ठी उ, नामाइं तु जहक्कमं ॥३॥

व्याख्या—एतानि लेश्यानां यथाक्रमं नामानि ज्ञेयानि । प्रथमा **कृष्णा** १ **च** पुनर्द्वितीया **नीला २** तृतीया **कापोत**नाम्नी ३ चतुर्थी **तेजो**लेश्या ४ पञ्चमी **पद्म**लेश्या ५ **च** पुनः षष्ठी **शुक्ललेश्या** ६ एवं षण्णामपि नामानि ॥३॥

वर्णानाह—

जीमूतनिद्धसंकासा, गवलरिट्ठगसंनिभा ।
खंजंजणनयणनिभा, किण्हलेसा उ वण्णओ ॥४॥

व्याख्या—स्निग्धः सजलत्वेन जीमूतस्तद्वत् सम्यक्काशते, व्यत्यये **स्निग्धजीमूत-सङ्काशा, गवलं** महिषशृङ्गं, रिष्टो द्रोणकाकः स एव **रिष्टको, यद्वारिष्टकः** फलभेदः, तत्**संनिभा, खञ्जनं** स्नेहाभ्यक्तकटाक्षघर्षणोद्भूतं, **अञ्जनं** कज्जलं, **नयनं** नेत्रं मध्यं कृष्णं, तन्निभा तत्सदृशा **कृष्णलेश्या तु वर्णमेवाश्रित्य** न तु रसादीन् ॥४॥

नीलासोयसंकासा, चासपिच्छसमप्पभा ।
वेरुलियनिद्धसंकासा, नीललेसा उ वण्णओ ॥५॥

व्याख्या—**नीलाऽशोको** वृक्षविशेषस्तत्**सङ्काशा**, रक्ताऽशोकव्यवच्छेदार्थं नील-विशेषणं । **चासः** पक्षिविशेषस्तत्**पिच्छस्य समप्रभा**, व्यत्ययात् **स्निग्धवैडूर्यसङ्काशा नीललेश्या वर्णतः** ॥५॥

अयसीपुप्फसंकासा, कोइलच्छदवसन्निभा ।
पारेवयगीयनिभा, काउलेसा उ वण्णओ ॥६॥

व्याख्या—**अतसी** धान्यभेदस्तत्**कुसुमसङ्काशा, कोकिलच्छदस्तैलघण्टकः** (पाठान्तरे-**कोकिलच्छविस्तत्सन्निभा**) **पारापतग्रीवानिभा कापोतलेश्या तु वर्णतः** किञ्चित् कृष्णा किञ्चिद्रक्तेति ॥६॥

हिंगुलयवण्णसंकासा, तरुणाइच्चसन्निभा ।
सुयतुंडपइवनिभा, तेउलेसा उ वण्णओ ॥७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या–**हिङ्गुलको** धातुः, पाषाणधात्वादिस्**तत्सङ्काशा, तरुणादित्यसन्निभा, शुकतुण्डं** शुकमुखं **प्रदीपश्च तन्निभा,** (पाठान्तरे-**सुयतुंडालत्तदीवाभा,** अन्ये तु-**सुयतुंडग्गसंकासा**) द्वयमपि स्पष्टं **तेजोलेश्या तु वर्णतो** रक्तेत्यर्थः ॥७॥

हरियालभेदसंकासा, हलिद्दाभेदसप्पभा ।
सणासणकुसुमनिभा, पम्हलेसा उ वण्णओ ॥८॥

व्याख्या–**हरितालस्य भेदो** द्विधाभावस्**तत्सङ्काशा,** भिन्नस्य हि प्रकर्ष इति भेदोक्तिः, **हरिद्रा** पिण्डहरिद्रा **तद्भेदसन्निभा, सणो** धान्यभेदः, **असनो** बीयकस्तयोः **कुसुमं तन्निभा पद्मलेश्या तु वर्णतः** पीतेति ॥८॥

संखंककुंदसंकासा, खीरपूरसमप्पभा ।
रययहारसंकासा, सुक्कलेसा उ वण्णओ ॥९॥

व्याख्या–**शङ्खः, अङ्को** मणिभेदः, **कुन्दः** कुन्दकुसुमं **तत्सङ्काशा, क्षीरं** दुग्धं तस्य **पूरः** प्रवाहः क्षीरधारा **तत्समप्रभा** (पाठान्तरे-**तूलसमप्रभा**-तूलं चार्कतूलं तत्सम-प्रभा) **रजतं** जात्यरूप्यं, **हारो** मुक्ताकलापस्**तत्सङ्काशा,** एवं **शुक्ललेश्या वर्णतः** शुक्ला ॥९॥

रसमाह–

जह तिक्कडुयस्स रसो, तिक्खो जह हत्थिपिप्पलीए वा ।
एत्तो वि अणंतगुणो, रसो उ नीलाए णायव्वो ॥११॥

व्याख्या–नीलाया नीललेश्याया ईदृशो रसो ज्ञातव्यः, यथा **यादृशस्त्रिकटुकस्य,** त्रयाणां कटूनां समाहारस्त्रिकटु, त्रिकटु एव **त्रिकटुकं** सुण्ठीमरिचपिप्पल्यात्मकं, तस्य **रसो** यादृक् **तीक्ष्णो** भवति, पुनर्यथा **हस्तिपिप्पल्या** गजपिप्पल्या **वा** रसो यादृशो भवति, **इतोऽप्येभ्योऽपि नीलाया अनन्तगुणो रस**स्तीक्ष्णो भवति ॥११॥

जह तरुणअंबयरसो, तुवरकविच्छस्स वा वि जारिसओ ।
एत्तो वि अणंतगुणो, रसो उ काऊए णायव्वो ॥१२॥

व्याख्या–कापोतलेश्याया रस ईदृशो ज्ञेयः, **यादृशस्तरुणाम्रकरसः, तरुणम-**परिपक्वं यदा**म्रकमाम्र**फलं तस्य रसः, तथा **तुवरं** सकषायं **यत्कपित्थं** कपित्थफलं **तस्य वाऽपि यादृशो** रसस्ततोऽप्यतिकषायः ॥१२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जह परिणयांबगरसो, पक्कविच्छस्स वा वि जारिसओ ।
एत्तो वि अणंतगुणो, रसो उ तेऊए नायव्वो ॥१३॥

व्याख्या—तेजोलेश्याया ईदृशो रसो भवति, **यथा** यादृशः **परिणतताम्रकरसः** पक्वाम्रकफलस्य रसो भवति, **पुनर्यादृशः पक्वकपिच्छस्यापि** रसो भवति, **ततोऽप्यनन्तगुणो रसस्तेजोलेश्याया ज्ञातव्यः**, इत्यनेन किञ्चिदाम्लः किञ्चिन्मधुरश्चेति भावार्थः ॥१३॥

वरवारुणीए य रसो, विविहाण व आसवाण जारिसओ ।
महुमेरगस्स व रसो, इत्तो पम्हाइ परएणं ॥१४॥

व्याख्या—**वरवारुणी** प्रधानसुरा, तस्या वा रसो **यादृशको विविधानामासवानां** पुष्पमद्यानां, **मधु** मद्यविशेषं, **मैरेयं** सरकस्तयोः समाहारः, तस्य वा यादृशको **रसः**, **इतो** वरवारुण्यादिरसात् **पद्मायाः**, 'परएणं'ति अनन्तगुणत्वात्तदतिक्रमेण वर्त्तते रसः, अयं च किञ्चिदाम्लकषायो मधुरश्च ॥१४॥

खज्जूरमुद्दियरसो, खीररसो खंडसक्कररसो वा ।
एत्तो वि अणंतगुणो, रसो उ सुक्काए नायव्वो ॥१५॥

व्याख्या—**खर्ज्जूरं** च पिण्डखर्ज्जूरादि, **मृद्वीका** द्राक्षा, तद्रसो यादृक् स्यात्, तथा **क्षीरस्य** दुग्धस्य यादृशो **रसः**, तथा **खण्डशर्करारसो** यादृक् स्यात्, **एभ्यो** रसेभ्योऽपि **शुक्ललेश्याया अनन्तगुणो रसो ज्ञातव्यः**, अत्यन्तमधुररसो ज्ञेय इत्यर्थः ॥१५॥

गन्धमाह—

जह गोमडस्स गंधो, सुणगमडस्स जहा अहिमडस्स ।
एत्तो वि अणंतगुणो, लेसाणं अप्पसत्थाणं ॥१६॥

व्याख्या—**यथा** गवां मृतकं **गोमृतकं** मृतकशरीरं, तस्य **गन्धः**, **श्वमृतकस्य** वाऽथवा यथाऽहिमृतस्य गन्धस्ततोऽपि गन्धादनन्तगुणोऽतिदुर्गन्धतया **लेश्यानामप्रशस्तानां** कृष्णनीलकापोतानां गन्ध इति ॥१६॥

जह सुरहिकुसुमगंधो, गंधवासाण पिस्समाणाणं ।
एत्तो वि अणंतगुणो, पसत्थलेसाण तिण्हं पि ॥१७॥

व्याख्या—**यथा सुरभिकुसुमानां** जातिकेतक्यादीनां **गन्धः**, गन्धश्च कोष्ठपुटपाकनिष्पन्ना वासाश्चेतरे **गन्धवासाः**, इह चैतदङ्गान्येवोपचारादेवमुक्तानि, **तेषां पिष्य-**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

माणानां सञ्चूर्ण्यमानानामिहाऽनुक्तोऽपि गन्धविशेषो [**प्रशस्त**]**लेश्यानां** [**तिसृणामपि**] पीतपद्मशुक्लानां तारतम्येन ज्ञेयः ॥१७॥

स्पर्शमाह—

जह करगयस्स फासो, गोजिब्भाए य सागपत्ताणं ।
एत्तो वि अणंतगुणो, लेसाणं अप्पसत्थाणं ॥१८॥

व्याख्या—यथा क्रकचस्य करपत्रस्य **स्पर्शः**, गोर्जिह्वा **गोजिह्वा तस्या वा, साको** वृक्षविशेषस्**तत्पत्राणां** यथाक्रमं तेषां तिसृणां यादृशः स्पर्शस्**ततोऽप्यनन्तगुणो**ऽतिकर्कश आद्यानां तिसृणा**मप्रशस्तानां लेश्यानां** ज्ञेय इति ॥१८॥

जह बूरस्स व फासो, णवणीयस्स व सिरीसकुसुमाणं ।
एत्तो वि अणंतगुणो, पसत्थलेसाण तिण्हं पि ॥१९॥

व्याख्या—यथा **बूरस्य** कोमलवनस्पतिविशेषस्य, **नवनीतस्य वा शिरीषपुष्पाणां स्पर्शो**ऽस्ति, **एतस्मादप्यनन्तगुणः** सुकुमारो यथाक्रमं **तिसृणां प्रशस्तलेश्यानां** स्पर्शो-ऽस्ति ॥१९॥

परिणाममाह—

तिविहो व णवविहो वा, सत्तावीसइविहेक्कसीओ वा ।
दुसओ तेयालो वा, लेसाणं होइ परिणामो ॥२०॥

व्याख्या—त्रिविधो नवविधो वा सप्तविंशतिविध एकाशीतिविधो वा त्रिचत्वा-रिंशदधिकद्विशतविधो वा, लेश्यानां भवति परिणामस्तद्रूपगमनात्मकः, इह त्रिविधो जघन्यमध्यमोत्कृष्टभेदेन, नवविधो यदेषामपि स्वस्थानतारतम्यचिन्तायां प्रत्येकं जघन्यादित्रयेण गुणना। एवं पुनः पुनस्त्रिकगुणनया सप्तविंशतिविधत्वादि, उपलक्षणं चैतत्, एवं तारतम्यचिन्तायां न सङ्ख्यानियमः। यतः **प्रज्ञापनायां—"कन्हलेसाणं भंते ! कइविहं परिणामं परिणमइ ? गोयमा ! तिविहं वा, नवविहं वा, सत्तावीसइविहं वा, एकासीइविहं वा, तेयालदुसयविहं वा, बहुं वा, बहुविहं वा, परिणामं परिणमइ, एवं जाव सुक्कलेसा"** [ ] इति ॥२०॥

लक्षणमाह—

पंचासवप्पमत्तो, तिहिं अगुत्तो छसु अविरओ य ।
तिव्वारंभपरिणओ, खुद्दो साहस्सिओ उ नरो ॥२१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—**पञ्चाश्रवा** हिंसाद्यास्तैः **प्रमत्तः** प्रमादवान्, **त्रिभिर्मनोवाक्कायैरगुप्तो** गुप्त्यादिरहितः, **षट्सु** जीवनिकायेष्वविरतः, तदुपमर्दकत्वादेः, **तीव्राः** स्वरूपतोऽध्यवसायतो वा **आरम्भाः** सावद्यव्यापारास्तेषु **परिणत** आसक्तः, **क्षुद्रः** सर्वस्याऽहितैषी कार्पण्ययुक्तो वा, सहसाऽपर्यालोच्य गुणदोषान् प्रवर्त्तते इति **साहसिकश्चौर्यादिकृत्** नरः स्त्र्यादिर्वा ॥२१॥

निद्धंधसपरिणामो, निस्संसो अजिइंदिओ ।
एयजोगसमाउत्तो, किण्हलेसं तु परिणमे ॥२२॥

व्याख्या—**अत्यन्तमैहिकामुष्मिकाऽपायशङ्कहीनः परिणामो** यस्य स, **नृशंसो** जीवान् विहिंसन्न मनागपि शङ्कते, **निःशंसो** वा परप्रशंसारहितः, **अजितेन्द्रियः, एतद्योगाः** पञ्चाश्रवप्रमत्तत्वाद्यास्तैः **समायुक्तः, तुः** निश्चये, **कृष्णलेश्यामेव परिणमेत्,** तद्द्रव्यसाचिव्येन तद्रञ्जनात्तद्रूपतां भजेत्, यतः—

कृष्णादिद्रव्यसाचिव्यात्, परिणामो य आत्मनः ।
स्फटिकस्येव तत्रायं, लेश्याशब्दः प्रयुज्यते ॥१॥ [ ] ॥२२॥

इस्सा अमरिस अतवो, अविज्जा माया अहीरियत्ता य ।
गेही पदोसे य सढे पमत्ते, रसलोलुए सायगवेसए य ॥२३॥

व्याख्या—**ईर्षा** परगुणाऽसहनं, **अमर्षो**ऽत्यन्ताभिनिवेशः, **अतपस्तपोविपर्ययः, अविद्या** कुशास्त्ररूपा, **माया** वञ्चना, **अह्रीकता**ऽसमाचारविषया निर्लज्जता, **गृद्धिर्विषयेषु** लाम्पट्यं, **प्रदोषश्च प्रद्वेषः** अभेदोपचाराच्चेह सर्वत्र तद्वान् जन्तुर्ज्ञेयः, अत एव **शठो**ऽलीकभाषणात् **प्रमत्तः** प्रकर्षेण जात्यादिमदासेवी, रसेषु लोलुपो **रसलोलुपः, सातगवेषकः** कथं मम सुखं स्यादिति बुद्धिमान् ॥२३॥

आरंभाओ अविरतो, खुद्दो साहसिओ नरो ।
एयजोगसमाउत्तो, नीललेसं तु परिणमे ॥२४॥

व्याख्या—**आरम्भात्** प्राण्युपमर्दात् **अविरतो**ऽनिवृत्तः **क्षुद्रः साहसिको नर एतद्योगसमायुक्तो नीललेश्यां तु परिणमेत्** ॥२४॥

वंके वंकसमायारे, नियडिल्ले अणुज्जुए ।
पलिउंचग ओवहिए, मिच्छद्दिट्ठी अणारिए ॥२५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—वक्रो वचसा, **वक्रसमाचारः** क्रियया, **निकृतिमान्** मनसा शाठ्ययुतः **अनृजुकः** कथञ्चिदृजूकर्त्तुमशक्यतया, **प्रतिकुञ्चकः** स्वदोषप्रच्छादकतया, उपधिछद्मनेन चरतीत्यौपधिकः सर्वत्र व्याजतः प्रवृत्तेः, एकार्थिकानि चैतानि नानादेशजविनेयानुग्रहार्थं, **मिथ्यादृष्टिरनार्यश्च** ॥२५॥

उप्पासगदुट्ठवाइ य, तेणे यावि य मच्छरी ।
एयजोगसमाउत्तो, काउलेसं तु परिणमे ॥२६॥

व्याख्या—उत्प्रासकं परमुत्प्रासकरं, दुष्टं च रागादिभिर्यथा स्यादेवं वदनशील **उत्प्रासकदुष्टवादी, स्तेन**श्चौरः, **अपि चेति** पूर्त्तौ । **मत्सरः** परसम्पदसहनं, सति वा वित्ते त्यागाऽभावस्तद्वान् , **एतद्योगसमायुक्तो** नरः **कापोतलेश्यां परिणमेत्** ॥२६॥

नीयावत्ति अचवले, अमाई अकुतूहले ।
विणीयविणए दंते, जोगवं उवहाणवं ॥२७॥

व्याख्या—नीचैर्वृत्तिः कायवाग्मनोभिरनुत्सेकवान् , **अचपलोऽमायी अकुतूहलः** कुहुकादिष्वकुतूहलवान् , **विनीतविनयः** स्वाध्यस्तगुर्वाद्युचितप्रतिपत्तिः, **दान्तः, योगवान्** स्वाध्यायादिव्यापारवान् , **उपधानवान्** विहितशास्त्रोपचारः ॥२७॥

पियधम्मे दढधम्मे, वज्जभीरु हिएसए(अणस्सवे) ।
एयजोगसमाउत्तो, तेउलेसं तु परिणमे ॥२८॥

व्याख्या—प्रियधर्माऽभिरुचितधर्मानुष्ठानो, **दृढधर्मा** अङ्गीकृतव्रतादिनिर्वाहकः, **अवद्यभीरुः** पापाचरणभीरुः, **हितैषको** मुक्तिगवेषकः (पाठान्तरे-**हिताशयः** परोपकारी, **अनाश्रवो वा** त्यक्तहिंसादिः) **एतद्योगसमायुक्तः** पुमान् **तेजोलेश्यां परिणमेत्** ॥२८॥

पयणुक्कोहमाणे य, मायालोभे य पयणुए ।
पसंतचित्ते दंतप्पा, जोगवं उवहाणवं ॥२९॥

व्याख्या—प्रतनुक्रोधमानः, पुनर्यस्य **मायालोभौ च प्रतनुकौ**, पुनर्यः **प्रशान्त-चित्तः, दान्तात्मा, योगवान् उपधानवांश्च** भवति ॥२९॥

तहा पयणुवाई य, उवसंते जिइंदिए ।
एयजोगसमाउत्तो, पम्हलेसं तु परिणमे ॥३०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या–**तथा** यः **प्रतनुवादी** स्वल्पभाषी, **उपशान्तो**ऽनुद्भटतयोपशान्तकृतिः, **जितेन्द्रियश्च, एतद्योगसमायुक्तः** स पुमान् **पद्मलेश्यां परिणमेत्** ॥३०॥

अट्टरुद्दाणि वज्जित्ता, धम्मसुक्काणि झायइ ।
पसंतचित्ते दंतप्पा, समिए गुत्ते य गुत्तिसु ॥३१॥

व्याख्या–आर्त्तरौद्रे ध्याने **वर्जयित्वा** यो **धर्म्यशुक्ले** ध्याने **ध्यायति,** कीदृशः सन्नित्याह–**प्रशान्तचित्तो दान्तात्मा समितः** समितिमान्, **गुप्तश्च** निरुद्धसर्वात्मव्यापारो **गुप्तिभि**र्मनोगुप्त्यादिभिः, अत्र तृतीयार्थे सप्तमी ॥३१॥

सराए वीयराए वा, उवसंते जिइंदिए ।
एयजोगसमाउत्तो, सुक्कलेसं तु परिणमे ॥३२॥

व्याख्या–स च **सरागो**ऽक्षीणाऽनुपशान्तकषायतया, **वीतरागो वा** ततोऽन्य उपशान्तः, विशिष्टलेश्या एवापेक्ष्यैवंस्वरूपोक्तिरिति, न देवाद्यैर्व्यभिचारः, **उपशान्तो** जितेन्द्रियश्च, **एतद्योगसमायुक्तः** पुमान् **शुक्ललेश्यां परिणमेत्** ॥३२॥

अथ स्थानद्वारमाह–

असंखिज्जाणोसप्पिणीणं, उस्सप्पिणीणं जे समया ।
संखाईया लोगा, लेसाण हवंति ठाणाइं ॥३३॥

व्याख्या–असङ्ख्येयोऽवसर्प्पिण्युत्सर्प्पिणीनां **ये समयाः,** कियन्त इत्याह–**सङ्ख्यातीता लोकाः** कोऽर्थः ? असङ्ख्येयलोकाकाशप्रदेशपरिमाणास्तावन्ति **लेश्यानां भवन्ति स्थानानि** प्रकर्षापकर्षकृतानि, अशुभानां सङ्क्लेशाः, शुभानां च विशुद्धयस्तत्परिमाणानीति भावः ॥३३॥

इत्युक्तं स्थानद्वारं, स्थितिमाह–

मुहुत्तद्धं तु जहन्ना, तेत्तीसं सागरा मुहुत्तहिया ।
उक्कोसा होइ ठिई, नायव्वा कण्हलेसाए ॥३४॥

व्याख्या–**मुहुर्त्ताद्धं** अन्तर्मुहूर्त्तमित्यर्थः, कालयोगे द्वितीया, **तुः** निश्चये, **जघन्या, त्रयस्त्रिंशत्सागरोपमाणि** इहोत्तरत्र च मुहूर्त्तशब्देन मुहूर्त्तैकदेश एवोक्तः, ततश्चान्तर्मुहूर्त्ताधिकान्युत्कृष्टा **स्थितिर्भवति,** एवंविधा स्थितिर्ज्ञातव्या **कृष्णलेश्यायाः,** इह चान्तर्मुहूर्त्तशब्देन पूर्वोत्तरभवसम्बन्ध्यन्तर्मुहूर्त्तद्वयमुक्तमेवमुत्तरत्रापि ॥३४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मुहुत्तद्धं तु जहन्ना, दस उदहिपलियमसंखभागहिया ।
उक्कोसा होइ ठिई, नायव्वा नीललेसाए ॥३५॥

व्याख्या—मुहूत्तार्द्धं तु जघन्या, दश उदधयः सागराः **पल्याऽसङ्ख्येयभागाऽधिकाः [नीललेश्यायाः] उत्कृष्टा भवस्थितिर्ज्ञातव्या**, नन्वस्या धूमप्रभोपरितनप्रस्तट एव सम्भवः, तत्र च पूर्वोत्तरभवान्तर्मुहूर्त्तद्वयेनाधिका नोक्ता । उच्यते—उक्तैव पल्योपमाऽसङ्ख्येयभागानामसङ्ख्येयभेदत्वेन तस्याप्यन्तर्मुहूर्त्तद्वयस्य, तत्रान्तर्भावात्, एवं उत्तरत्रापि वाच्यम् ॥३५॥

मुहुत्तद्धं तु जहन्ना, तिन्हुदही पलियमसंखभागमब्भहिया ।
उक्कोसा होइ ठिई, नायव्वा काउलेसाए ॥३६॥

व्याख्या—मुहूत्तार्द्धान्तर्मुहूर्त्तं **जघन्या, उत्कृष्टा त्रयः सागराः पल्याऽसङ्ख्येयभागाधिकाः**, एवंविधा **कापोतलेश्यायाः स्थितिर्ज्ञातव्या**, इयं च स्थितिस्तृतीयनरकपृथिव्या वालुकाया अपेक्षयोक्तास्ति ॥३६॥

मुहुत्तद्धं तु जहन्ना, दो उदहि पलियमसंखभागमब्भहिया ।
उक्कोसा होइ ठिई, नायव्वा तेउलेसाए ॥३७॥

व्याख्या—तेजोलेश्यायाश्चेयं स्थितिरस्ति, **जघन्या त्वन्तर्मुहूर्त्तं, उत्कृष्टा च द्वौ सागरोपमौ पल्यासङ्ख्येयभागाधिकौ**, एवंविधा **स्थितिर्ज्ञातव्या** ॥३७॥

मुहुत्तद्धं तु जहन्ना, दस उदही होंति मुहुत्तमब्भहिया ।
उक्कोसा होइ ठिई, नायव्वा पम्हलेसाए ॥३८॥

व्याख्या—जघन्या त्वन्तर्मुहूर्त्तं **उत्कृष्टा च दश सागरोपमाणि अन्तर्मुहूर्त्ताधिकानि**, एतावती **पद्मलेश्यायाः स्थितिर्भवतीति ज्ञातव्या** । इयं च स्थितिर्ब्रह्मदेवलोकापेक्षया ज्ञेया ॥३८॥

मुहुत्तद्धं तु जहन्ना, तित्तीसं सागरा मुहुत्तहिया ।
उक्कोसा होइ ठिई, नायव्वा सुक्कलेसाए ॥३९॥

व्याख्या—जघन्या स्थिरन्तर्मुहूर्तं **शुक्ललेश्यायाः**, उत्कृष्टा तु **त्रयस्त्रिंशत्सागरोपमाणि मुहूर्त्ताधिकानि शुक्ललेश्यायाः स्थितिर्भवतीति ज्ञातव्या** ॥३९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अथोत्तरग्रन्थसम्बधायाह—

एसा खलु लेसाणं, ओहेणं ठिई उ वन्निया ।
होइ चउसु वि गईसु, एत्तो लेसाण ठिई उ वोच्छामि ॥४०॥

व्याख्या—एषा लेश्यानां षण्णामप्योधेन सामान्यप्रकारेण **स्थितिर्वर्णिता भवति, इतश्चतसृषु गतिषु लेश्यानां** सर्वासां **स्थितिं वक्ष्यामि** ॥४०॥

दसवाससहस्साइं, काऊए ठिई जहण्णिया होइ ।
तिण्णुदहि पलिओवम-मसंखभागं च उक्कोसा ॥४१॥

व्याख्या—कापोताया जघन्यका स्थितिर्दशवर्षसहस्राणि भवति, सा च प्रथमायां रत्नप्रभायां प्रथमप्रस्तटेऽस्ति, तत्रस्थानां हि जघन्यतो दशवर्षसहस्रायुष्कत्वात्, **उत्कृष्टा** स्थितिस्तु कापोतलेश्यायास्त्रीणि **सागरोपमाणि पल्योपमाऽसङ्ख्येयभागयुक्तानि,** इयं च स्थिति-स्तृतीयपृथिव्या वालुकाप्रभाया उपरितनप्रस्तटनारकाणां ज्ञेया ॥४१॥

तिण्हुदहीपलिओवम-असंखभागं जहन्ननीलठिई ।
दसउदही पलिओवम-मसंखभागं च उक्कोसा ॥४२॥

व्याख्या—नीललेश्याया जघन्या स्थितिस्त्रीणि सागरोपमाणि पल्योपमा-ऽसङ्ख्येयभागयुक्तानि, इयती जघन्या स्थितिस्तृतीयाया वालुकप्रभायाः पृथिव्या अपेक्षया ज्ञेया, पुनस्तस्या उत्कृष्टा स्थिति**र्दशसागरोपमाणि पल्योपमाऽसङ्ख्येयभागयुक्तानि** । इयमपि पञ्चम्या धूमप्रभायाः पृथिव्या उपरितनप्रस्तटापेक्षया ज्ञेया । यतः—

देवाण नारयाण य, एआ लेसा अवट्ठिआ दव्वे ।
भावपरावत्तीए, सुरनेरइयाए छल्लेसा ॥१॥ [जी.स./गा.७४] ॥४२॥

दसउदहीपलिओवम-मसंखभागं जहन्निया होइ ।
तित्तीससागराइं, उक्कोसा होइ किण्हाए ॥४३॥

व्याख्या—कृष्णलेश्याया जघन्या स्थिति**र्दशसागरोपमाणि पल्योपमाऽसङ्ख्येय-भागयुक्तानि भवति,** इयं च पञ्चमीधूमप्रभानरकपृथ्व्यपेक्षया ज्ञेया । तस्याः पुन**रुत्कृष्टा** स्थिति**स्त्रयस्त्रिंशत्सागरोपमाणि,** इयं च सप्तमीतमस्तमःप्रभाख्यनरकपृथ्व्यपेक्षयास्ति ॥४३॥

एसा नेरईयाणं, लेसाणं ठिईउ वण्णिया होइ ।
तेण परं वुच्छामि, तिरियमणुस्साण देवाणं ॥४४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—एषा नैरयिकाणां नरकवासिजीवानां जघन्योत्कृष्टभेदेन स्थितिर्वर्णिता भवति, तेण 'परं' इति **ततः परं तिर्यग्मनुष्याणां** तिरश्चां तथा मनुष्याणां च **देवानां** च **स्थितिं वक्ष्यामि** ॥४४॥

अंतोमुहुत्तमद्धा, लेसाण ठिइं जहिं जहिं जा उ ।
तिरियाणं नराणं च, वज्जित्ता केवलं लेसं ॥४५॥

व्याख्या—अन्तर्मुहूर्त्ताद्धं अन्तर्मुहूर्त्तकालं **लेश्यानां स्थिति**र्जघन्या मध्यमोत्कृष्टा च, **यस्मिन् यस्मिन्** पृथिवीकायादौ सम्मूर्च्छिममनुष्यादौ च **याः** कृष्णाद्याः, **तुः** पूर्त्तौ, **तिरश्चां मनुष्याणां च** मध्ये स्युः, तासामेता हि क्वचित् काश्चित् सम्भवन्ति, **वर्जयित्वा केवलां शुक्लां** लेश्यां । यतः—''**पृथ्व्यप्वनस्पतय आद्यचर्तुर्लेश्याः, तेजोवायुविकल-सम्मूर्छिमनृनारका आद्यत्रिलेश्याः, शेषाः सर्वे षट्लेश्याः**'' [ ] ॥४५॥

मुहुत्तद्धा उ जहन्ना, उक्कोसा होइ पुव्वकोडीओ ।
नवहिं वरिसेहिं ऊणा, नायव्वा सुक्कलेसाए ॥४६॥

व्याख्या—शुक्ललेश्याया जघन्या स्थितिरन्तर्मुहूर्त्तकालं यावद् ज्ञेया, **उत्कृष्टा** च **नवभिर्वर्षैरूना पूर्वकोटी ज्ञातव्या** । इह यद्यपि कश्चिदष्टवार्षिकोऽपि पूर्वकोट्यायुर्व्रत-परिणाममाप्नोति, तथापि नैतावद्वयस्थस्य वर्षपर्यायादर्वाक् शुक्लेश्यासम्भव इति नववर्षोना पूर्वकोटिरुच्यते ॥४६॥

एसा तिरियनराणं, लेसाण ठिई उ वण्णिया होइ ।
तेण परं वोच्छामि, लेसाण ठिई उ देवाणं ॥४७॥

व्याख्या—एषा तिरश्चां नराणां स्थितिर्वर्णिता भवति, 'तेण'त्ति **ततः परं देवानां लेश्यानां स्थितिं वक्ष्यामि** ॥४७॥

दसवाससहस्साइं, कण्हाए ठिई जहण्णिया होइ ।
पलियमसंखिज्ज इमो, उक्कोसा होइ किण्हाए ॥४८॥

व्याख्या—कृष्णलेश्याया दशवर्षसहस्राणि जघन्यका स्थितिर्भवति, उत्कृष्टा च **तस्याः पल्योपमाऽसङ्ख्येयतमभागरूपा** स्थितिर्भवति । इयं च द्विविधापि कृष्णायाः स्थितिरेतावदायुषामेव भवनपतिव्यन्तराणां ज्ञेया, अन्यथा अधिककालोऽपि स्यात् ॥४८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जा किण्हाइ ठिई खलु, उक्कोसा सा उ समयमब्भहिया ।
जहण्णेणं नीलाए, पलियमसंखं च उक्कोसा ॥४९॥

व्याख्या—**या कृष्णायाः स्थिति**रुत्कृष्टा पल्याऽसङ्ख्यभागा, **सा समयाभ्यधिका जघन्येन नीलायाः, उत्कृष्टा** स्थितिस्तु **पल्योपमासङ्ख्येयभागा,** सा समयाभ्यधिका जघन्येन नीलायाः उत्कृष्टा स्थितिस्तु पल्योपमासङ्ख्येयभागा भवति, परं जघन्यस्थितेर्बृहत्तरोऽयं भागो ज्ञेयः ॥४९॥

जा नीलाए ठिई खलु, उक्कोसा सा उ समयमब्भहिया ।
जहन्नेणं काऊए, पलियमसंखं च उक्कोसा ॥५०॥

व्याख्या—**खलु** निश्चयेन **या नीलाया उत्कृष्टा स्थिति**रुक्ता, **सा** पुनः **समयाऽभ्यधिका जघन्येन कापोतायाः** स्थितिज्ञेया, **च** पुनस्तस्या **उत्कृष्टा** स्थितिः **पल्योपमाऽसङ्ख्येयभागरूपा** भवति, परमयमसङ्ख्येयो भागो बृहत्तमो ज्ञेयः, इत्येवं भवनपतिव्यन्तराणामेतावदायुषां लेश्यात्रयं दर्शितम् ॥५०॥

इत्थं निकायद्वयभाविनीमाद्यलेश्यात्रयस्थितिमुपदर्श्य सर्वनिकायभाविनीं तेजोलेश्यास्थितिमाह—

तेण परं वोच्छामि, तेऊलेसा जहा सुरगणाणं ।
भवणवइवाणमंतर-जोइसवेमाणियाणं च ॥५१॥

व्याख्या—**ततः परं** यथा यथावस्थितप्रकारेण **सुरगणानां तेजोलेश्या** स्यात् तथा **प्रवक्ष्यामि, भवनपतिवानमन्तरज्योतिर्वैमानिकानां, चः** पूर्त्तौ । यथा भवनपतिव्यन्तराणां जघन्या दशवर्षसहस्राणि, उत्कृष्टा च व्यन्तराणां पल्यं, भवनानां सागरं साधिकं, ज्योतिषां जघन्यां पल्याष्टभागः, उत्कृष्टा वर्षलक्षाधिकं पल्यं, एषां स्थितिश्चेयत्येव ॥५१॥

पलिओवमं जहन्नं, उक्कोसा सागरा उ दो अहिया ।
पलियमसंखिज्जेणं, होइ भागेण तेऊए ॥५२॥

व्याख्या—**जघन्या पल्यं, उत्कृष्टा द्वौ सागरौ अधिकौ पल्योसङ्ख्येयभागेन** स्तस्तैजस्याः, सामान्योक्तावपि वैमानिकविषयैवासौ ज्ञेया । अत्र जघन्या सौधर्मे, उत्कृष्टा चेशाने, एवं शेषवैमानिकेष्वपि स्वस्वस्थितिमानेन लेश्यास्थितिर्ज्ञेया ॥५२॥

दसवाससहस्साइं, तेऊए ठिई जहण्णिया ।
होइ दो उदही पलिओवम-असंखभागं च उक्कोसा ॥५३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—तेजोलेश्यायाः **स्थितिर्दशवर्षसहस्राणि जघन्या भवति**, तथा पुनर्द्वे **सागरोपमे पल्योपमाऽसङ्ख्येयभागयुक्ते** सैवोत्कृष्टा भवति । तत्र जघन्या व्यन्तरभवनपतिदेवानाश्रित्य ज्ञेया, उत्कृष्टा च द्वितीयदेवलोकदेवापेक्षया ज्ञेया ॥५३॥

जा तेऊए ठिई खलु, उक्कोसा सा उ समयमब्भहिया ।
जहन्नेणं पम्हाए, दस उ मुहुत्ताहियाइं उक्कोसा ॥५४॥

व्याख्या—**या तैजस्या उत्कृष्टा स्थितिः सा समयाभ्यधिका पद्माया जघन्या**, उत्कृष्टा **तु दशैव सागराणि** प्राग्भवसत्कान्तर्मुहूर्त्ताधिकानि । इयं च जघन्या सनत्कुमारे, उत्कृष्टा च ब्रह्मलोके । अत्राह वादी—यदिहान्तर्मुहूर्त्तमधिकमुच्यते, ततः पूर्वत्रापि किं न तदधिकमुक्तं ? उच्यते—देवभवलेश्याया एव तत्र विवक्षितत्वात् । नन्वेवं सतीहान्तर्मुहूर्त्ताधिकत्वं विरुध्यते, नैवं, अत्र हि प्रागुत्तरभवलेश्यापि "**अन्तो मुहुत्तम्मि गए**" इति वचनाद्देवभसम्बन्धिन्येवेति ज्ञप्त्यै इत्थमुक्तम् ॥५४॥

जा पम्हाइ ठिई खलु, उक्कोसा चेव समयमब्भहिया ।
जहण्णेणं सुक्काए, तित्तीसं मुहुत्तमब्भहिया ॥५५॥

व्याख्या—**या पद्माया उत्कृष्टा** स्थितिर्दशसागरा मुहूर्त्ताधिका, सा **एकेन समयेनाऽभ्यधिका जघन्येन** स्थितिः **शुक्लाया** ज्ञेया, उत्कृष्टा च **त्रयस्त्रिंशत्सागरा मुहूर्त्ताधिका**, तत्र जघन्या लान्तके, अपरा त्वनुत्तरेषु ॥५५॥

इत्युक्तं स्थितिद्वारं, गतिद्वारमाह—

किण्हा नीला काऊ, तिण्णि वि एया अहम्मलेसाओ ।
एयाहिं तिहिं वि जीवो, दुग्गइं उववज्जई ॥५६॥

व्याख्या—**कृष्णा नीला कापोता** च इति **तिस्रोऽपि** [एता] लेश्या **अधर्मलेश्याः** सन्ति, अविशुद्धत्वेनाऽप्रशस्तत्वात्, तत **एताभिस्तिसृभिरपि जीवो दुर्गतिं** नरकतिर्यग्गति-**मुपपद्यते** ॥५६॥

तेऊ पम्हा सुक्का, तिण्णि वि एयाओ धम्मलेसाओ ।
एयाहिं तिहिं वि जीवो, सुग्गइं उववज्जइ ॥५७॥

व्याख्या—**तैजसी पद्माशुक्लास्तिस्रोऽप्येता धर्मलेश्या** विशुद्धत्वेनासां धर्महेतुत्वात्, अत **एवैताभिर्जीवः सुगतिं** देवनृगती मुक्तिं **चोपपद्यते** ॥५७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अथायुर्द्वारावसरः, तत्र चावश्यं हि जन्तुर्यल्लेश्य उत्पत्स्यते तल्लेश्य एव म्रियते, तत्र जन्मान्तरभावलेश्यायाः किं प्रथमसमये परभवायुष उदयोऽथवा चरमसमयेऽन्यथा वा ? इति संशयच्छेदायाह–

लेस्साहिं सव्वाहिं, पढमे समयंमि परिणयाहिं तु ।
न हु कस्सइ वि उववत्ति, पर भवे अत्थि जीवस्स ॥५८॥

व्याख्या–लेश्याभिः **सर्वाभिरिति** षड्भिः, **प्रथमसमये** तत्प्रतिपत्तिकालापेक्षया **परिणताभिरात्मरूपतामापन्नाभिः तुः** पूर्त्यै, **न हु** नैव **कस्याप्युत्पत्तिः परे भवे अस्ति जीवस्य** ॥५८॥

लेस्साहिं सव्वाहिं, चरमे समयंमि परिणयाहिं तु ।
न हु कस्स वि उववाओ, परभवे अत्थि जीवस्स ॥५९॥

व्याख्या–लेश्याभिः **सर्वाभिश्चरमेऽन्त्ये समये परिणताभिस्तु न हि कस्याप्युपपादः परभवे भवति जीवस्य** ॥५९॥

अंतोमुहुत्तंमि गए, अंतमुहुत्तंमि सेसए चेव ।
लेसाहिं परिणयाहिं, जीवा गच्छंति परलोयं ॥६०॥

व्याख्या–**अन्तर्मुहूर्त्ते गते** एव, तथा**न्तर्मुहूर्त्ते शेषके** चैवाऽवशिष्यमाणे एव **लेश्याभिः परिणताभिरुपलक्षिता जीवा गच्छन्ति परलोकं** भवान्तरं, एतेनान्तर्मुहूर्त्तशेषे आयुषि परभवलेश्यापरिणाम इत्युक्तं, सुरनारकाणां त्वागामिकभवाद्यान्तर्मुहूर्त्तं यावल्लेश्याभावात् ॥६०॥

अध्ययनार्थमुपसंहरन्नुपदेशमाह–

तम्हा एयासिं लेसाणं, अणुभागे वियाणिया ।
अप्पसत्था उ वज्जित्ता, पसत्थाओ अहिट्ठिए ॥६१॥ त्ति बेमि

व्याख्या–यस्मादेता अप्रशस्ता दुर्गतिहेतवः प्रशस्ताश्च सुगतिहेतव**स्तस्मादेतासां लेश्यानामनुभागमुक्तरूपं विज्ञायाऽप्रशस्ताः** कृष्णाद्या **वर्जयित्वा प्रशस्तास्तैजस्याद्या**स्तिस्रोऽधि**तिष्ठेत्** भावप्रतिपत्त्याश्रयेन्मुनिः, **इति** समाप्तौ, **ब्रवीमी**ति प्रग्वत् ॥

इति चतुस्त्रिंशं लेश्याध्ययनमुक्तम् ॥३४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पञ्चत्रिंशमनगारमार्गगतिनामकाध्ययनम् ॥

लेश्याभिः शस्ताभिर्भिक्षवः स्युरिति भिक्षुगुणज्ञानायाऽनगारमार्गगत्याख्यं पञ्चत्रिंशाध्ययनमाह–

सुणेह मे एगग्गमणे, मग्गं बुद्धेहिं देसियं ।
जमायरंतो भिक्खू, दुक्खाणंतकरो भवे ॥१॥

व्याख्या–शृणुत 'मे' हे शिष्या ! यूयं **एकाग्रमनसो मार्गं** मुक्तेर्बुधैरर्हदाद्यैर्देशितं, **यमाचरन् भिक्षुर्दुःखानामन्तकरो भवेत्** ॥१॥

गिहवासं परिच्चज्ज, पव्वज्जामस्सिओ मुणी ।
इमे संगे वियाणेज्जा, जेहिं सज्जंति माणवा ॥२॥

व्याख्या–गृहवासं, यद्वा पारवश्याद् गृहमेव पाशं **परित्यज्य** प्रव्रज्यामाश्रितो **मुनिः**, **इमान्** प्रतिप्राणिप्रतीततया प्रत्यक्षान् **सङ्गान्** पुत्रकलत्रादीन् **विजानीयाद्भवहेतवोऽमी** इति विशेषेणावबुद्धयेत, ज्ञानस्य विरतिफलत्वात् प्रत्याख्यायाच्च, **येषु यैर्वा सज्यन्ते** बद्ध्यन्ते कर्मणा **मानवा** अन्येऽपि जीवाश्च ॥२॥

तहेव हिंसं अलियं, चोज्जं अब्बंभसेवणं ।
इच्छाकामं च लोभं च, संजओ परिवज्जए ॥३॥

व्याख्या–तथा समुच्चये, **एव** पूर्तौ **हिंसामलीकं चौर्यमब्रह्मसेवनं, इच्छारूपः कामस्तं** वा प्राप्तवस्तुकाङ्क्षारूपं, **लोभं च** लब्धवस्तुगृद्ध्यात्मकं, उभयेनापि परिग्रह उक्तः, तं च **संयतः परिवर्जयेत्** ॥३॥

मणोहरं चित्तघरं, मल्लधूवेण वासियं ।
सकवाडं पंडुरुल्लोयं, मणसा वि न पत्थए ॥४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—मनोहरं, चित्रप्रधानं गृहं **चित्रघरं, माल्यैर्ग्रथितपुष्पैर्धूपनैश्च** कृष्णागुर्वाद्यैर्**वासितं, सकपाटं पाण्डुरोल्लोचं, मनसाप्यास्तां** वचसा **न प्रार्थयेत्**, किं पुनस्तत्र तिष्ठेदिति भावः, निरवद्ये सकपाटे यतनार्थं च वस्त्रोपेते वसेत् ॥४॥

किं पुनरेवमुपदिश्यते ? इत्याह—

इंदियाणि तु भिक्खुस्स, तारिसंमि उवस्सए ।
दुक्कराइं निवारेउं, कामरागविवड्ढणे ॥५॥

व्याख्या—इन्द्रियाणि तुरिति यस्माद्भिक्षोस्तादृशे **उपाश्रये दुःकराणि** 'करोतेः सर्वधात्वर्थत्वात्' दुःशकानि **निवारयितुं** स्वस्वविषयप्रवृत्तेः, **कामा** इष्टेन्द्रियविषयास्**तेषु रागो**ऽभिष्वङ्गस्**तस्य वर्द्धने**, उपाश्रयविशेषणमेतत् ॥५॥

तर्हि क्व स्थेयमित्याह—

सुसाणे सुन्नगारे वा, रुक्खमूले व एक्कओ ।
पइरिक्के परकडे वा, वासं तत्थाभिरोयए ॥६॥

व्याख्या—स्मशाने वा **शून्यागारे वा वृक्षमूले वा एककोऽ**रागादिरसहायो वा, 'पइरिक्के'त्ति देश्या **एकान्ते** स्त्र्याद्यसङ्कुले, **परकृते** परैः कृते स्वार्थं, **वासं** स्थानं **तत्र** स्मशानादौ **अभिरोचयेदा**त्मने भिक्षुः ॥६॥

फासुयंमि अणाबाहे, इत्थीहिं अणभिद्दुए ।
तत्थ संकप्पए वासं, भिक्खू परमसंजए ॥७॥

व्याख्या—प्रासुकेऽचित्तीभूतभूभागे, **अनाबाधे** यत्रात्मनः परैरागन्तुभिराबाधा न स्यात्, **स्त्रीभिरनभिद्रुते, तत्र** प्रागुक्तविशेषणे स्मशानादौ **सम्यक् कल्पयेत्** कुर्याद्वासं **भिक्षुः परमसंयतः** परमो मोक्षस्तदर्थं सम्यग् यतते इति । प्राग् वासं तत्राभिरोचयेदित्युक्तेः रुचिमात्रेणैव कश्चित्तुष्येदिति तत्र सङ्कल्पयेद्वासमित्युक्तम् ॥७॥

ननु किमिह परकृतमिति विशेषणमुक्तमित्याशङ्क्याह—

न सयं गिहाइं कुविज्जा, नेव अन्नेहिं कारए ।
गिहकम्मसमारंभे, भूयाणं दिस्सए वहो ॥८॥

व्याख्या—न स्वयं गृहाणि कुर्वीत, नैवान्यैः कारयेत्, उपलक्षणान्नापि कुर्वन्तमनुमन्येत, यतो **गृहकर्मणि** इष्टिकामृदानयनादि, **तस्य समारम्भे** प्रवर्त्तने च **भूतानां दृश्यते वधः** ॥८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

केषामित्याह–

तसाणं थावराणं च, सुहुमाणं बायराण य ।
तम्हा गिहसमारंभं, संजओ परिवज्जए ॥९॥

व्याख्या–त्रसानां स्थावराणां सूक्ष्माणां देहेन सूक्ष्मनामकर्मोदयाद्वा, प्रमादतस्तेषामपि भावहिंसासम्भवात्, **बादराणां** स्थूलानां बादरनामकर्मोदयाद्वा, **तस्माद् गृहसमारम्भं संयतः परिवर्जयेत्** ॥९॥

अथाहारविधिमाह–

तहेव भत्तपाणेसु, पयणे पयावणेसु य ।
पाणभूयदयट्ठाए, न पए न पयावए ॥१०॥

व्याख्या–तथैवेति प्राग्वद्भक्तपानेषु पचनं स्वयं पाचनमन्यैः, तेषु **पचनपाचनेषु** भूतवधो दृश्यते, **प्राणा** द्वीन्द्रियादयो **भूतानि** पृथ्व्यादीनि, **तेषां दयार्थं न पचेन्न पाचयेत्** ॥१०॥

अमुमेवार्थं स्पष्टमाह–

जलधन्ननिस्सिया जीवा, पुहवीकट्ठनिस्सिया ।
हम्मंति भत्तपाणेसु, तम्हा भिक्खू न पयावए ॥११॥

व्याख्या–जलधान्ययोर्निश्रितास्तत्राऽन्यत्र चोत्पद्य ये तन्निश्रया स्थिताः, पूतरकेलिकाकीटाद्याः, जलधान्ययोर्वा मिश्रिता अब्वनस्पतिकायत्वेनाऽतिश्रिताः स्थिता जीवाः, एवं **पृथिवीकाष्ठनिश्रिता हन्यन्ते** भक्तपानेषु पच्यमानादिषु **तस्माद्भिक्षुर्न पाचयेन्न** पचेन्न पाकेऽनुमन्यादित्यपि ॥११॥

अन्यच्च–

विसप्पे सव्वओधारे, बहुपाणविणासणे ।
नत्थि जोइसमे सत्थे, तम्हा जोइं न दीवए ॥१२॥

व्याख्या–विसर्पतीति स्वल्पमपि बहु भवतीति **विसर्पं**, सर्वतः सर्वासु दिक्षु धारेव धारा जन्तुविनाशिका शक्तिरस्येति **सर्वतोधारं**, सर्वदिक्स्थजन्तुहन्तृत्वात्, अत एव **बहुप्राणविनाशनं, नास्ति ज्योतिःसमं शस्त्रम**न्यत्, शस्त्रस्य ह्यविसर्पत्वादसर्वतो धारत्वादल्पजन्तुहन्तृत्वाच्चेति भावः, **तस्माज्ज्योतिर्न दीपयेत्** ॥१२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पचनादौ जन्तुवधः स्यात्, न तु क्रयविक्रययोः, अतो युक्तमेवाभ्यां निर्वहणं, इति कस्यचिदाशङ्का स्यादत आह–

हिरण्णं जायरूवं च, मणसा वि न पत्थए ।
समलेट्ठुकंचणे भिक्खू, विरए कयविक्कए ॥१३॥

व्याख्या–हिरण्यं स्वर्णं **जातरूपं** रूप्यं, **चः** अनुक्ताऽशेषधनधान्यादिसमुच्चये, **मनसापि,** आस्तां वाचा, **न प्रार्थयेद्भिक्षुः**, कीदृक् सन् ? **समलेष्टुकाञ्चनो विरतः क्रयविक्रये** ॥१३॥

क्रयविक्रयविषये किमित्येवमत आह–

किणंतो कइओ होइ, विक्कणंतो य वाणिओ ।
कयविक्कयंमि वट्टंतो, भिक्खू हवइ न तारिसो ॥१४॥

व्याख्या–क्रीणन् क्रयकः स्यात्, तथाविधेतरलोकसदृशः, **विक्रीणंश्च वणिक्** स्यात्, वाणिज्यप्रवृत्वात्, इति भावः, अत एव **क्रयविक्रये वर्त्तमानो भिक्षुर्न भवति तादृशो** यादृशः सूत्रे उक्तो भावभिक्षुः ॥१४॥

ततः किमित्याह–

भिक्खियव्वं न केतव्वं, भिक्खुणा भिक्खवित्तिणा ।
कयविक्कओ महादोसो, भिक्खावित्ती सुहावहा ॥१५॥

व्याख्या–भिक्षितव्यं याचितव्यं योग्यं वस्तु, न नैव **क्रेतव्यं** मूल्येन गृहीतव्यं, **भिक्षुणा भिक्षावृत्तिना,** उक्तं हि–"**सव्वं से जाइयं होइ, नत्थि किंचि अजाइयं**" [ ] **क्रयविक्रयौ महादोषौ, भिक्षावृत्तिस्तु सुखावहा, शुभावहा** वा ॥१५॥

अनेन क्रीतदोष उक्तोऽशेषविशुद्धकोटीगतदोषत्यागज्ञप्त्यै भिक्षितव्यमित्युक्तं, तच्चैककुलेऽपि स्यादत आह–

समुयाणं उंछमेसिज्जा, जहा सुत्तमणिंदियं ।
लाभालाभंमि संतुट्ठे, पिंडवायं चरे मुणी ॥१६॥

व्याख्या–समुदानं भैक्ष्यं, नत्वेकभिक्षामेव, तच्चोञ्छमि**वोञ्छम**न्याऽन्यपरिमितं स्तोकस्तोकमिलनात् मधुकरवृत्त्या **एषयेत्, यथा सूत्रमा**गमोक्ताऽनेषणाद्यबाधितं, अत एवा**ऽनिन्दितं** स्वपरप्रशंसादिहेतुना नोत्पादितं, जात्यादिजुगुप्सितजनसम्बन्धि वा न स्यात्,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

लाभश्च अलाभश्च **लाभाऽलाभौ, तयोः सन्तुष्टः**, पिण्डस्य भिक्षायाः पातः पतनं पात्रेऽस्मिन्निति **पिण्डपातं** भिक्षाटनं **चरेदासेवत** [**मुनिरिति** तपस्वी] ॥१६॥

यथा भुञ्जीत तथाह–

अलोलो न रसे गिद्धे, जिब्भादंतो अमुच्छिओ ।
न रसट्ठाए भुंजिज्जा, जवणट्ठाए महामुणी ॥१७॥

व्याख्या–अलोलो न रसान्ने प्राप्ते लाम्पट्यवान्, **न रसे** स्निग्धादौ **गृद्धोऽ**प्राप्ते काङ्क्षावान्, प्राकृतत्वाद्दान्ता जिह्वा येनासौ **दान्तजिह्वः**, अत एवा**ऽमूर्च्छितः** सन्निधेरकरणेन, तत्कालेनाऽभिष्वङ्गाऽभावेन, उक्तं हि–"**णो वामाओ हणूयाओ दाहिणं, दाहिणाओ वा वामं चालेइ**" [ ] । **रसो** धातुविशेषः, धूतापलक्षणं, **तदुपचयार्थं न भुञ्जीत**, किन्तु **यापना** निर्वाहः, स च संयमस्य, **तदर्थं महामुनिर्भुञ्जीत** एवं पिण्डशुद्धिरुक्ता ॥१७॥

अच्चणं रयणं चेव, वंदणं पूयणं तहा ।
इड्ढीसक्कारसम्माणं, मणसा वि न पत्थए ॥१८॥

व्याख्या–अर्चनां पुष्पाद्यैरपि पूजां, **रचनां** निषद्यादिविषयां स्वस्तिकाद्यां वा, **चः** समुच्चये, **एवः** निश्चये, **वन्दनं, पूजनं** वस्त्राद्यैः प्रतिलाभनं, **तथे**ति समुच्चये, ऋद्धिः श्राद्धोपकरणादिः सम्पद्, आमर्षौषध्यादिर्वा, सत्कारोऽर्थप्रधानादिः, सन्मानमभ्युत्थानादिः, एवंविधं **ऋद्धिसत्कारसन्मानं मनसापि**, आस्तां वाचा, **नैव प्रार्थयेत्**, विधिना तु वन्दनग्रहणं वस्त्रग्रहणादिर्वा कुर्यात् ॥१८॥

सुक्कं झाणं झियाएज्जा, अनियाणे अकिंचणे ।
वोसट्ठकाए विहरेज्जा, जाव कालस्स पज्जओ ॥१९॥

व्याख्या–तथा **शुक्लं ध्यानं** यथा स्यादेवं **ध्यायेत्**, **अनिदानोऽकिञ्चनो व्युत्सृष्टकायो विहरेद**प्रतिबद्धविहारितया, यावत्कालस्य मृत्योः पर्यायः प्रस्तावः ॥१९॥

निज्जूहिऊण आहारं, कालधम्मे उवट्ठिए ।
चइऊण माणुसं बोंदिं, पहू दुक्खे विमुच्चई ॥२०॥

व्याख्या–['निज्जूहिऊण'त्ति] **परित्यज्याहारं** संलेखनाक्रमेणैव, झगत्यशनादित्यागे सामान्यानां बहुतर-दोषसम्भवात्–

देहंमि असंलिहिए, सहसा धाऊहिं खिज्जमाणेहिं ।
झायइ अट्टज्झाणं, सरीरिणो चरमकालंमि ॥१॥ [प.व./गा.१५७७]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कालधर्मे मरणे **उपस्थिते त्यक्त्वा मानुषीं बोन्दिं** तनुं, **प्रभु**र्वीर्यान्तरायाऽपगमाद्विशिष्टसामर्थ्यवान् **दुःखैः** शारीरैर्मानसैर्**विमुच्यते** ॥२०॥

निम्ममो निरहंकारो, वीयरागो अणासवो ।
संपत्तो केवलं नाणं, सासयं परिनिव्वुओ ॥२१॥ त्ति बेमि

व्याख्या—निर्ममो निरहङ्कारो वीतरागो वीतद्वेषश्च, **अनाश्रवः** कर्माश्रवरहितः, **सम्प्राप्तः केवलं ज्ञानं, शाश्वतं** स्थानं कदाचिदव्यवच्छेदात् **परिनिर्वृतो**ऽस्वास्थ्यहेतुकर्माऽभावतः सर्वथा स्वस्थीभूत **इति** समाप्तौ, **ब्रवीमी**ति प्राग्वात् ॥२१॥

इति पञ्चत्रिंशमनगारमार्गगतिनामकाध्ययनमुक्तम् ॥३५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

षट्त्रिंशं जीवाजीवविभक्तिसंज्ञमध्ययनम् ॥

भिक्षुगुणा जीवाऽजीवस्वरूपज्ञानात् स्युरिति षट्त्रिंशं **जीवाऽजीवविभक्त्य-**ध्ययनमाह—अत्र भाष्यगाथा—

तस्स अणुओगदारा, चत्तारि उवक्कमो य निक्खेवो ।
अणुगमे नए य तहा, उवक्कमो छव्विहो तत्थ ॥१॥ [भाष्यगा०]

नामं ठवणा दविए, खित्ते काले तहेव भावे य ।
एसो सत्थोवक्कमो, नेयव्वो सो जहाकमसो ॥२॥ [भाष्यगा०]

अह अणुपुव्वी नाम-प्पमाणवत्तव्वया य बोधव्वा ।
अत्थहिक्कारो तत्तो, छट्ठो य तहा समायारो ॥३॥ [भाष्यगा०]

सव्वे जहक्कमेणं, वण्णेणं इमो समायारो ।
अणुपुव्वीए उ तहिं, कित्तणपुव्विओयरइ ॥४॥ [भाष्यगा०]

सा इह पुव्वणुपुव्वी, पच्छणुपुव्वी तहा अणणुपुव्वी ।
पुव्वणुपुव्वी छत्तीसइयं इमं पच्छ पुण पढमं ॥५॥ [भाष्यगा०]

अणणुपुव्वीए जए, एगाए गुत्तरायसेढीए ।
छत्तीसगत्थगाए, गुणिया अण्णोण्णदुरूवूणा ॥६॥ [भाष्यगा०]

नामे छव्विहनामे, तत्थ वि भावे खओवसमिअंमि ।
जम्हा वट्टइ भावे, सव्वसुयं खओवसमियंमि ॥७॥ [भाष्यगा०]

ओयरइ पमाणे पुण, भावपमाणे उ तं पि तिविहं तु ।
गुणणयसंखपमाणं, ओयरइ गुणप्पमाणंमि ॥८॥ [भाष्यगा०]

तत्थ वि णाणेण तहियं पि, आगम ऊत्तरे अणंगे य ।
कालियसुए य तत्तो, अहवावी आगमतिअंमि ॥९॥ [भाष्यगा०]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अत्तअणंतरपारंपरे य उभयंमि तं समोयरइ ।
न नएसु समोयरई, समोयरइ उ संखपरिमाणे ॥१०॥ [भाष्यगा०]

तत्थ वि कालियसुए, अक्खपयमाइएसु ओयरइ ।
वत्तव्वय ओसन्नं, ससमयवत्तव्व ओयरइ ॥११॥ [भाष्यगा०]

एता गाथाः सर्वसिद्धान्तव्याख्यायामादौ तुल्या एव ।

अत्थहिगारो एत्थं, जीवाजीवेहिं होइ नायव्वो ।
एमेव समोयरइ, जं जत्थ समोयरइ दारे ॥१२॥ [भाष्यगा०]

इह गणभृतां आत्मसंयमः, प्रशिष्यादीनां परम्परागमः, उभयेऽन्तरपरम्परागमे इदमध्ययनं समवतरति ॥ गतं उपक्रमद्वारम् ॥

निक्खेवावसरो पुण, अह अणुपत्तो य तत्थ निक्खेवो ।
नासो त्ति य ठवणो त्ति य रयणे त्ति व होंति एगट्ठा ॥१३॥ [भाष्यगा०]

सो तिह ओहे नामे, सुत्तालावे य होइ बोधव्वो ।
तत्थोहो अविसेसो, अज्झयणस्स वि य सो चउहा ॥१४॥ [भाष्यगा०]

वण्णेउ जह विहिणा, तयणंतरमित्थ णामणिप्फन्नो ।
तत्थ य नामं अस्स उ, जीवाजीवाण य विभत्ती ॥१५॥ [भाष्यगा०]

एता गाथा **आवश्यकदीपिका**नुसारेण व्याख्येयाः ।

अथ जीवाऽजीवविभक्तिपदत्रयनिक्षेपाय निर्युक्तिः—

निक्खेवो जीवंमि, चउव्विहो[१] दुविह होइ दव्वंमि ।
आगमनोआगमओ, नोआगमओ य सो तिविहो ॥१॥ [उ.नि.गा.५४९]

जाणगसरीरभविए, तव्वइरित्ते य जीवदव्वं तु ।
भावंमि दसविहो खलु, परिणामो होइ जीवस्स ॥२॥ [उ.नि.गा.५५०]

व्याख्या—नोआगमतो ज्ञभव्यदेहातिरिक्तो द्रव्ये जीवो जीवद्रव्यं, जीवद्रव्यस्य सम्बन्धी जीवद्रव्याऽनन्यत्वेन दशविधः परिणामो भावतो जीवत्वेनोक्तः, यथा पञ्चेन्द्रियाणि षष्ठं मनः, चतुःकषायोदयाश्च दश परिणामाः कर्मक्षयोपशमोदयभावाः ॥

निक्खेवे उ अजीवे, चउव्विहो[२] दुविह होइ दव्वंमि ।
आगमनोआगमओ, नोआगमओ य सो तिविहो ॥३॥ [उ.नि.गा.५५१]

---

१. नामस्थापनादि । २. नामाद्यैः ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जाणगसरीरभविए, तव्वइरित्ते अ जीवदव्वं तु ।
भावंमि दसविहो खलु, परिणामो होइ अजीवस्स ॥४॥ [उ.नि.गा.५५२]

व्याख्या—ज्ञभव्यदेहातिरिक्तं द्रव्ये पुद्गलद्रव्यमपर्यायं विवक्षितः सन्, परिणामो भिन्नत्वादजीवद्रव्यं दशधा, शब्दरूपरसगन्धस्पर्शाः शुभा अशुभाश्च परिणामाः भावि-अजीवाः ॥४॥

निक्खेवो विभत्तीए, चउव्विहो दुविहो होइ दव्वंमि ।
आगमनोआगमओ, नोआगमओ य सा तिविहा ॥५॥ [उ.नि.गा.५५३]

जाणगसरीरभविया, तव्वइरित्ता य सा भवे दुविहा ।
जीवाण अजीवाण य, जीवविभत्ति तहिं दुविहा ॥६॥ [उ.नि.गा.५५४]

व्याख्या—ज्ञशरीरद्रव्यविभक्तिर्येन देहेन बालादिस्तद्भवे विभक्तिशब्दार्थं ज्ञास्यति स देहः, भव्यशरीरद्रव्यविभक्तिर्येन जीवदेहेन प्राग् विभक्तिशब्दार्थो ज्ञातोऽभूत् सोऽजीवो देहः, ज्ञभव्यशरीरव्यतिरिक्ताद्व्यतिरिक्ताविभक्तिद्रव्ये, सा द्विविधा, जीवविभक्तिर्जीवभेदाः, अजीवविभक्तिरजीवभेदाश्च ॥६॥

सिद्धाण असिद्धाण य, अजीवाणं तु होइ दुविहा उ ।
रूवीणमरूवीण य, विभासियव्वा जहा सुत्ते ॥७॥ [उ.नि.गा.५५५]

विभाषितव्या स्पष्टीकार्या विभक्तिर्भेदाः ।

भावंमि विभत्ती खलु, नायव्वा छव्विहंमि भावंमि ।
अहिगारो इत्थं पुण, दव्वविभत्तीए अज्झयणे ॥८॥ [उ.नि.गा.५५६]

व्याख्या—औदयिकौपशमिकक्षायिकक्षायोपशमिकपरिणामिकसान्निपातिकभावेषु षट्सु, अत्राध्ययने जीवाऽजीवद्रव्यविभक्त्यधिकारः ॥८॥

इतिनिर्युक्तिगाथा अष्ट उक्ताः, उक्तो नामनिष्पन्नो निक्षेपोऽथ सूत्रानुगमे सूत्रमिदम्—

जीवाजीवविभत्तिं मे, सुणेहेगमणा इओ ।
जं जाणिऊण भिक्खू, सम्मं जयइ संजमे ॥१॥

व्याख्या—जीवाश्चोपयोगलक्षणाः, अजीवाश्च तद्विपरीताः, जीवाऽजीवास्तेषां विभजनं विभक्तिः, तद्भेदादिदर्शनतो विभागेनाऽवस्थापनं, **जीवाऽजीवविभक्तिस्तां शृणुत** हे शिष्या ! **एकमनसः** सन्तः, **इतो**ऽनन्तराऽध्ययनादेतद्विषयाच्छ्रवणाद्वाऽनन्तरं, **यां** जीवा-ऽजीवविभक्तिं **ज्ञात्वा** भिक्षुः (पाठान्तरे-**श्रमणः**) **सम्यग् यतते** यत्नवान् स्यात् **संयमे** उक्तरूपसंयमविषये । जीवद्रव्यस्य दशधा परिणामः, क्षयोपशमिक इन्द्रियमनःपरिणामः

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

षोढा, औदयिककषायपरिणामश्चतुर्धा, अजीवद्रव्यस्य पुद्गलस्य शुभाशुभशब्दरूपादि-भेदैर्दशधा ॥१॥

जीवाऽजीवप्रसङ्गत एव महाव्रतेषूपयोगित्वाल्लोकालोकविभक्तिमाह—

जीवा चेव अजीवा य, एस लोए वियाहिए ।
अजीवदेसमागासे, अलोए से वियाहिए ॥२॥

व्याख्या—जीवाश्चैव अजीवाश्च, एष सर्वप्रसिद्धो **लोके व्याख्यातोऽर्हदाद्यैः, अजीवदेश आकाशमलोकः स व्याख्यातो** धर्मास्तिकायादिसहितस्याकाशस्यैव लोकत्वात् ॥२॥

जीवाऽजीवविभक्तिमाह—

दव्वओ खित्तओ चेव, कालओ भावओ तहा ।
परूवणा तेसिं भवे, जीवाणमजीवाण य ॥३॥

व्याख्या—द्रव्यत इदमियद्भेदं द्रव्यमिति, **क्षेत्रतश्चैव** इदमियति देशे, **कालत** इदमियत्स्थितिकं, **भावत** इमेऽस्य पर्यायाः, तथेति समुच्चये, इति **प्ररूपणा तेषां** विभजनीयत्वेन प्रक्रान्तानां **भवेज्जीवानामजीवानां च** ॥३॥

स्वल्पवक्तव्यादादावजीवप्ररूपणामाह—

रूविणो चेवऽरूवी य, अजीवा दुविहा भवे ।
अरूवी दसहा वुत्ता, रूविणो वि चउव्विहा ॥४॥

व्याख्या—रूपस्पर्शाद्याश्रयार्हमूर्त्तिस्तदेषामेषु वाऽस्तीति **रूपिणः, चः** समुच्चये, **एव** पूर्त्तौ, **अरूपिणश्च,** नैषामुत्करूपमस्तीति कृत्वा **अजीवा द्विविधा भवेयुः,** तत्राप्य**रूपिणो दशधा उक्ताः, अपिः** पुनरर्थे, ततो **रूपिणश्चतुर्विधा** अजीवाः ॥४॥

अरूपिणो दशधा, तानाह—

धम्मत्थिकाए तद्देसे, तप्पएसे य आहिए ।
अधम्मे तस्स देसे य, तप्पएसे य आहिए ॥५॥

व्याख्या—धारयति अनुगृह्णाति गतिपरिणतजीवपुद्गलान् अरूपित्वेऽपि स्वस्व-भावादिति धर्मः, अस्तयः प्रदेशास्तेषां चीयते इति अस्तिकायः, धर्मश्चासावस्तिकायश्च **धर्मास्तिकायः,** सर्वदेशप्रदेशानुगं द्रव्यं १ तस्य दिश्यते समानपरिणामत्वेऽपि विभागेनेति **तद्देशो** धर्मास्तिकायदेशः २ देशस्त्रिभागश्चतुर्भागादिः, तस्य प्रकर्षेणाऽविभागांसितया यद्दिश्यते **तत्प्रदेशः,** प्रदेशस्तु निरंशो भाग **आख्यातः** ३ न धारयति जीवाणून् गतिपरिणतौ

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स्थित्यवष्टम्भकत्वादित्यधर्मः, स एवाऽस्तिकायोऽधर्मास्तिकायः १ **तस्य देशः** स्थूलो भागोऽधर्मास्तिकायदेशः २ **तत्प्रदेशो** निर्विभागो भाग**श्चाख्यातः** ३ ॥५॥

आगासे तस्स देसे य, तप्पएसे य आहिए ।
अद्धासमए चेव, अरूवी दसहा भवे ॥६॥

व्याख्या—आङिति मर्यादया स्वरूपाऽत्यागरूपया काशन्ते भासन्तेऽस्मिन् षदार्था इत्य**ाकाशं**, आङ् अभिविधा व्याप्त्या सर्वभावानां काशते इत्य**ाकाशं** वा, तदेवास्तिकाय आकाशास्तिकायः १ प्राग्व**त्तस्य देश**श्च २ तत्प्र**देशश्चाख्यातः** ३ एवं ९ अद्धा कालस्तद्रूपः समयोऽ**द्धासमयो** निर्विभागत्वाच्चास्य न देशप्रदेशौ, इत्यरूपिणो **दशधा भवेयुः** ॥६॥

एतानेव क्षेत्रत आह—

धम्माधम्मा य दोवेते, लोयमित्ता वियाहिया ।
लोगालोगे य आगासे, समये समयखेत्तिए ॥७॥

व्याख्या—धर्माऽधर्मौ धर्मास्तिकायाऽधर्मास्तिकायौ च, **द्वावप्येतौ लोकमात्रौ व्याख्यातौ**, द्विवचनेन गतार्थत्वेऽपि द्वौशब्दः स्पष्टत्वाय । **लोके अलोके चाकाशं** सर्वगत्वात्तस्य, समय **इत्यद्धासमयः**, समयक्षेत्रं विषयभूतमस्यास्तीति समयक्षेत्रिकः, तत्परतस्तस्याऽभावात् ,

समयमूलत्वादावलिका-पक्षमासऋत्वयनसञ्ज्ञिता ।
नृलोक एव कालस्य, वृत्तिर्नान्यत्र कुत्रचित् ॥१॥ [ ] ॥७॥

एतानेव कालत आह—

धम्माधम्मो य आगासं, तिण्णि वि एए अणाइया ।
अपज्जवसिया चेव, सव्वद्धं तु वियाहिया ॥८॥

व्याख्या—धर्माऽधर्माकाशानि त्रीण्यप्येतानि अनादिकानि, अपर्यवसितानि चैव अनन्तानीत्यर्थः, **सर्वाद्धमेव** सर्वदा स्वस्वरूपाऽपरित्यागतो नित्यानीत्यर्थः, **व्याख्यातानी**ति ॥८॥

समए वि संतइं पप्प, एवमेव वियाहिए ।
आएसं पप्प साईए, सपज्जवसिए वि य ॥९॥

व्याख्या—समयोऽपि सन्ततिमपरापरोत्पत्तिप्रवाहं प्राप्याश्रित्यैवमेवाऽनाद्याऽपर्यव-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सितत्वेनैवाख्यातः, **आदेशं** देशविशेषं घट्याद्यं प्रतिनियतव्यक्त्यात्मकं प्राप्याङ्गीकृत्य चः पुनः **सादिः सपर्यवसितोऽपि, चः** समुच्चये ॥९॥

अथाऽमूर्त्तत्वेनैषां पर्यायाः प्ररूप्यमाणा अपि न ज्ञातुं शक्या इति भावतः प्ररूपणामनादृत्य द्रव्यतो रूपिणं प्ररूपयितुमाह—

खंधा य खंधदेसा य, तप्पएसा तहेव य ।
परमाणुणो य बोधव्वा, रूविणो चउव्विहा ॥१०॥

व्याख्या—स्कन्दन्ति शुष्यन्ति धीयन्ते पोष्यन्ते पुद्गलानां विचटनचटनाभ्यां इति **स्कन्धाः**, स्कन्धानां स्तम्भादिरूपाणां स्थूला भागाः परमाणुपुञ्जरूपाः **स्कन्धदेशाः**, तथा तेषां स्कन्धानां निर्विभागा मिलितपुद्गलाऽविभागांशाः **स्कन्धप्रदेशाः**, **परमाणवो** निर्विभागद्रव्यरूपा एकैकाः, **च** समुच्चये, **बोधव्याः**, एवं **चतुर्विधा रूपिणः** सन्ति, मुख्यवृत्त्या तु स्कन्धाः परमाणवश्चेति समासतो द्वावेव रूपिद्रव्यभेदौ ॥१०॥

तयोर्लक्षणमाह—

एगत्तेण पुहुत्तेण, खंधा य परमाणुणो ।
लोगेगदेसे लोए य, भइयव्वा ते उ खेत्तओ ।
इत्तो कालविभागं तु, तेसिं वुच्छं चउव्विहं ॥११॥ (षट्पदी)

व्याख्या—एकत्वेनाणुभिः सहैकपरिणत्या [स्कन्धाः] स्युः **पृथकत्वेन** परमाण्वन्तरैरसङ्गतेन परमाणवः स्युः, कोऽर्थः ? मिलिता द्व्यणुकाद्या अनन्तप्रदेशान् यावत् स्कन्धा एकैकाश्चाणवः, यद्वा स्कन्धा एकत्वे एकत्वेऽन्यपरमाणूनां द्विप्रदेशत्वाद्यसमपरिणामेनाऽन्यस्कन्धनिर्गताणुमिलनेन च तथा पृथक्त्वेन पतत्परमाणुत्वेन च स्युः, यतः स्कन्दन्ति शुष्यन्ति अणुपाते धुयन्ति पिबन्त्यणून् न संयोगे सतीति स्कन्धाः, अणवस्त्वेकत्वेनैव । तथा सङ्घातभेदे सङ्घाते भेदे च स्कन्धास्त्रिधापि स्युः, एतानेव क्षेत्रत आह—

लोकैकदेशे लोके च भक्तव्या भजनया दर्शनीयास्ते स्कन्धाः परमाणवश्च, **तुः** पूर्त्तौ, **क्षेत्रतो**ऽत्र च विशेषोक्तावपि परमाणूनामेकदेश एवाऽवस्थानात् स्कन्धविषयैव भजना द्रष्टव्या । ते हि विचित्रत्वात् परिणतेर्बहुप्रदेशा अप्येके एकप्रदेशे तिष्ठन्ति, अन्ये तु सङ्ख्येयेष्वसङ्ख्येयेषु प्रदेशेषु यावत् सकललोकेऽपि तथाविधाऽचित्तमहास्कन्धवत् स्युरिति भजनीया उच्यन्ते । **इतः** क्षेत्रप्ररूपणातोऽनु **कालविभागं तु** कालभेदं पुनस्तेषां स्कन्धादीनां **वक्ष्ये चतुर्विधं,** साद्यनाद्यसपर्यवसितभेदेन, अनन्तरमेव वक्ष्यमाणेनेति । इदं सूत्रं षट्पादगाथेत्युच्यते । यतस्तल्लक्षणं—

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

विषमाक्षरपादं वा, पादैरसमं दशधर्मवत् ।
तन्त्रेऽस्मिन् पदबद्धं, गाथेति तत्पण्डितैर्ज्ञेयम् ॥१॥ [ ]

दशधर्मवत्, यथा—

दशधर्मं न जानन्ति, धार्त्तराष्ट्रा निबोधत ! ।
मत्तः १ प्रमत्त २ उन्मत्तः ३, श्रान्तः ४ क्रुद्धो ५ बुभुक्षितः ६ ।
त्वरमाणश्च ७ भीरुश्च ८, लुब्धः ९ कामी च १० ते दश ॥११॥ [ ]

संतइं पप्प तेणाई, अपज्जवसिया वि य ।
ठिइं पडुच्च साईया, सप्पज्जवसिया वि य ॥१२॥

व्याख्या—सन्ततिं अपरापरोत्पत्तिं **प्राप्या**श्रित्य इति ते स्कन्धाः परमाणवश्च **अनादयोऽपर्यवसिता अपि च,** न हि स्कन्धा अणवश्च कदाचित् प्रवाहतो न भूता न भविष्यन्तीति, किन्तु स्कन्धाः कालेनाणवः, अणवश्च स्कन्धा जायन्ते इत्यर्थः, **स्थितिं** नियतक्षेत्रस्थानं प्रतीत्याङ्गीकृत्य **सादिकाः सपर्यवसिता अपि च,** कालान्तरे नवनवक्षेत्र-गामित्वात् अणुस्कन्धानाम् ॥१२॥

सादिसपर्यवसितत्वेऽपि कियत्कालमेषा स्थितिरित्याह—

असंखकालमुक्कोसं, इक्कं समयं जहन्नयं ।
अजीवाण य रूवीणं, ठिई एसा वियाहिया ॥१३॥

व्याख्या—असङ्ख्यकालमुत्कृष्टा, एकं समयं जघन्यिका, अजीवानां पुद्गलानां **रूपिणां पुद्गलानां स्थितिरेषा व्याख्याताः,** जघन्यत एकसमयादुत्कृष्टतश्चासङ्ख्येयकालात् परतोऽवश्यमेव एकस्थानान्नभःप्रदेशादेः स्कन्धानां, केवलनभःप्रदेशादणूनां च विचटनात् ॥१३॥

कालद्वारमाश्रित्य स्थितिरुक्ता, सम्प्रत्येतदन्तर्गतमेवान्तरमाह—

अणंतकालमुक्कोसं, इक्कं समयं जहन्नयं ।
अजीवाण य रूवीणं, अंतरं तु वियाहियं ॥१४॥

व्याख्या—अनन्तकालमुत्कृष्टमेकं समयं जघन्यकमजीवानां रूपिणामन्तरं विवक्षितक्षेत्रस्थितेश्च्युतानां **पुनस्तत्प्राप्तेरन्तरमेतद्व्याख्यातम्** ॥१४॥

भावत आह—

वण्णओ गंधओ चेव, रसओ फासओ तहा ।
संठाणओ य विन्नेओ, परिणामो तेसि पंचहा ॥१५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या–वर्णतो गन्धतश्चैव रसतः स्पर्शतस्तथा संस्थानतश्च, अयमर्थः– वर्णादीन् पञ्चाश्रित्य **विज्ञेयो** ज्ञातव्यः **परिणामः** स्वरूपे स्थितानामेव वर्णाद्यन्यथाभावः, **स तेषां** परमाणूनां स्कन्धानां च **पञ्चधा**, इहाऽणोः संस्थानाऽभावात् स्कन्धस्यैवेयन्तो भेदा ज्ञेयाः, अणुनां वर्णगन्धरसस्पर्शवत्त्वादेव ॥१५॥

प्रत्येकमेषामेवोत्तरभेदनाह–

वण्णओ परिणया जे उ, पंचहा ते पकित्तिया ।
किण्हा नीला य लोहिया, हालिद्दा सुक्किला तहा ॥१६॥

व्याख्या–वर्णतः परिणता वर्णपरिणामभाज इत्यर्थः, **येऽणवादयस्तु, ते** पञ्चधा **प्रकीर्त्तिताः**, प्रकर्षेण सन्देहापनेतृत्वलक्षणेन संशब्दिताः, तानेवाह–**कृष्णाः** कज्जलादिवत्, **नीला** नील्यादिवत्, **लोहिता** हिङ्गुलादिवत्, **हरिद्रा** हरिद्रावत्, **शुक्लाः** शङ्खादिवत्, **तथेति** समुच्चये ॥१६॥

गंधओ परिणया जे उ, दुविहा ते वियाहिया ।
सुब्भिगंधपरिणामा, दुब्भिगंधा तहेव य ॥१७॥

व्याख्या–ये तु पुद्गला **गन्धतः परिणताः** सन्ति, ते पुद्गला **द्विविधा व्याख्याताः**, सुरभिगन्धपरिणामो येषां ते **सुरभिगन्धपरिणामाश्चन्दनादिवत्**, दुरभिगन्धत्वेन परिणता **दुरभिगन्धा** लसुनादिवत् ॥१७॥

रसओ परिणया जे उ, पंचहा ते उ कित्तिया ।
तित्तकडुयकसाया य, अंबिला महुरा तहा ॥१८॥

व्याख्या–ये च पुद्गला **रसतः** परिणतास्ते **च पञ्चधा कीर्त्तिताः, तिक्ताः** शुण्ठ्यादिवत्, **कटुका** निम्बादिवत्, **कषायाश्चाऽपक्वकपित्थादिवत्, आम्ला** आम्ल-वेतसादिवत्, **मधुराः** शर्करादिवत् ॥१८॥

फासओ परिणया जे उ, अट्ठहा ते वियाहिया ।
कक्खडा मउया चेव, गुरुया लहुया तहा ॥१९॥

व्याख्या–ये च पुद्गलाः **स्पर्शतः परिणतास्तेऽष्टधा विख्याताः, कर्कशाः** पाषाणादिवत्, **मृदवो** हंसरूतादिवत्, **गुरवो** हीरकादिवत्, **लघवोऽर्कतूलादिवत्** ॥१९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सीया उण्हा य बोधव्वा, निद्धा लुक्खा तहेव य ।
इइ फासपरिणया, पुग्गला समुयाहिया ॥२०॥

व्याख्या—**शीता** मृणालादिवत्, **उष्णा** वह्न्यादिवत्, **स्निग्धा** घृतादिवत्, **रूक्षा** भूत्यादिवत्, **इतीत्यमुना** प्रकारेण **स्पर्शपरिणता** एते स्कन्धादयः पूरणगलनधर्माणः **पुद्गलाः समुदाहृताः** सम्यगुक्ता जिनैः ॥२०॥

संठाणपरिणया जे उ, पंचहा ते वियाहिया ।
परिमंडला य वट्टा, तंसा चउरंसमायया ॥२१॥

व्याख्या—सन्तिष्ठन्त्यत्र स्कन्धा देशाश्चेति **संस्थानानि** आकारास्तैः **परिणता ये तु पुद्गलास्ते पञ्चधा** व्याख्याताः, **परिमण्डलं** मध्यसुषिरं, **वृत्तं** मध्याऽसुषिरं, **त्र्यस्रं** त्रिकोणं, **चतुरस्रं** चतुःकोणं, **आयतं** प्रलम्बं, एतैः संस्थानैः स्कन्धाः स्युः ॥२१॥

वर्णगन्धरसस्पर्शसंस्थानानां परस्परसम्बधमाह—

वण्णओ जे भवे किण्हे, भइए से उ गंधओ ।
रसओ फासओ चेव, भइए संठाणओ वि य ॥२२॥

व्याख्या—**वर्णतो यः** स्कन्धादि**र्भवेत् कृष्णः, स तु पुनर्गन्धतो** गन्धमाश्रित्य **भाज्यः** सुरभिगन्धो वा दुर्गन्धो वा स्यात्, न तु नियतगन्ध एवेति भावः, एवं **रसतः स्पर्शतश्चैव भाज्यः, संस्थानतोऽपि च,** अन्यतररसादियोग्यो वाऽसौ भवेदित्यर्थः ॥२२॥

वण्णओ जे भवे नीले, भइए से उ गंधओ ।
रसओ फासओ चेव, भइए संठाणओ वि य ॥२३॥

व्याख्या—**वर्णतो यः** स्कन्धादिर्नीलो भवेत्, **सोऽपि गन्धतो रसतः स्पर्शतश्चैव भाज्यः संस्थानतश्च** ॥२३॥

वण्णओ लोहिए जे उ, भइए से वि गंधओ ।
रसओ फासओ चेव, भइए संठाणओ वि य ॥२४॥

व्याख्या—**वर्णतो यः** स्कन्धादिर्लोहितो भवेत् **सोऽपि गन्धरस्पर्शसंस्थानतश्च भाज्यः** ॥२४॥

वण्णओ जे उ हालिद्दे, भइए से वि गंधओ ।
रसओ फासओ चेव, भइए संठाणओ वि य ॥२५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—वर्णतो यः स्कन्धादिर्हरिद्रः पीतो भवेत् सोऽपि गन्धरसस्पर्श-संस्थानतश्च भाज्यः ॥२५॥

वण्णओ सुक्किले जे उ, भइए से वि गंधओ ।
रसओ फासओ चेव, भइए संठाणओ वि य ॥२६॥

व्याख्या—वर्णतो यः स्कन्धादिः शुक्लो भवेत् सोऽपि गन्धरसस्पर्शसंस्थानत-श्चापि भाज्यः ॥२६॥

गंधओ जे भवे सुरभि, भइए से वि वण्णओ ।
रसओ फासओ चेव, भइए संठाणओ वि य ॥२७॥

व्याख्या—तथा गन्धतो यो भवेत् सुरभिः, सोऽपि वर्णरसस्पर्शसंस्थानतश्चापि भाज्यः ॥२७॥

गंधओ जे भवे दुरभि, भइए से वि वण्णओ ।
रसओ फासओ चेव, भइए संठाणओ वि य ॥२८॥

व्याख्या—गन्धतो यो भवेद् दुरभिः सोऽपि वर्णरसस्पर्शसंस्थानतश्चापि भाज्यः ॥२८॥

रसओ तित्तए जे उ, भइए से वि वण्णओ ।
गंधओ फासओ चेव, भइए संठाणओ वि य ॥२९॥

व्याख्या—यो रसतस्तिक्तो भवेत्, सोऽपि वर्णगन्धरसस्पर्शसंस्थानतश्चापि भाज्यः ॥२९॥

रसओ जे भवे कडुए, भइए से वि वण्णओ ।
गंधओ फासओ चेव, भइए संठाणओ वि य ॥३०॥

व्याख्या—यो रसतः कटुको भवेत् सोऽपि वर्णगन्धरसस्पर्शसंस्थानतश्चापि भाज्यः ॥३०॥

रसओ कसाए जे उ, भइए से वि वण्णओ ।
गंधओ फासओ चेव, भइए संठाणओ वि य ॥३१॥

व्याख्या—यो रसतः कषायो भवेत् सोऽपि वर्णगन्धरसस्पर्शसंस्थानतश्चापि भाज्यः ॥३१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

रसओ अंबिले जे उ, भइए से वि वण्णओ ।
गंधओ फासओ चेव, भइए संठाणओ वि य ॥३२॥

व्याख्या—यो रसत आम्लो भवेत् सोऽपि वर्णगन्धरसस्पर्शसंस्थानतश्चापि भाज्यः ॥३२॥

रसओ महुरे जे उ, भइए से वि वण्णओ ।
गंधओ फासओ चेव, भइए संठाणओ वि य ॥३३॥

व्याख्या—यो रसतो मधुरो भवेत् सोऽपि वर्णगन्धरसस्पर्शसंस्थानतश्चापि भाज्यः ॥३३॥

फासओ कक्खडे जे उ, भइए सेवि वण्णओ ।
गंधओ फासओ चेव, भइए संठाणओ वि य ॥३४॥

व्याख्या—स्पर्शतो यः कर्कशो भवेत् सोऽपि वर्णगन्धरसस्पर्शसंस्थानतश्चापि भाज्यः ॥३४॥

फासओ मउए जे उ, भइए से वि वण्णओ ।
गंधओ रसओ चेव भइए संठाणओ वि य ॥३५॥

व्याख्या—स्पर्शतो यो मृदुर्भवेत् सोऽपि वर्णगन्धरसस्पर्शसंस्थानतश्चापि भाज्यः ॥३५॥

फासओ गरुयए जे उ, भइए से वि वण्णओ ।
गंधओ रसओ चेव, भइए संठाणओ वि य ॥३६॥

व्याख्या—स्पर्शतो यो गुरुकः सोऽपि वर्णगन्धरसस्पर्शसंस्थानतश्चापि भाज्यः ॥३६॥

फासओ लहुए जे उ, भइए से वि वण्णओ ।
गंधओ रसओ चेव, भइए संठाणओ वि य ॥३७॥

व्याख्या—स्पर्शतो यो लघुर्भवेत् सोऽपि वर्णगन्धरसस्पर्शसंस्थानतश्चापि भाज्यः ॥३७॥

फासओ सीयए जे उ, भइए से वि वण्णओ ।
गंधओ रसओ चेव, भइए संठाणओ वि य ॥३८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या–स्पर्शतः शीतो यो भवेत् सोऽपि वर्णगन्धरसस्पर्शसंस्थानतश्चापि भाज्यः ॥३८॥

फासओ उण्हए जे उ, भइए से वि वण्णओ ।
गंधओ रसओ चेव भइए संठाणओ वि य ॥३९॥

व्याख्या–स्पर्शत उष्णा यो भवेत् सोऽपि वर्णगन्धरसस्पर्शसंस्थानतश्चापि भाज्यः ॥३९॥

फासओ जे भवे निद्धे, भइए से वि वण्णओ ।
गंधओ रसओ चेव, भइए संठाणओ वि य ॥४०॥

व्याख्या–स्पर्शतो यः स्निग्धो भवेत् सोऽपि वर्णगन्धरसस्पर्शसंस्थानतश्चापि भाज्यः ॥४०॥

फासओ जे भवे लुक्खे, भइए से वि वण्णओ ।
गंधओ रसओ चेव, भइए संठाणओ वि य ॥४१॥

व्याख्या–स्पर्शतो यः भवेदुक्षः सोऽपि वर्णगन्धरसस्पर्शसंस्थानतश्चापि भाज्यः ॥४१॥

परिमंडलसंठाणे, भइए से वि वण्णओ ।
गंधओ रसओ चेव, भइए फासओ वि य ॥४२॥

व्याख्या–यः परिमण्डलसंस्थानः स्कन्धः, अणूनां संस्थानाऽभावात्, सोऽपि वर्णगन्धरसस्पर्शसंस्थानतश्चापि भाज्यः ॥४२॥

वट्टे संठाणओ जे उ, भइए से वि वण्णओ ।
गंधओ रसओ चेव, भइए फासओ वि य ॥४३॥

व्याख्या–यः स्कन्धः संस्थानतो वृत्तः सोऽपि वर्णगन्धरसस्पर्शसंस्थानतश्चापि भाज्यः, नानाभेदैर्वर्णगन्धरसाश्चास्य स्युरित्यर्थः ॥४३॥

संठाणओ भवे तंसे, भइए से वि वण्णओ ।
गंधओ रसओ चेव, भइए फासओ वि य ॥४४॥

व्याख्या–संस्थानतो यस्तिस्रो भवेत् सोऽपि वर्णगन्धरसस्पर्शसंस्थानतश्चापि भाज्यः ॥४४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

संठाणओ य चउरंसे, भइए से वि वण्णओ ।
गंधओ रसओ चेव, भइए फासओ वि य ॥४५॥

व्याख्या—संस्थानतो यश्चतुरस्रो भवेत् सोऽपि वर्णगन्धरसस्पर्शसंस्थानतश्चापि भाज्यः ॥४५॥

जे आययसंठाणे, भइए से वि वण्णओ ।
गंधओ रसओ चेव, भइए फासओ वि य ॥४६॥

व्याख्या—य आयतसंस्थानः प्रलम्बो **भवेत् सोऽपि वर्णगन्धरसस्पर्शसंस्थानतश्चापि भाज्यः** ॥

अत्र गन्धौ द्वौ, रसाः पञ्च, स्पर्शाः अष्ट, संस्थानानि पञ्च, एते च मिलिता विंशतिः, इत्येकेन कृष्णेन लब्धाः, एवं २० भङ्गान् प्रत्येकं पञ्चापि वर्णा लभन्ते, एवं पञ्चभिर्वर्णैर्लब्धं शतं १००, तथा गन्धौ द्वौ, तौ विनाऽष्टादश पञ्चभिर्मिलितैस्त्रयोविंशतिः २३, ततश्च गन्धद्वयेन लब्धाः ४६, एवं रसपञ्चकस्य प्रत्येकं पञ्चके गन्धद्वय-स्पर्शाष्टकसंस्थानपञ्चकैः २० भेदाः, एवं १०० भेदाः, स्पर्शाष्टके प्रत्येकवर्णसंस्थान-रसपञ्चकैर्गन्धद्वयेन च गुणने १७ भेदाः, सर्वे १३६, अत्र संस्थानपञ्चके वर्णगन्धरसस्पर्शानां विंशतिः, संयोगे शतं १००, एवं वर्णादीनां सर्वभङ्गसङ्कलना चत्वारि शतानि द्वयशीत्यधिकानि ४८२ ॥४६॥

उपसंहरन्नुत्तरसम्बन्धमाह—

एसा अजीवपविभत्ती, समासेण वियाहिया ।
एत्तो जीवविभत्तिं, वोच्छामि अणुपुव्वसो ॥४७॥

व्याख्या—एषाऽजीवविभक्तिः समासेन व्याख्याता, इत इत्यजीवविभक्ति-व्याख्यानादनु **जीवविभक्तिं वक्ष्याम्यानुपूर्व्या** ॥४७॥

संसारत्था य सिद्धा य, जीवा दुविहा वियाहिया ।
सिद्धा णेगविहा वुत्ता, तं मे कित्तयओ सुण ॥४८॥

व्याख्या—संसारस्थाश्च सिद्धाश्च द्विविधा जीवा व्याख्याताः, तत्राऽनेकविधाः **सिद्धाः,** अनेकविधत्वं सिद्धानामुपाधिभेदतः, तमिति सूत्रत्वात्तान् **मे कीर्त्तयतः** शृणुत ! ॥४८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अनेकविधत्वमेवैषामुपाधिभेदत आह–

इत्थी पुरिस सिद्धा य, तहेव य णपुंसगा ।
सलिंगे अन्नलिंगे य, गिहिलिंगे तहेव य ॥४९॥

व्याख्या–सिद्धशब्दः प्रत्येकं योज्यः, ततः **स्त्रीसिद्धाः** १ **पुरुषसिद्धाः** तथैव च **नपुंसकसिद्धाः** ३ **स्वलिङ्गे सिद्धाः** यतिलिङ्गसिद्धाः ४ **अन्यलिङ्गसिद्धाः**, बौद्धादिविषयसिद्धाः ५ **गृहिलिङ्गे** गृहस्थवेषे सिद्धाः ६ **तथैव च**, चस्तु तीर्थभेदाद्यनुक्तभेदसूचकः, अन्यलिङ्गादावपि भावतोऽर्हन्मताश्रयात् सिद्धिर्ज्ञेया । अत्र यः कोऽपि वेत्ति स्त्रियो न सिद्धिप्राप्तिर्मनोबलहीनत्वात् सप्तमभूव्यगतिवत्, तदसत्यं, विचित्रत्वाज्जन्मस्वभावस्य, मत्स्याः सप्तमभुवं यान्ति, ऊर्द्ध्वं सहस्रारात् परतो न यान्ति, गृही अच्युतात् पुरतो न याति, केवलं तु लभते, ततः स्त्रियोऽपि केवलित्वे भावतः, पुरुषत्वे द्रव्यतः, अवयवैः स्त्रीत्वेऽपि सिद्धिरस्ति । योऽभ्यन्तरस्त्रीत्वः स न सिद्धयति, नरादेरपि सत्त्वहीनस्यैवान्तरस्त्रीत्वात्, अतोऽस्ति स्त्रीणां मुक्तिः, महाव्रतित्वान्नृवत् । तथा ये स्त्रीषु दोषा उक्ता यथा–वादलब्ध्यज्ञत्वात् नराऽवन्द्यत्वात् पूर्वाद्ययोग्यत्वात् चञ्चलत्वात् मायावत्त्वात् इत्याद्या ये हेतवस्ते सिद्धयभावे न प्रमाणं । यतश्चतुर्दशपूर्व्यादीनामपि न सिद्धैर्नैयत्यात् अनन्तभवभ्रमाच्च, ततो व्यवहारः श्राद्धसाधुसाध्वीनां सिद्धान्तोक्तो नत्यादिर्यथा प्रमाणं, तथा स्त्रीणां मुक्तिरपि महाशीलत्वात्, सवस्त्रत्वे साधूनां साध्वीनां च नाऽपरिग्रहव्रतक्षतिर्धर्मोपकारित्वात् वस्त्राणां देहादिवत्, तेन परिग्रहत्वात् स्त्रीणाममुक्तिरिति न वाच्यम् ॥४९॥

सिद्धानेवावगाहनातः क्षेत्रतश्चाह–

उक्कोसोगाहणाए य, जहन्नमज्झिमाइ य ।
उड्ढं अहेयं य तिरियं च, समुद्दंमि जलंमि य ॥५०॥

व्याख्या–अवगाहन्तेऽस्यां जीवा इत्यवगाहना देहः, **उत्कृष्टावगाहनायां** पञ्चधनुःशतमानायां, च **जघन्यावगाहनायां** द्विहस्तमानायां, **मध्यमायामुत्कृष्टजघन्यावगाहनान्तराल**वर्त्तिन्यां सिद्धाः, **ऊर्द्ध्वमूर्द्ध्वलोके** मेरुचूलादौ, **अधश्चाधोलौकिकग्रामरूपे**, **तिर्यग्लोके** चार्द्धतृतीयद्वीपे, तथा द्वयोः **समुद्रयोः**, **जले** नद्यादीनां, गिर्यादिषु च स्युः ॥५०॥

स्त्र्यादिषु क्व कियन्तः सिद्ध्यन्तीत्याह–

दस य नपुंसएसु, वीसइ इत्थियासु य ।
पुरिसेसु य अट्ठसयं, समएणेगेण सिज्झइ ॥५१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—दश च नपुंसकेषु, विंशतिः स्त्रीषु, पुरुषेषु चाष्टभिरधिकं शतं, समयेनैकेन सिद्ध्यन्ति ॥५१॥

चत्तारि य गिहिलिंगे, अन्नलिंगे दसेव य ।
सलिंगेण य अट्ठसयं समएणेगेण सिज्झई ॥५२॥

व्याख्या—चत्वारो गृहिलिङ्गे, अन्यलिङ्गे दशैव च, स्वलिङ्गे चाष्टशतं समयेनैकेन सिद्ध्यन्ति ॥५२॥

उक्कोसोगाहणाए उ, सिज्झंते जुगवं दुए ।
चत्तारि य जहन्नाए, जवमज्झट्ठुत्तरं सयं ॥५३॥

व्याख्या—उत्कृष्टावगाहनायां सिद्ध्यतो युगपद् द्वौ, चत्वारश्च जघन्यायां, यवमध्यमिव **यवमध्यं** मध्यमावगाहना, तस्यामष्टोत्तरं शतं, यवमध्यत्वं चोत्कृष्टजघन्यावगानहनाऽपेक्षया बहुतरसङ्ख्यात्वेनास्याः पृथुलतयैव भासित्वात् ॥५३॥

चउरुड्ढलोए य दुवे समुद्दे, तओ जले वीसमहे तहेव य ।
सयं च अट्ठुत्तरं तिरियलोए, समएण एगेण उ सिज्झई धुवं ॥५४॥

व्याख्या—चत्वार ऊर्द्ध्वलोके, द्वौ समुद्रे, त्रयो जले, विंशतिरधः, तथैव अष्टोत्तरं शतं तिर्यग्लोके समयेनैकेन सिद्ध्यन्ति, उत्कृष्टतः सम्भवे सति ॥५४॥

कहिं पडिहया सिद्धा, कहिं सिद्धा पइट्ठिया ।
कहिं बोंदिं चइत्ताणं, कत्थ गंतूण सिज्झइ ॥५५॥

व्याख्या—कस्मिन् प्रतिहताः स्खलिताः सिद्धाः, क्व कस्मिन् प्रतिष्ठिताः सिद्धाः, साद्यपर्यवसितं कालं स्थिताः क्व बोन्दिं तनुं त्यक्त्वा कुत्र गत्वा सिद्ध्यन्ति ? ॥५५॥

अलोए पडिहया सिद्धा, लोयग्गे य पइट्ठिया ।
इहं बोंदिं चइत्ताणं, तत्थ गंतूण सिज्झइ ॥५६॥

व्याख्या—अलोके केवलाकाशलक्षणे प्रतिहताः, तत्र धर्मास्तिकायस्याऽभावेन तेषां गतेरभावात्, लोकाग्रे च प्रतिष्ठिताः सदा स्थिताः—

अधस्तिर्यगथोद्ध्वं च, जीवानां कर्मजा गतिः ।
ऊर्द्ध्वमेव तु ताद्धर्म्या-द्भवति क्षीणकर्मणां ॥१॥ [ ]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इह तिर्यग्लोकादौ **बोन्दिं त्यक्त्वा, तत्रेति** लोकाग्रे **गत्वा सिद्धयन्ति**, निष्ठितार्थाः शाश्वत-सुखिनस्तिष्ठन्ति । यस्मिन्नेव समये भवक्षयस्तस्मिन्नैव समये मोक्षस्तस्मिन्नेव तत्र गतिः सिद्धत्वं च ॥५६॥

बारसहिं जोयणेहिं, सव्वट्ठस्सुवरिं भवे ।
इसिपब्भारनामाउ, पुढवी छत्तसंठिया ॥५७॥

व्याख्या—**द्वादशभिर्योजनैः सर्वार्थस्य** विमानस्योपरि **भवेत्, ईषत्प्राग्भारनाम्नी पृथ्वी, छत्रसंस्थिता** उतानछत्राकारा ॥५७॥

पणयालसयसहस्सा, जोयणाणं तु आयया ।
तावइयं चेव वित्थिन्ना, तिउणा साहिय परिरओ ॥५८॥

व्याख्या—**पञ्चचत्वारिंशत् शतसहस्राणि योजनानां तु आयता दीर्घा, तावच्चैव विस्तीर्णा**, विस्तरेऽपि पञ्चचत्वारिंशच्छतसहस्रप्रमाणेत्यर्थः, **परिरयः** परिधिः **साधिक-त्रिगुणा** ॥५८॥

अट्ठजोयणबाहल्ला, सा मज्झंमि वियाहिया ।
परिहायंती चरिमंते, मच्छियपत्ताओ तणुयरी ॥५९॥

व्याख्या—**अष्टौ योजनानि** उत्सेधाङ्गुलनिष्पन्नानि **बाहल्यं** स्थौल्यं, **सा मध्ये** मध्यप्रदेशे **व्याख्याता, परि** समन्ताद्धीयमाना **चरिमान्तेषु** सकलदिग्भागवर्त्तिषु पर्यन्त-प्रदेशेषु **मक्षिकापत्रादपि तनुतरी**, हानिश्चात्र प्रतियोजनमङ्गुलपृथक्त्वं ज्ञेया ॥५९॥

अज्जुणसुवण्णगमई, सा पुढवी निम्मला सहावेण ।
उत्ताणयछत्तयसंठिया, भणिया जिणवरेहिं ॥६०॥

व्याख्या—पुनः **सार्जुनसुवर्णमयी** श्वेतकाञ्चनस्वरूपा ['सा' इति] **ईषत्प्राग्भारा निर्मला** स्वच्छा स्वभावेन नोपाधितः, पूर्वगाथायां सामान्येन छत्रसंस्थितेत्युक्तं, इहतूत्तानत्वं तद्विशेष इति न पौनरुक्त्यं, इत्युत्तानछत्रसंस्थिता च **भणिता जिनेश्वरैः** ॥६०॥

संखंककुंदसंकासा, पंडुरा निम्मला सुभा ।
सीयाए जोयणे तत्तो, लोगंतो उ वियाहिओ ॥६१॥

व्याख्या—**शङ्खककुन्दसंकाशा, पाण्डुरा निर्मला शुभा, सीतायाः** सीताभि-धानायाः पृथ्व्या ऊर्द्ध्वं **योजने ततो लोकान्तो** लोकपर्यन्तस्तु **व्याख्यातः** ॥६२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जोयणस्स उ जो तत्थ, कोसो उवरिमो भवे ।
तस्स कोसस्स छब्भाए, सिद्धाणोगाहणा भवे ॥६२॥

व्याख्या—**योजनस्य तु उपरिवर्त्ती यः क्रोशो भवेत्, तस्य क्रोशस्य षड्भागे,** इत्यनेन सत्रिभागत्रयस्त्रिंशदधिकधनुःशतत्रितयरूपे **सिद्धानां** तत्राऽवगाहनाऽवस्थिति**र्भवेत्** ॥६२॥

तत्थ सिद्धा महाभागा, लोयग्गंमि पइट्ठिया ।
भवप्पवंचउम्मुक्का, सिद्धिं वरगइं गया ॥६३॥

व्याख्या—**तत्र सिद्धा महाभागा** अतिशयाऽचिन्तशक्तयो **लोकाग्रे** प्रतिष्ठिताः, **भवा** नारकाद्यास्तेषां **प्रपञ्चो** विस्तारस्तेनोन्मुक्ताः **सिद्धिं वरगतिं गताः** प्राप्ताः, भवप्रपञ्च एव चलने हेतुः, स च सिद्धानां नास्त्यतस्ते महासौख्याः ॥६३॥

तत्र कस्य कियत्यवगाहनेत्याह—

उस्सेहो जस्स जो होइ, भवंमि चरिमंमि उ ।
तिभागहीणा तत्तो य, सिद्धाणोगाहणा भवे ॥६४॥

व्याख्या—**उत्सेधः** शरीरस्य **येषां** सिद्धानां **यो** यत्परिमाणो **भवति भवे चरमे** पर्यन्तवर्त्तिनि, तुर्विशेषणे, **ततः** पुनश्चरमभवोत्सेधात् **त्रिभागहीना सिद्धानामवगाहना भवेत्** ॥६४॥

एतानेव कालतः प्ररूपयति—

एगत्तेण या साइया, अपज्जवसिया वि य ।
पुहुत्तेण अणाइया, अपज्जवसिया वि य ॥६५॥

व्याख्या—**एकत्वेना**ऽसहायत्वेन विवक्षिताः, **सादिका अपर्यवसिताः**, अपि च यत्र हि काले ते सिद्ध्यन्ति स तेषामादिरस्ति, न तु कदाचिन्मुक्तेर्भ्रस्यन्तीति न पर्यवसानं, **पृथक्त्वेन** बहुत्वेन सामस्त्यापेक्षयेति यावत्, किमित्याह—**अनादिका अपर्यवसिता अपि,** न हि कदाचित्तेनाऽभूवन् भविष्यन्ति चेत्यर्थः ॥६५॥

एषामुपाधिनिरपेक्षं स्वरूपमाह—

अरूविणो जीवघणा, नाणदंसणसण्णिया ।
अतुलं सुहं संपत्ता, उवमा जस्स नत्थि उ ॥६६॥

व्याख्या—रूपिणो रूपरसगन्धस्पर्शवन्तस्तद्विपरीता **अरूपिणस्तेषां** रूपाद्यभावात्, जीवाश्च सततोपयुक्ततया घनाश्च सुषिरपूरणतो निरन्तरनिचितप्रदेशतया **जीवघनाः**,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ज्ञानदर्शनसङ्ज्ञिता ज्ञानदर्शनोपयोगवन्तः, **अतुलम**परिमितत्वात् **सुखं** सम्प्राप्ताः, **यस्य** सुखस्योपमा **नास्ति** ॥६६॥

उक्तग्रन्थेन ज्ञातमपि विप्रतिपत्तिनिरासार्थं पुनः क्षेत्रं स्वरूपं च तेषामाह–

लोएगदेसे ते सव्वे, नाणदंसणसन्निया ।
संसारपारनित्थिन्ना, सिद्धिं वरगइं गया ॥६७॥

व्याख्या–लोकैकदेशे ते सिद्धाः **सर्वे** तिष्ठन्ति, अनेन मुक्ताः सर्वत्र तिष्ठन्तीति मतमपास्तं, ज्ञानदर्शनसङ्ज्ञिताः, इत्यनेन मा भूत् केषाञ्चिद् ज्ञानसङ्ज्ञा, अपरेषां च दर्शनसङ्ज्ञैव केवला, किम्भूते अपि, सर्वेषां ज्ञानोच्छेदे मुक्तिरिति मतं चाऽपास्तं । **संसारपारं निस्तीर्णाः** पुनरागमनाऽभवालक्षणेनाधिक्येन संसारमतिक्रान्ताः, अनेन–

ज्ञानिनो धर्मतीर्थस्य, कर्त्तारः परमं पदं ।
गत्वाऽागच्छन्ति भूयोऽपि, भवं तीर्थनिकारतः ॥१॥ [ ]

इति मतमपास्तं । **सिद्धिं वरगतिं गताः**, इत्यनेन क्षीणकर्मणोऽपि लोकाग्रगमन-स्वभावेनोत्पत्तिसमये सत्क्रियत्वमप्यस्तीति ख्याप्यते, उक्ताः सिद्धाः ॥६७॥

अथ संसारिण आह–

संसारत्था उ जे जीवा, दुविहा ते वियाहिया ।
तसा य थावरा चेव, थावरा तिविहा तहिं ॥६८॥

व्याख्या–संसारस्थास्तु ये जीवास्ते द्विविधा व्याख्याताः, त्रसाश्च स्थावराश्चैव, तस्मिन् द्वैविध्ये सत्यपि, **स्थावरास्त्रिविधाः** सन्ति ॥६८॥

त्रैविध्यमाह–

पुढवी आउ य बोधव्वा, तहेव य वणस्सइ ।
इच्चेए थावरा तिविहा, तेसिं भेए सुणेह मे ॥६९॥

व्याख्या–पृथिवी आपो बोधव्याः, तथैव च वनस्पतयः, इत्येते स्थावरा-स्त्रिविधास्तेषां भेदान् शृणुत ! 'मे' वदतः तेजोवाय्वोर्गतेस्त्रसत्वेन स्थावरमध्येऽनुक्तिः ॥६९॥

पृथ्वीभेदानाह–

दुविहा पुहवीजीवा उ, सुहुमा बायरा तहा ।
पज्जत्तमपज्जत्ता, एवमेए दुहा पुणो ॥७०॥

व्याख्या–द्विविधाः पृथ्वीजीवास्तु सूक्ष्माश्च बादराः, तथा पर्याप्ताः, आहार-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

शरीरेन्द्रियोच्छ्वासनिःश्वासरूपाभिः पर्याप्तिभिः **पर्याप्ताः**, तद्विपरीताश्चाऽ**पर्याप्ताः**, **एवं** पर्याप्ताऽपर्याप्तभेदेनैते सूक्ष्मा बादराश्च **द्विधाः पुनः**, (पाठान्तरे-'एगमेग'त्ति, **एकैके द्विविधाः**) ॥७०॥

एषामुत्तरभेदानाह–

बायरा जे उ पज्जत्ता, दुविहा ते वियाहिया ।
सण्हा खरा य बोधव्वा, सण्हा सत्तविहा तहिं ॥७१॥

व्याख्या–बादरा ये पुनः पर्याप्ता द्विविधास्ते व्याख्याताः, श्लक्ष्णा इह चूर्णितलोष्टकल्पा मृदुः पृथ्वी, तदात्मका जीवा अप्युपचारतः श्लक्ष्णाः, एवमुत्तरत्रापि **खराश्च** कठिना **बोधव्याः, श्लक्ष्णाः सप्तविधास्तस्मिन्** भेदद्वये ॥७१॥

सप्तभेदानाह–

किण्हा नीला य रुहिरा, हालिद्दा सुक्किला तहा ।
पंडु पणगमट्टिया, खरा छत्तीसईविहा ॥७२॥

व्याख्या–कृष्णा नीलाश्च रुधिरा रक्तवर्णाः, **हरिद्राः** पीताः **शुक्लाः, तथा** 'पंडु'त्ति **पाण्डवः** पाण्डुरा ईषच्छौकल्यभाज इत्यर्थः, इत्थं च वर्णभेदेन षड्विधत्वं, इह च पाण्डुरग्रहणं कृष्णादिवर्णानामपि स्वस्थानभेदान्तरज्ञप्त्यै, पनकोऽत्यन्तसूक्ष्मरजोरूपः, स एव **मृत्तिकापनको** व्योम्नि वर्त्तमानो लोके पृथ्वीत्वेन रूढत्वात् तद्भेदत्वेनोक्तः, अन्ये त्वाहुः **पनको** मृत्तिका, मरुषु पर्पटिकेति रूढा, यस्याश्चरणाद्यभिघाते झगित्युज्जृम्भणं, **खराश्च** खरपृथ्वीजीवाः **षट्त्रिंशद्विधाः** षट्त्रिंशद्भेदाः ॥७२॥

तानाह–

पुढवी य सक्करा वालुगा य, उवले सिला य लोणूसे ।
अयतउयतंबसीसग-रुप्पसुवण्णे य वइरे य ॥७३॥

व्याख्या–पृथ्वी च शुद्धपृथ्वी, **शर्करा** लघुशकलरूपा, **वालुका च, उपलो** गण्डशैलादिः, **शिला च** दृषत्, **लवणं** समुद्रलवणादि, **उषः** क्षारमृत्तिका, **अयो** लोहं, **त्रपुकं** कस्तीरं, **ताम्रं, सीसकं, रूप्यं, सुवर्णं च**, एषां सम्बन्धिनो धातव एव, तेषु ह्यमूनि प्रागपि सन्त्येव केवलं मलविगमादाविर्भवन्ति, **वज्रश्च** हीरकः ॥७३॥

हरियाले हिंगुलए, मणोसिला सासगंजणपवाले ।
अब्भपडलब्भवालु य, बायरकाए मणिविहाणा ॥७४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या–हरितालो हिङ्गुलको मनःशिला, सासकश्च धातुविशेषः, अञ्जनं समीरकं, प्रवालं विद्रुमं, अभ्रपटलं अभ्रवालुका अभ्रपटमिश्रा वालुका, बादरकाय इति बादरपृथ्वीकायेऽमी भेदाः, मणिविधानानि च मणिभेदाः ॥७४॥

मणिभेदानाह–

गोमिज्जए य रुयए, अंके फलिहे य लोहियक्खे य ।
मरगयमसारगल्ले, भुयमोयग इंदनीले य ॥७५॥

व्याख्या–गोमेदकश्च रुचकः अङ्कः स्फटिकश्च लोहिताक्षश्च मरकतो मसारगल्लो भुजमोचक इन्द्रनीलश्च ॥७५॥

चंदणगेयरुयहंसगब्भ, पुलए सोगंधिए य बोधव्वे ।
चंदप्पभवेरुलिए, जलकंते सूरकंते य ॥७६॥

व्याख्या–चन्दनो गैरुको हंसगर्भः पुलकः सौगन्धिकश्च बोधव्यः, चन्द्रप्रभो वैडूर्यो जलकान्तः सूरकान्तश्च ॥

इह पृथ्व्याद्याः १४, हरितालाद्याः ८, गोमेदकाद्याश्च १४, क्वचित् कस्यचित् कथञ्चिदन्तर्भावान्मीलिताः षट्त्रिंशत् ३६ भवन्तीति ॥७६॥

एए खरपुढवीए, भेया छत्तीसमाहिया ।
एगविहमणाणत्ता, सुहुमा तत्थ वियाहिया ॥७७॥

व्याख्या–एते खरपृथिव्यास्तत्स्थजीवानां भेदाः षट्त्रिंशदाख्याताः, तथा एकविधा अनानात्वा अभेदाः सूक्ष्मास्तत्र पृथ्वीजीवेषु व्याख्याताः ॥७७॥

सूक्ष्मान् क्षेत्रत् आह–

सुहुमा य सव्वलोगंमि, लोगदेसे य बादरा ।
एत्तो कालविभागं तु, वोच्छं तेसिं चउव्विहं ॥७८॥

व्याख्या–सूक्ष्माः सर्वलोके चतुर्दशरज्ज्वात्मके तत्र सर्वत्र सर्वदा तेषां भावात्, लोकस्य देशो विभागो लोकदेशस्तस्मिंश्च पुनरर्थे बादराः सन्ति । इतस्तेषां सूक्ष्मबादरपृथ्वीनां यथाक्रमं कालविभागं वक्ष्ये चतुर्विधं सादिं, पर्यवसितं, अनादिं अपर्यवसितं च ॥७८॥

संतइं पप्प तेऽणाई, अपज्जवसिया वि य ।
ठिइं पडुच्च साईया, सपज्जवसिया वि य ॥७९॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—सन्ततिं प्रवाहं **प्राप्य ते अनादिका अपर्यवसिता अपि च,** पृथ्वीकायानां प्रवाहतः कदाचिदसम्भवात्, **स्थितिं** भवस्थितिकायस्थितिरूपां **प्रतीत्याश्रित्य सादिकाः सपर्यवसिताः, अपि च** द्विविधाया अपि तस्यानियतकालत्वात् ॥७९॥

बावीस सहस्साइं, वासाणुक्कोसिया भवे ।
आउठिई पुढवीणं, अंतमुहुत्तं जहन्निया ॥८०॥

व्याख्या—द्वाविंशतिसहस्राणां वर्षाणामुत्कृष्टा भवेदायुःस्थितिः पृथ्वीबादरकायानां, जघन्या चान्तर्मुहूर्तम् ॥८०॥

असंखकालमुक्कोसं, अंतोमुहुत्तं जहन्निया ।
कायठिई पुढवीणं, तं कायं च अमुंचओ ॥८१॥

व्याख्या—असङ्ख्यकालमुत्कृष्टा, जघन्यिका चान्तर्मुहूर्त्तं काये पृथ्वीकायस्थितिः, ततोऽनुद्धर्त्तनेन स्थानं **कायस्थितिः, पृथ्वीभेदजीवानां तमिति पृथ्वीकाययमुञ्चतां** मृत्वा मृत्वा पृथ्वीकाय एवोत्पद्यमानानां, असङ्ख्यकालशब्देनात्रोत्कृष्टाऽसङ्ख्यभेदेन व्यवहारो ज्ञेयः ॥८१॥

कालान्तर्गतमेवान्तरमाह—

अणंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नियं ।
विजढंमि सए काए, पुढवीजीवाण अंतरं ॥८२॥

व्याख्या—अनन्तकालमुत्कृष्टं, जघन्यं चान्तर्मुहूर्त्तं, 'विजढंमि' इति त्यक्ते सति **स्वकीये काये पृथ्वीजीवानां** तु **अन्तरं,** कोऽर्थः ? जघन्यत उत्कृष्टत इयता कालेन पृथ्वीकायजीवोऽन्यकायान् भ्रान्त्वा पुनः पृथ्वीकाये उत्पद्यते । अनन्तकालशब्देन च मध्यमानन्तानन्तेन व्यवहारो ज्ञेयः ॥८२॥

पृथ्वीजीवान् भावत आह—

एएसिं वण्णओ चेव, गंधओ रसफासओ ।
संठाणादेसओ यावि विहाणाइं सहस्ससो ॥८३॥

व्याख्या—एतेषां बादरपृथ्वीकायानां वर्णगन्धरसस्पर्शसंस्थानभेदैश्चैवं विधानानि प्रकाराः **सहस्त्रशो**ऽनेककुलकोटीत्वात् वर्णादीनां भवरूपत्वाद्भावानां च सङ्ख्याभेदेन पृथ्वीकायनां भेदसङ्ख्योत्पत्तेः **सहस्त्रश** इत्युक्त्या वर्णादितारतम्यस्य बहुतरभेदत्वेनाऽसङ्ख्यभेदा ज्ञेयाः ॥८३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अप्जीवानाह–

दुविहा आउजीवा उ, सुहुमा बायरा तहा ।
पज्जत्तमपज्जत्ता, एवमेए दुविहाहिया ॥८४॥

व्याख्या–अब्जीवास्तु द्विविधाः, सूक्ष्मास्तथा बादराश्च, तेऽपि **पर्याप्ता अपर्याप्ताश्चैकेके, एवमेते द्विविधा आख्याताः** ॥८४॥

बादरा जे उ पज्जत्ता, पंचहा ते वियाहिया ।
सुद्धोदए य उस्से य, हरितणू महिया हिमे ॥८५॥

व्याख्या–ये बादराः पर्याप्ता अब्जीवा **ते** पुनः **पञ्चधा व्याख्याताः, शुद्धोदकं** मेघाम्बु समुद्राद्यम्बु च, 'उस्से'त्ति **अवश्यायः** शरदादिषु प्राभातिकः सूक्ष्मवर्षः, **हरतनुः** प्रातः स्निग्धपृथ्वीभवस्तृणाग्रजलबिन्दुः, **महिका** गर्भमासेषु सूक्ष्मवर्षः, **हिमं** च ॥८५॥

सूक्ष्मानाह–

एगविहमणाणत्ता, सुहुमा तत्थ वियाहिया ।
सुहुमा य सव्वलोयंमि, लोयदेसे य बायरा ॥८६॥

व्याख्या–एकविधा अनानात्वाः सूक्ष्मा अप्कायजीवास्तत्र **व्याख्याता** जिनैरिति । ते **सूक्ष्माः सर्वलोके** चतुर्दशरज्ज्वात्मके वर्तन्ते, **बादराश्चाप्कायजीवा लोकदेशे** लोकस्यैकदेशेऽब्ध्यादिजलस्थानसमुदये वर्त्तते ॥८६॥

संतइं पप्प तेऽणाइ, अपज्जवसिया वि य ।
ठिइं पडुच्च साईया, सपज्जवसिया वि य ॥८७॥

व्याख्या–सन्ततिं प्रवाहमार्ग**माश्रित्य** अप्कायजीवा **अनादिका अपर्यवसिताश्चापि, स्थितिं** भवस्थितिं कायस्थितिं **चाश्रित्य सादिकास्तथा सपर्यवसिता** अवसानसहिता अपि वर्तन्ते ॥८७॥

सत्तेव सहस्साइं, वासाणुक्कोसिया भवे ।
आउठिई आऊणं, अंतोमुहुत्तं जहन्निया ॥८८॥

व्याख्या–अपां अप्कायजीवानां **सप्तैव सहस्राणि वर्षाणामुत्कृष्टा आयुषः स्थितिर्भवेत्, जघन्यतश्चान्तर्मुहूर्त्तं भवेत्** ॥८८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

असंखकालमुक्कोसं, अंतोमुहुत्तं जहन्निया ।
कायठिइ उ आऊणं, तं कायं तु अमुंचओ ॥८९॥

व्याख्या—अब्जीवानां **तं स्वकायम**र्थादप्कायम**मुञ्चतामुत्कृष्टा कायस्थिति-सङ्ख्यकालं** भवति, **जघन्या** कायस्थितिस्त्वन्तर्मुहूर्त्तं भवति ॥८९॥

अणंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नयं ।
विजढंमि सए काए, आउजीवाण अंतरं ॥९०॥

व्याख्या—अब्जीवानां स्वकीये काये त्यक्ते सति अपरस्मिन् काये उत्पद्य यदि पुनः स्वकीये काये उत्पत्तिः स्यात्तदोत्कृष्ट**मन्तरमनन्तकालं** भवति, **जघन्यमन्तरं चान्तर्मुहूर्त्तं** भवति ॥९०॥

एएसिं वण्णओ चेव, गंधओ रसफासओ ।
संठाणभेयओ यावि, विहाणाइं सहस्ससो ॥९१॥

व्याख्या—एतेषां वर्णतश्चैव गन्धतो रसतः स्पर्शतः संस्थानभेदतश्चाप्यसङ्ख्याता भेदाः सन्ति ॥९१॥

उक्ता आपः, वनस्पतीनाह—

दुविहा वणस्सइ जीवा, सुहुमा बायरा तहा ।
पज्जत्तमपज्जत्ता, एवमेए दुहाहिया ॥९२॥

व्याख्या—वनस्पतिजीवा द्विविधाः, सूक्ष्मास्तथा बादराश्च, ते सूक्ष्मा बादराश्चापि **पर्याप्ता अपर्याप्ताश्च द्विविधा आख्याताः** ॥९२॥

बायरा जे उ पज्जत्ता, दुविहा ते वियाहिया ।
साहारणसरीरा य, पत्तेयगा तहेव य ॥९३॥

व्याख्या—ये बादरा वनस्पतिजीवाः **पर्याप्तास्ते**ऽपि **द्विधा व्याख्याताः, साधारण-शरीराश्च** साधारणमनन्तजीवानामपि समानं शरीरं येषां तेऽमी **साधारणशरीराः**, आहारपान-ग्रहणेऽप्येषां साधारणत्वं, पुनः **प्रत्येकास्तथैव** च वनस्पतिजीवाः ॥९३॥

पत्तेयसरीरा उ, णेगहा ते पकित्तिया ।
रुक्खा गुच्छा गुम्मा य, लया वल्ली तणा तहा ॥९४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—**प्रत्येकशरीराश्च**, एकमेकं प्रति प्रत्येकमेकैकशो विभिन्नं शरीरमेषामिति प्रत्येकशरीराः, **तेऽनेकधाः प्रकीर्त्तिताः**, यथा **वृक्षाः** सहकारादयः **गुच्छा** वृन्ताक-कण्टकारिकाद्याः, **गुल्मा** नवमालतीप्रमुखाः, **लताश्चम्पकाद्याः** ४ **वल्ल्यो** नागवल्ल्याद्याः ५, तथा **तृणानि** जुञ्जुकार्जुनकुशादीनि ६ ॥९४॥

वलया पव्वया कुहणा, जलरुहा ओसही तहा ।
हरियकाया य बोधव्वा, पत्तेया इइ आहिया ॥९५॥

व्याख्या—**वलयानि** नालिकेरीकदल्यादीनि भण्यन्ते, तासां च शाखान्तराऽभावेन लतात्वं, त्वचो वलयाकारत्वेन च वलयता, पर्वाणि सन्धयस्तेभ्यो जाताः **पर्वजाः**, (पाठान्तरे तु-**पर्वगा** वा इक्ष्वाद्याः) **कुहणा** भूमिस्फोटकविशेषाः सर्पछत्रकाद्याः, जले रुहन्तीति **जलरुहाः** पद्माद्याः **औषधयः** फलपाकान्ताः, तद्रूपाणि तृणान्यौषधि तृणानि शाल्यादीनि, हरितानि तण्डुलेयकादीनि, तान्येव कायो येषां ते **हरितकायाः**, **च** एषामेवा-ऽनेकभेदवाची, बोधव्याः, **इत्य**मुना प्रकारेण **प्रत्येक**वनस्पतिजीवा **आख्याताः** ॥९५॥

साहारणसरीरा उ, णेगहा ते पकित्तिया ।
आलूए मूलए चेव, सिंगबेरे तहेव य ॥९६॥

व्याख्या—ये तु **साधारणशरीराः** साधारणवनस्पतिजीवा अनन्तकायवनस्पति-जीवास्तेऽपि **अनेकधा** अनेकप्रकाराः **प्रकीर्त्तिताः**, तेषां च मध्ये केषाञ्चित् प्रसिद्धानां नामान्याह—**आलुक** आलूपिण्डालुरक्तालुकन्दः १ तथा **मूलकः** प्रसिद्धः २ **शृङ्गबेर**-कमार्द्रकं ३ **तथैव च** ॥९६॥

हरिली सिरिली सिस्सिरिली, जावईके य कंदली ।
पलंडुलसणकंदे य, कंदली(कंदे) य कुहुव्वए ॥९७॥

व्याख्या—**हरिली**नामा कन्दः ४ **सिरिली**नामा कन्दः ५ **सिस्सिरिली**नामापि कन्दः ६ एते कन्दविशेषाः, **यावतिको**ऽपि कन्दविशेषः ७ **कन्दली**कन्दः ८ **पलाण्डु**कन्दः यो देशविशेषे मांसरूपः कन्दो भवति ९ **लसुनकं** १० **कुहुव्रत**कं नाम **कन्द**विशेषः ११ ॥९७॥

लोहिणी हूयत्थीहूय, तुहगा य तहेव य ।
कण्हे य वज्जकंदे य, कंदे सूरणए तहा ॥९८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—लोहिनीकन्दः १२ **हूताक्षी**कन्दः १३ **हूत**कन्दः १४ **तुहक**कन्दः १५ **कृष्णा**कन्दः १६ **वज्र**कन्दः १७ **सूरण**कन्दः १८ तथा ॥९८॥

असकन्नी य बोधव्वा, सीहकन्नी तहेव य ।
मुसंढी य हलिद्दे य, णेगहा एवमायओ ॥९९॥

व्याख्या—अश्वकर्णीकन्दो १९ **बोधव्यः, तथैव सिंहकर्णी**कन्दः २० **मुसण्ढी**-कन्दः २१ **हरिद्रा**कन्दः २२ **एवमादिका अनेकधाः** कन्दजातयो ज्ञेयाः । अनन्तकायलक्षणं यथा—

चक्काभं भज्जमाणस्स, गंठी चण्णघणो भवे ।
पुढविसरिसेण भेएण, अणंतजीवं वियाणाहि ॥१॥ [ ]
गूढच्छिरागं पत्तं, सच्छीरं चेव होई निच्छीरं ।
जं पि य पणट्ठसन्धिं, अणंतजीवं वियाणाहि ॥२॥ [ ] ॥९९॥

सूक्ष्मवनस्पतीनाह—

एगविहमणाणत्ता, सुहुमा तत्थ वियाहिया ।
सुहुमा सव्वलोयंमि, लोगदेसे य बायरा ॥१००॥

व्याख्या—एकविधा अनानात्वाः **सूक्ष्मा** वनस्पतयो **व्याख्याता** जिनैः, **तत्र सूक्ष्मा निगोदरूपाः सर्वलोके** व्याप्ताः सन्ति, **बादराश्च लोकदेशे** कुत्रचिद्भवन्ति न वेति ॥१००॥

संतइं पप्प णाईया, अपज्जवसियावि य ।
ठिइं पडुच्च साइया, सपज्जवसियावि य ॥१०१॥

व्याख्या—**सन्ततिं प्राप्यैते** वनस्पतिजीवा **अनादयः** पुनरपर्यवसिताश्च सन्ति, **कायस्थितिं** च **प्रतीत्य सादिकाः सपर्यवसिताश्च सन्ति** ॥१०१॥

दस चेव सहस्साइं, वासाणुक्कोसिया भवे ।
वणस्सईण आउं तु, अंतोमुहुत्तं जहन्नयं ॥१०२॥

व्याख्या—**वनस्पतीनां** प्रत्येकवनस्पतिजीवानां **दशसहस्रवर्षाणि उत्कृष्टायुः**-स्थितिर्**भवति, जघन्यिका स्थितिश्चान्तमुहूर्त्तं** भवति, साधरणानां तु जघन्यत उत्कृष्टत-श्चान्तमुहूर्त्तमेव स्थितिरस्ति ॥१०२॥

अणंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नयं ।
कायट्ठिइ पणगाणं, तं कायं तु अमुंचओ ॥१०३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या–**पनकानां** पनकोपलक्षितफूलणिवनस्पतिजीवानां **तं** स्वकीयं **कायममुञ्चतां कायस्थितिरुत्कृष्टाऽनन्तकालं, जघन्यतश्चान्तर्मुहुर्त्तं** ज्ञेया । अत्र सामान्यतो निगोदस्यानन्तकाल उक्तः, यथा **भगवत्यां**–"**निगोयस्स णं भंते ! केवइयं कालं ठिई पण्णत्ता**" [ ] इत्यादि ॥१०३॥

अथ कालस्यान्तरमाह–

असंखकालमुक्कोसं, अंतोमुहुत्तं जहन्नयं ।
विजढंमि सए काए, पणगजीवाण अंतरं ॥१०४॥

व्याख्या–**पनकजीवानां स्वकीये काये** त्यक्ते सति अपरस्मिन् पृथिव्यादिषु कायेषूत्पद्य पुनः पनकत्वेनोत्पद्यमानानां**उत्कृष्टमसङ्ख्यकालमन्तरं** भवति, **जघन्यमन्तरं त्वन्तर्मुहूर्त्तं** भवति ॥१०४॥

अथ प्रकृतमुपसंहरन्नग्रेतनं सम्बन्धं सूचयति–

एएसिं वण्णओ चेव, गंधओ रसफासओ ।
संठाणादेसओ वा वि, विहाणाइं सहस्ससो ॥१०५॥

व्याख्या–**एतेषां** सूक्ष्मबादरवनस्पतिजीवानां **वर्णतो गन्धतो रसतः स्पर्शतः संस्थानादेशतश्चापि सहस्त्रशो विधानानि भवन्ति,** अत्र सहस्त्रशब्देनाऽसङ्ख्या अनन्ताश्च भेदा ज्ञेयाः ॥१०५॥

इच्चेए थावरा तिविहा, समासेण वियाहिया ।
इत्तो उ तसे तिविहे, वुच्छामि अणुपुव्वसो ॥१०६॥

व्याख्या–**इत्येवं** प्रकारा **एते** पृथिव्याद्याः **स्थावरास्त्रिविधाः समासेन व्याख्याताः,** 'इत्तो उ' **स्थावरविभक्तेरनन्तरं** [तुः पुनरर्थः] **त्रसांस्त्रिविधान् वक्ष्याम्यानुपूर्व्या** ॥१०६॥

तेऊ वाऊ य बोधव्वा, ओराला य तसा तहा ।
इच्चेए तसा तिविहा, तेसिं भेए सुणेह मे ॥१०७॥

व्याख्या–**तेजांस्य**त्राग्नयः, तद्वर्त्तिनो जीवा अपि तथोक्ताः, एवं **वायवोऽपि बोधव्याः, उदारा** एकेन्द्रियाऽपेक्षया प्रायः स्थूला द्वीन्द्रियाद्या इत्यर्थः, **चः** समुच्चये, **त्रसास्तथा, इतीत्येते** [**इतीत्यन्तरोक्ता एते**], त्रस्यन्ति चलन्ति देशाद्देशान्तरं सङ्क्रामन्तीति **त्रसास्त्रिविधास्तेजोवायू**, गतित उदाराश्च लब्धितोऽपि **त्रसाः, तेषां** तेजःप्रभृतीनां **भेदान् शृणुत ! 'मे'** ॥१०७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तत्र तेजोजीवानाह—

दुविहा तेउजीवा उ, सुहुमा बायरा तहा ।
पज्जत्तमपज्जत्ता, एवमेए दुहाहिया ॥१०८॥

व्याख्या—द्विविधास्तेजोजीवाः **सूक्ष्मा बादराश्च तथा**, ते **पुनः पर्याप्ता-ऽपर्याप्त**भेदेन द्विविधाः ॥१०८॥

बायरा जे उ पज्जत्ता, णेगहा ते वियाहिया ।
इंगाले मुम्मुरे अगणी, अच्चि जाला तहेव य ॥१०९॥

व्याख्या—**ये बादराः पर्याप्ता** अग्निजीवास्तेऽनेकधा **व्याख्याताः**, **तत्राङ्गारो** भास्वरः, **मुर्मुरो** भस्ममिश्राग्निकणः, **अग्नि**रुक्तभेदाऽतिरिक्तः, **अर्चि**र्मूलप्रतिबद्धा शिखा तेजो वा, **ज्वाला** छिन्नमूला सैव, **तथैव च** ॥१०९॥

उक्का विज्जू य बोधव्वा, णेगहा एवमाइआ ।
एगविहमणाणत्ता, सुहुमा ते वियाहिया ॥११०॥

व्याख्या—**उल्का**ग्निस्तारावदाकाशात् पतन् यो दृश्यते, **विद्युत्त**डिदग्निः, **एवमा-दिका अनेकधा** अग्निजीवा **बोधव्याः**, **ते**ऽग्नयः सूक्ष्मा **एकविधा** एव **अनानात्वा व्याख्याताः** ॥११०॥

सुहुमा सव्वलोगंमि, लोगदेसे य बायरा ।
एत्तो कालविभागं तु, तेसिं वुच्छं चउव्विहं ॥१११॥

व्याख्या—**सूक्ष्मा**ऽग्निजीवाः **सर्वस्मिंश्च**तुर्दशरज्ज्वात्मक**लोके** सन्ति, **बादराग्नि-**कायजीवाश्च **लोकैकदेशे** सार्द्धद्वयद्वीपे सन्ति । इति क्षेत्रविभाग उक्तः **इतो**ऽनन्तरं **तेषाम**ग्निकायजीवानां **चतुर्विधं** कालविभागं **वक्ष्ये** ॥१११॥

संतइं पप्प णाइया, अपज्जवसिया वि य ।
ठिइं पडुच्च साइया, सपज्जवसिया वि य ॥११२॥

व्याख्या—अग्निकायजीवाः **सन्ततिं प्राप्याऽनादिका** आदिरहितास्तथा **अपर्य-वसिताः** सन्ति, **स्थितिं प्रतीत्यायुराश्रित्य सादिकाः सपर्यवसिताश्चापि** वर्तन्ते ॥११२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तिण्णेव अहोरत्ता, उक्कोसेण वियाहिया ।
आउठिइ तेऊणं, अंतोमुहुत्तं जहण्णिया ॥११३॥

व्याख्या–तेजसां तेजोजीवानामुत्कृष्टतस्त्रीणि अहोरात्राणि आयुःस्थिर्व्याख्याता, जघन्यिका चायुःस्थितिरन्तर्मुहूर्त्तं ज्ञेयेत्यर्थः ॥११३॥

अथ कायस्थितिमाह–

असंखकालमुक्कोसं, अंतोमुहुत्तं जहन्नयं ।
कायठिई तेऊणं तं कायं तु अमुंचओ ॥११४॥

व्याख्या–तेजसां तेजस्कायजीवानां स्वकायममुञ्चतां उत्कृष्टमसङ्ख्यकालं स्थिति-र्भवति, तेजस्कायस्थो जीवो मृत्योरनन्तरं यदि तेजस्काये एवोत्पद्यते, तदाऽसङ्ख्यं कालं तेजस्काये तिष्ठतीत्यर्थः, जघन्यं त्वन्तर्मुहूर्त्तं तिष्ठतीति ॥११४॥

कालस्यान्तरमाह–

अणंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नयं ।
विजढम्मि सए काए, तेउजीवाणमंतरं ॥११५॥

व्याख्या–तेजोजीवानां स्वकीये तेजस्काये त्यक्ते सति उत्कृष्टमन्तरमनन्तकालं, तेजस्कायजीवास्तत्कायाच्च्युत्वा अपरस्मिन् काये उत्पद्य पुनस्तेजस्काये उत्कृष्टमनन्त-कालस्यान्तरेणोत्पद्यन्ते, जघन्यं त्वन्तर्मुहूर्त्तेनाप्युत्पद्यन्ते । नवसमयादारभ्य किञ्चिदूनं घटिकाद्वयमन्तर्मुहूर्त्तमुच्यते ॥११५॥

एएसिं वण्णओ चेव, गंधओ रसफासओ ।
संठाणादेसओ वा वि, विहाणाइं सहस्ससो ॥११६॥

व्याख्या–एतेषामग्निकायजीवानां वर्णतो गन्धतो रसतः स्पर्शतः संस्थाना-देशतश्चापि सहस्त्रशो विधानानि भेदा भवन्ति ॥११६॥

दुविहा वाउजीवा, सुहुमा बायरा तहा ।
पज्जत्तमपज्जत्ता एवमेए दुहा पुणो ॥११७॥

व्याख्या–वायुजीवा द्विविधाः सूक्ष्मा बादराश्च, ते पुनः पर्याप्ताऽपर्याप्तभेदेन द्विधाः सन्ति ॥११७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

बादरा जे उ पज्जत्ता, पंचहा ते वियाहिया ।
उक्कलिया मंडलिया, घणगुंजा सुद्धवाया य ॥११८॥

व्याख्या—**ये बादरा** वायुकायजीवाः **पर्याप्तास्ते पञ्चधा** बहुविधा अपि **व्याख्याताः**, **उत्कलिका** वाता ये स्थित्वा स्थित्वा वान्ति, **मण्डलिका** वाता वातालीरूपाः, **घनवाता** घनोदधिविमानानां चाधाराः, हिमपटकल्पा वायवः, **गुञ्जा**, वाता ये गुञ्जन्तो वान्ति, **शुद्धवाता** उत्कलिकाद्युक्तविशेषविकला मन्दाऽनिलाः ॥११८॥

संवट्टगवाया य णेगहा एवमायओ ।
एगविहमणाणत्ता, सुहुमा ते वियाहिया ॥११९॥

व्याख्या—**संवर्त्तकवाता** ये बहिःस्थमपि तृणादि विवक्षितक्षेत्रान्तः क्षिपन्ति, **एवमादयोऽनेकधा** वाताः सन्ति, परं वायुजातिसामान्यत्वेन ते **एकविधा अनानात्वा**-स्तीर्थकरैः सूक्ष्मवायुकायजीवा **व्याख्याताः** ॥११९॥

सुहुमा सव्वलोगंमि, लोगदेसे य बायरा ।
एत्तो कालविभागं तु, तेसिं वुच्छं चउव्विहं ॥१२०॥

व्याख्या—**सूक्ष्मा** वायुकायजीवाः **सर्वस्मिन्** चतुर्दशराज्ज्वात्मके **लोके** स्थिताः सन्ति, **बादरा** वायुकायजीवाश्च **लोकैकदेशे** स्थिताः सन्ति, एवं क्षेत्रविभाग उक्तः, **इतो**ऽनन्तरं **तेषां** वायुकायजीवानां **चतुर्विधं कालविभागं वक्ष्ये** ॥१२०॥

संतइं पप्प णाईया अपज्जवसिया वि य ।
ठिइं पडुच्च साइया, सपज्जवसिया वि य ॥१२१॥

व्याख्या—**सन्ततिं** प्रवाहमाश्रित्य ते **अनादयोऽपर्यवसिताश्च**, **स्थितिं** च **प्रतीत्य** ते **सादिकाः सपर्यवसिताश्च** सन्ति ॥१२१॥

तिन्नेव सहस्साइं, वासाणुक्कोसिया भवे ।
आउठिई वाऊणं, अंतोमुहुत्तं जहन्निया ॥१२२॥

व्याख्या—**वायुकायानां त्रीणि वर्षसहस्राण्युत्कृष्टायुःस्थितिः**, **अन्तर्मुहूर्त्तं** च **जघन्यिका** ॥१२२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

असंखकालमुक्कोसं, अंतोमुहुत्तं जहन्नयं ।
कायठिई वाऊणं, तं कायं तु अमुंचओ ॥१२३॥

व्याख्या–वायुकायनां स्वं कायममुञ्चतामसङ्ख्येयकालमुत्कृष्टा स्थितिः, जघन्यतश्चान्तर्मुहूर्त्तं कायस्थितिर्व्याख्याता ॥१२३॥

अणंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नयं ।
विजढम्मि सए काये, वाउजीवाणमंतरं ॥१२४॥

व्याख्या–वायुजीवानां स्वकीये काये त्यक्ते सति उत्कृष्टमन्तरमनन्तकालं, जघन्यं चान्तर्मुहूर्त्तं भवति ॥१२४॥

एएसिं वण्णओ चेव, गंधओ रसफासओ ।
संठाणादेसओ वा वि, विहाणाइं सहस्ससो ॥१२५॥

व्याख्या–एषां वायुकायजीवानां वर्णतो गन्धतो रसतः स्पर्शतः संस्थानादेशतश्चापि सहस्त्रशो भेदा भवन्ति ॥१२५॥

एवं तेजोवायुत्रसानुक्त्वोदारत्रसानाह–

ओराला तसा जे उ, चउहा ते पकित्तिया ।
बेइंदिय तेइंदिय, चउरो पंचिंदिया तहा ॥१२६॥

व्याख्या–उदारास्त्रसा ये पुनस्ते चतुर्धाः प्रकीर्त्तिताः, द्वीन्द्रियाः, त्रीन्द्रियाः, चतुरिन्द्रियाः पञ्चेन्द्रियाश्च । एतच्च निर्वृत्त्युपकरणाख्यं द्रव्येन्द्रियमभिप्रेत्योक्तं, भावेन्द्रियापेक्षया तु एकेन्द्रियाणामपीन्द्रियपञ्चकसम्भवः ॥१२६॥

द्वीन्द्रियवक्तव्यमाह–

बेइंदिया उ जे जीवा, दुविहा ते वियाहिया ।
पज्जत्तमपज्जत्ता, तेसिं भेये सुणेह मे ॥१२७॥

व्याख्या–ये जीवास्तु द्वीन्द्रियास्ते द्विविधा व्याख्याताः, पर्याप्ता अपर्याप्ताश्च, तेषां भेदान् 'मे' कथयतो यूयं शृणुत ! ॥१२७॥

किमिया सोमंगला चेव, अलसा माइवाहया ।
वासिमुहा य सिप्पीया, संखा संखणगा तहा ॥१२८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—कृमयोऽशुच्यादिजाः, **सोमङ्गलाः**, **अलसाः** मातृवाहकाः, **वास्या-कारमुखाः**, सुक्तयः, **शङ्खाः**, **शङ्खनकास्तथा** ॥१२८॥

पल्लुगाणुल्लगा चेव, तहेव य वराडगा ।
जलूगा जालगा चेव, चंदणा य तहेव य ॥१२९॥

व्याख्या—**पल्लुका च पुनरणुपल्लकास्तथैव वराटकाः** कपर्दकाः, **जलूका** रुधिरपाः, **जालकास्तथैव चन्दना** अक्षाः ॥१२९॥

इइ बेइंदिया एए, णेगहा एवमाइआ ।
लोगस्सेगदेसंमि, एए सव्वे वियाहिया ॥१३०॥

व्याख्या—**इत्येवं** प्रकारेण **द्वीन्द्रिया** जीवा **एतेऽनेकधा एवमादयः सर्वे लोक-स्यैकदेशे** तिर्यग्लोकोऽब्ध्यादिषु स्थिता **व्याख्याताः** सन्ति ॥१३०॥

संतइं पप्पणाइया, अपज्जवसिया वि य ।
ठिइं पडुच्च साइया, सपज्जवसिया वि य ॥१३१॥

व्याख्या—ते द्वीन्द्रियाः **सन्ततिं प्राप्यानादयस्तथाऽपर्यवसिता अपि । स्थितिं च** प्रतीत्य **सादयः सपर्यवसिता अपि** ॥१३१॥

वासाइं बारसे चेव, उक्कोसेण वियाहिया ।
बेइंदियआउठिइ, अंतोमुहुत्तं जहन्निया ॥१३२॥

व्याख्या—द्वीन्द्रियाणामायुःस्थितिरुत्कृष्टा द्वादशवर्षाणि, जघन्यतश्चान्तर्मुहूर्त्त-माख्याता ॥१३२॥

संखेज्जकालमुक्कोसं, अंतोमुहुत्तं जहन्निया ।
बेइंदियकायठिइ, तं कायं तु अमुंचओ ॥१३३॥

व्याख्या—द्वीन्द्रिजीवानां तं स्वकीयं **कायममुञ्चतां कायस्थितिरुत्कृष्टा सङ्ख्येय-कालं, जघन्यतश्चान्तर्मुहूर्त्तम्** ॥१३३॥

अणंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नियं ।
बेइंदियजीवाणं, अंतरं तु वियाहियं ॥१३४॥

व्याख्या—द्वीन्द्रियजीवानामुत्कृष्टमन्तरमनन्तकालं, जघन्यं चान्तर्मुहूर्त्तं व्या-ख्यातम् ॥१३४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एएसिं वण्णओ चेव, गंधओ रसफासओ ।
संठाणादेसओ वा वि, विहाणाइं सहस्ससो ॥१३५॥

व्याख्या—एतेषां द्वीन्द्रियाणां वर्णतो गन्धतो रसतः स्पर्शतः संस्थानादेशतश्च सहस्रशो भेदा भवन्ति ॥१३५॥

अथ त्रीन्द्रियानाह—

तेइंदिया उ जे जीवा, दुविहा ते पकित्तिया ।
पज्जत्तमपज्जत्ता, तेसिं भेए सुणेह मे ॥१३६॥

व्याख्या—ये त्रीन्द्रिया जीवास्ते द्विविधाः प्रकीर्त्तिताः, पर्याप्ता अपर्याप्ताश्च तेषां भेदान् कथयतो 'मे' शृणुत ! ॥१३६॥

कुंथुपिवीलउद्दंसा, उक्कलुद्देहिया तहा ।
तणहारा कट्ठहारा, मालूगा पत्तहारगा ॥१३७॥

व्याख्या—कुन्थवः, पिपीलिकाः, उद्दंशाः, उत्कलिक्काः, उपदेहिकाः, तृणाहाराः, काष्ठाहाराः, मालूकाः पत्रहारकाः ॥१३७॥

कप्पासऽट्ठिमिंजा य, तिंदुगा तउसमिंजगा ।
सदावरी य गुम्मी य, बोधव्वा इंदगायगा ॥१३८॥

व्याख्या—कर्पासाः, अस्थिजाताः, तिन्दुकाः, तन्तुसमिञ्जिकाः सदावरी, गुल्मीति यूका, तथेन्द्रकायका अपि बोधव्याः ॥१३८॥

इंदगोवगमाईया, णेगविहा एवमाईओ ।
लोएगदेसे ते सव्वे, न सव्वत्थ वियाहिया ॥१३९॥

व्याख्या—इन्द्रगोपकादिकाः, एवमादिका अनेकविधास्त्रीन्द्रियाः सन्ति, ते सर्वे लोकैकदेशे व्याप्ताः सन्ति, न सर्वत्र व्याख्याताः ॥१३९॥

संतइं पप्प णाईया, अपज्जवसिया वि य ।
ठिइं पडुच्च साईया, सपज्जवसिया वि य ॥१४०॥

व्याख्या—एते त्रीन्द्रियाः सन्ततिं प्राप्याऽनादयोऽपर्यवसिताः, स्थितिं च प्रतीत्य सादयः सपर्यवसिताश्च ॥१४०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एगूणवन्नहोरत्ता, उक्कोसेण वियाहिया ।
तेइंदियआउठिइ, अंतोमुहुत्तं जहन्निया ॥१४१॥

व्याख्या—त्रीन्द्रियजीवानामुत्कृष्टायुःस्थितिरेकोनपञ्चाशद्दिनानि व्याख्याता, जघन्या चान्तर्मुहूर्तम् ॥१४१॥

संखिज्जकालमुक्कोसं, अंतोमुहुत्तं जहन्नियं ।
तेइंदियकायठिइ, तं कायं तु अमुंचओ ॥१४२॥

व्याख्या—त्रीन्द्रियाणां स्वकायममुञ्चतामुत्कृष्टाऽसङ्ख्येयकालं स्थितिः, जघन्या चान्तर्मुहूर्त्तं स्थितिः ॥१४२॥

अणंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नयं ।
तेइंदियजीवाणं, अंतरं तु वियाहियं ॥१४३॥

व्याख्या—त्रीन्द्रियजीवानामुत्कृष्टमन्तरमनन्तकालं, जघन्यं चान्तर्मुहूर्त्तं व्याख्यातम् ॥१४३॥

एएसिं वण्णओ चेव, गंधओ रसफासओ ।
संठाणदेसओ वा वि, विहाणाइं सहस्ससो ॥१४४॥

व्याख्या—एतेषां त्रीन्द्रियाणां वर्णतो गन्धतो रसतः स्पर्शतः संस्थानादेशतश्चापि सहस्रशो भेदाः सन्ति ॥१४४॥

अथ चतुरिन्द्रियानाह—

चउरिंदिया उ जे जीवा, दुविहा ते पकित्तिया ।
पज्जत्तमपज्जत्ता, तेसिं भेए सुणेह मे ॥१४५॥

व्याख्या—चतुरिन्द्रियाश्च ये जीवाः सन्ति, ते द्विविधाः प्रकीर्त्तिताः पर्याप्ता अपर्याप्ताश्च, तेषां भेदान् 'मे' कथयतः शृणुत ! ॥१४५॥

अंधिया पोत्तिया चेव, मच्छिया मसगा तहा ।
भमरे कीडपयंगे य, ढिंकुणे कुंकणे तहा ॥१४६॥

व्याख्या—अन्धिकाः, पौत्तिकाः, मक्षिकाः, तथा मशकाः भ्रमरास्तथा कीटपतङ्गाः, ढिङ्कुणास्तथा कुङ्कणाः ॥१४६॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कुक्कुडे सिंगिरीडी य, नंदावत्ते य विच्छिए ।
डोले य भिंगरीडी य, चिरली अच्छिवेहए ॥१४७॥

व्याख्या—कर्कुटाः, शृङ्गरीटी, नन्द्यावर्त्ताः, वृश्चिकाः, डोलाः, भृगरीटकाः, चिरल्यः, अक्षिवेधकाः ॥१४७॥

अच्छिले माहए अच्छि, रोडए चित्तपत्तए ।
उहिंजलिया जलकारी य, नीययातंबगाइया ॥१४८॥

व्याख्या—अक्षिलाः, मागधाः, अक्षाः, रोडकाः, चित्रपत्राः, उपधयः जलकाः, जलकार्यः, नीचकाः, ताम्रकाः ॥१४८॥

इइ चउरिंदिया एए, णेगहा एवमाइओ ।
लोगस्स एगदेसंमि, ते सव्वे परिकित्तिया ॥१४९॥

व्याख्या—इत्यमुना प्रकारेण एते चतुरिन्द्रिया एवमादिका अनेकधाः सन्ति, ते सर्वे च लोकस्यैकदेशे प्रकीर्त्तिताः ॥१४९॥

संतइं पप्पणाइया, अपज्जवसिया वि य ।
ठिइं पडुच्च साइया, सपज्जवसिया वि य ॥१५०॥

व्याख्या—सन्ततिं प्राप्य ते जीवा अनादयस्तथा अपर्यवसिताश्च सन्ति, स्थितिं च प्रतीत्य सादयः सपर्यवसिताश्च सन्ति ॥१५०॥

छच्चेव य मासाउ, उक्कोसेण वियाहिया ।
चउरिंदियआउठिई, अंतोमुहुत्तं जहन्निया ॥१५१॥

व्याख्या—चतुरिन्द्रियाणां षण्मासायुःस्थितिरुत्कृष्टा व्याख्याता, जघन्यका चान्तर्मुहूर्तम् ॥१५१॥

संखिज्जकालमुक्कोसं, अंतोमुहुत्तं जहन्निया ।
चउरिंदियकायठिइ, तं कायं तु अमुंचओ ॥१५२॥

व्याख्या—चतुरिन्द्रियजीवानां स्वं कायममुञ्चतां सङ्ख्येयकालमुत्कृष्टा स्थितिः, जघन्यिका चान्तर्मुहूर्तम् ॥१५२॥

अणंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नियं ।
विजढम्मि सए काए, अंतरेयं वियाहियं ॥१५३॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—चतुरिन्द्रियाणां **स्वकीये काये त्यक्ते** सति पुनरन्यस्मिन् काये उत्पद्य पुनर्यदि चतुरिन्द्रियकाये उत्पद्यते **तदोत्कृष्टमन्तरमनन्तकालं, जघन्यं चान्तर्मुहूर्त्तं** ज्ञेयम् ॥१५३॥

एएसिं वण्णओ चेव, गंधओ रसफासओ ।
संठाणादेसओ वा वि, विहाणाइं सहस्ससो ॥१५४॥

व्याख्या—एतेषां चतुरिन्द्रियाणां **वर्णतो गन्धतो रसतः स्पर्शतः संस्थानादेशतश्चापि** सहस्रशो भेदाः सन्ति ॥१५४॥

अथ पञ्चेन्द्रियानाह—

पंचिंदिया य जे जीवा, चउव्विहा ते वियाहिया ।
नेरइय तिरिक्खा य, मणुआ देवा य आहिया ॥१५५॥

व्याख्या—ये च **जीवाः पञ्चेन्द्रियास्ते चतुर्विधा व्याख्याताः, नारकाः, तिर्यञ्चः, मनुष्याः, देवाश्च** ॥१५५॥

नेरइया सत्तविहा, पुढवीसु सत्तसु भवे ।
पज्जत्तमपज्जत्ता, तेसिं भेए सुणेह मे ॥१५६॥

व्याख्या—रत्नप्रभादिषु **सप्तसु नरकपृथ्वीषु सप्तधा नैरयिका भवेयुः**, ते पुनः **पर्याप्ता अपर्याप्ताश्च** सन्ति, **तेषां भेदान् 'मे'** कथयतो यूयं **शृणुत** ! ॥१५६॥

तासां स्वरूपमाह—

रयणाभा सक्कराभा, वालुयाभा य आहिया ।
पंकाभा धूमाभा, तमा तमतमा तहा ॥१५७॥

व्याख्या—रत्नकाण्डस्य भवनपतिभवनस्याभा इव आभा यस्याः सा **रत्नाभा १ शर्करा** लघुपाषाणखण्डानि **तदाभा** २ तथैव **वालुकाभा** च ३ **आख्याता, पङ्कसमपुद्गलाभा** ४, **धूमसमपुद्गलाभा** ७, **तमा** अन्धकारमयी ६, **तमस्तमा** प्रकृष्टान्धकारमयी ७ तथा ॥१५७॥

नामान्याह—

घम्मा वंसगा सेला, तहा अंजणरिट्ठगा ।
मघा माधवई चेव, णारया य पुणो भवे ॥१५८॥

व्याख्या—घर्म्मा १ वंशका २ शैला ३ अञ्जना ४ अरिष्टा ५ मघा ६ माधवती ७ एवंविधनामयुताः सप्त **नारका भवेयुः** ॥१५८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

रयणाइगुत्तओ चेव, तहा घम्माइ णामओ ।
इइ नेरइया एए, सत्तहा परिकित्तिया ॥१५९॥

व्याख्या—रत्नप्रभादयो गोत्रतो ज्ञेयाः, तथा घर्मादयो नामतो ज्ञेयाः, इत्येवमेते नैरयिकाः सप्तधाः परिकीर्त्तिताः ॥१५९॥

अत्र क्षेत्रविभागमाह—

लोगस्स एगदेसंमि, ते सव्वे उ वियाहिया ।
इत्तो कालविभागं तु, तेसिं वुच्छं चउव्विहं ॥१६०॥

व्याख्या—ते सर्वे नारका लोकस्यैकदेशे व्याख्याताः, इतोऽनन्तरं तेषां नारकाणां चतुर्विधं कालविभागं वक्ष्ये ॥१६०॥

संतइं पप्पणाइया, अपज्जवसिया वि य ।
ठिइं पडुच्च साइया, सपज्जवसिया वि य ॥१६१॥

व्याख्या—सन्ततिं प्रवाहमाश्रित्य ते नारका अनादयोऽपर्यवसिताश्च, स्थितिं प्रतीत्य च ते सादयः सपर्यवसिताश्च सन्ति ॥१६१॥

सागरोवममेगं तु, उक्कोसेण वियाहिया ।
पढमाए जहन्नेणं, दसवाससहस्सिया ॥१६२॥

व्याख्या—प्रथमायां पृथिव्यामुत्कृष्टेनैकं सागरोपमायुःस्थितिः, जघन्यतश्च दशवर्षसहस्रिकायुःस्थितिर्व्याख्याता ॥१६२॥

तिन्नेव सागराउ, उक्कोसेण वियाहिया ।
दुच्चाए जहन्नेणं, एगं तु सागरोवमं ॥१६३॥

व्याख्या—द्वितीयायामुत्कृष्टतस्त्रीणि सागरोपमाणि, जघन्यतश्चैकं सागरोपमायुःस्थितिर्व्याख्याता ॥१६३॥

सत्तेव सागराउ, उक्कोसेण वियाहिया ।
तइयाए जहन्नेणं, तिन्नेव सागरोवमा ॥१६४॥

व्याख्या—तृतीयायामुत्कृष्टा सप्तसागरोपमस्थितिः, जघन्या च त्रीणि सागरोपमाणि स्थितिर्ज्ञेया ॥१६४॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दस सागरोवमाओ, उक्कोसेण वियाहिया ।
चउत्थीए जहन्नेणं, सत्तेव सागरोवमा ॥१६५॥

व्याख्या—चतुर्थ्यामुत्कृष्टायुःस्थितिर्दशसागरोपमाणि, जघन्येन च सप्तैव सागरोपमाणि व्याख्याता ॥१६५॥

सतरससागराओ, उक्कोसेण वियाहिया ।
पंचमाए जहन्नेणं, दस उ सागरोवमा ॥१६६॥

व्याख्या—पञ्चम्यामुत्कृष्टायुःस्थितिः सप्तदशसागरोपमाणि व्याख्याता, जघन्येन च दश सागरोपमाणीति ॥१६६॥

बावीससागराओ, उक्कोसेण वियाहिया ।
छट्ठीए जहन्नेणं, सतरससागरोवमा ॥१६७॥

व्याख्या—षष्ठ्यां द्वाविंशतिसागरोपमाण्युत्कृष्टायुःस्थितिः, जघन्येन च सप्तदशसागरोपमाणि ॥१६७॥

तित्तीससागराओ उक्कोसेण वियाहिया ।
सत्तमाए जहन्नेणं, बावीसं सागरोवमा ॥१६८॥

व्याख्या—सप्तम्यामुत्कृष्टायुःस्थितिस्त्रयस्त्रिंशत्सागरोपमाणि, जघन्येन च द्वाविंशतिसागरोपमाणि ॥१६८॥

जा चेव आउठिइ, नेरइयाणं वियाहिया ।
सा तेसिं कायठिइ, जहन्नुक्कोसिया भवे ॥१६९॥

व्याख्या—नारकाणां या जघन्योत्कृष्टत आयुःस्थितिर्व्याख्याता, सैव तेषां नारकाणां कायस्थितिर्जघन्योत्कृष्टतश्च व्याख्याता, यतो हि नारको जीवो मृत्वा पुनर्नरकभूमौ नोत्पद्यते, अन्यत्र गर्भजपर्याप्तसङ्ख्येयवर्षायुष्केषूत्पद्यते, पश्चाच्च नरके उत्पद्यते नोत्पद्यते चापि ॥१६९॥

अथ कालान्तरमाह—

अणंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नियं ।
विजढंमि सए काए, नेरइयाणं तु अंतरं ॥१७०॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या–नारकाणां तु **स्वे काये त्यक्ते** सति **उत्कृष्टं** कालस्यान्तरम**नन्तकालं** भवति, **जघन्यं** चान्तर्मुहूर्तम् ॥१७०॥

एएसिं वण्णओ चेव, गंधओ रसफासओ ।
संठाणादेसओ वा वि, विहाणाइं सहस्ससो ॥१७१॥

व्याख्या–एतेषां नारकाणां **वर्णतश्चैव गन्धतो रसत स्पर्शतः संस्थानादेशत-श्चापि सहस्त्रशो भेदाः** सन्ति ॥१७१॥

अथ पञ्चेन्द्रियतिरश्चां भेदनाह–

पंचिंदिया तिरिक्खा य, दुविहा ते वियाहिया ।
समुच्छिमा तिरिक्खा य, गब्भवक्कंतिया तहा ॥१७२॥

व्याख्या–**पञ्चेन्द्रियास्तिर्यञ्चश्च द्विविधा व्याख्याताः, सम्मूर्च्छिमास्तिर्यञ्चश्च** ये मनःपर्याप्त्यभावात् सदा सम्मूर्च्छिता एव तिष्ठन्ति, **गर्भव्युत्क्रान्तिकास्तथा** ॥१७२॥

दुविहा ते भवे तिविहा, जलयरा थलयरा तहा ।
खहयरा य बोधव्वा, तेसिं भेए सुणेह मे ॥१७३॥

व्याख्या–ते द्विविधा अपि तिर्यञ्चस्त्रिविधा **भवेयुः, यथा जलचराः स्थलचरा-स्तथा खचरा बोधव्याः, तेषां भेदान् 'मे'** कथयत **शृणुत** ! ॥१७३॥

मच्छा य कच्छभा यावि, गाहा य मगरा तहा ।
सिसुमारा य बोधव्वा, पंचहा जलयराहिया ॥१७४॥

व्याख्या–**मत्स्याश्च कच्छपाः, ग्राहास्तन्तुकजीवाः, मकरास्तथा सिसुमाराः,** एवं **पञ्चधा जलचरा आख्याता** बोधव्याः, एषु पञ्चस्वपि बहुभेदानान्तर्भावो ज्ञेयः, यतो **'यावन्तः स्थलचरास्तावन्त एव जलचरा अपि'** इत्युक्तेः ॥१७४॥

लोएगदेसे ते सव्वे, न सव्वत्थ वियाहिया ।
इत्तो कालविभागं तु, तेसिं वुच्छं चउव्विहं ॥१७५॥

व्याख्या–**ते सर्वे** जीवा **लोकैकदेशे** जलाशयेष्वेव सन्ति, **न सर्वत्र व्याख्याताः, इतोऽनन्तरं तेषां चतुर्विधं कालविभागं वक्ष्ये** ॥१७५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

संतइं पप्प णाइया, अपज्जवसिया वि य ।
ठिइं पडुच्च साइया, सपज्जवसिया वि य ॥१७६॥

व्याख्या—ते जलचराः सन्ततिं प्राप्यानादयोऽपर्यवसिताश्च, स्थितिं च प्रतीत्य सादयः सपर्यवसिताश्च सन्ति ॥१७६॥

इक्का य पुव्वकोडी, उक्कोसेणं वियाहिया ।
आउठिइ जलयराणं, अंतोमुहुत्तं जहन्निया ॥१७७॥

व्याख्या—जलचराणामायुःस्थितिरुत्कृष्टा एका पूर्वकोटी व्याख्याता, जघन्या चान्तर्मुहूर्तम् ॥१७७॥

पुव्वकोडीपुहत्तं तु, उक्कोसेणं वियाहिया ।
कायठिइ जलयराणं, अंतोमुहुत्तं जहन्निया ॥१७८॥

व्याख्या—जलचराणां कायस्थितिरुत्कृष्टा पूर्वकोटिपृथक्त्वं व्याख्याता, जघन्या चान्तर्मुहूर्त्तं । द्वाभ्यामारभ्य नवाङ्कं यावत् पृथक्त्वसङ्ज्ञा सिद्धान्तोक्ता ज्ञेया ॥१७८॥

अणंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नयं ।
विजढम्मि सए काए, जलयराणं तु अंतरं ॥१७९॥

व्याख्या—जलचराणां स्वकीये काये त्यक्ते सति उत्कृष्टमन्तरमनन्तकालं, जघन्यं चान्तर्मुहूर्तम् ॥१७९॥

एएसिं वण्णओ चेव, गंधओ रसफासओ ।
संठाणादेसओ यावि, विहाणाइं सहस्ससो ॥१८०॥

व्याख्या—एतेषां जलचराणां वर्णतो गन्धतो रसतः स्पर्शतः संस्थानादेशतश्चापि सहस्रशो भेदा भवन्ति ॥१८०॥

स्थलचरानाह—

चउप्पया य परिसप्पा, दुविहा थलयरा भवे ।
चउप्पया चउव्विहा उ, तं मे कित्तयओ सुण ॥१८१॥

व्याख्या—स्थलचरा द्विविधा भवेयुः, चतुःपदाश्च परिसर्पाः, तत्र चतुष्पदाश्चतुर्विधाः, तान् 'मे' कथयतः शृणुत ! ॥१८१॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एगखुरा दुखुराओ, गंडीपयसणप्पया ।
हयमाइ गोणमाइ, गयमाइ सीहमाइणो ॥१८२॥

व्याख्या—एकखुराः, एकोऽवयवः खुरो येषां ते **एकखुरा** हयाद्याः, एवं **द्विखुरा** गवाद्याः, गण्डी पद्मकर्णिका तद्वद्वृत्ततया पदा येषां ते **गण्डीपदा** गजाद्याः, **सनखपदाः** सिंहाद्याश्च ॥१८२॥

परिसर्पानाह—

भुओरगपरिसप्पा, परिसप्पा दुविहाहिया ।
गोहाई अहिमाईया, इक्किक्काणेगहा भवे ॥१८३॥

व्याख्या—**परिसर्पा** जीवा **द्विविधाः, भुजपरिसर्पा उरःपरिसर्पाश्च**, तत्र **गोधादयो** भुजपरिसर्पाः, **अह्यादयश्चोरःपरिसर्पाः**, एते **चैकेऽपि अनेकधा भवेयुः** ॥१८३॥

क्षेत्रविभागमाह—

लोएगदेसे ते सव्वे, न सव्वत्थ वियाहिया ।
इत्तो कालविभागं तु, तेसिं वुच्छं चउव्विहं ॥१८४॥

व्याख्या—**ते सर्वे** स्थलचरा **लोकैकदेशे, न च सर्वत्र व्याख्याताः, इतोऽनन्तरं** तेषां **चतुर्विधं कालविभागं वक्ष्ये** ॥१८४॥

संतइं पप्प णाइया, अपज्जवसिया वि य ।
ठिइं पडुच्च साइया, सपज्जवसिया वि य ॥१८५॥

व्याख्या—**सन्ततिं प्राप्य** तेऽनादयोऽपर्यवसिताश्च, **स्थितिं च प्रतीत्य सादयः सपर्यवसिताश्च** सन्ति ॥१८५॥

पलिओवमाइं तिन्नि उ, उक्कोसेण वियाहिया ।
आउठिई थलयराणं, अंतोमुहुत्तं जहन्निया ॥१८६॥

व्याख्या—**स्थलचराणामायुःस्थितिरुत्कृष्टा त्रीणि पल्योपमानि व्याख्याता, जघन्यिका चान्तर्मुहूर्त्तम्** ॥१८६॥

पलिओवमाइं तिन्नि उ, उक्कोसेणं तु साहिया ।
पुव्वकोडीपुहुत्तेणं, अंतोमुहुत्तं जहन्निया ॥१८७॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—स्थलचराणां स्वकीये काये एव समुत्पद्यमानानां **त्रीणि पल्योपमानि पूर्वकोटिपृथक्त्वेन साधिकानि उत्कृष्टा** कायस्थितिर्व्याख्याता, **जघन्यिका चान्तर्मुहूर्त्त**मुक्ता। यतो हि त्रिपल्योपमायुषः स्थलचराः पूर्वकोट्यायुषां सप्ताष्टभवग्रहणानि कुर्वन्ति, पञ्चेन्द्रियनरतिरश्चामधिकनिरन्तरभवस्याऽसम्भवोऽस्ति ॥१८७॥

कायठिइ थलयराणं, अंतरं तेसिमं भवे ।
अणंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नियं ।
विजढम्मि सए काए, थलयराणं तु अंतरं ॥१८८॥
एएसिं वण्णओ चेव, गंधओ रसफासओ ॥
संठाणभेयओ यावि, विहाणाइं सहस्ससो ॥१८९॥

व्याख्या—स्थलचराणां स्वकीये काये त्यक्ते सति यदि ते वनस्पत्यादिषूत्पद्य पुनः स्थलचरेष्वायान्ति **तदोत्कृष्टमनन्तकालस्यान्तरं भवति, जघन्यतश्चान्तर्मुहूर्त्त**कालस्यान्तरं भवति, **एतेषां वर्णगन्धरसस्पर्शसंस्थानभेदतश्चापि सहस्त्रशो भेदाः** सन्ति ॥१८९॥

अथ खेचरानाह—

चम्मे उ लोमपक्खी य, तइया समुग्गपक्खीया ।
वियपक्खी य बोद्धव्वा, पक्खिणो य चउव्विहा ॥१९०॥

व्याख्या—पक्षिणश्चतुर्धाः, चर्मपक्षिणः, **रोमपक्षिणः, समुद्गपक्षिणः, विततपक्षिणश्च**। तत्र चर्मपक्षिणश्चर्मचटकाद्याः, चर्मरूपा एव हि तेषां पक्षाः, रोमप्रधानाः पक्षास्तद्वन्तो रोमपक्षिणो हंसाद्याः, समुद्गपक्षिणः समुद्गकाकारपक्षवन्तस्ते च मानुषोत्तराद्बहिर्द्वीपवर्त्तिनः, **विततपक्षिणो** ये सर्वदा विस्तरिताभ्यामेव पक्षाभ्यामासते ॥१९०॥

लोएगदेसे ते सव्वे, न सव्वत्थ वियाहिया ।
इत्तो कालविभागं तु, तेसिं वुच्छं चउव्विहं ॥१९१॥

व्याख्या—**ते सर्वे** खचरा **लोकैकदेशे**, तिर्यग्लोके सन्ति, न च **सर्वत्र व्याख्याताः, इतो**ऽनन्तरं **तेषां चतुर्विधं कालविभागं वक्ष्ये** ॥१९१॥

संतइं पप्प णाइया, अपज्जवसिया वि य ।
ठिइं पडुच्च साइया, सपज्जवसिया वि य ॥१९२॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—सन्ततिं प्राप्य तेऽनादयोऽपर्यवसिताश्च सन्ति, स्थितिं प्रतीत्य च सादयः सपर्यवसिताश्च ॥१९२॥

पलिओवमस्स भागो, असंखिज्जइमो भवे ।
आउठिई खहयराणं, अंतोमुहुत्तं जहन्निया ॥१९३॥

व्याख्या—खचराणामायुःस्थिति पल्योपमस्याऽसङ्ख्येयतमो भागो भवति, जघन्यिका चायुःस्थितिरन्तर्मुहूर्त्तं भवति ॥१९३॥

असंखभावो पलियस्स, उक्कोसेण उ साहिया ।
पुव्वकोडीपुहुत्तेणं, अंतोमुहुत्तं जहन्निया ॥१९४॥
कायठिइ खहयराणं, अंतरं तेसिमं भवे ।
अणंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नयं ॥१९५॥

व्याख्या—खचराणां कायस्थितिरुत्कृष्टा पल्योपमस्याऽसङ्ख्येयतमो भागः पूर्वकोटिपृथक्त्वेन साधिकश्च भवति, जघन्यिका चान्तर्मुहूर्त्तं भवति । तेषां कालान्तरं चोत्कृष्टमनन्तकालं यावद्भवति, जघनन्यतश्चान्तर्मुहूर्त्तं भवति ॥१९४॥१९५॥

एएसिं वन्नओ चेव गंधओ रसफासओ ।
संठाणादेसओ यावि, विहाणाइं सहस्ससो ॥१९६॥

व्याख्या—एतेषां खचराणां वर्णतो गन्धतो रसतः स्पर्शतः संस्थानादेशतश्चापि सहस्त्रशो भेदा भवन्ति ॥१९६॥

मनुजानाह—

मणुया दुविहभेया उ, तं मे कित्तओ सुण ।
संमुच्छिमा य मणुया, गब्भवक्कंतिया तहा ॥१९७॥

व्याख्या—मनुजा द्विविधभेदाः सन्ति, तान् कीर्त्तयतो 'मे' शृणुत ! सम्मूर्च्छिमा मनुष्यास्तथा गर्भव्युत्क्रान्तिकाश्च ॥१९७॥

गब्भवक्कंतिया जे उ, तिविहा ते वियाहिया ।
अकम्मकम्मभूमा य, अंतरद्दीवगा तहा ॥१९८॥

व्याख्या—ये तु गर्भव्युत्क्रान्तिकास्ते मनुष्यास्त्रिविधा व्याख्याताः, अकर्मभूमाः कृष्यादिकर्मरहितभूमौ भवाः, कर्मभूमास्तथाविधकर्मयुतभूमौ भवाः, तथान्तरम्बिधमध्यं, तत्र द्वीपा अन्तरद्वीपास्तेषु जाता अन्तरद्वीपजाश्च ॥१९८॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तीसइ पनरसविहा, अट्ठवीसइविहा तहा ।
संखा उ कमसो तेसिं, इइ एसा वियाहिया ॥१९९॥

व्याख्या—तत्राऽकर्मभूमयस्त्रिंशद्विधाः, कर्मभूमयश्च **पञ्चदशविधाः**, अन्तरद्वीपाश्चाष्टाविंशतिविधाः, **इति** तेषां क्रमेणैषा सङ्ख्या **व्याख्याता** । विस्तरस्तु **नवतत्त्व**-**विवरणतो** ज्ञेयः ॥१९९॥

संमुच्छिमाण एसेव, भेओ होइ आहिओ ।
लोगस्सेगदेसंमि, ते सव्वे वियाहिया ॥२००॥

व्याख्या—**सम्मूर्च्छिमानां** हि **एष एव भेदः**, यत्कर्मभूम्यादिगर्भजानामेव वान्तश्लेष्मादौ ते स्युः, **ते** चाङ्गुलाऽसङ्ख्येयभागमात्रावगाहनाः **सर्वेऽपि लोकैकदेशे व्याख्याताः** ॥२००॥

संतइं पप्पणाइया, अपज्जवसिया वि य ।
ठिइं पडुच्च साइया, सपज्जवसिया वि य ॥२०१॥

व्याख्या—**सन्ततिं प्राप्य** ते सम्मूर्च्छिमा गर्भजाश्च मनुष्या **अनादयोऽपर्यवसिताश्च** सन्ति **स्थितिं प्रतीत्य** च **सादयः सपर्यवसिताश्च** सन्ति ॥२०१॥

पलिओवमाइं तिन्नि उ, उक्कोसेण वियाहिया ।
आउठिई मणुआणं, अंतोमुहुत्तं जहन्निया ॥२०२॥

व्याख्या—गर्भजानां **मनुजानां त्रीणि पल्योपमान्युत्कृष्टाऽायुःस्थितिः, जघन्या चान्तर्मुहूर्त्तं** व्याख्याता ॥२०२॥

पलिओवमाइं तिन्नि उ, उक्कोसेण वियाहिया ।
पुव्वकोडिपुहुत्तेणं, अंतोमुहुत्तं जहन्निया ॥२०३॥

कायठिइ मणुआणं, अंतरं तेसिमं भवे ।
अणंतकालमुक्कोसं, अंतोमुहुत्तं जहन्नियं ॥२०४॥

व्याख्या—मनुजानां गर्भजानां **त्रीणि पल्योपमानि पूर्वकोटिपृथक्त्वेन साधिकानि उत्कृष्टा** कायस्थितिर्व्याख्याता, **जघन्यिका चान्तर्मुहूर्त्तं** यावद् व्याख्याता, **तेषां** कालस्य **चान्तरमुत्कृष्टमनन्तकालं, जघन्यं चान्तर्मुहूर्त्तं** ज्ञेयम् ॥२०३॥२०४॥

एएसिं वण्णओ चेव गंधओ रसफासओ ।
संठाणादेसओ यावि, विहाणाइं सहस्ससो ॥२०५॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याख्या—एतेषां वर्णतो गन्धतो रसतः स्पर्शतः संस्थानादेशतश्चापि सहस्त्रशो **भेदा** भवन्ति ॥२०५॥

अथ देवानाह—

देवा चउव्विहा वुत्ता तं मे कित्तयओ सुण ।
भोमिज्ज वाणमंतर, जोइस वेमाणिया तहा ॥२०६॥

व्याख्या—देवाश्चतुर्विधा उक्ताः, **तान् कीर्त्तयतो 'मे' शृणुत ! भौमेयकाः, व्यन्तराः, ज्योतिष्कास्तथा वैमानिकाः**, भूमौ भवा भौमेयका भवनसानिनो देवाः, रत्न-प्रभापृथ्व्या अशीतिसहस्रोत्तरयोजनलक्षपिण्डाया उपर्येकं योजनसहस्रमवगाह्य, अधश्चैकं योजनसहस्रं मुक्त्वा मध्येऽष्टसप्ततिउत्तरायोजनलक्षे भवनवासिनां चमरेन्द्रादिदेवानां भवनानि सन्ति १ 'वाणमंतर'त्ति आर्षत्वाद्विविधान्यन्तराणि निवासस्थानानि गिरिकन्दरविवरादीनि येषां ते व्यन्तराः २ ज्योतयन्तीति ज्योतींषि विमानानि, तन्निवासिनो देवा ज्योतिष्काः ३ विशेषण मानयन्त्युपभुज्जन्ति सुकृतिनो यानीति विमानानि, तेषु भवा वैमानिकाः ॥२०६॥

तदुत्तरभेदानाह—

दसहा भवणवासी उ, अट्ठहा वणचारिणो ।
पंचविहा जोइसिया, दुविहा वेमाणिया तहा ॥२०७॥

